# न्यायकन्दली- कुसुमोद्गमटीका- पर्यालोचनम्

दर्शननिष्णात (Master of Philosophy) उपाधिहेतुप्रस्तुतलघुशोधप्रबन्धः


शोधनिर्देशिका

प्रो० शशिप्रभाकुमार

शशिप्रभा कुमार
18/7/14

Dr. Shashiprabha Kumar
Professor
Special Centre for Sanskrit Studies
Jawaharlal Nehru University
New Delhi - 110067

शोधार्थिनी

निर्मला देवी

Nirmala

विशिष्टसंस्कृताध्ययनकेन्द्र,

जवाहरलाल नेहरू विश्वविद्यालय,

नई दिल्ली – 110067


भारत - 2014

विशिष्टसंस्कृताध्ययनकेन्द्र,
जवाहरलाल नेहरू विश्वविद्यालय,
नई दिल्ली – 110067

SPECIAL CENTRE FOR SANSKRIT STUDIES
JAWAHARLAL NEHRU UNIVERSITY
NEW DELHI – 110067

July 18th, 2014

# DECLARATION

I declare that the dissertation entitled "न्यायकन्दली-कुसुमोद्गमटीका-पर्यालोचनम्" submitted by me for the award of degree of **Master of Philosophy** is an original research work and has not been previously submitted for any other degree or diploma in any other institution/University.

Nirml

**NIRMLA DEVI**

विशिष्टसंस्कृताध्ययनकेन्द्र,
जवाहरलाल नेहरू विश्वविद्यालय,
नई दिल्ली - 110067

SPECIAL CENTRE FOR SANSKRIT STUDIES
JAWAHARLAL NEHRU UNIVERSITY
NEW DELHI – 110067

July 18th, 2014

## CERTIFICATE

The dissertation entitled "न्यायकन्दली-कुसुमोद्गमटीका-पर्यालोचनम्" submitted by **Nirmla Devi** to **Special Centre for Sanskrit Studies, Jawaharlal Nehru University, New Delhi – 110067** for the award of degree of **Master of Philosophy** is an original research work and has not been submitted so far, in part or full, for any other degree or diploma in any University. This may be placed before the examiners for evaluation.

Kumar 18/7/14

**Prof. C. Upendra Rao**
**(Chairperson)**

Chairperson
Special Centre for Sanskrit Studies
Jawaharlal Nehru University
New Delhi - 110067

**Prof. Shashiprabha Kumar**
**(Supervisor)**

Dr. Shashiprabha Kumar
Professor
Special Centre for Sanskrit Studies
Jawaharlal Nehru University
New Delhi - 110067

# समर्पणम्

ॐकार इति सर्वम्

येन प्रवर्तितमिदं जगच्चक्रं तस्मै

सच्चिदानन्दस्वरूपात्मानं प्रणमामि

## मातृपितृभ्यां समर्पये

# प्राक्कथनम्-

सर्वप्रथमं तु शोधकार्यस्य निर्विघ्नसमापत्यर्थं ॐकाराय, सच्चिदानन्दस्वरूपाय, जगत्कारणाय, विश्वाधिष्ठात्रे परमात्मने नमनं क्रियते, येन सकलमपि जगत् प्राचाल्यमानं प्रकाशमानं च वर्तते।

प्रस्तुतशोधकार्यस्य सफलपरिणत्यर्थे मातृतुल्यायाः स्वशोधनिर्देशिकायाः प्रो.शशिप्रभाकुमार - महोदयायाः कृते कोटिशः हार्दं कार्तज्ञ्यं ज्ञापयामि, यासां कुशलनिर्देशनेन, सम्यक्परिष्कारेण, नितराम् उत्साहवर्धनेन, स्नेहेन, प्रेरणया, तर्कशैल्यां सत्यपरामर्शेन च शोधकार्यमिदं सम्पन्नं कर्तुं योग्याभवम्। तर्कसंग्रह-कुसुमोद्गम-टीकाप्रभृतीनां ग्रन्थानाम् अध्यापनस्य तर्कसमन्वितशैल्याः कारणात् भारतीयदर्शनस्य पारिभाषिकशब्दावलीज्ञानं तथा च मौलिकचिन्तनं प्रति बुद्धिविकासः समारब्धः। एतासां निर्देशने लघुशोधकार्यकरणं मत्कृते सौभाग्यं गौरवास्पदं च वर्तते। एतासां दीर्घायुः, सर्वदा आरोग्यं च स्यादित्यहं परमात्मनः प्रार्थये कामये च। प्रस्तुतशोधार्थे न्यायकन्दल्याः टीकानां परिचयः शोधनिर्देशिकया एव कारितः।

केन्द्रस्थगुरुजनानां प्रो. चौडूरि-उपेन्द्ररावमहोदयानाम्, प्रो. संतोषकुमारशुक्लमहोदयानाम्, प्रो. रामनाथ-झा महोदयानाम्, डॉ. हरिराममिश्रमहोदयानाम्, डॉ. रजनीशकुमारमहोदयानाम्, प्रो.गिरीशनाथ-झामहो - दयानां तथा च प्रो. सुधीरकुमारमहोदयानां च कृते अपि बहुशः धन्यवादान् ज्ञापयामि, येषां स्वस्वशास्त्र-सम्बद्धाध्यापनेन स्नेहेन आशीर्वादेन च भारतीयदर्शन-साहित्य-व्याकरण-भाषाविज्ञान-उपनिषत्प्रभृतीनाम् आधुनिकदृष्ट्या यथासामर्थ्यं ज्ञानकरणेन तार्किकपद्धत्याः विकासः तथा च शोधसम्बन्धिनिप्रवृत्तिः संजाता।

जवाहरलालनेहरूविश्वविद्यालयस्य छात्राणामपि सहयोगः साहचर्यं चाहं लब्धवती, तासामपि धन्यवाद - करणं कर्त्तव्यं खलु मदीयम्। विशेषतः तु अहं सुमनस्य आभार्यस्मि, या टंकणकार्ये बहुसाहाय्यमाचरितवती। एतां विना मम कार्यमवरुद्धं स्यादिति मन्ये। अन्यदपि कक्षा-सतीर्थ्येषु विशेषतः रंजनलता, वंदना, राजकिशोरप्रभृतीनां तथा च अन्येषाम् अन्यासां समेषां धन्यवादान् ज्ञापयामि, ये प्रत्यक्षपरोक्षरूपेण शोधकार्ये साहाय्यं विहितवन्तः। वरिष्ठेषु देवेन्द्रमहोदयस्यापि बहु कार्तज्ञ्यं ज्ञापयामि, यतो हि शोधकार्यसम्बद्धनिर्देशने एते सर्वदा एव साहाय्यं विहितवन्तः।

अन्येऽपि जे.एन.यू.परिसरीयाः तदितराः वा परमस्नेहिबन्धुजनाः सावित्री-कुसुम-संगीता-सुनीता- अनिता-सोनू-सोनम-निर्मला-सत्यदेवमहोदयश्चैतेषां धन्यवादकरणं कथं विस्मर्तुं शक्यते, ये प्रत्येकस्मिन् कार्ये साहाय्यं उत्साहवर्धनं मानसिकसम्बलनं च प्रदत्तवन्तः।

कस्मिन्नपि कार्ये स्वाधार: पृष्ठभूमि: च न विस्मर्तुं शक्यते । अत: सर्वप्रथमं मातृपितृभ्यां चरणयो: प्रणमामि । अनयो: स्नेहेन आशीर्वादेन अध्ययनसम्बद्धप्रेरणया च कार्येऽस्मिन् साफल्यं लब्धम्। एतदनन्तरं अग्रजाया: अनुबालाया:, कनिष्ठाया: सिलोचनाया: तथा च कनिष्ठस्य रविन्द्रस्य कृते भूरिशो धन्यवादो वितनोमि, ये अध्ययने सर्वदा प्रेरका:, उत्साहप्रदायका:, स्नेहासक्त्या मानसिकसम्बलनप्रदाने सर्वदा उत्सुका: विद्यन्ते।

शास्त्र्यां ये पाठितवन्त: तथा च अध्ययने प्रेरणादायका: गुरव: प्राचार्य-द्रोणप्रसाद-कोईरालामहोदयानाम्, श्री.दिनेशमहोदयानाम्, श्री मेघनादमहोयानां चैतेषां समेषां कृते प्रणामाञ्जलि: बहुशो धन्यवाद: ज्ञाप्यते ।

केन्द्रे वर्तमानानां प्रशासनिकाधिकारिणां वीरेन्द्रसिंहमहोदय:, मनीषमहोदय:, शबनममहोदया, मन्जु-महोदयाप्रभृतीनां समेषां कर्मचारिणां प्रशासनिककार्यसंपादने सहयोगार्थे धन्यवादं करोमि।

जवाहरलालनेहरूविश्वविद्यालयस्य, विशिष्टसंस्कृताध्ययकेन्द्रस्य, लालबहादुरशास्त्री-राष्ट्रिय-संस्कृत-विद्यापीठस्य, राष्ट्रियसंस्कृतसंस्थानस्य, दिल्लीविश्वविद्यालयस्य, महर्षिदयानन्दविश्वविद्यालयस्य च पुस्तकालयकर्मचारिणां कृतेऽपि हार्दं धन्यवादं ज्ञापयामि, ये शोधसामग्रया: संकलने: बहुसाहाय्यमाचरितवन्त: । अन्येषामपि ये प्रत्यक्षपरोक्षरूपेण साहाय्यमाचरितवन्त: तेषामपि बहुश: कार्तज्ञ्यं ज्ञाप्यते ।

# किञ्चित् प्रास्ताविकम्-

'दृश्यतेऽनेनेति दर्शनम्','दर्शनात् दर्शनम्' इति व्युत्पत्तिद्वयं दर्शनशब्दस्य प्राप्यते। आस्तिकनास्तिक - दर्शननाम्ना प्रचलितदर्शनेषु न्यायवैशेषिकयो: स्थानमन्यतमं 'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्' इति उक्त्या प्रमुखतया अङ्गीक्रियते । 'वैशेषिकसूत्रस्य कणादप्रणीतत्वात् 'तस्येदम्' इति सूत्रेण अण् प्रत्यये सति काणादमिति शब्द: निष्पन्न: । औलूक्यम्, काणादम्, वैशेषिकं च एतस्यैव अपराभिधानानि । विशेषपदार्थस्य स्वीकृतिकारणादस्य नामधेयं वैशेषिकमिति विद्वद्भिरङ्गीक्रियते; तद्यथा उक्तम्-'विशेषाय स्वाश्रयस्येतरेभ्यो व्यवच्छेदाय प्रभवति इति वैशेषिक:'। वैशेषिकसूत्रस्योपरि उपलब्धेषु भाष्येषु चतुर्थशताब्दस्य प्रशस्तपादभाष्यस्य मुख्यत्वं सुसम्बद्धत्वं च इति विद्वद्भिरुररीकृत:। प्रशस्तपादभाष्यस्योपरि उपलब्धासु टीकासु प्रमुखतया व्योमवती, किरणावली, न्यायकन्दली, न्यायलीलावती च विद्यन्ते । एतासु शोधविषयदृष्ट्या न्यायकन्दली एव अभीष्टा वर्तते। न्यायकन्दल्या: प्रकाशिता: तिस्र: टीका: - पञ्जिका, टिप्पणम्, कुसुमोद्गम: तथा च उल्लिखितटीकासु न्यायकन्दलीरहस्यम्, न्यायकन्दलीप्रकाशश्च अन्यत्टीकाद्वयमपि प्राप्यते । **एतासु शोधकार्यदृष्टया शिडिलवोम्मिदेवकृता कुसुमोद्गमटीका अभिप्रेता वर्तते। इयं टीका पाण्डुलिपे: संपादनमात्रमेव । अस्या: टीकाया उपरि अनुवादादिकमपि न प्राप्यते । विदुषां दृष्टौ अद्यावधि: अपरिचितेयं टीका । एतस्माद् कारणादपि विषयोऽयं गृहीत: । अन्यच्च पाण्डुलिपे: उपरि कार्यकरणस्यापि रुचिरासीत् ।**

अस्या: टीकाया: संपादनं एस.जे जेटलीमहोदयस्य शिष्य: वसन्तपारीखेण कृतं यतो हि जेटलीमहोदयस्य अकालमेव देहावसानं जातम् । पाटनभण्डारस्थाया: अस्या: टीकाया: परिचय: जेटलीमहोदयस्य कृते यू.पी.शाहमहोदयेन कारित:। कुसुमोद्गमकारस्य रचयितु: जन्मादिकसम्बन्धिनि कापि चर्चा ग्रन्थे न प्राप्यते। ग्रन्थे विद्यमानश्लोकानामाधारेण ज्ञायते यत् अयं रविवंशीय पर्वतसुजातारितुंगोलयो: पुत्रो दाक्षिणात्य: शस्त्रशास्त्रपारङ्गतो ब्रह्मभूपतिश्चासीत् । टीकेयं शिडिलवोम्मिदेवेन इन्दीवरस्य संप्रीतये रचिता इति ग्रन्थे स्वयंमेव सूचयति। कुसुमोद्गमटीका समग्रेषु पदार्थेषु, द्रव्येषु, गुणेषु बुद्धिपर्यन्ता वोम्मिदेवेन व्याख्याता । पदकृत्यशैल्यां रचितेयं टीका कुत्रचिद् अस्पष्टापि वर्तते । अस्या: भाषा सरला, समस्ता, सारगर्भिता च वर्तते । कुत्रचिद् विस्तार:, कुत्रचिद् सारमात्रमेव प्रस्तूयते । बहुश: अत्र कंदल्येवनुस्रियते। विषयाणां स्पष्टीकरणम् 'अयमत्राभिसन्धि:', 'अयमभिप्राय:','इति भाव:','इति भावार्थ:', 'इत्यर्थ:' प्रभृतिभि: शब्दै: क्रियते।

प्रस्तुतेऽस्मिन् शोधे कुसुमोद्गमस्य न्यायकंदल्या आधारेण पर्यालोचनं करिष्यते । यथावश्यकं प्रशस्तपादभाष्यस्य लक्षणादिकमपि नियोजयिष्यन्ते । प्रस्तुतेऽस्मिन् शोधे प्रथमाध्याये वैशेषिकदर्शनस्य परिचय:, परम्परा च वर्णिता वर्तते। द्वितीयाध्याये प्रशस्तपादभाष्यसम्बद्धपरिचय:, तस्य टीकोपटीकाश्च संस्करणानि तथा च तृतीयाध्याये न्यायकन्दल्या: संस्करणानि टीकोपटीकाश्च चर्चिता विद्यन्ते । कुसुमोद्गमटीकाया: न्यायकन्दल्या सह कुसुमोद्गमस्य विवरणं चतुर्थाध्याये तथा च पञ्चमाध्याये कुसुमोद्गमस्य समीक्षा कृता विद्यते । प्रस्तुतशोधेऽस्मिन् विवेचनात्मक-विश्लेषणात्मक-तुलनात्मक-समीक्षात्मक-प्रभृति विधीनां प्रयोगो विहित: । आवश्यकतानुसारं व्याख्यानात्मकप्रविधिरपि प्रयुज्यते।

# संकेताक्षर-सूची

- वै.सू. - वैशेषिकसूत्रम्
- न्या.सू. - न्यायसूत्रम्
- प्र.पा.भा. - प्रशस्तपादभाष्यम्
- न्या.कं - न्यायकन्दली
- टी.न्या.कं - टीकात्रयोपेता न्यायकन्दली
- वै.द.ए.अ. - वैशेषिक दर्शन एक अध्ययन

# विषयानुक्रमणिका


प्राक्कथनम् १-२

किञ्चित् प्रास्ताविकम् ३

संकेताक्षर-सूची ४

विषयानुक्रमणिका ५-८

१. प्रथमोऽध्याय:- वैशेषिकदर्शनपरम्परा

१. वैशेषिकदर्शनपरिचय: १-२

१.१ वैशेषिकसूत्राणाम् उपलब्धा: प्रकाशिता: टीकोपटीकाश्च २-३

१.२ वैशेषिकसूत्राणाम् अनुपलब्धा: सन्दिग्धा: टीकोपटीकाश्च ३-४

१.३ वैशेषिकसूत्राणां सप्तदश-टीकानां विवरणम् ४-७

१.४ आधुनिककाले वर्तमाना: वैशेषिकसूत्रस्य टीका: ७-८

१.५ वैशेषिकसूत्राणामुपरि हिन्दी-व्याख्या: ८-९

२.द्वितीयोऽध्याय:- प्रशस्तपादभाष्यस्य टीका: न्यायकन्दली च

२.१ प्रशस्तपादभाष्यम् १०-११

२.२ प्रशस्तपादभाष्यस्य संस्करणानि ११-१२

२.३ प्रशस्तपादभाष्यस्य टीकोपटीकाश्च १२-२७

२.५ प्रशस्तपादभाष्यस्य टीकानां संस्करणानि १२-२७

**३.तृतीयोऽध्याय:- न्यायकन्दल्या: टीका:**

३.१ न्यायकन्दल्या: टीका: २८

३.२ न्यायकन्दली-टिप्पणम् २८-३०

३.३ न्यायकन्दली-पञ्जिका ३०-३२

३.४ पञ्जिकाया: संस्करणम् ३२

३.५ न्यायकन्दली-प्रकाश: ३२

३.६ न्यायकन्दली-सार: ३२

३.७ न्यायकन्दली-कुसुमोद्गम: ३२-३४

**४. चतुर्थोऽध्याय:- *'कुसुमोद्गम'* टीका-विवरणम्**

४.१ मङ्गलाचरणप्रकरणम् ३५-३९

४.२ पदार्थोद्देशप्रकरणम् ३९-४४

४.३ पदार्थानां साधर्म्य-वैधर्म्यम् ४५-४७

४.४ द्रव्याणां साधर्म्य-वैधर्म्यम् ४७-५५

४.५ द्रव्यप्रकरणम् ५६-८६

(पृथिवी,जलम्,तेजस्,वायु:,सृष्टिप्रक्रिया,आकाश:,काल:,दिक्,आत्मन्,मनस्)

४.६ गुणप्रकरणम् ८६-११३

(रूपम्,रसः,गन्धः,स्पर्शः,संख्या,परिमाणम्,पृथक्त्वम्,संयोगः.विभागः,परत्वापरत्व,बुद्धिः)

४.६.० प्रत्यक्षप्रमाणम् ११३-११८

४.६.१ अनुमानप्रमाणम् ११८-१३२

४.६.२ स्मृतिः १३२

४.६.३ आर्षप्रत्यक्षः,सिद्धदर्शनम् १३२-१३३

४.७ कर्मपदार्थनिरूपणम् १३३-१३७

४.८ सामान्यपदार्थनिरूपणम् १३८-१३९

४.९ विशेषपदार्थनिरूपणम् १३९-१४१

५.० समवायपदार्थनिरूपणम् १४२-१४३

५. पञ्चमोऽध्यायः- समीक्षा

५.१ मङ्गलाचरणप्रकरणम् १४४-१४६

५.२ पदार्थोद्देशप्रकरणम् १४७-१४८

५.३ पदार्थानां साधर्म्य-वैधर्म्यम् १४९-१५०

५.४ द्रव्याणां साधर्म्य-वैधर्म्यम् १५९-१५०

५.५ द्रव्यप्रकरणम् १५०-१६८

(पृथिवी,जलम्,तेजस्,वायुः,सृष्टिप्रक्रिया,आकाशः,कालः,दिक्,आत्मन्,मनस्)

५.६ गुणप्रकरणम् १६९-१७९

५.७ बुद्धि प्रकरण(अविद्या) १८०-१८४

(रूपम्,रसः,गन्धः,स्पर्शः,संख्या,परिमाणम्,पृथक्त्वम्,संयोगः.विभागः,परत्वापरत्व,बुद्धिः)

५.७.० प्रत्यक्षप्रमाणम् १८४-१८६

५.७.१ अनुमानप्रमाणम् १८६-१९६

५.७.२ स्मृतिः १९६

५.६.३ आर्षप्रत्यक्षः, सिद्धदर्शनम् १९६-१९७

५.८ कर्मपदार्थनिरूपणम् १९७-१९९

५.८ सामान्यपदार्थनिरूपणम् १९९-२००

५.९ विशेषपदार्थनिरूपणम् २०१

६.० समवायपदार्थनिरूपणम् २०१-२०२

**उपसंहारः** २०३-२१०

**सन्दर्भ-ग्रन्थ-सूची**

# प्रथमोऽध्यायः

## वैशेषिकदर्शनपरम्परा

## वैशेषिकदर्शनस्य परम्परा:-

मनुष्योऽस्ति चिन्तक: सामाजिकश्च। स: समाजे वसन् स्वसुखसौविध्यर्थं सर्वदैव किञ्चिद् विचारयति। विचारशक्ते: कारणाद् एव तस्य स्वस्य दृष्टिकोणं विकसितं भवति। चिन्तनमाध्यमेनैव स: आधुनिकसमये महत्कार्यमपि अल्पसमय एव कर्तुमर्ह:। एषा तु भौतिकजगतो वार्ता परञ्च यदा स: स्वात्मविषये विचारयति तदा कोऽहं ? कुत: समायात:? सृष्टि: कथं संजाता ? इत्यादयो विचारा तं भौतिकताया: प्रत्यङ्गीमुखीकृत्य आध्यात्मिकतां प्रति नयति। जगत्प्रति मानवस्य दृष्टिकोणमेव दर्शनम्। 'दर्शन' शब्दोऽयं दृश् धातो: ल्युट् प्रत्यये सति संभवति। 'दर्शनात् दर्शनम्', 'दृश्यतेऽनेनेति दर्शनम्'। आचार्य-विशेषै: कृता जगद्व्याख्या एव सम्प्रदायरूपे प्रवर्तिता जाता:। दर्शने विविधा विषया विचार्यन्ते यथा- कोऽहं ? ज्ञानं कथं भवति ? का प्रक्रिया ? किं जगत् ? अस्ति किमेतस्य मूले च इत्यादय:। ब्रह्माण्डमूले केचन एकं वेदान्तादय:, केचन द्वे सांख्ययोगश्च केचन बहुनि तत्त्वानि च स्वीकुर्वन्ति यथा न्यायवैशेषिकप्रभृतय:। वेदप्रामाण्यत्वदृशा भारतीयदार्शनिकसम्प्रदाया द्विधा विभज्यन्ते-आस्तिकसंप्रदाय: नास्तिकसम्प्रदायश्च। चार्वाकबौद्धजैना: नास्तिकसम्प्रदायेऽपरे षट् मींमासान्यायवैशेषिकसांख्यप्रभृतयश्च आयान्ति। आस्तिकषड्दर्शनेषु वैशेषिक - दर्शनमपि अन्यतममस्ति। वैशेषिकदर्शनमपि द्विधा विभक्तुं शक्यते प्राच्यं नव्यं च। प्राच्या: षड्-पदार्थान् जगत्व्याख्यायामङ्गीकुर्वन्ति[1]; नव्याश्च सप्तपदार्थान्[2] इति। वैशेषिकदर्शनस्य प्रतिपादको महर्षि-कणादोऽङ्गीक्रियते। अस्य महर्षे: अन्यानि अप्यभिधानानि सन्ति यथा कणाद:, काश्यप:, उलूकश्च[3]। 'कणाद' इति शब्दस्य व्युत्पत्ति: 'कणान् अत्तीति कणाद': तमिति[4]। तत्रैव कन्दलीकार: 'कणाद' इति शब्दं व्युत्पादयन् कथयति - तद्यथा- **"कणादमिति तस्य कापोती वृत्तिमनुतिष्ठतो रथ्यानिपतितांस्तण्डुलकणानादाय प्रत्यहं कृत्ताहारनिमित्तेयं संज्ञा"**[5]। चीनीविदुषाप्रतिपादित-अर्थानुगुणं दिवसेऽयं मुनि ग्रन्थरचनारतो भवति स्म, रात्रौ च जीविकार्जनं करोति स्म। एतस्मादेव कारणाद् अस्य नामधेयमुलूकमित्यासीत्[6]। केचन 'उलूक' इति ऋषे: पुत्रमासीद् कणाद इति कथयन्ति[7]। न्यायलीलावत्या भूमिकायामुलूकरूपे ईश्वर: स्वं विपरिणम्य कणादं ज्ञानं दत्तवान् इति वदन्ति केचन इति तत्र प्रतिपादितम्[8]। दर्शनमिदं विविधनामभिराहूयते यथा-

---

[1] धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्य-वैधर्म्याभ्यां तत्त्वज्ञानान्निश्रेयसम्। *वैशेषिकसूत्रोपस्कार*:,शंकरमिश्र: सं. अनु. दुण्ढिराजशास्त्री,चौखम्बा-प्रकाशनम्,वाराणसी,द्वि.सं.वि.सं.२०५९,पृ.१६

[2] अभावस्तु स्वरूपावानपि पृथक् नोद्दिष्ट: प्रतियोगिनिरूपणाधीनत्वात् न तु तुच्छत्वात्। *किरणावली,* उदयन:,सं.शिवचन्द्रसार्वभौम,द ऐशियाटिकसोसायटी,कलकता,१९८९ .पृ.३८

[3] शास्त्री,दुण्ढिराज,*हिन्दी वैशेषिक दर्शन,प्रशस्तपादभाष्य,*चौखम्बा-संस्कृत-सीरिज,वाराणसी,वि.स.२०५९,पृ.१६

[4] *व्योमवती,* चौखम्बा प्रकाशनम्, पृ.२०

[5] *न्यायकन्दली.प्रशस्तपादभाष्यसहितम्* ,श्रीधर:,हि.व्या.दुर्गाधर झा शर्मा,सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय:, वाराणसी, द्वि,सं.ख्रि.१९९७,पृ.४

[6] H.UI, ed. F.W.Thomas,*The Vaiśika Philosophy according to the Daśapadārthaśāstra,* C.S.S.O.,Varanasi p.3

[7] *वाचस्पत्यम्,* तारानाथ तर्कवाचस्पति:, राष्ट्रिय-संस्कृत-संस्थानम्, दिल्ली,पु.मु.सं.२००२:भाग .३,पृ.१९२७

[8] मुनये कणादाय स्वयमीश्वर:उलूकरूपधारी प्रत्यक्षीभूय...पदार्थषट्कम् उपदिदेश:। *न्यायलीलावती,* सं .राजेन्द्रप्रसाद-शर्मा, राजस्थान-विश्वविद्यालय:, जयपुर,पृ.२, *टीकात्रयोपेता (न्यायकन्दली) पञ्जिका,* राजशेखर:,भूमिका,पृ.२(अत्रोद्धृत:)

औलूक्यम्, वैशेषिकम्, पैलवम्, काश्यपं काणादञ्च। कणादप्रणीतत्वात् अण् प्रत्यये सति काणादमिति निष्पन्नः। अण् प्रत्यये सति औलूक्यम्, ठञ् प्रत्यये सति वैशेषिकमिति शब्दनिष्पत्तिः[9]। विशेष[10]पदार्थस्य स्वीकरणाद् अस्याभिधानं वैशेषिकमिति। अन्यच्च **"शास्त्ररूपार्थे वैशेषिकशब्दव्युत्पत्ति विशेषपदार्थमधिकृत्य कृतो ग्रन्थः"** इति[11]। दशपदार्थशास्त्रे 'वैशेषिक' इति नामधेयं सांख्यदर्शनाद् वैशिष्ट्यप्रदर्शनार्थं कृतमिति एच. ऊई महोदयेनोच्यते यथा- **"Vaiśesika, the name of the sutra, means superior, or excellent, and distinguished(or different). The origion of the name is in the fact that the system is distinguished from,and superior to,the Sāmkhya"**[12] आधारोऽयं नातिसम्यक् कथयितुं शक्यते। सर्वदर्शनसंग्रहे उच्यते यत्-**"यस्य न स्खलिता बुद्धिः तं वै वैशेषिकं विदुः"**[13]। अन्यच्च- **"विशेषाय स्वाश्रयस्येतरेभ्यो व्यच्छेदाय प्रभवति इति वैशेषिकाः"**[14]। एतेषां प्रमाणानामाधारेण वक्तुं शक्यते यत् 'विशेष'इति पदार्थमधिकृत्यैव एतस्य दर्शनस्य नामधेयं 'वैशेषिकम्' इति सुप्रसिद्धं जातम्। अन्यग्रन्थेषु 'विशेष' इति नाम्नः स्थाने विभागनिर्देशः प्राप्यते यथा-**"इदमेवसामान्योद्दिष्टानां विशेषसंज्ञाभिधानं तत्रान्तरे विभाग इति निर्देश इति च कथ्यते"** [15]। वैशेषिकदर्शनस्यादावावुपलब्धो ग्रन्थो 'वैशेषिकसूत्रं वर्तते। अस्य रचयितापि स्वविषये प्रमाणं न त्यक्तवान् (अवशिष्टवान्)। ग्रन्थोऽयं संक्षिप्तः सूत्ररूपे दशाध्याययुक्तश्च वर्तते। न्यायदर्शनाद् पूर्वंजातं वैशेषिकस्य विकास इति विद्वद्भिः उररीक्रियते। बौद्धाचार्यस्य लेखात् ज्ञायते यत् वैशेषिकस्य संस्थापकः उलूकः आचार्यः, तस्य समयः अष्टशतं वर्षात्पूर्वमासीद् [16]।

वैशेषिकसूत्रस्योपरि बह्व्यः टीकोपटीकाश्च सन्ति। तासु काश्चन उपलब्धाः, काश्चन अनुपलब्धाश्च सन्ति। तासां विवरणमध उल्लिख्यते तद्यथा- वैशेषिकसूत्राणामुपरि उपलब्धाः प्रकाशिताः च टीकाः-

| **टीकाकारस्य नाम** | **टीकायाः नाम** | **प्रकाशनसम्बद्धा-सूचना** |
| --- | --- | --- |
| १.प्रशस्तपादः (चतुर्थशताब्दी[17],फ्राउवाल्नर-४५०-५००)[18] | प्रशस्तपादभाष्यम्(पदार्थधर्मसंग्रह) | १९६६तमे वर्षे काशी-संस्कृतग्रन्थमाला,वाराणसीतः |
| २.अज्ञातः | मिथिलावृत्तिः(१२,व १३तमी). | १९५७ ई.तमे वर्षे मिथिलाविद्यापीठदरभङ्गातः[19] |

9 शा.,ढुण्ढिराज,*हि. वै. द.*,*प्र.पा.भा.*,पृ.९.

10 विशिष्यते सर्वतो व्यच्छिद्यते येन स विशेषः। *तत्रैव*, पृ.११

11 *न्यायकोशः*,भीमाचार्य झलकीकरः,सं वासुदेव शास्त्री अभ्यंकर,चौखम्बा सुरभारती प्रकाशन, वाराणसी, पु.मु.२०११,पृ.८१२

12 H.UI,p.4

13 *सर्वदर्शनसंग्रहः*,माधवाचार्यः,उमाशंकर शर्मा,प्रका.व्या.हि.व्या.,चौखम्भा-विद्याभवनम्,वाराणसी,२०१२,पृ.३६०.

14 *न्या.कं.प्र.पा.भा* .पृ.६४

15 *तत्रैव*. पृ .२१

16 H.UI.pp 1-5

17 *तर्कसंग्रहः,(स्वोपज्ञवृत्तिसहितम्)*, अन्नभट्टः, हि.व्या.दयानन्द भार्गव,मोतीलाल बनारसीदास,दिल्ली.प्र.स. १९७१, पृ.xxv

18 गैरोला,वाचस्पति,*संस्कृत साहित्य का इतिहास*, चौखम्बा विद्याभवन, वाराणसी. पु.मु.२००३, पृ.४८४

३.चन्द्रानन्दः चन्द्रानन्दवृत्तिः जैनमुनिजम्बुविजयेन १९६१ तमे वर्षे गायकवाडतः प्रकाशिता

४.शंकरमिश्रः वैशेषिकसूत्रोपस्कारः १९२३ ई.तमे वर्षे काशी-संस्कृतग्रन्थमाला-वाराणसीतः

५.भट्टवादीन्द्रः वैशेषिकदर्शनवार्त्तिकम्[20] १९८५ तमे वर्षे कामेश्वरसिंहदरभङ्गा- -
(अनन्तलालठाकुरसंपादितं) संस्कृत-विश्वविद्यालयतः प्रकाशितम्

६.गङ्गाधरकविराजः भारद्वाजवृत्तिभाष्यम् १८६९ तमे वर्षे कलकत्तातः प्रकाशितम्[21]

**वैशेषिकसूत्राणाम् अनुपलब्धाः सन्दिग्धाश्च टीकाः-**

| टीकाकारस्य नाम | टीकायाः नाम | प्रकाशनसम्बद्धा सूचना |
|---|---|---|
| ७.वाक्यकारः | वैशेषिकसूत्रवाक्यम् | अज्ञातम् |
| ८.कटन्दीकारः | वैशेषिकसूत्रवाक्यकटन्दी(अष्टमशता.पूर्वम्) | अज्ञाता |

९.चन्द्रमतिः/मतिचन्द्रः दशपदार्थशास्त्रम् १९६२ तमे वर्षे एफ. डबल्यू. थोमस इत्यनेन संपाद्य चौखम्बा, वाराणसीतः प्रकाशिता

| | | |
|---|---|---|
| १०.श्रायस्काचार्यः | श्रायस्ककृतव्याख्या | अज्ञाता |
| ११.रावणः | रावणभाष्यम् | अनुपलब्धम् |
| १२.आत्रेयः | आत्रेयव्याख्या | सन्दिग्धा |
| १३.वृत्तिकारः | वैशेषिकसूत्रवृत्तिः | पाण्डुलिपिरूपेऽस्ति[22] |
| १४.भारद्वाजः | भारद्वाजवृत्तिः | सन्दिग्धा |

१५.पद्मनाभमिश्रः कणादरहस्यम् पाण्डुलिपिरूपेण भण्डारकर-ओरियन्टल-रिसर्च-
इंस्टीट्यूट-मध्ये उपलब्धम्[23]

---

19 *किरणावली,* उदयनः,ओरियन्टल-इंस्टीट्यूट-वडोदरा,१९९१. पृ-ix (भूमिका)

20 वैशेषिकदर्शनवार्त्तिकस्यापरनामधेयं कणादसूत्रनिबन्धोऽप्यस्ति इति पोटरेण उद्धृतम्।

21 सांख्यायुर्वेदयो प्रभावयुक्तं भाष्यम्। Thakur,Anantlal, *origin and development of the nyāya-vaiśeṣika philosophy,* PHISPC,New Delhi, २००३, p.१६२

22 H. Potter, p .१०

१६.रघुदेव: वैशेषिकसूत्र-व्याख्यानम् १६५७ ए. डी.[24](प्राप्त्यनुल्लिखिता)

प्रशस्तपादभाष्यस्य समासां टीकानां संक्षिप्तरूपेण विवरणमध: प्रस्तूयते।

**१.प्रशस्तपादभाष्यम्:-** ग्रन्थोऽयं सूत्रानन्तरं वैशेषिकदर्शनस्य प्रवेशद्वार: कथ्यते[25]। वैशेषिकसूत्रानन्तरं विस्तृतरूपे वैशेषिकसिद्धान्तानाधारीकृत्यैव लिखितोऽयं ग्रन्थ: [26]। अस्य [27]ग्रन्थस्य समयो वात्स्यायनात्पूर्वं चतुर्थी शताब्द्यङ्गीक्रियते।

**२.मिथिलावृत्ति:-**अज्ञातकर्तृका मिथिलाविद्यापीठदरभङ्गात:१९५७ तमे वर्षे प्रकाशिता। अस्या: संपादनम् अनन्तलालदेवशर्मणा विहितम्। संपादकानुसारमस्य कालो द्वादशतमी त्रयोदशतमी वा ईस्वी. उररी - क्रियते[28]। इयं नवमाध्यायस्य प्रथमाह्निकपर्यन्तमुपलभ्यते। ढुण्ढिराजशास्त्रिणा वादीन्द्रस्य वार्त्तिक – लेखनशैल्या: साम्यमनया सह दृष्ट्वा तस्य शिष्यस्य वा रचनास्तीति अङ्गीक्रियते। [29] अस्यां त्रयधिक - त्रयस्त्रिंशतंसूत्राणि सन्ति। वादीवागीश्वर:[30] उदयनाचार्यश्चात्रोल्लिख्यन्ते, अत: निश्चयेनैव इयम् उपस्कारात् पूर्वतनीयास्ति[31]।

**३.चन्द्रानन्दवृत्ति:-**एषा वृत्ति: प्राचीनतमा मन्यते। वृत्ते: संपादकोऽस्या: कालो मिथिलोपस्कारयो: मध्यकालेऽङ्गीकरोति। उद्योतकरात्पूर्वमस्य समय:[32]। सत्यनारायणमिश्रेण ७०० ई. स्वीक्रियते [33]। अयमेव समय: पोटरेणोल्लिख्यते[34]। इयं वृत्ति:१९६१ तमे वर्षे ओरियन्टल-रिसर्च-इंस्टिट्यूट-बडौदात: प्रकाशितास्ति। मिथिलावृत्तित: इयं प्राचीनेति उदयवीरशास्त्रिणा कथ्यते [35]।

---

[23] H. Potter, p.१३९४ (मैन्यू.सं.८६ आफ १८६०-६८.फोलियो.१-२२)

[24] Kaviraj, Gopinath,*The History and Bibliography of Nyāya-Vaiśeṣika Literature*, Sampurnand Sanskrit University,Varanasi,1982,p.९८

[25] *तर्कसंग्रह:*,अन्नंभट्ट:,पंकजकुमारमिश्र:,परिमल-पब्लिकेशन्स,दिल्ली,२००१,पृ.१९.

[26] Frauwallner has argued that it was to refute his verson his verson that praśastapāda wrote the work which is probably,even more than the Vaśiṣika Sutra. H. Potter, p.p ५-६

[27] गैरोला वाचस्पति:,*संस्कृत साहित्य का इतिहास*, पृ.४८४.

[28] H. Potter,p p १०-१२

[29] शा.ढुण्ढिराज,*हि.वै.द. प्र.पा.भा.*, पृ.२१

[30] वादीवागीश्वरोऽस्य समय: ७५०-११०० ई. अङ्गीकरोति.अनन्तलालशर्मा,इन्ट्रोडक्शन-मिथिलावृत्ति:, पृ.८

[31] *प्रशस्तपादभाष्यम्*, श्रीनिवासशास्त्री,इन्डो-विजन प्राइवेट लिमिटेड,गाजियाबाद, प्र.सं.१९८४.पृ.१०

[32] *वैशेषिकदर्शनम्*, विद्योदयभाष्य,उदयवीरशास्त्री, गोविन्दराम हासानन्द,दिल्ली,२००९, पृ.२१

[33] मिश्र:, सत्यनारायण,*वैशेषिकदर्शन एक अध्ययन,* चौखम्बा विद्याभवन,वाराणसी,पु.मु.२००० ,पृ.१८

[34] H. Potter ,p.p 9-12.

[35] *वैशेषिकदर्शनम्*, सं. अनु.उदयवीरशास्त्री,पृ.१३.

४.**कणादसूत्रनिबन्ध:**-भट्टवादीन्द्रकृतोऽयं ग्रन्थ:। डी.जी.भट्टाचार्येणास्य काल:११७५ ई.त:१२२५ ई. पर्यन्तमुररीकृत:। अस्य प्रकाशनं अनन्तलालठाकुरेण बडौदात विहित:[36]। कणादसूत्रवार्त्तिकमपि अस्य अपरं नामधेयमिति पोटरेण स्वग्रन्थे लिखितम्। [37]

५. **वैशेषिकसूत्रोपस्कार:**-वैशेषिकसूत्रोपस्कारस्य रचना शंकरमिश्रेण विहिता। प्रशस्तपादभाष्यस्यानन्तरम् उपस्कारस्य महत्वपूर्णं स्थानं विद्यते। पञ्चाननतर्करत्नेन अस्योपरि परिष्कारनाम्ना टीका विहिता। यस्या: प्रकाशनं कलकत्तात जात:। अपरा टीकापि विश्वनाथेन कृता या पाण्डुलिपिरूपेण अस्ति। ग्रन्थोऽयं न प्रशस्तपादभाष्यस्य अनुकरणमपितु नव्यन्यायशैल्यां रचितं प्रौढग्रन्थो वर्तते। [38]

६. **भारद्वाजवृत्ति-भाष्यम्:**- भारद्वाजवृत्तिभाष्यं यत् गङ्गाधरकविरत्नेनकृतम्, एतस्य प्रकाशनं १९७८ तमे वर्षे संजातम्। एतद् न भारद्वाजवृत्ते: भाष्यमपितु स्वतन्त्रप्रबन्धोऽस्तिऽ [39]।

७.**वैशेषिकसूत्रवाक्यम्:**- वाक्यकारेण वैशेषिकसूत्रस्योपरि वाक्यनाम्ना व्याख्या विहिता। ग्रन्थोऽयं कोऽपि स्वतन्त्रग्रन्थोऽस्ति वा न इति निर्धारणं दुर्वारम्[40]। अस्या: समयविषये कुत्रचिदपि प्रमाणं न प्राप्यते। वाक्यमिति रचनाया: उपरि भाष्यमासीदित्यपि द्वादशारण्यचक्रे उल्लेख: सङ्केतो वा प्राप्यते। [41] अस्य भाष्यस्योपरि सूत्र-वाक्य-भाष्यसमेता प्रशस्तमतिटीकापि उद्धरणेषु उल्लिख्यते। [42] अयं प्रशस्तमति आचार्यप्रशस्तपादोऽस्ति इति उदयवीरशास्त्रिणा स्वग्रन्थस्य भूमिकायां विलिख्यते। अत्रोच्यते यत् स्वतन्त्ररीत्या सिद्धान्तानां व्याख्यानार्थं पदार्थधर्मसंग्रहनाम्ना पृथग्रचना विहिता। [43]

८.**कटन्दीटीका**- अनुपलब्धा इयं टीका। अस्या: सङ्केतो केवलं अन्यग्रन्थेषु वर्तमानानां उद्धरणानामाधारेणैव मिलति। अष्टमशताब्द्या: पूर्वरचिता रचना अनर्घराघवम् इत्यस्मिन्, ब्रह्मसूत्रशांकरभाष्यस्य रत्नप्रभा - टीकायाम्,पद्मनाभस्य किरणावलीभास्करे च अस्योद्धरणानि यत्र तत्र सन्ति। रावणभाष्यकटन्दीटीकयोर्मध्ये

---

36 H. Potter, p.p 9-12.,

37 H. Potter, p.६५८

38 *वैशेषिकसूत्रोपस्कार: सं.अनु.ढुण्ढिराजशास्त्री,* चौ.प्र.,वाराणसी,पृ.१७

39 शा. ढुण्ढिराज:,*हि.वै.द. प्र.पा.भा.,* पृ.२०

40 *प्रशस्तपादभाष्यम्,* सं.हि.अनु. श्रीनिवासशास्त्री,पृ.८

41 अस्तसम्बन्ध-परिहारार्थनिष्ठासम्बन्धयोरेककालत्वातिति वाक्यं सभाष्यं प्रशस्तोऽन्यथा व्याचष्टे। मिश्र:, सत्यनारायण,*वैशेषिकदर्शन एक अध्ययन,* पृ.१२

42 *प्रशस्तपादभाष्यम्* ,सं.हि.अनु.श्रीनिवासशास्त्री,पृ.८

43 *वैशेषिकदर्शनम्,* सं. हि.अनु.उदयवीरशास्त्री,पृ.२४

विवादो दृश्यते यदुभयो एकं वा न [44]। सत्यनारायणमिश्र: उभयो: पृथक् सतां स्वीकरोति। 'कटन्दीपण्डित:' इति शब्दकथनेन सूच्यत यत् स्वपाण्डित्यख्यापनं नास्ति अर्थपूर्वकम् अत: नास्त: एकमिति [45]।

**९.दशपदार्थशास्त्रम्**-अस्य मूलं चीनीभाषायां पाण्डुलिपिमाध्यमेन प्राप्यते। अस्यग्रन्थस्यस्य समय: फ्राउवाल्नरानुगुणं ४५०-५०० ई. इत्यङ्गीक्रियते[46]। वैशेषिकस्य पुस्तकेऽस्मिन् दशपदार्था: स्वीकृता: सन्ति। संस्कृतानुवादोऽस्य चन्द्रमतिना[47],ए. एच.उई महोदयेन च आङ्ग्लानुवादो विहित:।

**१०.श्रायस्क-व्याख्या**:-तिब्बतिभाषात: चीन्यां रूपान्तरिते प्रमाणसमुच्चय इति ग्रन्थे जिनेन्द्रबुद्धिव्याख्याकार: अस्या: व्याख्याया: उल्लेख:'केचित् 'श्रायस्कादय:'इति उक्त्वा करोति इति तर्कसंग्रहकार उद्धरति[48]। नोपलभ्यतेऽधुनेयं व्याख्या। अस्या: समयोऽज्ञातो वर्तते।

**११.रावणभाष्यम्**:-एतद् भाष्यमनुपलब्धं वर्तते। अनर्घराघवे रावणमुखात् वाक्यमिदं उच्यते यत् "वैशेषिककटन्दीपण्डित: जगद्विजयमान:पर्यटामि" इति एतस्याधारेण रूचिदत्त: रावणमेव कटन्दी-पण्डित: स्वीकरोति; परञ्च एतद् समीचीनं न प्रतीयते। रावणस्य तु भाष्यमेवासीत्, तं टीका कथं कथयितुं शक्यते। अत: उभयोरेकमित्यत्र वर्तते सन्देह:। प्रशस्तपादात्पूर्वमासीद् भाष्यं इति शास्त्रिणोच्यते। [49]

**१२.आत्रेयव्याख्या**:-मिथिलावृत्तित: अस्या: किञ्चित् विवरणं प्राप्यते। अनेनज्ञायते यदियं मिथिलावृत्त: प्राचीना वर्तते [50]। इयं व्याख्या नोपलभ्यते। राकेशशास्त्रिणा आत्रेयसम्मति: सम्मानयुतायां प्रभावयुक्तायां च शैल्याम् उद्ध्रियते। आत्रेयसम्बद्धानि सर्वाणि उद्धरणानि वी.राघवेन् अनन्तलालठाकुरेण च एकत्रीकृतानि सन्ति [51]।

**१३.वैशेषिकसूत्रवृत्ति**:-अस्या वृत्ते: काल: ११००-११५० ईस्वी मन्यते। इयमनुपलब्धा वर्तते। केवलमुद्धरणेष्वेवास्य विवरणं प्राप्यते। [52]

---

44 *प्रशस्तपादभाष्यम्,* सं.हि.अनु.श्रीनिवासशास्त्री,पृ.९

45 मिश्र:, सत्यनारायण:,*वैशेषिकदर्शन एक अध्ययन,* पृ.१३

46 H. Potter, p.p 9-12.

47 "Chan_tā_jo is the transliteration of Chandra in Sanskrit.Candra as the original of 'wisdom moon' seems to show omission.", "Maticandra is preferable to Candramati" The vaiśeṣika Philosophy according to Daśpadārthaśātra, H.UI ,p.9

48 *तर्कसंग्रह:*,सं.अनु.राकेश-शास्त्री,पृ.३१, *प्रशस्तपादभाष्यम्* ,सं हि.अनु.श्रीनिवासशास्त्री,पृ.९.

49 *प्रशस्तपादभाष्यम्,* सं.हि. अनु.श्रीनिवासशास्त्री, पृ.१९

50 शा.ढुण्ढिराज. *हि. वै.द.प्र.पा.भा.*,पृ.९

51 मिश्र, सत्यनारायण:,*वैशेषिकदर्शन एक अध्ययन* ,पृ.१४

52.H.Potter .vol-2,p-10

**१४.भारद्वाजवृत्ति:**-वैशेषिकसूत्रस्योपरि वर्तत इयं रचना। इयं वृत्ति: सन्दिग्धा अस्ति। भारद्वाजवृत्तिभाष्यं यत् गङ्गाधरकविरत्नेनकृतं एतस्य प्रकाशनं १९७८ तमे वर्षे संजातम्। एतद् न भारद्वाजवृत्ते भाष्यमपितु स्वतन्त्रप्रबन्धोऽस्ति [53]।

**१५.कणादरहस्यम्:**-वैशेषिकसूत्राणामुपरि पद्मनाभमिश्रकृतस्य एकस्यापरस्य कणादरहस्यस्योल्लेख: प्राप्यते। एतस्य प्रकाशनम् अद्यावधि न जातम्। पद्मनाभस्य समय: १६.तमी शताब्दी स्वीक्रियते ; अतोऽस्य काल: १५६० ई. इति लिखति। अस्योल्लेख: पोटरेण स्वविश्वकोशे विहितम्[54]।

**१६.वैशेषिकसूत्र-व्याख्यानम् –**

गोपीनाथकविराजेन वैशेषिकसूत्राणामुपरि अपरमपि व्याख्यानं रघुनाथलिखितमासीदिति सूच्यते। रघुदेवस्य काल: १६५७ ए. डी. स्वीक्रियते। [55] व्याख्यानस्यास्य उपलम्भानुपलम्भकृते कापि सूचना तत्र न दीयते।

आधुनिककालेऽपि वैशेषिकसूत्रस्योपरि टीका व्याख्याश्च समुपलभ्यते। तासां विवरणमधोलिखितमस्ति। तद्यथा-

| **टीकाकारस्य नाम** | **टीकाया: नाम** | **प्रकाशनम्** |
|---|---|---|
| १७.वीरराघवाचार्य: | वैशेषिकदर्शनम् 'रसायन-व्याख्या' | १९५८ तमे वर्षे मद्रासत: प्रकाशिता। |
| १८.स्वामी-हरिप्रसाद: | वैशेषिकसूत्र-वैदिकीवृत्ति: | १९५१ तमे वर्षेनिर्णयसागर-मुद्रणकार्यालयात् |
| १९.देशिकतिरूमल-ताताचार्य: | सुगमावैशेषिकसूत्रवृत्ति: | १९७२ तमे वर्षे गंगानाथ झा केन्द्रीयविद्यापीठत: प्रकाशिता |
| २०.काशीनाथ: | वैशेषिकदर्शनम्' वेदभास्करभाष्यम् | १९७२ तमे वर्षे होशियारपुर-डिस्ट्रिक्ट-यूनियन-प्रटिंगप्रेसत:[56] |
| २१.ब्रह्ममुनि: | वैशेषिकदर्शनं ब्रह्ममुनिभाष्यम् | १९९५ तमे वर्षे आर्यकुमार-महासभाबडौदात: |

---

53शा.ढुण्ढिराज. *हि. वै.द.प्र.पा.भा.* पृ.२०

54 H.Potter,p.१३९४

55 Kaviraj,Gopinath, p.९८

56 कुमार,शशिप्रभा, *वैशेषिकदर्शन-परिशीलन*, विद्यानिधि प्रकाशन,पृ.९८-१०४,

२२.चन्द्रकान्ततर्कालंकार: वैशेषिकसूत्र-भाष्यम्[57] १९८२ तमे वर्षे मुनि श्री जम्बुविजयेन ओरियन्टल-इंस्टीट्यूट-बडौदात: संपादितम्

२३.जयनारायण: कणादसूत्र-विवृत्ति: १८६०-६१ तमे वर्षेलिखिता[58]

## वैशेषिकसूत्राणामुपरि हिन्दी-व्याख्या:-

| व्याख्याकारस्य नाम | व्याख्याया: नाम | प्रकाशनसम्बद्धा सूचना |
|---|---|---|
| १.प्यारेलाल आत्मजा | भाषानुवाद | १८८६ तमे वर्षे बोम्बेत: प्रकाशित: |
| २. स्वामी-दर्शनान्द जी सरस्वती | वैशेषिकदर्शन | १९५९ तमे वर्षे प्रेम-पुस्तकभण्डार, बरेलीत: प्रकाशित: |
| ३. महामहोपाध्याय पण्डित-आर्यमुनि | वैशेषिकार्य्यभाष्य | २००० तमे वर्षे [59] प्रकाशित: |
| ४. दुण्ढिराज शास्त्री | हिन्दी वैशेषिकदर्शन प्रशस्तपादभाष्य | २००७ तमे वर्षे पु. मुद्रित-संस्करणम् चौ.सं.स.,वाराणसीत: |
| ५. सत्यनारायणमिश्र | वैशेषिकसूत्र-हिन्दी-व्याख्या | २००७ तमे वर्षे पु. मुद्रित-संस्करणम् चौ.सं.स.,वाराणसीत:, प्रकाशिता |
| ६. उदयवीरशास्त्री | वैशेषिकदर्शनम्'विद्योदयभाष्य' | गोविन्दराम-हासानन्द- देहलीत:प्रकाशित: |

वैशेषिकसूत्रस्य व्याख्यासु बह्व्य अनुपलब्धा:, तदितरा: या उपलब्धा: तासां न एतादृशी प्रसिद्धि:। 'प्रशस्तपादभाष्यम्' वैशेषिकसूत्रानन्तरं वैशेषिकदर्शनस्य प्रौढं मौलिकं च पुस्तकं वर्तते। भाष्यमिदं केवलं सूत्रव्याख्या नास्ति। अस्य ग्रन्थस्य प्रशस्ति: प्रशस्तपादभाष्यमिति रूपे विधीयते। अस्य अपर नाम 'पदार्थधर्मसंग्रह:' इति भाष्यकारेण एव सूचितम्। अस्य ख्याति: प्रशस्तपादभाष्यं नाम्ना अतिशायि संजाता।

---

[57] इयं कणादसूत्राणामद्वैतपरकस्वतन्त्रभाष्यं विद्यते।

[58], Thakur,Anantlal, p.१६०

[59] भाष्यमिदं हरयाणा-संस्कृत- संस्थान-गुरुकुल-झज्जर,रोहतकत: प्रकाशित:।

वैशेषिकसूत्राणामुपरि शोधपूर्णं वैज्ञानिकप्रबन्धोऽस्ति इति श्रीनिवासशास्त्रिणोच्यते।[60] अस्य ग्रन्थस्य माहात्म्यं टीकोपटीकाभिरेव वर्तते। आभिरेव अस्य माहात्म्यं इतोऽपि वृद्धिं प्राप्तवत्।[61] प्रशस्तपादभाष्यस्योपरि बह्व्य: टीकोपटीकाश्च सन्ति एतासां संकलनं द्वितीध्याये प्रस्तोस्यते। अनेन प्रकारेण अवलोक्यते चेत् प्रशस्तपादभाष्यमेक: सुसम्बद्धो ग्रन्थः।

---

60 *प्रशस्तपादभाष्यम्*, सं. हि.अनु. श्रीनिवासशास्त्री,पृ.१२

61 *तर्कसंग्रह:*, स. हि.अनु.राकेशशास्त्री,पृ.३४

# द्वितीयोऽध्यायः

## प्रशस्तपादभाष्यस्य टीका: न्यायकन्दली च

## प्रशस्तपादभाष्यस्य टीकोपटीकाश्च

**प्रशस्तपादभाष्यम्:-** सूत्रग्रन्थानन्तरं प्रशस्तपादभाष्यमेक: स्वतन्त्र: सुव्यवस्थितश्च ग्रन्थो विद्यते। भाष्यमिदं प्रशस्तपादाचार्येण विहितम्। अस्य समय: फ्राउवाल्नरेण षष्ठशताब्दस्य पूर्वार्धे स्वीक्रियते। रेण्डले- महोदयेन न्यायप्रवेश:, न्यायद्वार:, प्रमाणसमुच्चय:, प्रशस्तपादभाष्यमित्येतेषामाधारेण अस्य कालो दिङ्नागानन्तरमुररीकृत:। बोडास:५००-६००ई. पूर्वमेतस्य कालमासीदिति कालनिर्धारणे लिखति। [1] प्रशस्तपादभाष्यस्य समयो वात्स्यायनात्पूर्वमङ्गीक्रियते विद्वद्भि:। एतस्य काल: चतुर्थ-शताब्दी वर्तत इति कथनार्थं गैरोलामहोदय: शेरवास्किनमुद्धरति। [2] आचार्यप्रशस्तपादस्य नामानि बहुनि आसन्निति विभिन्न - ग्रन्थेषु उद्धृतानि सन्ति यथा- प्रशस्तपाद:, प्रशस्तदेव:, प्रशस्तदेवपाद:, प्रशस्तकर:, प्रशस्तदेवकर:, प्रशस्तमति:, प्रशस्त-इत्यादीनि[3]। एका वाक्यभाष्यटीका प्रशस्तमति नाम्ना विहितमासीदिति प्रशस्तपाद - भाष्यस्य भूमिकायामुल्लिख्यते।[4] प्रशस्तपादस्य कृतिद्वयं वाक्यं भाष्यं च इति अनन्तलालठाकुरेण अङ्गीक्रियते। [5] प्रशस्तपादेनास्य ग्रन्थस्य नाम '*पदार्थधर्मसंग्रह:*' इत्यप्युच्यत इति राममूर्तिशर्मणोच्यते[6]। पदार्थसंग्रह:, पदार्थप्रवेश: तथा च पदार्थप्रवेशकनाम्नापि पदार्थधर्मसंग्रहोऽभिधीयते[7]। पदार्थधर्मसंग्रहस्य सूक्ष्मावलोकनात् ज्ञायते यत् भाष्य[8]संग्रहग्रन्थयो उभयो: सकललक्षणं नात्र घटते। यथा संग्रहग्रन्थस्य लक्षणम्-

**"विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययो:,**
**निबन्धो य: समासेन संग्रहं तं विदुर्बुधा:"।**

अर्थात् न हि वर्ततेऽत्र सूत्राणां क्रमिक-व्याख्या, अतो लक्षणानुसारं नायं भाष्यग्रन्थ:, अपितु विशद: स्वतन्त्रग्रन्थो वर्तते। केचन एनं संग्रहग्रन्थ:, केचन भाष्यमिति कथयन्ति। प्रशस्तपादेनापि उभयतया अभिधानं कथितम्। श्रीनिवासशास्त्रिणा प्रशस्तपादभाष्यं 'संग्रह'ग्रन्थरूपेणाङ्गीक्रियते। [9] 'आकर'ग्रन्थ इति संस्कृतवाङ्मयकोशकारेणाभिधीयते[10]। पारिभाषिकदृष्ट्या अवलोक्यते चेत् उभयो: सम्मिश्रणमेव कथयितुं

---

[1] H. Potter, p.p ९-११

[2] गैरोला, वाचस्पति:, *संस्कृत साहित्य का इतिहास*, चौखम्बा विद्याभवन, वाराणसी,पु.मु.२००३.पृ.४८४

[3] शा.ढुण्ढिराज,हि.वै.द.प्र.पा.भा.पृ .२३

[4] *प्रशस्तपादभाष्यम्*,सं.अनु. श्रीनिवासशास्त्री,पृ.१२ (भूमिका)

[5] Thakur,Anantlal,p. १७१

[6] शर्मा,राममूर्ति,*न्याय-वैशेषिक एक चिन्तन*, राष्ट्रिय-संस्कृत-संस्थानम्, नवदिल्ली,१९९८

[7] *प्रशस्तपादभाष्यम्*, सं. हि.अनु,श्रीनिवासशास्त्री,पृ.१२ (भूमिका)

[8] सूत्रार्थो वर्ण्यते यत्र पदै सूत्रानुसारिभि:,स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदु:।

[9] *प्रशस्तपादभाष्यम्*, सं.हि.अनु.श्रीनिवास-शास्त्री,पृ.१२

[10] *संस्कृतवाङ्मयकोश:*,श्रीधर-भास्कर-वर्णेकर:,लोकभारती-प्रकाशन,इलाहाबाद,द्वि.खण्ड.पृ.१७८

शक्यते। पदार्थधर्मसंग्रह: प्रशस्तपादभाष्यस्यापरं नामधेयं परञ्च प्रशस्तपादभाष्यमिति अभिधानेन ग्रन्थोऽयं सुप्रथितो जात:। यद्यपि कणादसूत्राणामुपरि बहवो भाष्यटीकाश्च विद्यन्ते परञ्च प्रशस्तपादभाष्य-स्योत्तरकालेऽपि बहुकालपर्यन्तं कापि प्रामाणिकरूपेण टीका न उपलभ्यन्ते। प्रशस्तपादभाष्यस्य प्रकाशे आगमनान्तरं कणादसूत्राणाम् अध्ययनस्य पिधानं जातमिति अनन्तलालठाकुरेण स्वसंपादितग्रन्थ उक्तम्। प्रशस्तपादस्य प्राधान्यम् एतस्य वैशिष्ट्यकारणादेव वर्तते। प्रशस्तपादभाष्यस्य विषये केचन मुख्यो बिन्दव अधो लिख्यन्ते -

१.वैशेषिकदर्शनमतसंरक्षणं प्रशस्तपादभाष्यग्रन्थेन एव विहितम्।
२.पदार्था: षडेव, पीलुपाकप्रक्रिया, संख्यापरिमाणपरत्वापरत्वविषयकअपेक्षा बुद्धिप्रभृतीनाम् उत्पत्ति: नाशो वा ग्रन्थकारेण एव सर्वप्रथमं वर्ण्यन्ते स्पष्टीक्रियन्ते च।
३.विद्याविद्ययो: उभयो: चातुर्विध्यं कथयित्वा अनुमानप्रमाण एव ऐतिह्यपर्यन्तं समेषामनुमान एवान्तर्भावो विधीयते। अन्यच्च बुद्धिप्रकरण एव प्रमाणचर्चा। बुद्धे: क्षणिकत्वमपि तत्र प्रतिपादितम्।
४.धर्माधर्मयो: बन्धमोक्षयो: विशदचर्चा, सृष्टिप्रलययो: वर्णनम्, शब्दस्य विस्तृता चर्चा च आचार्येण विधीयते।
५.सूत्रग्रन्थे त्रयाणां हेत्वाभासानां निर्देश: परञ्च भाष्यकारेण चत्वारो हेत्वाभासा: स्वीकृता:।
६.केवलं केषाञ्चन-सूत्राणामेव साक्षाद्रूपेण व्याख्यानं विहितम्। सूक्ष्मतयावलोकनेन ज्ञायते यत् न्यूनातिन्यूनं चतुर्विंशति-सूत्राणामत्र भाष्ये नोल्लेख इति सूचितम्[11]। अन्यच्च कुत्रचिद्व्याख्याप्रयोगो नूतनलक्षणानां प्रामाणिकरूपेणोपस्थानार्थमिति।
७.केषुचित् स्थानेषु पूर्वं सूत्राण्युद्धृत्य तेषां विस्तृतव्याख्या क्रियते। कुत्रचिद् सूत्रस्य भावार्थ एव स्पष्टीक्रियते तथा च कुत्रचिद् नूतनं सूत्रादतिरिक्तं व्याख्यायते।
८.वैशेषिकसूत्रे सप्तदशसूत्राणामेव कण्ठतोऽभिधानं वर्तते। भाष्यकारेणात्र तदतिरिक्तसप्तगुणानां नियोजनं कृतम्। गुणनिरुपणे 'गुणाधिकारसन्निवेश:' इत्यनेन सूत्रनियोजनं सुष्ठुरीत्या आचार्येण विहितम्।
९.अनन्तलालठाकुरेण सूच्यते यत् भाष्ये वर्णितसूत्रपाठ अन्येषामपेक्षया प्रामाणिक इति[12]।
श्रीनिवासशास्त्रिणा पदार्थधर्मसंग्रहो वैशेषिकसूत्राणामुपरि शोधपूर्णं वैज्ञानिकप्रबन्ध: कथ्यत इति[13]।
प्रशस्तपादभाष्यस्य टीकाप्रभृतीनामुल्लेख अस्मिन्नेवाध्याये करिष्यते।

## प्रशस्तपादभाष्यस्य संस्करणानि:–

१. *पदार्थधर्मसंग्रह:,* प्रशस्तपाद:, लेखराज-महत-परिसुरम्,लाहौर:,१८८८

२. *पदार्थधर्मसंग्रह:,* प्रशस्तपाद:,हि.अनु.गङ्गानाथ-झा,पण्डित-बनारस,वाराणसी,१९०३-३७.पु.मु.१९१५; वाराणसी,१९८२,१(१८८६-एन.एस. ४२(१९८२)

३. *पदार्थधर्मसंग्रह:,* (किरणावली-सहितम्),वी.पी.द्विवेदी,बनारस-संस्कृत-सीरिज ९,१८९७,१९१९

---

11 कुमार:,शशिप्रभा, *वैशेषिक दर्शन में पदार्थ निरूपण,* विद्यानिधि प्रकाशन,१९९२, पृ.११

12 Thakur,Anantlal, *pp.* १७३-१७४

13 *प्रशस्तपादभाष्यम्,*सं हि. अनु. श्रीनिवासशास्त्री, पृ.१२

४. *पदार्थधर्मसंग्रहः*(शंकरमिश्रस्योपस्कारसहितम्),दुण्ढिराजशास्त्री,काशी-संस्कृत-सीरिज-३,१९२३

५. *पदार्थधर्मसंग्रहः(*व्योमवती-सेतु-सूक्तिसहितम्), सं. गोपीनाथकविराजः, दुण्ढिराज-शास्त्री च, चौखम्बा-संस्कृत-सीरिज,बनारस,१९२४-३१

६. *पदार्थधर्मसंग्रहः,(*सूक्ति-सहितम्),कालीपाद-तर्काचार्य,संस्कृत-साहित्य-परिषद्-सीरिज,कलकत्ता-१४,१९२५

७. *पदार्थधर्मसंग्रहः,*(न्यायकन्दली-सहितम्),हि.अनु.दुर्गाधर-झा-शर्मा,गङ्गानाथ-झा-ग्रन्थमाला, वाराणसी, १९६३,१९७७

८. *पदार्थधर्मसंग्रहः,* प्रशस्तपादः,सं.नारायणमिश्रः,काशी-संस्कृत-सीरिज-१७३, १९६६

९. *पदार्थधर्मसंग्रहः,(*उदयनस्य किरणावली-लक्षणावली-सहितम्),सं.जे.एस. जेटली, गायकवाड-ओरियन्टल-सीरिज-१५४,वडौदरा,१९७१

१०. *पदार्थधर्मसंग्रहः,(*न्यायकन्दली-सहितम्),विजयङ्ग्राम-संस्कृत-सीरिज,१८९५

११. *पदार्थधर्मसंग्रहः,*अनु.सं.देवीप्रसाद-चट्टोपाध्यायः,मृणालकान्ति-गङ्गो-पाध्यायः,एन एन्थोलोजी ऑफ मैटीरियल एण्ड सन रिसन्ट स्टडीज,न्यू-देहली,१९९०

*१२.प्रशस्तपादभाष्यम्,* श्रीनिवास-शास्त्री,(हि.अनु.) इण्डो-विजन-प्राईवेट-लिमिटेड, गाजियाबाद,१९८४

१३. *हिन्दी वैशेषिकदर्शन प्रशस्तपादभाष्य,*(प्रकाश हि व्या.सहित).सं.अनु. ढुण्ढिराज शास्त्री,चौखम्बा संस्कृत संस्थान, वाराणसी,पु.मु.वि.सं २०६३

प्रशस्तपादभाष्यस्य संस्करणादीनां वर्णनान्तरं तस्य टीकोपटीकाश्च वर्ण्यन्ते।

## प्रशस्तपादभाष्यस्य टीकोपटीकाश्चः-

**१.व्योमवतीः-** व्योमवती टीका उपलब्धटीकासु प्राचीनतमा वर्तते। व्योमशिवाचार्यो शैवः आसीत्। टीकायाः कालः सप्तमशताब्द्या उत्तरार्धे स्वीक्रियते। राजशेखरस्य पञ्जिकया ज्ञायते यत् श्रीधरेणास्य खण्डनं बहुधा विहितम्। कन्दल्यां कुत्रचिदपि नामोल्लेखपूर्वकं व्योमवत्याः खण्डनं न क्रियते। धर्मकीर्तिकुमारिलप्रभृतीनामुल्लेख आचार्येण विधीयते। अन्यच्च वैशेषिकसूत्र-श्लोकवार्त्तिक-प्रमाणवार्त्तिक-वाक्यपदीय-न्यायभाष्य वार्त्तिकप्रभृतीनां ग्रन्थानामुद्धरणानि व्योमवतीकारेण दीयन्ते। वैशेषिकदर्शनस्य परम्पराविरुद्धं भासर्वज्ञस्य प्रभावकारणात् शब्दस्य पृथक्प्रामाण्यत्वमङ्गीकृत[14]मित्यपि कथ्यते। शब्दस्य न

---

[14] तदेवं तादात्म्यतदुत्पत्तिप्रतिबन्धस्य पूर्वमेव प्रतिषेधात् शब्दानान्तु समयवेशनार्थप्रतिपादकत्वाद् उपपन्नम् अनुमानादर्थान्तरत्वे सति प्रामाण्यमिति। *व्योमवती,* व्योमशिवः,सं.गौरीनाथशास्त्री,संपूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी,प्र.सं.१९८४,पृ१६३

अनुमानेऽन्तर्भावो विधातुं शक्यत इति सूच्यते[15]। व्योमशिवाचार्यस्य रचनान्तरविषये विवरणं नोपलभ्यते। अस्य प्रकाशनमपि बहुकालानन्तरं जातम्। व्योमवत्या उपरि टीकानामुपटीकानां च कुत्रापि उल्लेखो न प्राप्यते।

**व्योमवत्या: संस्करणानि:-**

१.*व्योमवती,* व्योमशिवाचार्य:, सं गोपीनाथकविराज:, दुण्ढिराज-शास्त्री, चौखम्बा-संस्कृत-सीरिज,१९६०

२.*व्योमवती,* व्योमशिवाचार्य:, सं. गौरीनाथ-शास्त्री, संपूर्णानन्द-संस्कृत-विश्वविद्यालय:, वाराणसी, १९८३-८४ भाग-१,२

**२.न्यायकन्दली:-** व्योमशिवानन्तरं श्रीधराचार्यस्य टीका प्राप्यते। न्यायकन्दली एका विशदा टीका वर्तते। अस्या: विवरणं अस्मिन्नेवाध्यायस्य अन्ते प्रस्तोस्यते।

**३.किरणावली:-** उदयनाचार्यविरचिता किरणावली प्रशस्तपादभाष्यस्योपरि सुप्रसिद्धा टीका वर्तते। उदयनस्य स्थितिकाल: शक-सं-९०६ मध्ये कथ्यते। अस्य कालसूचक: श्लोक:-तद्यथा-

**"तर्काम्बराङ्कप्रमीतेष्वतीतेषि शकान्तत:।**
**वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम्"।**

आधुनिकविद्वांस: अस्य श्लोकस्याधार: कालगणनारूपेण न अङ्गीकुर्वन्ति। अत्र गोपीनाथशास्त्रिणा अस्य समयो दशमशताब्द्या: चतुर्थचरणे स्वीक्रियते [16]। दरभङ्गापार्श्वे मङ्गरौनीति नाम्ना ख्यातो ग्रामो यो 'कनका' नद्या: पार्श्वे विद्यते तत्रत्य आसीदयमाचार्य:। अयमाचार्यो मैथिल आसीत् [17]।नव्यन्यायस्य सूक्ष्मातिसूक्ष्मविचारकरणं यद् वैशिष्ट्यं तदुयनाचार्यस्य रचनासु प्राप्यते। टीकानां साहाय्यं विना किरणावल्या अवगमनं न सरलम्। [18] किरणावल्या भाषा समस्ता सारगर्भिता च वर्तते। १९७१ तमे वर्षे जेटली-संपादितग्रन्थे संस्कारत्रयस्य चर्चा अतिरिक्तरूपेण विहितास्ति। टीकेयं न सम्पूर्णा तथापि अतीव ख्यातिं लब्धवती। अस्य ग्रन्थस्य समापनमपि अस्वाभाविकं यतो हि तत्र 'इति' शब्दो न प्रयुज्यते। ग्रन्थस्य प्रसिद्धि: तस्य टीकोपटीकाभिरपि ज्ञातुं शक्यते।

**किरणावल्यां स्वीकृत-मुख्यबिन्दव:-**१.किरणावल्यां 'षडेव पदार्था इति स्वीक्रियते। सप्तमस्य अभावपदार्थस्य स्थिति: पूर्वग्रन्थेषु वैशेषिकसूत्रादिषु पूर्वकालादेव वर्तत इति सूच्यते[19]। यथोक्तं किरणा - वल्यां-**"अभावस्तु स्वरूपवानपि पृथङ्नोद्दिष्ट: प्रतियोगिनिरूपणाधीननिरूपणत्वात्, न तु तुच्छत्वात्।**

---

[15] Thakur, Anantlal, p.२५७

[16] *किरणावली,* उदयन:,गौरीनाथ-शास्त्री,संपूर्णानन्द-संस्कृत- विश्वविद्यलय:.वाराणसी,१९८०, पृ.६

[17] *तत्रैव.* पृ. Xiii (भूमिका)

[18] *तत्रैव.* पृ.७

[19] Thakur,Anantlal,p२९६

उत्पत्तिविनाशचिन्तायां प्रागभावध्वंसाभावयो: वैधर्म्यै-चेतरेतराभावात्यन्ताभावयोस्तत्र तत्र निदर्शयिष्यमाणत्वात्"।[20]

२.स्नेहो न अपां गुण:, अपितुघृततैलवसाप्रभृतिषु अस्य गुणस्य सत्त्वं वर्तते। ३.पृथिव्यां न स्पर्श:। ४. चक्षु न इन्द्रियम्। विषयस्य ज्ञानं यस्य सन्निकर्षेण प्राप्यते तदिन्द्रियत्वेन अभिधीयते परश्च चक्षुषि एतादृशी स्थितिर्न विद्यते। अतो न चक्षु इन्द्रियम्।

अनेन प्रकारेण इतोऽपि वैशिष्टयं तत्र वर्तते। भासर्वज्ञश्रीधरलिखितग्रन्थानाम् उद्धरणानि कुत्रचिदादरपूर्वकं कुत्रचिद् खण्डनार्थं च प्रयुज्यन्ते[21]। बौद्धमतखण्डनमपि किरणावलीकारेण क्रियते। अस्य कृते तु बौद्धाधिकारनाम्ना पृथग्रचनापि विहिता। उदयनस्य अन्या: कृतयोऽपि विद्यन्ते, ता: सर्वा न्यायदर्शनसम्बद्धा वर्तन्त इति। ता: च- आत्मतत्त्वविवेक:, लक्षणमाला, लक्षणावली, न्यायकुसुमाञ्जलि:, न्याय-परिशिष्ट:, न्यायवार्त्तिकतात्पर्यटीकापरिशुद्धि: किरणावली च इति [22]।

## किरणावल्या: टीका:-

| टीकाया: नाम | टीकाकारस्य नाम | समयादिकसूचना |
|---|---|---|
| १.द्रव्यकिरणावलीप्रकाश: | वर्धमानोपाध्याय: | १३४५ द्रव्यपर्यन्तम् (प्रकाशिता)[23] |
| २.किरणावली टीका | प्रभाकरोपाध्याय: | द्रव्यपर्यन्तम्(१२००-१२५०) |
| ३.किरणावली टीका | भट्टवादीन्द्र: (रससार:) | गुणानामुपरि १२२५ ए. डी.[24] |
| ४..किरणावलीप्रकाशदीधिति: | रघुनाथ-शिरोमणि: | फो. १५००-१५४०[25] |
| ५.किरणावलीनिरूक्तिप्रकाश: | शंङ्करमिश्र: | १४००-१४९० ए. डी.[26] |
| ६.किरणावली-भास्कर: | पद्मनाभमिश्र: | सी.१५६३ (अनुपलब्धा) |
| ७.किरणावली टीका | मथुरानाथतर्कवागीश: पाण्डुलिपि:[27] | एफ.एल. १५५०-१५९० |

---

20 *किरणावली*, सं गौरीनाथ-शास्त्री,वाराणसी,१९८०.पृ.४६

21 Thakur,Anantlal, p.२९५-२९६

22 H. Potter,p.१०४

23 *किरणावली-प्रकाश:*, वर्धमानोपाध्याय:,सं गौरीनाथ-शास्त्री, संपूर्णानन्द-संस्कृत-विश्वविद्यालय:,वाराणसी,१९८०

24 टीकेयं १९९७ तमे वर्षे गोपीनाथकविराजेन सरस्वतीभवनग्रन्थमालात:.काशीत: प्रकाशिता।

25 १९३२ तमे वर्षे काशी-सरस्वती-भवन-ग्रन्थमालायां बदरीनाथशास्त्रिणा प्रकाशिता। गुणकिरणावलीप्रकाशस्योपर्यस्ति।

26 कणादरहस्ये पृ.१७७ इत्यस्योपरि उल्लिखिता।

27 संस्कृत-विश्वविद्यालय-वाराणसीत:,१९८१ तमे वर्षे जी.शास्त्रिणा अस्य बहुलांश प्रकाशित:।

८.द्रव्यकिरणावलीप्रकाशिका रूद्रवाचस्पति: १६००-१६६० (पाण्डुलिपि:)[28]

**किरणावल्या उपटीका:-** एता: सर्वा: टीका: वर्धमानस्य द्रव्यकिरणावलीप्रकाशस्योपरि सन्ति।

**द्रव्यकिरणावलीप्रकाश: वर्धमानोपाध्याय:-**

१.द्रव्यकिरणावलीप्रकाशटीका प्रगल्भाचार्य: एफ.एल.१४७०(पाण्डुलिपि:) द्रव्यगुणयोरुभयो उपरि[29]

२.किरणावलीप्रकाशविवृत्ति: रूचिदत्त: सी.१५०५ (द्रव्यपर्यन्तम्) प्रकाशिता[30]

३.किरणावलीप्रकाशटिप्पणी जलेश्वर-वाहिनीपति -महापात्र-भट्टाचार्य: षोडशतमे शताब्दे पाण्डुलिपि:[31]

५.किरणावलीप्रकाशविवेक: पक्षधर: सी. १५०० (पाण्डुलिपि:) उपलब्ध:(केवलं द्रव्ये)

६.किरणावलीप्रकाशविमल: बलभद्रमिश्र: १५००-१५५०(पाण्डुलिपि:,द्रव्ये)[32]

७.वर्धमानेन्दु: वर्धमान: (द्रव्ये) सी.१५६३ (पूणे पाण्डु.उपलब्धा)

८.किरणावलीप्रकाशप्रकाशिका भगीरथठक्कुर: ए.डी.१५८८ गुणप्रकाशिका,द्रव्यप्रकाशिका[33] (गुणजलद:)

९.किरणावलीप्रकाशटीका, मथुरानाथतर्कवागीश: १५५०(पाण्डु.उप.)[34] किरणावलीप्रकाशविवृत्ति: च

१०. लक्षणावलीन्यायमुक्तावली शेषशार्ङ्गधर: १४२० ई. (प्रकाशिता)

---

28 बीकानेर आर.एल,मित्रा केटेलोग्.पृ.५४६ इत्यस्मिन् सूचीबद्ध:।

29 नवद्वीप लाईब्रेरी, डी.सी भट्टाचार्येणान्वेषिता, बंगाली भाषायां विद्यते।

30 बिब्लियोथिका-इण्डिका-सीरीज इत्यस्यां प्रकाशिता।

31 सरस्वती-भवन-न्याय-वैशेषिक-मैन्यु.संख्या-३५८) फोलियो-१५०

32 पूणे (मैन्यू.सं,७५४)-१८८४-७ फो.-७०)

33 Kaviraj Gopinath ,p.५०

34 पाण्डुलिपि सरलतया उपलभ्यत इति सूच्यते।

| | | |
|---|---|---|
| ११. खण्डनदर्पणम् | प्रगल्भमिश्र: | १४७० ई. (प्रकाशिता) [35] |

**एतदनन्तरं गुणकिरणावल्या: टीका लिख्यते-**

| | | |
|---|---|---|
| १.गुणकिरणावलीप्रकाश: | वर्धमान: | १३४५ ई. प्रकाशिता |
| २.गुणविवृत्तिविवेक: | गुणानन्दविद्यावागीशभट्टाचार्य: | १६ शताब्द्या उत्तरार्धे[36] |
| २.गुणरहस्यम् | रामभद्र-सार्वभौम: | समय अज्ञात:[37] |

**रघुनाथशिरोमणिकृत-किरणावलीप्रकाशदीधिते उपरि टीका:-**

| टीकाया: नाम | रचयितु: नाम | समयेत्यादिका सूचना |
|---|---|---|
| १.गुणदीधिति-टीका | कृष्णदेवसार्वभौम: | सन्दिग्धा[38] |
| २.गुणदीधिति-टीका | भावानन्द-सिद्धान्तवागीश: | १५१५-१६००[39] |
| ३.गुणदीधिति-टीका | मथुरानाथतर्कवागीश: | १५५० ई. पाण्डु.[40] |
| ४.गुणदीधिति-प्रकाश: | रामकृष्णभट्टाचार्य:चक्रवर्ती | १६तमे शताब्दे |
| ५.गुणदीधितिविवृत्ति: | जयरामन्यायपञ्चानन: | १७ तमे. शताब्दे[41]. |
| ६.गुणदीधितिपरीक्षा | रूद्रन्यायवाचस्पति:, | १६००-१६६०,गुणानामुपरि मूल ग्रन्थ:[42] |

अनेन प्रकारेण किरणावल्या एका विस्तृता टीकापरम्परा वर्तते। अनयैवास्या वैशिष्ट्यमिति।

**किरणावल्या: संस्करणानि:-**

१.*किरणावली,* वर्धमानोपाध्यायटीकासहिता,सं शिवचन्द्र-सार्वभौम:,एशियाटिक-सोसायटी,कलकत्ता, प्र.सं.१९११.द्वि.सं.१९८९

---

35 H. Potter, p.p १०-१२.

36 Kaviraj Gopinath, p.३४ पाण्डुलिपि इंडिया-आफिस-लाइब्रेरी, विद १५३४ शक सं(१६१२ ए.डी.)।

37, Kaviraj Gopinath, p.८६, स्वतन्त्रग्रन्थ:,(Thakur,Anantlal, p.२९८)

38 त्रिलोचनदेवस्य कुसोमाञ्जलिकारिका-टीकायां पाण्डुलिपि उपलब्धा इति सूचना प्राप्यते।

39 नवद्वीपे संपूर्णा वर्तते पाण्डुलिपि इति अनन्तलालठाकुरेण सूचितम्।

40 अधिकांशभागो विभिन्नपुस्तकालयेषु पाण्डुलिपिरूपेण उपलभ्यते।

41 ४,५ उभयं विभिन्नपुस्तकालयेषु पाण्डुलिपिरूपेण सरलतया उपलभ्यते।

42 Thakur,Anantlal, p.२९८

२.*किरणावली,* वर्धमानोपाध्यायटीकासहिता,सं शिवचन्द्र-सार्वभौम: तथा नरेन्द्रचन्द्र:, एशियाटिक-सोसायटी, बंगाल,प्र.सं.१९११. द्वि. सं. १९५६, १९११,१९४५,१९४५७.

३.*किरणावली,* उदयन:,सं(बंङ्गभाषा).गौरीनाथ-भट्टाचार्य-शास्त्री, कलकत्ता, १९५६.१९८०

४.*किरणावली,* उदयन:,सं.जितेन्द्र-जे.एस.जेटली, ओरियन्टल-रिसर्च-इंस्टीट्यूट,वडोदरा, प्र.सं १९७१, द्वि.स.१९९१

६.*किरणावली,* उदयन:(प्र.पा.भा,लक्षणावली-सहितम्),सं.जे.एस.जेटली, गायकवाड-ओरियन्टल-सीरिज-१५४,वडौदरा,१९७१

७.*किरणावली,* उदयन:, हि.व्या.गौरीनाथ-शास्त्री,संपूर्णानन्द-संस्कृत-विश्वविद्यालय:,वाराणसी,१९८०
८.*किरणावली,* (प्र.पा.भा.)उदयन:, वी.पी.द्विवेदी,बनारस-संस्कृत-सीरिज- ९,१८९७,१९१९

९.*किरणावली,* उदयन:,सं अनु. मशेसी तचिकोवा, स्टडीज ऑफ क्लासिकल, वाराणसी,१९८१

**४.न्यायलीलावती** :–उदयनस्य किरणावल्या: अनन्तरं वल्लभाचार्यविरचितया: न्यायलीलावत्या: स्थानमायाति। अस्य कालादिकविषये ग्रन्थे न वर्तते सूचना । उदयनान्तरमस्यावस्थिति:, यतो हि आचार्येण उदयनस्य नामोल्लेख: क्रियते तथा च न्यायलीलावत्या: प्रथमटीकाकारो वर्धमानो यस्य काल: ११७८ ई. इति स्वीक्रियते। अतएव अस्य समय: ११००-११७५ ई. मध्येऽङ्गीक्रियते संपादकराजेन्द्रशर्मणा। आचार्योऽयं मैथिल इति स्वीक्रियते। [43] ग्रन्थग्रन्थकारयो: नामधेयविषये शंका वर्तते। पञ्जिकाटीकायां राजशेखर: चतसृणां टीकानां विवरणं लिखति तद्यथा- **"तत्र चतस्रो वृत्तयो निर्वृत्ता: एकां व्योमवती नाम्नीं वृत्तिं व्योमशिवाचार्यो जुगुम्फ। द्वितीया तु न्यायकन्दल्यभिधाना श्रीधराचार्य: संददर्भ, तृतीयां किरणावली नाम्नीमुदयानाचार्यस्ततान । चतुर्थी तु लीलावतीति ख्यातां श्रीवत्साचार्यो वबन्ध। चतस्रोऽपि गम्भीरार्था:"**[44]। अत्र राजेन्द्रशर्मणा श्रीवत्साचार्यस्य स्थाने वल्लभाचार्य: तथा च तस्य ग्रन्थनाम न्यायलीलावतीति कथ्यते। श्रीनिवासशास्त्रिणापि इयं चतुर्थतमी टीका तथा चास्या: स्वतन्त्रग्रन्थ - रूपेणास्यावस्थिति: स्वीक्रियते[45]। वल्लभाचार्यस्य ग्रन्थशैली नूतना, मौलिका, उत्कृष्टा, परीक्षाप्रधाना, नव्यन्यायशैल्योत्प्रेरका, गाम्भीर्ययुक्ता तथा च दुर्बलायुक्तिकखण्डने समर्था चेति कथ्यते। व्योमवतिकन्दलिप्रभृतिवत् अस्या: शैली प्राचीना नास्ति। वल्लभाचार्यस्य रचनान्तरमपि सूच्यते। 'ईश्वरसिद्धि' इति रचनायां प्रमाणं यथा "चैतत्तथास्माभिरपि ईश्वरसिद्धवुक्तम्"। द्वितीयं न्यायसूत्राणां पञ्चमाध्यायस्योपरि टीका लिखितेति अन्वीक्षानयतत्त्वप्रबोधात् प्राप्यते। यथा न्यायलीलावत्या: भूमिकायां लिखितं- **"अत्र श्रीवल्लभ:-एवं विशेषविवक्षायां...प्रत्यवस्थानमप्रमित सम: "**[46]

---

[43] *न्यायलीलावती,* सं. राजेन्द्रप्रसाद-शर्मा, राजस्थान-विश्वविद्यालय:,जयपुर,पृ. ७

[44] टीकात्रयोपेता,*न्यायकन्दली,* सं जे एस जेटली तथा .वसन्त-पारीख,ओरियटल-इंस्टीट्यूट-वडोदरा,१९९१ पृ.२

[45] *प्रशस्तपादभाष्यम्,* सं.हि. अनु. श्रीनिवासशास्त्री, पृ.१६

[46] *न्यायलीलावती,* सं. राजेन्द्र-प्रसाद-शर्मा,पृ. ७-८

१. आरोपितनीलरूपं तम इत्यस्य श्रीधरमतस्य खण्डनं विहितम्।

२. 'षडेव पदार्था' इत्यत्रानुपपत्ति: प्रदर्श्यते।

२. सप्तमपदार्थरूपेण अभाव: तत्र स्वीक्रियते।

**न्यायलीलावत्या: टीकोपटीकाश्च-**

| टीकाया: नाम | टीकाकारस्य नाम | समयप्रभृतिसूचना: |
|---|---|---|
| १. न्यायलीलावतीप्रकाश: | वर्धमान-उपाध्याय: | १२५०ई,चौखम्बासंस्करणे प्रकाशित: |
| २. न्यायलीलावतीकण्ठाभरणम् | शंकरमिश्र: | (१४५० ई.)चौखम्बासंस्करणात् प्रकाशितम् |
| ३.न्यायलीलावतीप्रकाशदीधिति: | रघुनाथ-शिरोमणि: | सरस्वतीभवनवाराणस्यां प्रकाशिता, १४७५ काल: १६०० ई. (पाण्डुलिपि:) पुस्तकालयेऽस्ति |
| ४.न्यायलीलावती-अनुनयव्याख्या | पद्मनाभमिश्र: | (१६०० ई.) अस्य किञ्चिदंश आड्यार-लाइब्रेरीत: १९४४ तमे वर्षे प्रकाशिता |
| ५. शाम्भवी व्याख्या(हिन्दी-व्याख्या) | दुर्गाधर झा | प्रकाशिता |
| ६.चन्द्रकान्ति: (हि.व्याख्या) | चन्द्रकान्त दवे | प्रकाशिता[47] |

**न्यायलीलावत्या: पाण्डुलिपिरूपेण उपलब्धा अनुपलब्धा च टीका:-**

१. न्यायलीलावतीदर्पण वटेश्वर-उपाध्याय: १४०० ई.(अनुपलब्धा)

२. न्यायलीलावतीव्याख्या वाचस्पति:(द्वितीय) (१४५० ई.) वाराणस्या: अमुद्रितग्रन्थसूच्यामस्ति

३. न्यायलीलावतीविभूति:(स्वतन्त्रव्याख्या) रघुनाथशिरोमणि: सरस्वती- भवनकाशी-लंदन-मथुराया: पुस्तकालये (पा.प्रतिरूपे)[48]

४. न्यायलीलावतीविवेकटीका पक्षधरमिश्र: १४५० ई. उपलब्धा लंदनस्थ भारतीयकार्यालयस्य पुस्तकालये पाण्डुलिपि:

५. न्यायलीलावतीरहस्य मथुरानाथतर्कवागीश: (१६०० ई.) लंदनतिरूवन्तपुरशान्तिपुर-पुस्तकालयेषु च

---

[47] *न्यायलीलावती*, सं.राजेन्द्रप्रसाद:,(हि.शाम्भवी.व्या.,चन्द्रकान्ति व्या.) दुर्गाधर झा,दर्शनविभाग,राजस्थान विश्वविद्यालय:,जयपुरम्,१९९६

[48] H.potter.p.१०-१२

६. न्यायलीलावती-विलासव्याख्या रूचिदत्तमिश्र: (१६.तमी शताब्दी) पाण्डुलिपि मद्रासपुस्तकालये

७. न्या.ली.प्रकाशव्याख्या रामकृष्णभट्टाचार्य: औधसूच्यामुल्लिखिता

८. लीलावतीव्याख्या रूद्रभट्टाचार्य: (१८०० ई.) लाहौरपुस्तकालय इति सन्दिग्धा

९. भावपरिच्छेदटीका महादेवपण्डित: पण्डितग्रन्थमालाप्रकाशित-न्यायसारस्य पञ्चमपृष्ठेन ज्ञायते

१०. विलास: पण्डितमहादेव: मद्रासतिरूवन्ततंजौरपुस्तकालयसूचीत: ज्ञायते

११. न्याय.ली.व्याख्या शंकरभगीरथपण्डित: मैसूर-पुस्तकालये

१२. लीलावती-व्याख्या श्रीनिवास: न्यायसिद्धान्ततत्त्वामृत- लेखकेन मद्राससंस्करणस्य पृ. ६-१८ पर्यन्तम्

१३. न्यायलीलावतीविभाषा रूचिदत्तमिश्र: पाण्डुलिपि:(१५०५ ई.)

## १. वर्धमान-उपाध्यायकृत-न्यायलीलावतीप्रकाशस्य टीका:-

१. न्या.ली.दीधितिविवृत्ति: भगीरथ-ठक्कुर: (१५८८ ई.) चौखम्बासंस्करणात्प्रकाशिता

२. न्यायलीलावतीप्रकाशरहस्य मथुरानाथतर्कवागीश: १६०० ई. लंदन-लाहौर-पुस्तकालये[49]

३. पक्षधरमिश्र: न्यायलीलावतीप्रकाशविवेक: १४५० ई. पाण्डुलिपि उपलब्धा अप्रकाशिता च[50]

वर्धमान-उपाध्यायकृत-न्यायलीलावतीप्रकाशस्य उपरि रघुनाथशिरोमणे: न्या.ली.प्रकाश दीधितौ वर्तमाना: टीका अत्र लिख्यन्ते -

## न्यायलीलावतीप्रकाशस्य टीका:-

१. न्या.ली.दीधितिव्याख्या जगदीशभट्टाचार्य: (१६०० ई.) जर्नल ऑफ एशियाटिक-सोसायटी-पत्रिकायां प्रकाशिता

२.न्यायलीलावतीप्रकाशदीधिति: रघुनाथ-शिरोमणि: सरस्वतीभवनवाराणस्यां प्रकाशिता, १४७५ काल: १६०० ई. (पाण्डुलिपि:) पुस्तकालयेऽस्ति

३.न्या.ली.दीधितिविवेक: भवानन्दसिद्धान्तवागीश: (१६०० ई.० सरस्वतीभवनपुस्तकालये संपूर्णा पाण्डुलिपि उपलभ्यते

४.न्या.ली.दीधितिव्याख्या देवीदासपुत्र: लंदन-तंजौर-काशीसरस्वतीभवनपुस्तकालये उपलब्धा.

---

49 *न्यायलीलावती*, सं राजेन्द्रप्रसाद-शर्मा, पृ.१९-२१

50 *तत्रैव*, पृ.११

५.न्या.ली.प्रकाशदीधितिव्याख्या गुणानन्दविद्यावागीश: (१७०० ई.)वाराणस्या: सरस्वती-भवनपुस्तकालये।

एतासु सर्वासु काश्चनैव प्रकाशिता: सन्ति। अन्या: पाण्डुलिपिरूप एव वर्तते; ता अपि प्रायश: जीर्णावस्थायां सन्ति। [51]अनेन प्रकारेण न्यायलीलावत्या अपि सुदीर्घा परम्परा वर्तते। अयमेव अस्य वैशिष्ट्यं सूचयति।

## न्यायलीलावत्या: संस्करणानि-

१. *न्यायलीलावती,* श्रीवल्लभ:,सं वी.पी,द्विवेदी,बनारस-संस्कृत-सीरिज- ३७,१९१०

२. *न्यायलीलावती,* श्रीवल्लभ:,सं.मंगेश-रामकृष्ण-तेलंग,बॉम्बे,१९१५

३. *न्यायलीलावती,*(वर्ध.प्रकाशटीका,शं.मिश्र:.कण्ठाभरणम्,ठक्कुर-विवृत्ति:सहितम्) सं.हरिहरशास्त्री, ढुण्ढि -राजशास्त्रीच,चौखम्बा-संस्कृत-सीरिज-६४,१९२७,१९३४,१९९०

४. *न्यायलीलावती,*वल्लभाचार्य:,(भगीरथठक्कुरविवृत्ति:,वर्धमानस्य प्रकाश:, शंकरमिश्रस्य कण्ठाभरणेन-सहितं च) सं हरिहर-शास्त्री,चौखम्बा-संस्कृत-सीरिज-आफिस,वाराणसी,२००७

**५.कणादरहस्यम्:-** शंकरमिश्रेण विरचिता इयं टीका प्रशस्तपादभाष्यस्योपरि वर्तते। भवनाथमिश्रस्य पुत्रोऽयं पञ्चदशशताब्द्या उत्तरार्धे वर्तते। अयं मैथिल:, श्रोत्रियश्चासीत्। [52] पक्षधरमिश्रात् किञ्चिद् वर्षपूर्वमेवास्य जन्म-समय आसीत्। ढुण्ढिराजशास्त्रिणा उपस्कारस्य भूमिकायामस्य काल: १४०० ई. तथा च किञ्चिद् कालमस्या अनन्तरं वर्तते। बाल्यकालादेव अयमतीव–प्रतिभावान् आसीत्। [53] शंकरमिश्रस्य अन्या अपि रचना: सन्ति। ताश्च १.आमोदटीका, २.भेदरत्न, ३.कणादरहस्य, ४.उपस्कार: (वैशेषिकसूत्रम्), ५.कल्पलता (वल्लभस्य लीलावत्याम्) ६.कण्ठाभरणप्रभृतय:।

कणादरहस्य भाषा नव्यन्यायशैल्यामन्विता वर्तते। यथास्थानं श्रीधर-उदयनप्रभृतीनामुद्धरणान्यपि दीयन्ते। कणादरहस्ये चर्चिता विविधबिन्दव:-

१. पृथिव्यां गन्धसिद्धि: केवलं व्यतिरेकस्याहरणेन क्रियते।

२.तेजस:चत्वार: प्रकारा:-१.सूर्यतेज:, २.अग्नितेज:, ३.नेत्रतेज:, ४.उष्णतैलप्रभृतौ समन्वितं तेज: च।

३.तेजस अभावमात्रं तम तथा च पाकजप्रक्रियायां पीलुपाक: स्वीक्रियत इति।

---

[51] *न्यायलीलावती,* सं.राजेन्द्रप्रसाद:,हि.व्या.दुर्गाधर झा, पृ.१९-२२.

[52]. H.potter p..३९५

[53] *वैशेषिकसूत्रोपस्कार:*,हि.व्या.ढुण्ढिराजशास्त्री,सं नारायणमिश्र:,पृ. ७-१२

४.त्रय एव हेत्वाभासा: मन्यन्ते। ते च असिद्धविरूद्धसन्दिग्धाश्चेति। ५.अविद्याया: चर्चायां विपर्ययेऽन्यथाख्याति: स्वीकृता। 54

६.आश्रयसिद्धि द्विधा स्वरूपासिद्धि:, आश्रयविशेषणासिद्धिश्चेतिरूपेण उच्यते।

७. संशयोऽपि द्विधा कथ्यते। प्रथमस्तु समानवस्तुना अपरं विपरीतवस्तुतो जायते।

८. गुणस्य स्वभावो स्थैर्यं वर्तते। परिमाणं न पृथक् गुण:- यथा च पोटरेण स्पष्टीकृतम्- **"Quality is category which possesses a generality, lacks a mobile nature and is not the substratum of dimension."**[55]

अनेन प्रकारेण अस्य वैशिष्ट्यं वर्तत इति आचार्यै वर्णितम्। अस्य टीकाप्रभृतिविषये कापि सूचना न प्राप्यते।

## कणादरहस्यस्य संस्करणानि:-

१. *पदार्थधर्मसंग्रह:,* प्रशस्तपाद:,(कणादरहस्यं तर्कालंकारभाष्यं च),सं. वी.द्विवेदी, चौखम्बा-संस्कृत-सीरिज ४८, वाराणसी,१९१७

२. *प्रशस्तपादभाष्यटीकासंग्रह:* (कणादप्रभृतिसहितम्),सं विन्ध्येश्वरीप्रसाद-द्विवेदी, चौखम्बा-संस्कृत-सीरिज-आफिस,वाराणसी,पु.मु. २००७

**६.सूक्ति-टीका: –** प्रशस्तपादभाष्यस्य इयं सूक्तिटीका बंगालप्रदेशीय जगदीशतर्कालंकारेण विहिता। अस्य काल: षोडशतम: शताब्द: स्वीक्रियते। श्री निवासशास्त्रिणा अस्य समय: सप्तदशशताब्दे स्वीकृतम्। अस्येका 'सूक्तिदीपिका' नाम्ना टीकापि वर्तत इति कथ्यते। सूक्तिटीकाया अपरनामधेयानि द्रव्यभाष्यसूक्ति:, द्रव्यभाष्यटीका, भाष्यसूक्ति:, पदार्थतत्त्वनिर्णयश्च सन्तीति कथ्यते। अस्याचार्यस्य इतो भिन्नापि रघुनाथशिरोमणिकृतग्रन्थानामुपरि टीका विद्यन्ते। तासां विषये श्लोकमेकं प्रथितं वर्तते। यथा चोल्लिखितम्-

**"गुणोपरि गुणानन्दी भावानन्दी च दीधितौ, सर्वत्र मथुरानाथी जागदीशी कश्चित् कश्चित्"**[56]।

शब्दशक्तिप्रकाशिकापि अस्याचार्यस्य प्रथिता रचना कथ्यते।

सूक्तिकारस्य भाषा साधारणशैल्या: अपेक्षया उत्कृष्टा अतीव-सारगर्भिता अपवादरूपा च अस्ति; परञ्च स्वग्रन्थतत्त्वचिन्तामणि-दीधिति-प्रकाशिकापेक्षया नोत्कृष्टा इति। स्वपूर्वग्रन्थानां न्यायकन्दली, किरणावली, प्रभृतीनां प्रति सूक्तिकारेण कार्तज्ञ्यं ज्ञाप्यत इति अनन्तलालठाकुरेण स्वग्रन्थे वर्णितम्। सूक्तिकारेण पूर्वाचार्यग्रन्थानामुल्लेख: प्रमाणस्योपस्थापनार्थम्, स्वाभिमतसूचनार्थम्, वादनिवारणार्थं च कृतमिति

---

54 H.potter,pp.४१८-४२२

55 Thakur,Anantlal, p.329

56 *Ibid.*p३०१



TH22951

लिख्यते। एम्.एम्.कालिपादाचार्येण ग्रन्थसंपादकेनास्य जगदीशतर्कालङ्कारस्य प्रथमा रचना 'सूक्ति'रिति कथ्यते [57]।

**सूक्तिग्रन्थस्य टीका:-** अस्येका एव टीका 'सूक्ति-दीपिका' नाम्ना वर्तते।

## सूक्तिग्रन्थस्य संस्करणानि:-

१. *सूक्ति:*, कालीपाद-तर्काचार्य:, संस्कृत-साहित्य-परिषद्-सीरिज, कलकत्ता-१४,१९२५

२. *सूक्ति:*, *(*व्योमवती-सेतु-सूक्तिसहितम्*)*, जगदीशतर्कालङ्कार:, सं. गोपीनाथकविराज:,दुण्ढिराज-शास्त्री च,चौखम्बा-संस्कृत-सीरिज, बनारस, १९२४-३१

**७.सेतु-टीका:-**बलभद्रमिश्रस्य पुत्रोऽयं पद्मनाभमिश्र: प्रशस्तपादभाष्यस्योपरि सेतु-टीकां विरचितवान्। अस्य समय: षोडशतम्या: शताब्द्या: उत्तरार्धे स्वीक्रियते [58]। मुख्यत: काश्या निवासी अयमिति। अयं 'वीरवरीय' इति अपरनाम्ना ख्यात: तथा च न्यायवैशेषिकपरम्परायां प्रबुद्ध-विद्वान् आसीत्। सेतु-टीकेयं द्रव्यपर्यन्ता, तथा च तस्य रचनासु अन्तिमा अस्ति। उदयन-पक्षधर-वर्धमान-गंगेश-वादीन्द्रप्रभृतीनामुल्लेख: तस्य टीकासु प्राप्यते। अन्यच्च विभिन्नसंप्रदायानां सांख्य-वेदान्त-नैयायिक-मीमांसक-प्राभाकर-सौत्रान्तिक-योगाचार-आदीनामुद्धरणान्यपि पद्मनाभेन तत्र प्रस्तूयन्ते। वैशेषिकसूत्राणाण्यपि आचार्येण प्रयुक्तानि। पद्मनाभस्य वैशिष्ट्यं प्रत्यक्ष-आत्माप्रभृतिप्रकरणव्याख्यायां वर्तते। तमस् निरूपणे कन्दलीकारस्य मतानुगतिरेव अङ्गीकरोति। ग्रन्थस्य शैली व्याख्यानात्मिका, विद्वत्तापूर्णा, विस्तृता च अस्ति। आचार्योऽयं बहुप्रतिभायुक्तं वर्तते यतो हि धर्मशास्त्र-वेदान्त-साहित्य-न्यायप्रभृतीनां विषयाणामुपरि तेन ग्रन्थानि विरचितानि। तस्य वैशेषिकदर्शनसम्बद्धा रचना:-

१. वर्धमानेन्दु:

२. किरणावली भास्कर:

३. कणादरहस्यm

४. लीलावत्यनुनय:

५. सेतु-टीका (प्र.पा.भा.) च। [59]

---

57 Thakur,Anantlal, p.३०१-३०२

58 *प्रशस्तपादभाष्यम्*,सं.हि.अनु. श्रीनिवासशास्त्री,पृ.१५

59. Thakur,Anantlal, p p.३०३-३०४

## सेतुटीकाया: संस्करणानि:-

१.*सेतु:,(*व्योमवती-सूक्तिसहितम्),जगदीशतर्कालङ्कार:, सं.गोपीनाथ कविराज:, दुण्ढिराज-शास्त्री च, चौखम्बा-संस्कृत-सीरिज, बनारस, १९२४-३१

२.*सेतु:,* जगदीशतर्कालङ्कार:, वी.पी.द्विवेदी, दुण्ढिराजशास्त्री च, चौखम्बा-संस्कृत-सीरिज-आफिस, वाराणसी, पु.मु.२००७

**८.प्रशस्तपादभाष्य-भावप्रकाशिका:-** प्रशस्तपादभाष्यस्य टीकेयं गोपीनाथकृता वर्तते। अस्य पितुर्नाम नारायण:, स च मीमांसकलेखक आसीत्। इयं टीका पाण्डुलिपिरूपेण गवर्नमेंट-ओरियन्टल-मैन्यूस्क्रिप्ट-लाइब्रेरी इत्यस्मिन् सुरक्षिता विद्यते। उदयनस्य किरणावल्या: तथा च न्यायलीलावत्या: प्रकाशे आगते सति प्रशस्तपादस्य महत्वं यदा न्यूनं जातं तदा पठने क्रमिकतानयनार्थं टीकेयं विरचितेति अनन्तलालठाकुरेण सूचितम्। इयं टीका द्रव्यपर्यन्तं विद्यते। ग्रन्थस्य भाषाशैली विषयिणी चर्चापि आचार्येण न क्रियते। न च जन्मादिविषयकं किञ्चिद् वर्ण्यते। अस्यां टीकायां मध्ये मध्ये शब्दानां लोपो दृश्यत इति अनन्तलालठाकुरेण उल्लिख्यते। अस्यां टीकायां किरणावली, वार्त्तिकम्, शाब्दमणि: (तत्त्वचिन्तामणि:) प्रभृतीनां ग्रन्थानामुद्धरणानि मिलन्ति। बौद्धानां पक्षोऽपि गोपीनाथेन गृह्यते। यथा च श्लोक:-**'एकं चेत् चित्रता कस्मात् चित्रं चेद् एकता** *कुत:,* **तस्माद् एकं च चित्रं चेत्येतत् चित्रतरं महत्'।** अस्य शब्दपरिवर्तनमात्रम् एव अन्येषु वैशेषिकदर्शनग्रन्थेषु उद्धरणं प्राप्यते। यथा च कन्दल्याम् - "**एकं च चित्रं चेत्येतत् तच्च चित्रतरं तत:**"[60]। अन्यच्च वैशेषिकसूत्राणाम् उद्धरणानि अपि साधारणतया आचार्येण दीयन्त इति। ग्रन्थोऽयं जगन्नाथगिरीशयो कार्तज्ञ्यज्ञापनरूपमङ्गलाचरणं विधीयते। यथा च तत्र उद्ध्रियते- **"गिरीशो यातु मां नित्यं गिरीश-वस्तौ रत:, गिरीशतनयाक्रान्त-गिरीशार्चितविग्रह:"** [61] अनेन प्रकारेण टीकाया विवरणं अनन्तलालठाकुरेण स्वसंपादितग्रन्थे प्रदत्तम्।

**९.लीलावती:-**श्रीवत्साचार्यरचित टीकेयं सन्दिग्धा वर्तते। पञ्जिकाकारेण प्रशस्तपादभाष्यस्य टीकागणनायामस्या उल्लेखो विधीयते तद्यथा- **"एकां व्योमवती नाम्नींव्योमशिवाचार्यो जुगुम्फ। द्वितीयो तु न्यायकन्दलीत्यभिधानांरीधराचार्य: सन्ददर्भ, तृतीयां किरणावली नाम्नीमुदयानाचार्यस्ततान। चतुर्थी तु लीलावतीति ख्यातां श्रीवत्साचार्यो वबन्ध"। चतस्रोऽपि गम्भीरार्था:**[62] विद्वद्भि: अत्र त्रुटिकारणात् न्यायलीलावती-टीका इति नाम स्वीक्रियते परञ्च एकस्मिन् स्थाने तु त्रुटि भवितुमर्हति परञ्च उभयो नाम्नी न त्रुटि अङ्गीकर्तुं शक्यते। अन्यच्च यस्मिन् प्रकरणे एतासामुल्लेखं तत्प्रकरणं सुसम्बद्धं वर्तते। अतएव लीलावती नाम्नी टीकासीद् इत्यत्र न संशय:।

---

60 *न्या.कं.प्र.पा.भा.* पृ. ७६

61 Thakur,Anantlala, p. 299-300 (Manuscript,ICPR. pp 1-275 ibid-pp-39,114157

62 टी.न्या.कं.पृ.२

**१०.भाष्यनिकष:-** इयं टीका प्रशस्तपादभाष्यस्योपरि मल्लिनाथेन विहिता। टीकेयं नोपलभ्यते।[63] अस्य समय: १४५० ई.मध्ये मन्यते। एच. पोटरेणास्य पाण्डुलिपिविषये सूचना-कृते न्यू कैटेलोगस केटेलोगोरमित्यस्य उद्धरणं दीयते। अस्य नाम 'निष्कान्तिका' इति तत्र कथ्यते।[64]

**११.शालिकनाथकृतव्याख्या:-** प्रशस्तपादभाष्यस्योपरि इयं व्याख्या प्रभाकरमीमांसकेन कृता। डी.सी भट्टाचार्येणास्य कालो दशमशताब्दस्य पूर्वार्धेऽङ्गीकृतम्। अतएव अस्यावस्थिति वैशेषिक-इतिहासस्य अन्धकारकाले तिष्ठति। अन्यच्च व्योमशिवात्पूर्वमयमाचार्यो इति अनन्तलालठाकुरेण आशङ्क्यते। वैशेषिकसूत्रप्रभृतीनामपि तस्य ग्रन्थात् उद्धरणानि प्राप्यन्ते[65]। अस्योपलब्धि: संदिग्धा वर्तते [66]। दुण्ढिराजशास्त्री अस्य प्रमाणे तर्कभाषाप्रकाशिकायां दत्तमुद्धरणं कथयति- **"मृत्तपिण्ड पाषाणादि लक्षण...व्यतिरिक्त: विषय इति शालिकनाथ: प्रशस्तपादभाष्य-व्याख्याने न्यरूपयत्"[67]।**

**१२.पदार्थप्रवेशनिर्णय:-**अभिनवगुप्तेनापि प्रशस्तपादभाष्यस्य पदार्थप्रवेशनिर्णयनाम्ना टीका विरचिता इति श्रीनिवासशास्त्रिणा स्वानुवादितप्रशस्तपादभाष्य उद्ध्रियते। इयं टीका अनुपलब्धा इत्यपि तत्र कथ्यते [68]।

**१३.वैशेषिक-भाष्य-विवरण:-** पदार्थधर्मसंग्रहे एका अपरापि टीका गोपीनाथेन स्वबिब्लियोग्राफीत्य - स्यामुल्लिख्यते। गौरीनाथसार्वभौमकृत भावार्थदीपिकायामस्या उल्लेख इति गोपीनाथेन उक्तम्। इयं तर्कसंग्रहटीकापि पाण्डुलिपिरूपेण सरस्वती-भवन-लाइब्रेरी-मध्ये वर्तते। प्रशस्तपादभाष्यस्य इयं टीका पाण्डुलिपिरूपेण गवर्नमेन्ट-संस्कृत-पुस्तकालये विद्यत इति।[69]

**न्यायकन्दली:-** न्यायकन्दल्या रचना श्रीधरेण विहिता। श्रीधरस्य जन्मकाल: ९९१ ई. इत्यस्याम् अर्थात् दशमशताब्दे मन्यते। अस्य पितुर्नाम बलदेव मातुश्च अब्बोका इति आसीद्। अस्य जन्म गौडराज्ये राढापुरी इत्यस्यान्तर्गत भूरिश्रेष्ठि: इति नाम्ना ख्यातग्रामेऽभवत्। यथा स्वग्रन्थस्यान्ते श्लोक: लिखति- **"आसीद् दक्षिणराढायां द्विजानां भूरिकर्मणाम्।**

**भूरिसृष्टिरिति ग्रामो भूरिश्रेष्ठिजनाश्रय:"।** [70]

वर्तमानसमये ग्रामोऽयं हुगली-जनपदे 'भुरसृट' इति अभिधेयेन ख्यातं वर्तते [71]। श्रीधराचार्य: कुमारिलसंप्रदायसम्बद्धमासीत् इत्यपि कथ्यते। न्यायकन्दल्या: रचना श्रीधर: पाण्डुदासस्य प्रार्थनया प्रेरितो

---

63 कुमार,शशिप्रभा, *वैशेषिक दर्शन में पदार्थ निरूपण,* विद्यानिधि प्रकाशन,देहली.१९९२.पृ.१६

64 H,Potter,vol1.sec.1p.५३१

65 *तत्रैव,* पृ.२५२

66 *वैशेषिकदर्शनम्,* सं. हि..अनु. उदयवीरशास्त्री,पृ १७

67 शा.,दुण्ढिराज, *हि. वै. द., प्र.पा.भा.* पृ.३१

68 *प्रशस्तपादभाष्यम्,* सं.हि.श्रीनिवासशास्त्री,पृ.१६

69 Kaviraj Gopinath, p.p.९०-९१

70 *न्या.कं.* प्र.पा.भा,पृ.७८७

भूत्वा अकरोत्। न्यायकन्दल्या: रचना ९१३ इति शकाब्दे जातेति श्लोक: कन्दलीकार: स्वग्रन्थस्यान्ते कथयति। उक्तं च-

**"त्र्यधिकदशोत्तर-नवशतशाकाब्दे न्यायकन्दली रचिता, श्रीपाण्डुदासयाचितभट्टश्रीश्रीधरेणेयम्"**[72]।

न्यायकन्दल्येका सुमेरुशृङ्गस्य पत्राणामिव अतीव-रमणीया,[73] सर्वातिशायिनी, सर्वोत्तरस्था, परप्रसिद्धसिद्धान्तदलने[74] च समर्था चास्ति। अस्यां बौद्धानां खण्डनं विशिष्टरूपेण विहितम्। योगशास्त्रम्, सांख्यम्, कुमारिल:, मण्डनमिश्रप्रभृतीनां उद्धरणानि तथा च अपरे, केचित्, कश्चित् परादिशब्दैरपि अपि अन्येषां मतानाम् उल्लेख: खण्डनं च विधीयते। व्योमशिवस्य मतखण्डनं श्रीधरेण विहितमिति राजशेखरस्य पञ्जिकया ज्ञायते। मण्डनमिश्रस्य मतं श्रीधरेण स्वमतस्थापनार्थमपि प्रयुज्यते। मण्डनमिश्रस्य कन्दल्यां त्रिधा उल्लेखो प्राप्यते। मण्डनमिश्रमतस्य खण्डनं केवलं स्फोटसिद्धौ एव विधीयते। [75] बंगाले कन्दली-टीकाया उद्भव: कंटकवदासीत् इति अनन्तलालठाकुरेण सूच्यते।

**श्रीधराचार्यस्य कृतय:-** श्रीधराचार्यस्य अन्या अपि रचना: प्राप्यन्ते। ता: अद्वयसिद्धि:(वेदान्तस्य), तत्त्वप्रबोध:(मीमांसा), तत्त्वसंवादिनी, न्यायकन्दली च वर्तन्ते। न्यायकन्दलीं व्यतिरिच्य सर्वा विलुप्ता एव जाता इति। [76] अद्वयसिद्धि इति रचनाया उल्लेखस्तु कन्दल्याम् आचार्येणापि विहितम्। न्यायकदली प्रशस्तपादभाष्यस्य उपलब्धटीकासु द्वितीया टीका वर्तत इति पञ्जिकायामुल्लिखितक्रमेणापि ज्ञायते[77]। इयं टीकातिविशदा सरसभाषायां विद्यते। पश्चाद्वर्त्ति-आचार्यैरपि अस्य प्रामाण्यं मन्यते। गोपीनाथेन स्वटीकायामुद्ध्रियते यत् न्यायकन्दल्या: प्रयोगो बंगाले मिथिलायां च न्यूनं जातं परञ्च स्वयं न स्वीकरोतीति। [78] श्रीधर-उदयनयो: समये न्यूनभेदकारणाद् दर्शनाद् च उभयो व्याख्ययो परस्परं परिचयमासीदिति ढुण्ढिराजशास्त्रिणा उच्यते [79]। विद्वत्सु उभयो: पौर्वापर्यमध्ये वैमत्यं दरीदृश्यते। किरणावल्या अपेक्षया न्यायकन्दली विशदा शैथिल्ययुक्ता च वर्तते। अनेन न्यायकन्दल्या पूर्ववर्त्तित्वमपि कथ्यते[80]।

---

[71] गुह, दिनेशचन्द्र, झा-किशोरनाथ हि.रुपा, *न्याय-परिचय*, चौखम्बा विद्याभवन,वाराणसी,१९६८,पृ.१३ (भूमिका)

[72] *न्या.कं. प्र.पा.भा*, पृ.७८८

[73] सुमेरो: शृङ्गवीथीव टीकेयं न्यायकन्दली। *तत्रैव*, पृ.७८७

[74] परसिद्धान्तान् दलति न्यायकन्दली। *तत्रैव*, पृ.७८७

[75] Thakur,Anantlal,.pp.२६६-२६७

[76] *तत्रैव*, पृ. २६७

[77] *टी.न्या.कं.* पृ.२

[78] Kaviraj Gopinath,pp.२७-२८

[79] शा. ढुण्ढिराज,*हि.वै.द..प्र.पा.भा.* पृ.३१(भूमिका)

[80] *प्रशस्तपादभाष्यम्*,सं.हि.अनु.श्रीनिवासशास्त्री,पृ१४ (भूमिका)

## न्यायकन्दली-विषये युक्तय:-

१.कन्दलीकारकृत टीकायां प्रत्येकपदार्थस्य प्रारम्भे मङ्गलाचरणं ब्रह्माविष्णु- महेशादीनां नमस्कारपूर्वकं विधीयते। पदार्थेषु षड्पदार्थाणामेव चर्चात्र विहिता।

२.अभावपदार्थस्य पृथग्रूपेण अनभिधाने तत्र अत्यन्ताभाव: कारणत्वेन कथयति। उक्तं च अनुमानप्रकरणे-

**"अत्यन्ताभावे तु सर्वथा असद्भूतस्यैव बुद्धवारोपितस्य देशकालानवच्छिन्न: प्रतिषेध:। यथा षड्पदार्थेभ्यो नान्यत् प्रमेयमस्तीति। यदि चात्यन्ताभावो नेष्यते, षडेव पदार्था इत्ययं नियमो दुर्घट: स्यात्"**[81]।

३.मङ्गलाचरणप्रकरणे सोल्लेखपूर्वकं सांख्यबौद्धवेदान्तप्रभृतीनां मतखण्डनं विधीयते। वैशेषिकमतस्य सुरक्षा सर्वत्रैव विधीयते। अन्यच्च यत्र तत्र आवश्यकतानुसारं श्रुतिप्रभृतीनामुद्धरणान्यपि उपस्थाप्यन्ते।
४.आत्मासंख्यानुमानप्रकरणानामतिविशदा व्याख्या आचार्येण प्रस्तूयते। भाष्यभिन्नप्रकरणानामपि चर्चा यथा मङ्गलाचरणे, आत्मनि, अनुमाने, पाकजप्रक्रियायाम्, संख्याप्रभृतिषु खण्डन-मण्डनं चेति वर्तते।

५.अस्याचार्यस्य एतदपि वैशिष्ट्यम्, यद्यपि अयं वेदान्तमीमांसाग्रन्थरचनां कृतवान् तथापि एतेषां मतखण्डने न पक्षपातो अवलोक्यते अपितु वैशेषिकमतस्यैव पुष्टि: क्रियते।

६. भाभावस्तम: न तु तेजस अभाव:। नीलत्वस्य तु तमसि आरोप एव वर्तत इति।

७.अन्यच्च सर्वत्र वैशेषिकसिद्धान्तानां सुरक्षा विधीयते यतो हि परसिद्धान्तानां दलनमेव अस्या उद्देश्यमिति कन्दलीकारेणैव सूच्यते।

**न्यायकन्दल्या: टीका:-**न्याकन्दल्या उपरि पञ्चटीकानां विवरणं प्राप्यते। तासु तिस्र एकस्मिन्नेव संस्करणे १९९१ तमे वर्षे वडोदरात: प्रकाशिता। न्यायकन्दल्या टीकासु राजशेखरकृता न्यायकन्दली-पञ्जिका, पद्मनाभकृत-न्यायकन्दलीसारश्च प्रमुखे स्त इति श्रीनिवासशास्त्रिणा उच्यते [82]। न्यायकन्दलीसार:,न्यायकन्दलीप्रकाशश्च टीके अनुपलब्धे स्त:। यथाक्रमं सर्वासां विवरणं तृतीयाध्याये प्रस्तोस्यते। .

## न्यायकन्दल्या: संस्करणानि:-

१.*न्यायकन्दली,* श्रीधर:(पदार्थधर्मसंग्रह-सहितम्),विजयङ्ग्राम-संस्कृत-सीरिज, १८९५

२.*न्यायकन्दली,* श्रीधर:, दुर्गाधर-झा-शर्मा, गङ्गानाथ-झा-ग्रन्थमाला, वाराणसी, १९६३,१९७७

३.*न्यायकन्दली,* श्रीधर:, अनु.गङ्गानाथ-झा, द पण्डित.एन.एस.,बनारस-२५, १९०३-३७, १९१५, एन.एस.१(१८८६)-४२(१९२०)

---

81 *न्या.कं.प्र.पा.भा.* हि.अनु.दुर्गाधर-झा,१९९७,पृ.५५८

82 *प्रशस्तपादभाष्यम्,* सं. हि.अनु.श्रीनिवासशास्त्री,पृ.१५

४. *न्यायकन्दली*,(टीकात्रयोपेता) श्रीधरः, सं. जे.एस.जेटली, वसन्त-जी-पारीखश्च, ओरियन्टल-रिसर्च-इंस्टीट्यूट,वडोदरा, १९९१

५. *न्यायकन्दली*,श्रीधरः,हि. अनु.दुर्गाधर-झा, संम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः , वाराणसी,१९९७

प्रशस्तपादभाष्यस्य टीकोपटीकासम्बद्धा सर्वा सूचना मुख्यतो गोपीनाथस्य बिब्लियोग्राफीं, पोटरस्य विश्वकोशम्, अनन्तलालठाकुरसंपादित- द ओरिजन एण्ड डेवल्पमेन्ट आफ द न्याय-वैशेषिक इत्यमुमाधारीकृत्य लिखिता वर्तते। अन्यच्च एतेभ्यो भिन्नानां ग्रन्थानां सार्धमेवोल्लेखो विहितः।

# तृतीयोऽध्यायः

## न्यायकन्दल्याः टीकाः

## न्यायकन्दल्या: टीका:-

न्यायकन्दल्या[1]उपरि पञ्चटीकानां विवरणं प्राप्यते। तासु तिस्र एकस्मिन्नेव संस्करणे १९९१तमे वर्षे वडोदरात: प्रकाशिता। न्यायकन्दल्या: टीकासु राजशेखरकृता न्यायकन्दलीपञ्जिका, पद्मनाभकृत-न्यायकन्दलीसारश्च प्रमुखे स्त इति श्रीनिवासशास्त्रिणा उच्यते[2]। न्यायकन्दलीसार:, न्यायकन्दलीप्रकाशश्च टीके अनुपलब्धे स्त:। यथाक्रमं सर्वासां विवरणमध: प्रस्तूयते ता: च –

| टीकाया: नाम | टीकाकारस्य नाम | समयप्रभृतिसूचना |
|---|---|---|
| १. न्यायकन्दलीसार: (अनुपलब्ध:)[4] | पद्मनाभमिश्र: | १६तम-शताब्दे[3] |
| २.न्यायकन्दली-प्रकाश: | राजशेखर: | (१३५०ई.) अनुपलब्ध:[5] |
| ३.न्यायकन्दली-टिप्पणम् | नरचन्द्रसूरि: | (१३ई.शताब्द:)उपलब्धा.प्रकाशिताच |
| ४. न्यायकन्दली-पञ्जिका | राजशेखर: | (१५ई.शताब्द:)उपलब्धा, प्रकाशिताच |
| ५.न्यायकन्दली-कुसुमोद्गम: | शिडिलवोम्मिदेव: | उपलब्धा,प्रकाशिताच[6] |

उपर्युक्तासु पञ्चसु टीकासु अन्तिमानां तिसृणां प्रकाशनमेकस्मिन् एव संस्करणे१९९१ई. तमे वर्षे वडोदरात: जातम्।

**१.न्यायकन्दली-टिप्पणम्:-** नरचन्द्रकृतटीकेयं सर्वाभ्यो प्राचीना नातिविशदा विद्यते। अस्य जैनाचार्यस्य नरचन्द्रस्य समय: १२१०ई. इति पोटरेण स्वीक्रियते।[7] अयं वेदप्रभसूरिहर्षपुरी यस्य शिष्यो मल्लधारिगच्छानुयायि चासीद्।'पृथिवीधारा'इति नाम्ना प्रसिद्ध:, तस्य न्यायदर्शनपाठको गुरु: आसीद्। वस्तुपालगुरो अयमाचार्यो व्याकरणम्, साहित्यम्, त्रयीविद्यां च पठितवान्[8]। नरचन्द्रस्य देहावसानं भाद्रपदमासस्य कृष्णपक्षीये दशमे शताब्दे १२३१(१२८७) ए.डी. मध्ये जातमिति कथ्यते। अयं

---

[1]न्यायकन्दल्याविवरणंतुद्वितीयाध्यायेविहितम्, अत: तस्या: टीकाविषयकं वर्णनमत्र पुनर्नक्रियते।

[2] *प्रशस्तपादभाष्यम्*,सं.हि.अनु.श्रीनिवासशास्त्री,पृ.१५

[3] पद्मनाभस्यसमय: षोडशतमे शताब्दे , अतो न्यायकन्दलीसारस्यापि तदेवकाल इति कथयितुं शक्यते।

[4] Thakur, Anantlal,p.३०३

[5] H. Potter,p.१० इत्यत्रसूचिता

[6] *टी. न्या. कं. पृ.२*

[7] H. Potter,p.४४३

[8] Thakur, Anantlal, p.२७७

ब्राह्मणपण्डितो जैनाचार्यो वा न स्पष्टतया ज्ञायत इति ग्रन्थसंपादकेन लिख्यते।[9] टिप्पण-टीकाया: रचना १३२७ई. मध्ये जाता इति ग्रन्थकार: स्वयमेव श्लोकं लिखति। तद्यथा-

**"मुनिनयनयक्षसंख्येवर्षेस्वपरार्थसिद्दयेसुधिया।**

**लिखितमिदंकन्दल्या: टिप्पनकंकमुदचन्द्रेण"**[10]॥

नरचन्द्रस्य अन्येऽपि ग्रन्था: सन्ति इत्येवमुच्यते। तद्यथा-

१.मुरारिण: अनर्घराघवस्योपरिटीका

२.प्राकृतप्रबन्ध:(प्राकृतस्यव्याकरणम्)

३.कठारत्नाकर: (जैनाचार्यवस्तुपालस्योपरि)

४.चतुर्विंशति-स्तोत्रम्

५.वस्तुपालप्रशस्ति:

६. गिरनारस्याभिलेखेषुज्योतिषस्योपरिकार्यं 'नरचन्द्र'नाम्नाप्रसिद्धमितिकथ्यते।

७.'पाण्डवचरित'नाम्नाजैनानुवाद: महाभारतस्यविहितम्।[11]

न्यायकन्दल्या सह संपादितटिप्पणटीका तिसृणां पाण्डुलिपिनामाधारेण संपादितेति। ग्रन्थे संपादिता न्यायकन्दली चतसृणां पाण्डुलिपीनामाधारेण कृतम्। एता: पाण्डुलिप्य: जैसलमेरस्थ 'बडाभण्डार' इति स्थानात् प्राप्ता:।

टिप्पणे प्रतिपादितविषयाणां विषये केचन बिन्दव अधोलिखिता: सन्ति–

१.सर्वप्रथमम् अर्हन् नमस्कृत्य ग्रन्थोऽयं प्रारब्ध:। 'कन्दलीटिप्पनारम्भसंरम्भ: क्रियते मया'[12]इति कथयित्वा टीकाया: प्रारम्भ: कृत:। २. मंङ्गलाचरणे कन्दलीमतमेवानुस्रियते परञ्च व्योमवतीकारस्य मतं स्पष्टीक्रियते आचार्येण - यथा- **"नमस्कार: कृत एव क्त्वा प्रत्ययेनानूद्यते इति व्योमशिवेन व्याख्यातम्, तद्विधिनिषेधाभावान्निष्प्रयोजनमिति दूषयिष्यन् अन्यथा व्याचष्टे"**[13]। ३. तमसो न पृथग्द्रव्यत्वम् अपितु तेजस: अभावमात्रत्वमेव विद्यत इति कन्दलीभिन्नं मतं प्रतिपादितम्। [14] ४.टिप्पणकारस्य तर्ककरणे नैपुण्यं

---

9 *न्या.कं.टी.*, पृ.vii(भूमिका)

10 *तत्रैव*, पृ.६९९

11 *टी.न्या.कं.* पृ.vi(भूमिका)

12 *तत्रैव*, पृ.१

13 *टी.न्या.कं.* पृ.७

14 तमो द्रव्यं न भवति, तेजो द्रव्यान्यत्वे सति आलोकानपेक्षचक्षुर्ग्राह्यत्वाद् आलोकाभाववत्। *तत्रैव*, पृ.३६

विद्यते। श्रीधरप्रतिपादितमतान्तराणामपि संक्षेपटिप्पणी तत्तत् स्थानेषु एव विधीयते।५. अभावपदार्थस्य पृथगनुल्लेखे भावपारतन्त्रयं प्रतियोगिनिरूपणाधीनत्वमेव कारणं नरचन्द्रेण कथ्यते।[15]६.नवद्रव्येभ्य: पृथक् द्रव्यस्याकथने शशविषाणवाक्यवत् प्रमाणाभाव: कथ्यते यथा- **"नवद्रव्यातिरिक्तं द्रव्यमस्तीति वाक्यमनर्थकम्, प्रमाणानुपलभ्यमानार्थत्वात्, शशविषाणमस्तीति वाक्यवद् इति प्रमाणम्"**।[16] ७.क्षणिकवादे,चित्ररूपे,अपेक्षाबुद्धौ, हेत्वाभासे, प्रमाणसमाख्याविषये च नरचन्द्रेण विशिष्टं व्याख्यानं विहितमिति वसन्तपारीखेण ग्रन्थभूमिकायां सूच्यते[17]। ८. नरचन्द्रेण गुणेषु व्याख्यानमति संक्षेपेण विहितम्। सुखगुणतो धर्मगुणपर्यन्तं केवलं टिप्पणटीका एव अतीव संक्षेपेण प्रोच्यते। इच्छागुणपर्यन्तमेव गुणेषु टीका विद्यते। ९.योगजप्रत्यक्षे कन्यायाः यदुदाहरणं कन्दलीकारेण दीयते, तत्र उच्यते यत्कुमारिणा -मपि आर्षप्रत्यक्षे योगजधर्माभावाद् न सहकारितम्। यथा च कथयति- **"योगिप्रत्यक्षे योगजो धर्म: सहकारी, आर्षे तु नायं कुमारिकाणां योगजधर्माभावाद् इति द्वयोर्विशेष:"**[18]। १०. सुवर्णस्य तेजस्त्वसाधने टिप्पणकारेण अनुद्भूतरूपमित्यस्यार्थ: पृथिव्याद्यभिभूतैरित्यर्थो गृह्यते। यथाचलिखति- **"यदिरूपमनुद्भूतं स्यात् पिशाचादिवत्सुवर्णं नोपलभ्येत तस्मादत्रानुद्भूतमिति तथाविध पार्थिवोपष्टम्भद्रव्यैरभिभूतमिति व्याख्येयम्"**[19]। ११.पदार्थप्रकरणे कर्मविशेषपदार्थयो उपरि टिप्पणटीका न विद्यते। सामान्ये समवाये च पदार्थे टीकेयं समस्तरीत्या विधीयते।

एवं प्रकारेण टीकेयं स्वाभिधेयं साधयन्ती वर्तते। टिप्पणस्य भाषा सरला समस्ता च वर्तते। पश्चाद्वर्त्तिटीकाकाराणामुपरि अस्या: प्रभावो स्पष्टतया द्रष्टुं शक्यते। स: स्वकारुणिकतया श्रद्धया च ग्रन्थस्योद्देश्ये साफल्यं लब्धवान् इति संपादकेनोच्यते[20]।

**२.न्यायकन्दली-पञ्जिका:-** न्यायकन्दल्याः द्वितीया टीका राजशेखरेण विरचिता। राजशेखरस्य समय: चतुर्दशतमः शताब्दः इति स्वप्रबन्धकोशाद् ज्ञायते। राजशेखर: तिलकसूरिशिष्य:[21] हर्षपुरीयगच्छेन सह सम्बद्ध आसीत्। कन्दल्या अध्ययनं राजशेखरेण जिनप्रभगुरो: कृतम्। राजशेखरो बहुप्रतिभायुक्त: विद्वान् आसीत्।

**राजशेखरस्य रचना:-**राजशेखरस्य अन्या अपि बह्व्य: रचना सन्ति। तासामुल्लेख अधोविधीयते- १.प्रबन्धकोश:, २.स्याद्वादकारिका, ३.रत्नावतारिका-पञ्जिका, ४.कौतुककथा, ५.षड्दर्शनसम्मुच्चय:,

---

15 भावपारतन्त्रयं प्रतियोगिनिरूपणाधीननिरूपणीयत्वम्, प्रतियोगी च विरोधी। टी.*न्या.कं.* पृ.२५

16 *तत्रैव*, पृ.३१

17 *तत्रैव*, पृ.viii(भूमिका)

18 *तत्रैव, पृ.*६०१

19 टी.न्या.कं,पृ.८१

20 *तत्रैव*, पृ. (भूमिका)

21 *तत्रैव*, पृ.१० (भूमिका) श्रीतिलकसूरिशिष्य: सूरि: श्रीराजशेखरोजयति।

६.अन्तर्कथा-संग्रह:, ७.दानत्रिंशिका,८.न्यायकन्दली-पञ्जिका[22], ९.स्याद्वादकलिका तथा च १०.न्यायकन्दली-प्रकाश[23]इति।

राजशेखर: पञ्जिकाया: पाण्डुलिपे: प्रतिद्वयं लब्धवान्। ग्रन्थस्य एका पाण्डुलिपि: अहमदाबादे विमल गच्छस्य भण्डार उल्लिखिता परञ्च पाण्डुलिपिसूच्यां न तस्य उल्लेख: प्राप्त:। बहुकालानन्तरं जेटलीमहोदयेन अपरस्या: अन्वेषणं विहितम्। उभयो: प्रथमे पृष्ठे विलुप्ते आस्ताम्। एका लिपि: पूर्णा सप्तदशाधिक-एकशतपृष्ठयुक्ता, अपराचपञ्चसप्ततिपृष्ठयुक्ता अपूर्णा आसीत्। अस्या: टीकाया: रचना १२२६ शकसम्वत् मध्ये जातेति कथ्यते[24]। अनुमानस्य अवयवप्रकरणात् सामान्यपदार्थपर्यन्तं पाण्डुलिपे: पृष्ठानि विलुप्तानि आसन्निति आचार्येण सूच्यते । एतस्माद् कारणाद् तत्र टीकापि न समुपलभ्यते। टीकेयं टिप्पणस्यापेक्षया बृहती परञ्च कुसुमोद्गमस्यापेक्षया लघ्वी अस्ति। इयं टीका निबन्धरूपिण्यस्ति। संपादितग्रन्थेऽपि कालक्रमानुसारेणास्या द्वितीयस्थाने निर्देशो विहित:। न केवलं कणादप्रभृतीनामुल्लेख: अपितु जैमिनीया:, प्राभाकरा:, मण्डनमिश्र:, धर्मकीर्ति:, उदयन:, भूषणकारश्चापि तत्रोल्लिखिता:।

**पञ्जिकाविषये मुख्यबिन्दव:-**

१.श्रीधरकृत-मङ्गलाचरणव्याख्यायां राजशेखरेण कथ्यते यत्श्रीधरो वैष्णवो यतोहि शिवनमस्कारश्लोके ईश्वरनमस्कारं विहितवान् , द्वितीये पद्ये च स्वेष्टं विष्णुं नतवान्। २.कणादं प्रति ईश्वर: प्रसन्नो भूत्वा उलूकरूपे षट्पदार्थशिक्षां प्रदत्तवानिति पञ्जिकाकारेण स्वटीकायां वर्ण्यते[25]। एतस्मादेव कारणात् दर्शनस्य नाम औलूक्यं कथ्यत इति स्पष्टीक्रियते। अन्यच्च व्योमवतीप्रभृतीनां टीकापरम्परामपि यथाक्रमम् आचार्य: स्वग्रन्थे निरूपितवान्। ३.भावपारतन्त्र्यकारणादेव न अभावपदार्थस्य पृथगुल्लेख इति टिप्पणवदेव स्वीकरोति। ४.सांख्यबौद्धवेदान्तन्यायमीमांसकप्रभृतीनामुद्धरणानि आचार्येण दीयन्ते। ५.भाभाव: तम इति कन्दलीमतमेव मन्यते यथा च कथितम्-"**न पुनर्मुख्यतया तमसोऽभावख्यापनपरमिति श्रीधराभिप्राय:**"[26]। ६.चतुर्विंशतिगुणा इतिव्यवहार संपादनार्थमेव न तु चतुर्विंशतिसंख्यागुणेषु वर्तत इति। ७.कन्दलीभिन्नानि उदाहरणान्यपि पञ्जिकाकारेण प्रस्तूयन्ते। ८.अनुमानस्य अवयवप्रकरणान्तरम् इयं टीका केवलं विशेषे समवायपदार्थे च उपलभ्यते; मध्यभागे न तस्य उपलब्धिरिति। गुणेषु बुद्धिपर्यन्तमेव टीका उपलभ्यते यतोहि अस्मिन् प्रकरणे पाण्डुलिपि विलुप्ता स्यादिति भूमिकायामेव ग्रन्थसंपादकेन निर्देशो विहित:। ९.सुवर्णस्य तैजस्त्वे पञ्जिकाकारेण कथ्यते यत् सुवर्णस्य अप्रकटरूपेण एव परप्रकाश्यत्वं तथा च तस्य तेजस्त्वं तु स्वभावेन एव वर्तत इति निरूपितम्। १०.राजशेखरस्य मतम्मिदं यत् शबरस्वामि - पक्षिलस्वामिनौ न चाणक्यभिन्नौ यथा च लिखति-"**पक्षिलस्वामी न्यायभाष्यकारश्च चाणक्य:**"[27]।

---

22 Thakur,Anantlal,p.२७८

23 H. Potter,p.१०

24 दुर्गवृत्तिगरूचादिगणस्य श्रीजिनप्रभमुनिप्रभुरेताम्। पञ्जिकां समुपनीय विनेते(वितेने) वृत्तिमल्पमतिबोधनिमित्तम्।

25 *टी.न्या.कं* पृ.२

26 *तत्रैव*, पृ.३६

27 *तत्रैव*, पृ..६

११.श्रीधरविहितव्योमवत्याः मतखण्डनमपि पञ्जिकाकारेण सूच्यते[28]। १२.टिप्पणकारस्योद्धरणमपि विभागप्रकरणे आदरपूर्वकं प्रस्तौति। **यथा-"तत्र च श्रीनरचन्द्रटिप्पनक व्याख्यानमनुरुन्ध्यते**[29]। १३.अन्यदपि वैशिष्ट्यं यत् स्वमन्दमतित्वं सूचयित्वा विशदार्थे टिप्पणटीका द्रष्टव्या इति टिप्पणमतानुसरणकाले पञ्चभूतशरीरवर्णने कथ्यते[30]। अनेन प्रकारेण टीकेयं विशिष्टा वर्तते।

**पञ्जिकाया: संस्करणानि:**–सर्वप्रथमं जे. एस जेटलीमहोदयेन अस्या निर्देश अन्ताराष्ट्रियसम्मेलनस्य पत्रिकायां कृतः।जेटली,जे एस. दपञ्जिका आफ राजशेखरसूरि, प्रोसिडिंग आफ आल इण्डिया ओरियन्टल-कान्फ्रेन्समध्ये, पञ्जिकाग्रन्थ: तस्य समयश्च सूची बद्ध रूपेणविहित:,१-३६(१९८६-१९८७),२२,१९६५(२३९-२४०)। अस्यैव टीकाया उपरि वसन्तपारीखेण जर्नल-आफ-ओरियन्टल-इंस्टीट्यूट्-बडोदरामध्ये शोधपत्रं प्रकाशितम्।

*१.टीकात्रयोपेता(न्यायकन्दली),*सं. जे.एस.जेटली,वसन्तजीपारीख:च, ओरियन्टल-इंस्टीट्यूट, वडोदरा, १९९१

**३.न्यायकन्दली-प्रकाश:-** न्यायकन्दल्या एकापरा टीका राजशेखरेण कृता इत्यस्यापि उल्लेख: प्राप्यते। इयं टीका न उपलभ्यते। राजशेखरेण पञ्जिकाटीकायामपि नास्योल्लेखो विधीयते। अस्या: काल: १३५०ई इतिकथ्यते। अस्या उल्लेख: एच. पोटरेण स्वग्रन्थे विहित: [31]।

**४.न्यायकन्दली-सार:-** न्यायकन्दलीसारस्य रचना पद्मनाभमिश्रेण विहिता। इयं टीका अनुपलब्धा वर्तते। पद्मनाभस्य समय: षोडशतमी शताब्दी स्वीक्रियते।[32]

**५.न्यायकन्दली-कुसुमोद्गम:-**कुसुमोद्गमटीका शिडिलवोम्मिदेवेन विहिता। वोम्मिदेवो नृपो ब्रह्मभूपतिश्चासीत्। अस्य नाम्ना ज्ञायते यदयं दाक्षिणात्यो नृप: स्यात्। तस्य जन्मकालादिविषयिणि कापि सूचना न प्राप्यते। तस्य पितुर्नाम इतुनगोला, माता पर्वतसुजाता चासीदिति कुसुमोद्गमकार एव स्वग्रन्थे सूचयति। उक्तं च-

**"अभूदभूतपूर्व्वाणांगुणानामाकरोनृप:, वंशेरवेरितुंगोल:[वीर:] शस्त्रविदांपति:।**
**तस्य पुत्रो महावीर: शिडिलब्रह्मभूपति:, सा[शा]सद्विषभरं स्पष्टं व्याचष्टे न्यायकन्दली"। (टी.न्या.कं.भूमिका)**

वोम्मिदेवो न्यायशास्त्रप्रभृतीनाम् अध्ययनं कुत: कृतवान्निति विवरणं कुत्रापि नोपलभ्यते। केवलमेकस्मिन् स्थान एव स्वगुरो: प्रशंसा करोतीति प्रतीयते।

---

28 *तत्रैव.* पृ.६,१६६,१६७...

29 *तत्रैव.* ३८६

30 यद्यपि किल श्री नारचन्द्रटिप्पणके व्याख्यानं किञ्चित्किञ्चिद्दृश्यते तथाप्यस्माभिर्मन्दमतित्वान्नावगम्यते। *तत्रैव,* पृ.१११

31 H. Potter, *vol* ,४.p.१०.

32 Thakur,Anantlal,p.२५५

यथा च श्लोक:-

**"विद्याविद्ये यस्य सेवामसेवां चानुस्यातां जन्मभाजक्रमेण।**
**तस्मै श्लाघे नित्यविद्याविलास-श्री सोमैणां कावंतसावधाम्ने"[33]॥**

ग्रन्थसंपादकेनात्र पादटिप्पण्यां कर्तुर्गुरोर्नाम इति निर्दिश्यते। ग्रन्थकार: शस्त्रशास्त्रपारङ्गत आसीद् । अन्यच्च स महावीराणां विद्वज्जनानां च पतिरासीदित्यपि कथ्यते[34]। शिडिलस्य 'शिडिलब्रह्मभूपति' रिति कश्चिद् उपाधि इति ग्रन्थसंपादकेन सूच्यते। स: स्वयमपि स्वस्य नाम ब्रह्मभूपतित्वेन कथयति । आचार्योऽयं बहुप्रतिभावान्निति तस्य टीकया ज्ञायते । कुसुमोद्गमटीकाया: पाण्डुलिपि: सुरतस्थ पाटन - भण्डारे आसीत्। अस्या अन्वेषणं १९७१तमे वर्षे यू.पी.शाहमहोदयेन कृतम्। १९८३तमे वर्षे मुद्रणार्थं पाण्डुलिपिरियं प्रेषिता परञ्च बहुकार्यभारकारणात् मुद्रणालये बहुकाल अलगत्। अन्तत: १९९१तमे वर्षे गायकवाडत: प्रकाशिता[35]। जेटली महोदयेन पूर्वं टिप्पणपञ्जिकयोरेव प्रकाशनं कारणीयमासीद् परञ्च यदा कुसुमोद्गमस्य पाण्डुलिपि: यू.पी, शाहमहोदयात् प्राप्तवान् तदा प्रोजेक्ट इत्यस्मिन्तिसृणां स्थापनं कृतवान्। अकस्मादेव देहवसाकारणात् तस्य शिष्यो वसन्तपारीखेण ग्रन्थोऽयं संपादित: । इयं पाण्डुलिपि अनेकस्थानेषु खण्डितासीदिति ग्रन्थसंपादकेन उच्यते। अस्या: पृष्ठानि पुरातनि, कीटादिभि: खादितानि आसन्। अपरञ्च एकैव पाण्डुलिपि उपलब्धा, अत: तस्या: आधारेण संपादनं दुष्करकार्यमासीदिति ग्रन्थ - भूमिकायां निर्दिष्टम्। एतस्मादेव अनेकस्थानेषु अक्षरलोपाद् त्रुटिकारणाद् च भावार्थो नावगन्तुं शक्यते। इयं पाण्डुलिपि: **षष्ट्यधिकैकशतपृष्ठयुक्ता संपूर्णा उपलब्धवानाचार्य:।** [36] कुसुमोद्गमटीका एका विशदा टीका वर्तते। अस्या: भाषा सरला, सुसम्बद्धा, समस्ता च अस्ति। अस्या: शैली पदकृत्यटीकाशैली विद्यते। आचार्यस्य व्याकरणज्ञानमति सुदृढमिति ज्ञायते यतोहि व्याकरणसूत्राणां परिभाषामाध्यमेन च यत्रकुत्रचिद् विषया: स्पष्टीक्रियन्ते। टीकाया: प्रारम्भ: गणेशवन्दनया क्रियते। कुसुमोद्गमटीकाया द्रव्यप्रकरणं धात्रीधरेन्द्रस्य आत्मज इन्दीवरस्य संप्रीतये विहितमिति वोम्मिदेवेन द्रव्यप्रकरणस्यान्ते लिख्यते। उक्तं च तत्र–**"द्रव्याणि प्रतिपादितानि मुख्यानि संख्यावतां संतोषाय गुणान्वितानि मुनिवाक्ययोगमपेक्षणात् वराज्ञब्रह्मवसुन्धराधिपतिना धात्रीधरेन्द्रात्मजवैक्रमोजविकासनालभरणेन्दीवरस्य संप्रीतये"**[37]। न्यायकन्दल्या: प्रथमपाठकस्य कृते इयं टीका मार्गदर्शिकावद् वर्तते। ग्रन्थस्य शैलीं दृष्ट्वा तु प्रतीयते यत् इयं सर्वाभ्य: पुरातनी वर्तते। कुसुमोद्गमे न्यायकन्दल्या: कस्यापि टीकाया: उल्लेखो न प्राप्यते। कन्दल्यामुद्धृतानामुद्धरणेभ्यो भिन्नं न श्रीवल्लभस्य उद्धरणं व्यतिरिच्य नाम्ना कस्यापि उद्धरणमत्र प्राप्यते। न्यायसूत्रस्यापि कर्मफलादर्शनात् इति सूत्रनिर्देश: क्रियते। श्रुतिस्मृतीनां यत्र-कुत्रचिद् मन्त्रनिर्देश वोम्मि - देवेन विहितम्। कुसुमोद्गमकारस्य तर्कप्रावीण्यं ग्रन्थे बहुस्थानेषु दृश्यते। कन्दलीप्रतिपादितविषयो हि

---

33 *टी.न्या.कं.पृ.*.३९९

34 इति श्रीमण्डलेश्वरेण शस्त्रशास्त्राविदांपत्या शिडिलवोमिदेवेन विरचिते न्यायकन्दलीव्याख्याने न्यायकुसुमोद्गमोदये द्रव्यपदार्थ:। *तत्रैव*, पृ.२३८

35 *तत्रैव*, पृ.भूमिका (फोरवर्ड)

36 *तत्रैव* ,पृ.xiii (भूमिका)

37 *तत्रैव*, पृ.२३८

कुसुमोद्गमकारेण विश्लेषणपूर्वकं स्थाप्यते। अन्यच्च कन्दलीकारेणोत्थापितप्रश्नेषु अपि समीक्षात्मकरीत्या प्रश्नाः तर्काश्च कुसुमोद्गमकारेण विधीयन्ते। वोम्मिदेवस्य ग्रन्थलेखनशैली उभयो भिन्ना नूतना तस्य स्वशैली चास्ति। ग्रन्थकारविषयनिरूपणात् पूर्वं तस्य आधार भूमिं निर्माति तदनन्तरं विषयनिरूपणं तथा च अन्येषां मतखण्डनं श्रीधरस्य शोधप्रबन्धात् विधीयते प्रारभ्यते च।

**कुसुमोद्गमटीकायामुख्यबिन्दवः-**

१.ग्रन्थस्य प्रारम्भे एव पदार्थनिर्देशो वस्तुनिर्देशो वा ग्रन्थकारेण विधीयते। यथा-**"न तत्त्वं न द्रव्यं त्यजति गुणवर्गस्त्वनुधियां...शिडिलब्रह्मनृपतौ"**[38]। २.कन्दलीभिन्ना युक्तयोऽपि कुसुमोद्गमकारेण लिख्यन्ते। तद्यथा- १. न वातपुत्रीयता शास्त्रस्येति। २.काकदन्तपरीक्षा, ३.पार्थिवलोहलेख्यावयोर्वक्ष इति शङ्कते। अनेन प्रकारेण विभिन्नप्रकरणेषु बहवो युक्तयो विद्यन्ते। ३. अभावपदार्थस्य पृथगनभिधाने आक्षेपो विधीयते परञ्च अन्ते गुरोः कणादस्य मतं निरङ्कुश तया नाशंकनीय इति कथयित्वा विरमति। ४. कन्दलीवदेव तमसि नीलरूपस्य आरोप एव कथ्यते । ५. मङ्गलाचरणेऽपि विशदा चर्चा कन्द्ल्याः स्पष्टीकरणपूर्वकं कथ्यत इति। अन्यच्च मङ्गलाचरणश्लोकस्य प्रत्येकपदप्रयोगस्य कारणत्वमपि स्पष्टीक्रियते। ६.समवायः स्वस्मिन् स्ववृत्त्या तिष्ठति, अतः समवाये वृत्तिवृत्तिमद्भावो वर्तते यथा दृष्टान्तः- तन्तुषु पट इति।[39]७.कुसुमोद्गमकारेण बहुधा कन्दल्या भाव अनुमानवाक्यप्रयोगेण स्पष्टीक्रियते। यथा-'प्रमाणं च समवाय एकः, अवान्तरभेदविरहित्वात्, सत्तावत्'[40]इति। ८.सुवर्णस्य विषये कथ्यते यत् सुवर्णं न पार्थिवं सौरालोकवदिति। सुवर्णस्य हिरण्यत्वे श्रुतिः प्रमाणं तदनन्तरं न्यायलीलावत्याः श्लोकमपि उद्धरति।

**"अनुच्छिन्नद्रवत्व[यद्-तद्] वस्तु यस्त्वि[त्वि]हभासते।**

**सुवर्णाव्यवहारोऽयं तत्र शास्त्रेप्रवर्तते"**[41]।

९.कुसुमोद्गकारेण स्वटीकायां व्यर्था चर्चा न क्रियते; अपितु कन्दल्या भाव एव' इतिभावः "इत्यर्थः "इत्यभिप्रायः','आशंक्याहः' 'एवमाह' इत्यादिशब्दैः स्पष्टीक्रियते। १०.कन्दलीप्रोक्तविषयाणां निर्देशः शब्दप्रतीकमाध्यमेन करोति। ११.इयं टीका गुणेषु बुद्धिपर्यन्तमेव वर्तते। कर्मपदार्थे केवलं कुसुमोद्गम टीकैवोपलभ्यते। १२. कन्दल्यां चर्चितमुख्यबिन्दूनां परित्यागः कुसुमोद्गमकारेण कुत्रापि न क्रियते। अनेन प्रकारेण न्यायकन्दल्याः समासां टीकानां परिचयं जातः। कुसुमोद्गमटीकायां प्रतिपादितविषयाणाम् वर्णनं विषये वर्णनं यथाक्रमं चतुर्थाध्याये करिष्यते।

---

[38] *टी,न्या.कं.*,पृ.२

[39] टी.न्या.कं.पृ.५०

[40] *तत्रैव*, पृ.६९२

[41] *तत्रैव*, पृ.८१

# चतुर्थोऽध्यायः

## '*कुसुमोद्गम*' टीका-विवरणम्

## चतुर्थोऽध्याय: - कुसुमोद्गमटीका- विवरणम्

मङ्लाचरणरूपे प्रशस्तपादाचार्येण श्लोकं प्रस्तूयते । जगत: हेतो ईश्वराय, मुनिकणादाय च नमस्कृत्य ग्रन्थोऽयं प्रारभ्यते[1] ।

**न्यायकन्दल्यां मङ्गलाचरणम्-** न्यायकन्दलीकार: प्रकरणेऽस्मिन् भाष्योक्तश्लोकादीनां विस्तृतां व्याख्यां प्रस्तौति । मङ्गलाचरणं कर्तव्यं न वा इति विषयेऽपि तत्र विशदा चर्चा विधीयते । तत्र पृथक्तया मङ्गल -श्लोकद्वयमपि लिख्यते । अनादिनिधन:[2], योगिभि एकाग्रमनसा-गम्य:, जगन्निमित्तकारणम्, निर्मल:, अद्वितीय:, बन्धैर्विनिर्मुक्त:, सत्यसंकल्पयुक्त:, ज्ञानयुक्त: च य ईश्वर: तस्मै प्रणम्यते। द्वितीयं मङ्गलश्लोकं तत्र प्रस्तूयते यथा- **"ध्यानैकतामनसो विगतप्रचारा: पश्यन्ति यं कमपि निर्मलमद्वितीयम्, ज्ञानात्मने विघटिताखिलबन्धाय तस्मै नमो भगवते पुरुषोत्तमाय"**[3] ।

**मङ्गलप्रयोजनम्-** आचार्येण स्वग्रन्थारम्भे इष्टदेवतां ग्रन्थरचयितारं गुरुं प्रति च नमस्कारस्य प्रयोजनं शिष्टानामाचार इति प्रोच्यते । नमस्कारस्य फलं स्वर्गादिकं न भूत्वा विघ्नविघातो ग्रन्थसमाप्तिश्च अङ्गी - क्रियते, नास्य नैष्फल्यमिति । तत्र आक्षिप्यते यत् नमस्कारेणैव विघ्नविनाशश्चेत् न्यायमीमांसाभाष्ययोर्मध्ये नमस्काराभावेऽपि ग्रन्थसमाप्ति: विघ्नविरहिता दृश्यते । अस्य प्रश्नस्योत्तरे कथ्यते यत्, मङ्गलाचरणं तत्र कृतं स्यात्, परञ्च स्वग्रन्थे उपनिबद्धं न स्यात् इति । म्लेच्छजनोऽपि स्वकार्ये इष्टनमस्कारं विना न प्रवर्तते, तर्हि कथं परमास्तिकपक्षिलस्वामिप्रभृतिनां मङ्गलाचरणेऽप्रवृत्ति: स्यादिति[4]। तच्च नमस्कारो भक्तिश्रद्धा – न्वितमित्येतज्ज्ञानं प्रकर्षेण कार्येणैवागम्यते[5] । अस्मिन्नेव श्लोके कणादमुनिं[6] प्रति नमस्कारोऽपि विधीयते । यस्य अज्ञानरूपान्धकारो विशुद्धात्मज्ञानेन नाश्यते स एव मुनि: इत्युररीकृत: । कापोतिवृत्त्या तण्डुलाना - मदने या आहारनिमित्तसंज्ञा सा स्वग्रन्थे ख्यातिदर्शनार्थं न प्रयुज्यत अपित्वाचार्यास्य नाम एव इत्यङ्गीकृत: । मनुप्रभृतिस्मृतिकाराणामिव मुने: कणादस्य प्रसिद्धि: तु अन्येषां शिष्यानां गतानुगतिकारणादेव वर्तते । निबन्धोऽयं कणादमूलकमिति (कणादलिखितम्)इति प्रसिद्धौ प्रयोजनमपि उच्यते । तत्र कथ्यते यत् यो यस्य देवता तमेव नमस्कृत्य प्रारभ्यते कार्यम् । अत एव नमस्कारो विघ्नविरहाय। ईश्वरं प्रणम्य तदनु कणादमुनिं प्रति अनुष्ठित: [7]।

---

[1] प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वत:,पदार्थधर्मसंग्रह: प्रवक्ष्यते महोदय:। *प्रशस्तपादभाष्यम्,* हि.व्या.दुर्गाधर झा शर्मा,संपूर्णानन्द-संस्कृत-विश्वविद्यालय:,वाराणसी, पृ.१

[2] अनादिनिधनं देवं जगत्कारणमीश्वरम्,प्रपद्ये सत्यसंकल्पं नित्यविज्ञानविग्रहम्। *न्यायकन्दली,* हि.व्या.दुर्गाधर झा शर्मा, संपूर्णानन्द-संस्कृत-विश्वविद्यालय:,वाराणसी, पृ.१

[3] *न्या.कं.प्र.पा.भा.,* पृ.१

[4] *न्या.कं.प्र.पा.भा.* पृ.२-३

[5] *तत्रैव,* पृ.३

[6] मुनिमिति शुद्धात्मज्ञानप्रदीपक्षपिततमसमत्युग्रतपसं साक्षादशेषतत्त्वावबोधयुक्तं पुरूषविशेषमाह, इत्थम्भूत एवार्थे मुनिशब्दस्य लोके दर्शनात्। *तत्रैव.* पृ ४

[7] *न्या.कं,प्र.पा.भा.,*पृ.३-४

**पदार्थानामुद्देश:**- **"पदार्था द्रव्यादय: षट्, तेषां धर्मा: साधारणासाधारणस्वभावा: संगृह्यन्ते संक्षेपेणा - भिधियन्तेऽनेनेति पदार्थधर्मसंग्रह:"**[8] अत्र आक्षिप्यते यत् केवलं पदार्थानां यथार्थप्रतीति:, तेषां धर्मसंग्रहश्च न पुरूषाणामभीष्टम्, यतो हि सर्वै सुखप्राप्ति: दु:खनिवृत्तिश्च इष्यते । एतस्योत्तरे 'महोदय:' इति पदस्य व्युत्पत्तिं प्रदर्शयति यथा- **"महानुदयो महत्फलमपवर्गलक्षणं यस्मात् संग्रहादसौ महोदय: सङ्ग्रह:"**[9] अर्थात् अपवर्गलक्षणं, महत् फलं येन स्यात् सैव महोदयसंग्रह इति अवगम्यते । अत्र संग्रहरूपग्रन्थमाध्यमेन पदा - र्थानां, तेषां धर्माणां च कृते कार्यकारणभाव: प्रदर्श्यते, एतदनन्तरं बौद्धानाम् आत्मविषयकं मतं संक्षेपेण खण्ड्यते । तेषां मते **"सवासनमुच्छेदो ज्ञानोपरम"**[10] वासनासहितं ज्ञानस्य नाश एव मोक्ष उच्यते । तत्र आत्मा ज्ञानस्वरूप:,अतो ज्ञानविनाशे सति आत्मनोऽपि विनाश: स्यात् । न हि केनापि जनेन स्वेप्सितवस्तु –विनाशमिष्यते, अत: न तत्र मोक्षसंभव: । अन्यस्य विज्ञानवादिन: मतमपि उपस्थाप्य खण्डयते[11]। एतै: भावनाप्रचयं महोदयस्य कारणं कथ्यते। बद्ध एव मुक्तो भवति, इति भावेन परमतं दूषयति यथा- **"बन्धमोक्षौ चैकाधिकरणौ विषयभेदेन वर्तेते, य एव च प्रवर्त्तते प्राप्य च निवृतो भवति"**[12]। अतो न विद्यते मतमिदं समीचीनमिति कथ्यते । **सांख्यमतदूषणम्**- एतदनन्तरं सांख्यमतं दूष्यते– यदा प्रकृतिपुरूषयो विवेकज्ञानाद् प्रकृतिना स्वकार्येभ्यो विरम्यते, तदा पुरूषस्य स्वरूपेऽवस्थिति: मोक्ष: प्रोच्यते। पुरूषप्रकृत्यो: भेदज्ञानरूप -पुरूषप्रयोजने प्रकृते: प्रवृत्ति: कथ्यते चेत् जडत्वात् तस्या: विचारणे असामर्थ्यत्वात् पुरुषार्थे प्रकृते: प्रवृत्तिर्न विवेकयुक्ता स्वीक्रियते । शब्दादीनामुपलम्भेऽपि तदर्थे पुन: प्रवृत्ति:, तथैव विवेकख्यात्युत्पन्ने सत्यपि तदर्था पुन: प्रवृत्ति अनेन निर्मोक्षप्रसङ्गो स्यादिति श्रीधराचार्येण प्रतिपाद्यते[13]। ततो मोक्षसम्बद्धं वेदान्तमतं प्रस्तूय निराक्रियते- यथा च लिखति-**"नित्यनिरतिशय सुखाभिव्यक्तिर्मुक्ति तित्यमपरे । तदप्यसारम्, अग्रे निराकरिष्यमाणत्वात् । तस्मादहितनिवृत्तिरात्यन्तिकी महोदय इति युक्तम्"**[14]। तत्र विस्तृतरीत्या वेदान्तमतं खण्डितं वर्तते[15] । तत: प्रभाकरमीमांसकमते कार्यत्वविशिष्टार्थ एव शब्दस्य शक्तिरस्ति,यतो हि अन्वय-व्यतिरेकेण वृद्धव्यवहृतकार्यविशिष्टेष्वेव शक्ति: गृह्यते । नास्त्ययं समीचीनं यतो हि कार्यत्वासम्बद्धार्थेऽपि अर्थोऽवगम्यते[16]। निष्पन्नार्थेषु हि शब्दानां शक्ति दृश्यते । प्रवृत्तिनिवृत्तौ यदि वाक्यस्यार्थ: तर्हि आम्रखादनेन या तृप्ति:, तस्या: प्रतिपादकतापि तेनैव वाक्येन प्रतिपाद्यते । अनेन प्रकारेण अत्र अभिहितान्वयवादमतं क्रियान्वितत्वं च प्रस्तूय वेदान्तवाक्येषु अप्रामाण्यत्व -शंकां निराकरोति-तद्यथा- **"न तावत्सर्वत्र क्रियाया अभाव:, यत्र तु नास्ति तत्रोपसंसर्गपरतया पदैरभिहितानां पदार्थानामेव योग्यतासन्निधि मतामन्योन्याकाङ्क्षानिबन्धन:सम्बन्ध:। तथा च काञ्च्यां त्रिभुवनतिलको राजा' इत्यत्रापि**

---

[8] *तत्रैव.* पृ ५

[9] *तत्रैव,* पृ.६

[10] *तत्रैव. पृ.* ७

[11] 'निखिलवासनोच्छेदे विगतविषयाकारोपप्लव विशुद्धज्ञानोदय इत्यपरे। *तत्रैव,* पृ.६

[12] *तत्रैव,* पृ.८

[13] *तत्रैव, पृ.८*

[14] *न्या.कं.प्र.पा.भा.* पृ.८

[15] *तत्रैव,* पृ.८-१०

[16] *तत्रैव,* पृ.१२

**वाक्यार्थो गम्यत एव**"[17] अर्थात् तत्र क्रियापदानां 'अस्ति' 'भवति' प्रभृतीनामध्याहारोऽपि कर्त्तुं शक्यते । अतो वेदान्तवाक्येषु न वर्तते प्रामाण्यत्वशंका । अनेन समर्थेषु पदेषु अर्थबोधनस्य शक्तिरिति तत्र अवबुद्ध्यते ।

**कुसुमोद्गम-टीकायां मङ्गलाचरणम्-** शिडिलवोम्मिदेवकृतटीकायां सर्वप्रथमं गणेशवन्दना क्रियते। ग्रन्थारम्भे सप्तश्लोकाः लिखिताः विद्यन्ते । तेषु गणेशवन्दना, स्ववंशादिपरिचयः, पदार्थनिर्देशश्च क्रियते । सप्तश्लोकेषु यत्र-कुत्रचिद् अस्पष्टता दृग्गोचरी भवति । प्रथमे श्लोके शिववन्दना[18]. द्वितीये गणेशवन्दना, तृतीये चतुर्थे पंचमे स्ववंशविषयकं परिचयम्, षष्ठतमे षड्पदार्थनिर्देशः[19],सप्तमे च व्याख्यार्थे विहिता प्रतिज्ञा वर्ण्यते । रविवंशीय रितुंगोलस्य पुत्रोऽयं शस्त्रशास्त्र-पारङ्गतब्रह्मभूपतिश्चास्ति इति वोम्मिदेवेन स्वयंमेव प्रतिपाद्यते[20] । व्याख्याकरणात्पूर्वं स्वव्याख्यायाः संकल्परूपकं कथ्यते[21] । इयं टीका न्यायकन्दल्याः वर्तते। अतः तस्यामुल्लिखितश्लोकानां पदकृत्यशैल्यां व्याख्या क्रियते । सर्वप्रथमं श्रीधरकृतमङ्गलस्य प्रयोजनं कथ्यते। प्रारीप्सितग्रन्थस्य परिसमाप्तिः तथा च परिपन्थिप्रत्यूहप्रशमार्थं 'अनादिनिधनं...'इत्यादिकं मङ्गलमाचरितम् । ईश्वरसिद्धौ तत्र लोकप्रसिद्धि एव कारणङ्गीक्रियते । जगच्छब्दः कार्यवर्गपरत वर्तते, यतो हि तत्र अन्यकारणस्यापेक्षा न वर्तते । अस्मिन् विषये प्रमाणं प्रदीयते यत् तत् विवादपदं प्रमाणमिति कथ्यते तत्र प्रमाणं यथा- **'बुद्धिमत्कर्तृकारणं कार्यत्वाद् घटवदिति'**[22] । **श्लोकव्याख्या-** अत्र श्लोकव्याख्यायां शब्दप्रयोगप्रयोजनमात्रमेव दत्तम्। धर्माधर्मजगतः कारणतया भूते तत्र ईश्वरप्रसङ्गनिवारणाय अनादि - निधनमिति शब्दः तथा च परमाणुषु प्रसङ्गनिवारणार्थं 'देव' शब्दो दीयते । 'देव' शब्दः दीव्यति इति देवः, देवनस्याभिप्रायो गतिः, गतिश्च ज्ञानमित्यङ्गीक्रियते । सा गतिः परमाणुषु न संभाव्यते । अत अनादि - निधनानामनित्यज्ञानयुक्तां परमाणूनामधिष्ठाने जगत्कर्तृत्वरूपे ईश्वरसिद्धि भवितुं योग्यमिति, अतः तत्र परिहाराय सत्यसंकल्पमित्युक्तम् । जीवानामिच्छा न अप्रतिहता अतो बाध्यते । अत्र न्यायसूत्रकारमुद्धरति **"ईश्वरः कारणं पुरूषः कर्मफलादर्शनात्"**[23] योगर्धिसम्पन्नाः ये जीवनमुक्ताः तेषामनादिभवपरम्परया उपात्तकर्माशयनाशे सत्यसंकल्पदर्शनात् ईश्वरत्वप्रसङ्गविरहार्थं नित्यविज्ञानविग्रह[24]मिति लिखितम् । यतो हि योगिनां ज्ञानं नित्यं न अङ्गीक्रियते। अन्यसर्वे शब्दाः स्तुत्यर्थे प्रयुक्ता इति । अनुमानप्रमाणजनित-योगिप्रत्यक्षगम्यश्च वर्तते । ईश्वरः संसारमलरहितः,स एव श्रुतिस्मृतीतिहासपुराणवर्णितपुरूषोत्तमशब्द-वाच्यो ज्ञानात्मा इति वर्ण्यते । ईश्वरोपासनायाः फलं तेन अखिलबन्धनानां विघटनमिति वर्ण्यते । तत्र

---

17 *न्या.कं.प्र.पा.भा.*,पृ. १४-१५

18 शिवाय विदुषां बन्धविध्वंसनपटीयसे ॥१॥ टीकात्रयोपेता, न्यायकन्दली ,सं. वसन्तपारीखः,ओरियन्टल-रिसर्च-इंस्टीट्यूट, बडौदरा,१९९१, पृ.२

19 न तत्त्वं न द्रव्यं त्यजति...स्वनिलयम् ॥६॥ *तत्रैव*, पृ.२

20 अभूदभूतपूर्वाणां गुणानामाकरो नृपः,वंशे रवे रितुंगोलः [वीरः] शस्त्रविदां पतिः॥३॥ *तत्रैव*, पृ.१

21 अद्याश्वाह्यद्यास्य[ ] व्याख्याः सन्तु विपश्चिताम्, देशेऽत्र या न दृश्यते ततोत्रः[त्र] प्रयतामहे। *तत्रैव*. पृ.३

22 *टी.न्या.कं.*पृ.३

23 *न्यायदर्शनम्*, ४/१/१९(वा,भा,सहितम्)हि.व्या.सं.ढुण्ढिराजशास्त्री,चौखम्बा-संस्कृत-भवन,वाराणसी,वि.सं.२०६९.पृ.४७७
ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्।

24 विगृह्यते विविच्य ज्ञायते तदितरेभ्यो येन स विग्रहः व्यावर्तको धर्म इति यावत्। नित्यं विज्ञानं विग्रहो यस्य स तथोक्तः। *टी.न्या.कं.* पृ.५

वोम्मिदेवमते ईश्वरस्यैकत्वमिति भविष्योत्तरपुराणस्य श्लोकस्य उद्धरणेन ज्ञायते[25]। **मङ्गलप्रयोजनम्**-शिष्टाचारोऽपि इष्टोपायार्थं क्रियते- यथा अनुष्ठानं कालान्तरभावी इष्टोपायार्थमेव ज्ञानपूर्वकं क्रियते निष्ठीवनादिक्रियासु तत्र न व्यभिचार: । अत्रापि मङ्गलं नैष्फल्यमिति न प्रतिपाद्यते । 'चैत्यं वन्देत स्वर्गकाम:' इत्यादिभि: विपुलस्थानानामनुष्ठानद्वारा व्यभिचारो न स्यात्; तन्निवृत्त्यर्थं प्रेक्षाजनैरनुष्ठीय - मानत्वात् इति लिखितम्[26] । प्रेक्षावद्भि: यस्यानुष्ठानं न क्रियते, न तत्तत् फलकम्, यथा स्वर्गफल: कारीरी, अत्र विघ्नोपशमव्यतिरिक्तवृष्टिफलरूपे ईष्यते । यदि अनुष्ठातृभि: नेष्यते तर्हि विघ्नोपशमोऽपि अफलं स्यात् । मीमांसाप्रभृतिभाष्ये सत्यपि निर्विघ्न -समाप्तौ अदर्शनं मङ्गलाचारस्य तदसमीचीनम्, मृगयादिकार्येष्वपि नमस्कारेण विघ्नविघात: तर्हि कथं नु महति कार्ये । किरणावल्यां वर्तते मङ्गलाचरणं परञ्च तत्र विघ्नविनाशो न जात: । अत्र लिङ्गावसेये हि दोष: सूच्यते । दृष्टहेतो: सादगुण्येन अदृष्टहेतुसाद्गुण्यस्य दुर्विज्ञानत्वात् हेतुत्वेऽपि सन्देह:, अत: अकारणमत्र विस्तार:[27] । शत्रुणां नाशे असहायस्य शत्रुणां क्षये सामर्थ्यमवलोक्यते सहायमात्रेण । अन्यच्च विघ्नहेतु -सामर्थ्यस्य अनिश्चयात् तस्य निवर्तककारणमनुपादेयमिति कथयितुं शक्यते । विघ्नानां यत्र संदेहो नास्ति तत्रापि विघ्ननिवर्तक उपादेय:, तत्रोदाहरणं यथा- **"न हि पाथा: पाटवरां निश्चितां धनुराददते**[28] अर्थात् भावोऽयं यत् मार्गे चौरादीनां यदा निश्चय: तदा पाथै: स्वधनुर्न त्यज्यते, तथैव विघ्नविघातकस्य मङ्गलस्यापि तत्रोपादेयता उररीक्रियते । **मुनिनमस्कारप्रयोजनम् -मुनिनमस्कारविषयिण्यां चर्चायां कणादस्य मुनित्वं लोकप्रसिद्धं तर्हि नाम्नोल्लेख: कथम् ।** उग्रतपस्यया यस्य अज्ञानजनितोन्मादाद्यो नष्टा: अर्थात् अशेषतत्त्वावबोधिना ज्ञानं जातं तादृशो 'मुनि:' इति । तत्र पुनराक्षिप्यते यत् तत्त्वसाक्षात्कारान्तरं अपवृक्तमुने: शास्त्रप्रणयेतृत्वं कथम् ? तन्निरासार्थं जीवनमुक्तमित्युक्तम् । यावत्कालं कर्माशयस्य न नाश: तावत्कालं शरीरमवतिष्ठते । एतादृशो मुनि: शास्त्रं प्रणीतवान् यतो हि शास्त्रस्य वातपुत्रीयता न संभाव्यत[29] इत्यनेन ग्रन्थमाहात्म्यं प्रतिपाद्यते । **मुने आहारविषयिणी या चर्चा तत्रोक्तं यत् आहारप्रतिपादनं नात्र अभीष्टमत: अपितु आहारविशेषप्रतिपादनं मुनिवैशिष्ट्यार्थं विघ्नोपशमार्थं च वर्तते** । विशिष्टव्याख्येयविषयद्वारा व्याख्यानस्य वैशिष्ट्यख्यापनार्थं पूर्वस्य निराकरणं क्रियते । ईश्वरनमस्कारविषयिण्यपि विशदचर्चायां **कथ्यते यत् यद्यपि तत्पूर्विका या प्रतीति: यदि न स्वीकृता स्यात्, तथापि** इष्टत्वाद् नमस्कारस्य संगति: स्यात् । **ईश्वरप्रणामविषये परामर्शो ददाति यत्- "ईश्वरप्रणामस्य परामर्श इति पश्चाद्भावस्यावधिसापेक्षत्वे प्रत्यासत्तेरीश्वरप्रणामस्यैवावधि - त्वेऽर्थलभ्येऽपि शिष्यबुद्धिवैशद्यायेति भाव:"**[30] अर्थात् शिष्यबुद्धिवैशद्यार्थे नमस्कारो विधातुं शक्यत इति कुसुमोद्गमकारस्य स्वकीया उद्भावना वर्तते । **निष्प्रयोजनकार्ये प्रवृत्तिर्न भवितुं योग्या** काकदन्तपरीक्षा इतिवत् । तत्र कार्यस्याकरणेऽपि पुत्रो अपुत्रो जायते, अत: तत्र कार्यकृतमपि अकृतं स्यात् । अत एव

---

[25] ब्रह्माविष्णुर्विषाङ्कश्च त्रयो देवा सनातना:, नामभेदै कृपाभेदैर्भिद्यन्ते वस्तुतोऽन्यथा। *तत्रैव*, पृ.५

[26] कर्मादौ मङ्गलाचारो न विघ्नोपशमव्यतिरिक्तफलो नियमेन प्रेक्षावद्भिरनुष्ठीयमानत्वात्। *तत्रैव*, पृ.६

[27] दृष्टगुणभूयस्त्वेनादृष्टवैगुण्यस्यापि परिहारसंभवात्। *तत्रैव*, पृ.६

[28] *तत्रैव*, पृ.६

[29] *तत्रैव*, पृ.९

[30] *टी.न्या.कं*, पृ.११

सम्बन्धप्रयोजनयो: कथनं प्रवृत्त्यर्थे आवश्यकम् । बौद्धमतस्य विज्ञानवादस्य[31] सांख्यस्य च मत खण्डनं विशदतया कंदलीकारवद् कुत्रचिद् दृष्टान्तरेण कुत्रचिद् स्पष्टीकरणमात्रमेव वर्तते । सांख्यमतपरीक्षणे कन्दलीकारत: पृथक् उदाहरणं स्पष्टीकरणार्थं दीयते । अकारणा प्रकृति सत्त्वरजतमसां साम्यावस्था, पुरूष: कुटस्थचैतन्य: अकारणमकार्यं च प्रतिपाद्यते । महदादिरूपे परिणममाणया प्रकृतिना दर्पणस्थमलिनतावत् दर्पणस्थानीये महति बिम्बिते पुरुषे कर्तृत्वभोक्तृत्वादयो स्वधर्मा: समारोप्यन्ते । पुरुषस्य स्वरूपावस्थितिरेव न वर्तते महोदय इति कन्दलीकारस्यानुसारमेव तत्र प्रतिपाद्यते[32] । प्रवृत्तिस्वभावा हि प्रकृति: नोचेत् संसारानुपपत्ति: स्यात् । पुरुषार्थे प्रवृत्ति: प्रकृते: एवं सति जडत्वात् तस्या अविमृश्यकारित्वं साध्यते; यथा स्वैरिण्या स्त्रिया स्वभर्तरि दोषसत्त्वेऽपि तं प्रति न विपरिणम्यते; तथैव प्रकृते: प्रवृत्ति वर्तत इति पृथगुदाहरणेन प्रतिपाद्यते[33]अर्थात् अत्रापि न मोक्षसंभव: वाक्यस्य पदानां परस्परसम्बन्ध: आकांक्षा - योग्यतादिभिरेव वोम्मिदेवेनाङ्गीक्रियते। एतदनन्तरं मीमांसक प्रभृतीनां मतेषु कंदल्येवानुस्रियते[34] ।

**न्यायकन्दल्यां उद्देशपदार्थप्रयोजनम्-** द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्य - वैधर्म्यानां तत्त्वज्ञानं नि:श्रेयसहेतु: इति भाष्यकारेण कथ्यते[35] । कन्दल्यामपि ग्रन्थे परम्परासम्बन्धेन नि:श्रेयसावाप्तौ हेतुता स्वीक्रियते[36]। साधारणो धर्म: साधर्म्यं, वैधर्म्यं च असाधारणो धर्म उभयमपि तत्त्वे। द्रव्यादीनां स्वरूपज्ञानं मोक्ष दु:खानामात्यन्तिकनिवृत्तिरूपो परमकल्याणमय: स्वीक्रियते । स्वर्गादिसुखम् अनित्यं तत्र सुखस्यानन्तरं पुन दु:खस्याविर्भाव:, परञ्च दु:खानामात्यन्तिकनिवृत्तिरूपे मोक्ष: परमकल्याणमय अस्तीति प्रतिपाद्यते । तत्र शंकोपस्थाप्यते यत् मोक्ष: सुखानामपि निवृत्तिरूप:,अस्य प्रत्युत्तरे कथ्यते यत् विषमिश्रितमधुवत् सुखोऽपि कठिनोपायै: साध्य:, अत एव नेष्यते[37] मोक्षे कारणत्वमिति

**पदार्थोद्देशप्रकरणम्-** केषां पदार्थानां तत्त्वज्ञानमस्ति इति प्रश्नस्योत्तरे क्रमश: पदार्थानां निर्देश: क्रियते । विभागवाक्यानुसारं द्वन्द्वसमासानुसारं द्रव्यगुणादिवाक्यस्य विग्रहो क्रियते [38]। द्रव्यं सर्वेषामाश्रय:, अत: तस्य प्रथममुद्देश:, कर्मणामपेक्षया गुणानामाधिक्यम्, एतस्माद् कारणात् कर्मण: पूर्वं गुणानां तदनन्तरं कर्मकथनम्, कर्मणा सह सम्बन्धकारणात् सामान्यनिरूपणम्, सामान्यानन्तरं समवायात्पूर्वं विशेषस्याभिधानमुचितम् । पञ्चषु पदार्थेषु वृत्तिकारणाद् समवायस्य अन्ते निर्देश: क्रियते । अभावस्य भावपारतन्त्र्यत्वाद् न पृथगुल्लेख: तत्र विहित:[39]।

---

31 *टी.न्या.कं*, पृ.१३-१४

32 *तत्रैव*, पृ.१६

33 *तत्रैव* ,पृ १६

34 *तत्रैव*, पृ.१७-२२

35 द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानं नि:श्रेयसहेतु:। *प्र.पा.भा.न्या.कं.* पृ.१५

36 यस्य वस्तुनो: यो भावस्तत् तस्य तत्त्वम्। *न्या.कं.प्र.पा.भा.*.पृ.१६

37 *न्या.कं.प्र.पा.भा.*.पृ.१५-१६

38 द्रव्याणि च गुणाश्च, कर्माणि च सामान्यञ्च, विशेषाश्च, समवायश्च, इति विभागवचनानुसारेण विग्रह:। *तत्रैव*, पृ.१७

39 पञ्चपदार्थवृत्ते: समवायस्य सर्वशेषेणाभिधाने प्राप्ते विशेषाणां मध्ये कथनम्। अभावस्य पृथगनुपदेशो भावपारतन्त्र्यात्, न त्वभावात्। *न्या.कं.प्र.पा.भा.* पृ.१७-१८

वैशेषिकमते मोक्ष: धर्मेण, धर्मश्च तत्त्वज्ञानाद्; अत: परम्परया मोक्षेऽपि कारणत्वं साध्यते। पदार्थानां यथार्थ -ज्ञानाद् बाह्याभ्यान्तरविषयेषु दोषदर्शनाद् वैराग्यम्, वैराग्यात् निष्कामकर्म कुर्वन् आत्मज्ञानार्थं प्रयतते जन इति प्रतिपाद्यते। मोक्षस्तु ईश्वरेच्छया चोदनया वा चोदितकार्योन्मुखधर्ममाध्यमेनैव विहित:। तत्त्वज्ञानेन सह मिलित्वैव धर्मस्य मोक्षसाधनता वर्तते[40]। कंदल्यां पदार्थाना -मुद्देशस्य पृथक्–पृथक् विवरणं दीयते। तत्र नवद्रव्याणां चर्चा सामान्यविशेषापेक्षया विधीयते, पृथिवीत्यस्य 'द्रव्य'मिति सामान्यसंज्ञा, विशेषसंज्ञा तु पृथिव्यपतेजस्त्वादिरूपा मन्यते[41]। नवद्रव्यलक्षणे इदमस्ति प्रयोजनं यत् एतेभ्यो भिन्नद्रव्यस्य सत्ता न मन्यते। लक्षणादीनां कार्यं सजातीयविजातीयेभ्यो लक्ष्यस्य व्यावृत्तिकरणमिति। द्रव्याणि 'नवैव' इत्यत्र अवधा -रणार्थे 'एव' शब्द: प्रयुज्यते अर्थात् नवद्रव्येभ्यो व्यतिरिक्तं द्रव्यमत्र महर्षिणा न लिखितम् इति उच्यते।

**तमसोऽतिरिक्तद्रव्यचर्चा–** १.आद्याक्षेपो यत् रूपसंख्यापरिमाणप्रभृति-अष्टगुणैयुक्तोऽभाव नाम्ना द्रव्यान्तर -मस्ति इति प्रतिपाद्यते। यदि अन्धकारो रूपयुक्तं द्रव्यं तर्हि स्पर्शप्रतिघातोऽपि अवश्यमेव स्यात्। एवं सति तमस: प्रतिघातेन एव जन: प्रतिरुद्धो भवेत्। अत नवैव द्रव्याणि इति[42]। २.यदि अन्धकारो महत् द्रव्यं चेत् महान्भूखण्ड इव तस्यापि अवयवानि प्रतीयेयु:, परञ्च न प्रतीयन्ते। श्रीधराचार्येण समाधानद्वयस्य खण्डनं क्रियते। तेजसि तेजसावयवमाध्यमेन अदृष्टवशात् अनुद्भूतस्पर्शयुक्त-अनिबिडावयवप्रभारूप- प्रकाश -द्रव्यस्य उत्पत्तिर्जायते,तत्र अवयवोपलब्धि: पुरूषप्रतिघातश्चोभयमपि न मन्येते। परमाणुषु स्पर्शो सत्यपि यदि कार्येषु अदृष्टवशात् कल्पना क्रियते तर्हि वायुवत् कल्पना स्यात्। एकजातीयपरमाणुभिरेव पृथिव्यादिसर्वेषामुत्पत्तौ अदृष्टवैचित्र्येण एतेषु वैचित्र्यं कल्पयत इति। स्पर्शशून्यरूपान्धकारपरमाणुभि: स्पर्शरूपान्धकारं न जन्यते यतो हि स्पर्शविशिष्टद्रव्यं हि द्रव्योत्पादकं वर्तत इत्यनेनोत्तरपक्ष विवेच्यते[43]। ३.दृष्टान्धकारे न स्पर्शोपलब्धि:। कार्यकारणसमानगुणयुक्तौ भवत:, अत: अन्धकारपरमाणुषु रूपं न मन्यते, एवं स्पर्शयुक्तद्रव्येण हि द्रव्यमुत्पाद्यते। द्रव्यस्वीकरणाभावे न अन्धकारद्रव्यं तमस अभावरूपम् यतो हि नीलरूपाद् तस्य प्रत्यक्षं क्रियते। अन्धकारोत्पन्ने सति कस्यापि वस्तुन: अभावरूपे प्रतीतिर्न वर्तते[44]। प्रतियोगिन: प्रतीति: स्वसंयुक्तविशेषणतासम्बन्धेन जायते; अत: तादृशी प्रतीति: तत्र श्रीधरेण न स्वीक्रियते। ४.तमस: अभावरूपे अन्धकारो स्वीक्रियते चेत् नीलरूपारोपे काठिन्यं मन्यते यतो हि रूपं भावस्य धर्म:। तमसस्तु रूपविशेष:, तेजस अत्यन्ताभावे परित: समारोप्य तस्य स्थिति:। तत्र नीलरूपाभिन्न छाया इत्यपि उच्यते। अन्यथा दीर्घा, ह्रस्वाप्रभृति छायाप्रतीतिर्न स्यात्। तेजस: अभावे अन्धकाराभाव इति वृद्धसम्मतमपि न विद्यते[45]। न हि छायादेहानुवर्तिनीति महदल्पचलाचलेति प्रतीति: स्यात्। छायायां सर्प भ्रम: तु असम्भव एव। यदि अन्धकारप्रत्यक्षं आलोकाभावे सति चक्षुषा तर्हि अन्यद्रूपप्रत्यक्षे आलोकसहकृत चक्षुकारणत्वे सत्यपि अन्धकारप्रत्यक्षे आलोकनिरपेक्षचक्षु: हि कारणं मन्तव्यं स्यात्। यथा भवद्भिरपि

---

40 *तत्रैव,* पृ.१८-१९

41 *न्या.कं.प्र.पा.भा.* पृ.२०

42 *तत्रैव,* पृ.२१

43 *तत्रैव,* पृ.२२

44 तस्य नीलाकारेण प्रतिभासायोगात्, मध्यन्दिनेऽपि दूरगगनभोगव्यापिनो नीलिम्नश्च प्रतीते:। किञ्च गृह्यमाणे प्रतियोगिनि संयुक्तविशेषणतया तदन्यप्रतिषेधमुखेनाभावो गृह्यते, न स्वतन्त्र:। *न्या.कं.प्र.पा.भा.* पृ.२४

45 न च भामाभावस्य तमस्त्वं वृद्धसम्मतम्, छायाया: कार्ष्ण्यमित्येव पुराणे भूगुणश्रुते:। *न्या.कं.प्र.पा.भा.*पृ.२५

तेजस: अभावरूपे अन्धकारस्य प्रत्यक्षं स्वीक्रियते तथैव तेजस: अभावे हि अन्धकारप्रतीतिर्जायते । अत: सूत्रकारेण 'भाभावस्तम:' इत्यौपचारिकप्रयोगो विहित[46] इति । अनेन प्रकारेण तमस: षड्पदार्थेषु अन्तर्भावो विधीयते । **ईश्वरस्य पृथग्द्रव्यनिराकरणम्-** बुद्धियुक्तत्वाद् ईश्वरोऽपि आत्मा एव । परमात्मा षड्गुणयुक्तो जीवात्मा चतुर्दशगुणयुतमङ्गीक्रियते । अतो गुणभेदाद् जीवात्मपरमात्मनो भेदो न वर्तते[47] । अनेन प्रकारेण ईश्वरस्य षड्पदार्थेष्वन्तर्भावो विधीयते।

**कुसुमोद्गमे तमसोऽतिरिक्तद्रव्यचर्चा-** सर्वप्रथमं शंकोपस्थानानन्तरं परिहरति सुवर्णसादृश्यादीनां द्रव्यतया प्रमिते सति द्रव्यत्वनिषेधो विहित तद्वत् तदधिकस्य शंका बुध्यनारोहणाद् न करणीया । एवमेव तमस: पृथक् द्रव्यत्वं न वक्तव्यम् । तम: नापि व्यापकद्रव्यं, न हि अगुण: प्रत्यक्षत्वात् कादाचित्कत्वात् चेति विवेच्यते। तमस: परिमाणं मध्यम: कथयित्वा अनुमानवाक्यं कथयति यथा-**"तमो मध्यमपरिमाणद्रव्यं न भवति अप्रतिघातकत्वादप्रतीयमानखण्डावयवित्वाच्च अभाववत्"**[48] इति मतमेकदेशि कथयित्वा निबिडावयवेत्यादि कंदली मतमेवोपस्थापयते । वात: पतिघातो न दृश्यते अत स हेतु: । प्रभामण्डलम् अवयवित्वे हेतु इति कंदलीकारेणैव सूचित:। स्पर्शवत्कार्याभावेऽपि क्वचिद् स्पर्शवती पृथिवीति विशेषणं दृश्यते । एवमुपाधिमाशंक्य अदृष्टव्यापादिति कथयते । तम:कार्यत्वसिद्धौ तत्र स्पर्शवत्वानारम्भकत्वयोर्मध्ये व्याप्तिभेदो जायते **'पार्थिवलोहलेख्यावयोर्वक्ष इव** [49]। तदनन्तरं शंका-तम: कार्यद्रव्यविषयमस्ति तमोमात्र - विषयत्वं वा इति चेत् प्रथमे असिद्धिरस्ति अत्र भानुपपति: स्यात् । द्रव्यकार्यत्वे स्पर्शवत्वं महत्त्वप्रमाणं तद्त्र न घटिष्यत इति । द्वितीयमपि नोचितं तम: तु केवलं रूपमात्रप्रतीति वर्तत इति । अनेनद्रव्यत्वासिद्धि: प्रतिपाद्यते । तस्मात् नव एव द्रव्याणि, तदा जिज्ञासून् प्रति सुहृद्भावेन तत्स्वरूपप्रतिपादने परमतं दूषयन् 'एवं तर्हि इति पदेनानुवाद: क्रियते ।२.तत्र आलोकस्य अन्वयव्यतिरेकेणाभावो निश्चियते । शंखे पीति-मारोपवद् अत्रापि नीलत्वारोपश्चेत् कुत्र विरोध इति कथ्यते । आरोपितरूपे तमोबुद्धिव्यपदेशसिद्धि:, अत: तत्रा -भावस्य प्रतीतिकल्पनायां कल्पनागौरवं स्यादिति । पुनराक्षेपो क्रियते-आरोपस्तु प्रत्यक्षत: प्रतीयमाने तद्गुणाभिभवेन भवति, अत्र आलोकाभाव भवतां मते कथं प्रतीयते ? तस्य निराकरणाय मध्यन्दिने नीलिमाप्रतीति इति कथितम् । अत्र कंदलीकारमतमेवानुस्रियते । ग्रहणभवनस्मरणरूपेऽपि प्रगृह्यं प्रति योगिन: स्मरणं न भवितुमर्हतीति मतमुस्थाप्यते । अभिप्रायोऽयं यत् अन्धकारस्य न प्रतियोगिरूपे प्रतीति: । न केवलं दिने अपितु रात्रौ अपि तमस: अवश्यं प्रतिसंधातव्यम् । दिनालोकस्मरणनेनैव अर्थसिद्धि -र्भविष्यतीत्यस्य निराकरणं क्रियते यत् एतादृशीप्रतीत्यभावे नास्ति एतादृश नियम इति[50] । वोम्मिदेवेन स्वस्य कथनमपि स्थाने स्थाने यत्रावश्यकं तत्र योजयते । अन्यत् सर्वं कंदलीवत् प्रतिपादितं न कुत्रचिद्

---

[46] तत्र चालोकाभावव्यञ्जनीयरूपविशेषे तमस्यालोकानपेक्षस्यैव चक्षुष: सामर्थ्यम्, तद्भावभावित्वात्; यथालोकभाव एव त्वन्मते। नन्वेवं तर्हि सूत्रविरोध:'द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद् भावस्तम:' इति ? न विरोध:, भाऽभावे सति तमस: प्रतीतेर्भाभावस्तम् इत्युक्तम्। *तत्रैव*, पृ.२६

[47] ईश्वरोऽपि बुद्धिगुणत्वादात्मैव, न तु षड्गुणाधिकरणश्चतुर्दशगुणाधिकरणाद् गुणभेदेन भिद्यते, मुक्तात्मभिर्व्यभिचारात्। *न्या.कं.प्र.पा.भा.*पृ.२६

[48] *टी.न्या.कं.*पृ. ३२

[49] *तत्रैव*, पृ.३३

[50] *टी.न्या.कं.* पृ.३५-३६

विषयविशेषे चर्चा प्राप्यते । ३. तदनन्तरमारोपविषये चर्चां करोति- **"अभिमानो: भ्रम:"**[51] । यथा सुखाभावे दु:खारोप:, संयोगाभावो विभागारोप: इतिवत् अभावेऽपि भावधर्मारोपे विरोधो न वर्तते । एवं अस्ति चेत् विरोध:, निश्चयेनात्र दु:खविभागयो: आरोप: भावरूप एवास्ति इति प्रतिपाद्यते । दीर्घत्वादि या प्रतीति सा तु अभावरूपा एव वर्तत इति विशेष: । एतदनन्तरं भूगुणत्वेन कार्ष्ण्यं छायादिप्रतिपादनं कंदलीवदेव । तमस: प्रतीति भाववदेव, एतां विना चलाचलाह्रस्वादिप्रतीतय: नोपपत्स्यन्ते । अत भावाभावयोरत्यन्त - वैसादृश्यन्वात् द्रव्यप्रतीति दुरुपपादा वर्तते । अतोऽत्र अन्यथोपपादनं कृतमाचार्येण । पूर्व यदारोप: देश - देशान्तरयो: अपेक्षया वर्तते । एवं प्रकारेण देशस्य परत्वापरत्वमाध्यमेनापि आरोप: क्रियते । **आक्षेप:-** आलोकसहकृतचक्षुषा यदा रजतादिषु आरोपो क्रियते चेत् रूपारोप: चक्षुषा कथं क्रियते ? आरोपोऽयं मानस इत्यपि न कथयितुं शक्यते, अन्धानां तम: प्रत्यत्रानुदयाच्च इति अर्थात् आलोकाभावे तम: प्रतीतिरिति तत्र पूर्वपक्ष: । वोम्मिदेवेन स्वाभिप्राय: स्पष्टीक्रियते यत् आलोकसहकृतचक्षुसामर्थ्यं हि तमप्रतीतौ सहायकमिति सर्वजनप्रसिद्धि: । तत्रापह्नव भवितुं नार्हति । ' नीलं तम:' इति व्यवहारसिद्ध्यर्थं 'आलोकाभाव: तम' इति मन्यमानां रूपारोपो एष्टव्य: । स्वरूपारोपेण तमस: प्रतीति ज्ञायते । तत्र अभावग्रहणे आरोपवद् सामर्थ्यं समानम् । ननु यदि आलोकाभावो न प्रत्यक्षश्चेत् 'विस्फारितचक्षुषो नात्रापवरके आलोक इति प्रतीति कथं जायत इति चेत् 'नरयं प्राची इति अनुमानानुमित्यो उपपतिरिति । विषयाननुपलब्धिसंज्ञकमनुमानं न संभाव्यते[52]। एतदनन्तरं तत्र आरोपं लक्षयति यथा-**"अविविक्तग्रहणं चारूप: एव तस्मादारोप्यविषय - संस्कारोद्बोधे अधिकरणसन्निकर्षे च असंसृष्टतया स्मर्तव्ये संसृष्टतयानुभव इति युक्तम्"**[53]। निर्विकल्पान्यतराग्रहे विवेकाविवेकपरिहारात् सादृश्यसंस्कारप्रतीति: स्वप्नज्ञानवत् विशेषादृष्टेन संस्कार - बोधोपपति: प्रतिपाद्यते । दिक्करणदेश:, आकाशदेश प्रभृतय: चक्षुषा एव सन्निकृष्यन्ते । आलोकाभाव-रूपतमस: यै ग्रहणं क्रियते तत्रापि एवमेवाधिकरणसिद्धि वर्तत इति प्रतिपाद्यते । अनेन अदृष्टसामर्थ्यस्य कल्पना कर्त्तव्या जायते। आलोकाभावे शौक्ल्याभावरूप सादृश्यनिमित्तस्य नीलपीतादिसाधारणधर्मे यन्नीलिमाप्रतीतिरूपारोप: तत्सादृश्यनिमित्तकारणानुसरणादेव जायते[54] । 'नीलं तम:' इति प्रतीति सामानाधिकरणाप्रतीति: वर्तते । एकम् एव वस्तु अदृष्टमहिम्ना सत्यपि धर्मधर्मिणो भेदे आक्रान्तरूपे आरोप्यते[55]। अन्ते लिखति यथा- **"भाभावस्तम इति लौकिके उपचारे प्रयोजनमालोकाभावोपकरण-त्वान्नीलिमारोपस्यालोकापेक्षित्वा शंकानिवर्तनमिति"**[56] । प्रस्तुतेऽस्मिन् आरोपविषयिणि या चर्चा सा कंदल्यां नास्ति । **ईश्वरस्य पृथग्द्रव्यनिरास:-**ईश्वरेऽपि पृथक द्रव्यत्वशंका क्रियते । संख्यादिभि: पञ्चभि:,सह बुद्धीच्छाप्रयत्नद्वारा ईश्वरस्य अष्टगुणत्वमिति । 'गुणभेदेन' इति शब्दव्याख्या चतुर्दशगुणत्वेन उच्यते अर्थात् गुणभेदेन जीवात्मपरमात्मनो न भेदो स्वीक्रियते । अतो न विद्यते पृथक् द्रव्यत्वमेतस्य । अत्र कन्दलीकारस्य अनुसरणमेव परञ्च तत्र इयं चर्चा पृथग्द्रव्यत्वमाशंक्य न विधीयते ।

---

51 *तत्रैव*, पृ.३७

52 *तत्रैव*, पृ.३७

53 *तत्रैव*, पृ .३७

54 *तत्रैव*, पृ .३७

55 अदृष्टमहिम्ना एकमेव वस्तु धर्म्मधर्मिभावभेदरूपाक्रान्ततयैवारोप्यत इति । *टी.न्या.कं.* पृ .३८

56 *न्या. कं. प्र पा.भा.* पृ .३८

**कुसुमोद्गम-टीकायामुद्देशप्रकरणम्-** केवलं धर्माणां संग्रह इत्युच्यते चेत् पृथिवीप्रभृतिनवद्रव्याणि, रूपादयश्च चतुर्विंशति गुणा: इति अप्रस्तुतमापद्यते। अत: पदार्थशब्दनिर्देश: कृत:। तत्त्वशब्दस्य तद्धिता -न्तत्वे सति धर्मस्वरूपप्रसंग: स्यात्; अत: रूढिमाश्रित्य 'यस्याभाव' इति सूचितम् अर्थात् यस्य भाव: तत् तत्त्वं परश्च कुसुमोद्गमकारो भिन्नं लक्षणं कथयति यथा-**"यद्वस्तु प्रमाणेन निश्चयते तत् तस्य तत्त्वमिति"**[57]। षष्ठी विभक्ते: प्रयोग: शिलापुत्रकस्य शरीरवद् उपचाराश्रितमुच्यते। साधर्म्यवैधर्म्ययो स्वातन्त्र्ये अनभिधा -नात् द्रव्यादयोऽपि तत्त्वं स्वीक्रियते। उद्देशविभागयो लक्षणं तत्र प्रस्तूयते। यथा[58]उद्देशविभागयो: एकैव विषयत्वं भवति। एतदनन्तरम् एकैकश: पदार्थाभिधानस्य चर्चा अत्रापि विहिता वर्तते। इदं कन्दलीत: किञ्चिद् भिन्नं प्रतिपाद्यते। प्रधानज्ञानमप्रधानस्य हेतु: अत: प्रथमं द्रव्यस्याभिधानम्। अक्लिष्टबुद्धे: सामर्थ्यं बहु कथ्यते, अतो गुणानां संख्याबाहुल्यात् कर्मण: पूर्वमभिधानम्,कर्म अल्पविषय: एतत्तु अक्लिष्टबुद्धिनापि ज्ञातुं शक्यते। सामान्यस्य द्रव्यादित्रिकवृत्ति:, कर्मान्विति तस्योपलक्षणम्, विशेषस्य त्रिभ्योऽपकर्ष:। समवायविषये पञ्चपदार्थवृत्तित्वात् अन्तेऽभिधानं कृतमित्यस्मिन् कन्दलमतमेवानुस्रियते। **अभावनामकसप्ततमपदार्थोऽपि प्रश्नोत्तरपूर्वकं चर्च्यते-** आक्षेप:-१.पूर्वमाक्षिप्यते यत् ननु अभावो प्रमाणरूपे यत्र तत्र वर्ण्यते। भवतामपवर्गोऽपि मिथ्याज्ञानादिदु:खान्तानां प्रध्वंश: ? २.द्रव्यादीनाम्, उत्पत्तिविनाशयो-रपि प्राक्प्रध्वंसाभावो वर्तते। ३.वैधर्म्यप्रतिपादने इतरेतरात्यन्ताभावो अस्ति, तर्हि अभावस्य निर्देश: कथं न कृतम्[59] ? इति पुनरुद्भावनं क्रियते यत् अभावस्य भावपारतन्त्र्यमस्ति इति मत्वा न पृथग्निर्देशश्चेत् संयोगादीनामुद्देशो न करणीयं स्यादिति। **समाधानम्-**स्वयमेव प्रतिविधीयते यत् शिष्यानामूहा -शक्त्यादीनाम् अत्र अधिकारो न विद्यत इति तु अभावस्यानुद्देशेनैव स्पष्टीक्रियते[60]। यदुक्तं संयोगादीनां कथमुद्देश:, तत्र कारणस्याभावो कथ्यते, अतो निरङ्कुशतया आचार्यस्य विपर्ययशंकावकाशो न विद्यते। केवलसंग्रहप्रतिज्ञामात्रेण न मुक्तौ हेतुत्वमपितु तत्त्वज्ञानस्यापि हेतुत्वं कथ्यते। साक्षात्कारस्य धर्मकारणत्वमस्ति चेत् शास्त्रज्ञानस्य नास्त्यावश्यकता इत्यत उक्तम् यत् द्रव्यादितत्त्वज्ञानं साक्षात्कारस्य धर्मे कारणत्वं वर्तते[61]। **आत्मज्ञानपरिपाकेन दु:खनिवृत्तिरिति।** तत्त्वसाक्षात्कारस्य वामनायुक्तमिथ्या -ज्ञानजनितमोक्षसंभवेऽपि अदृष्टकल्पना अहिकंटकादिपरिहारवत् ज्ञानसहकारि आत्मनो विशेषगुण: (निवृत्तिजनकप्रयत्नम्) साध्योऽस्ति इति कंदल्यनुगुणमेवास्ति। आत्मनो विशेषगुणं वर्णयन् कथयते यत् किमिदं सर्वकर्मसमुच्चयो, काम्यनैमित्तिककर्मसम्मु च्चयो, असमुच्चयो, यावत् नित्यसमुच्चयो वास्ति ? एतेषु न प्रथमो यतो हि नित्यकाम्यनैमित्तिक कर्मणां यदि अनुष्ठाने काम्यकर्मसमुच्चयो न संभाव्यते,अनेन चतुर्थाश्रमविधौ विरोध: स्यात्। नैमित्तिककर्मणां निमित्तानामसंभवे अनुष्ठाने अनुपपत्ति: तथा च नित्यकर्मणां समुच्चयेऽपि चतुर्थाश्रमविधिविरोध: समापद्यते। तदसत्-यथाधिकारिनित्यकर्मणां समुच्चये

---

57 *टी.न्या.क.* पृ २४

58 नामधेयेन पदार्थाभिधानमात्रमुद्देश:। उद्दिष्टस्य अवान्तरविशेषोद्देशो विभाग:। *तत्रैव,* पृ ,२४

59 अपवर्ग एवायं तावन्मिथ्याज्ञानादिदु:खान्तानां प्रध्वंस:। द्रव्यादीनामुत्पत्तिविनाशयोश्च प्राक्प्रध्वंसाभावौ। वैधर्म्येषु चेतरेतरात्यन्ताभावौ। तत्कथं तस्यानुद्देश इत्यत आह- अभावस्येति। *टी.न्या.कं.* पृ .२६

60 शिष्याणामूहादिशक्तियुक्तानामत्राधिकार इत्यभावानुद्देशेनैव प्रदर्शितं[तम्]। *तत्रैव,* पृ .२६

61 देहेन्द्रियव्यतिरिक्तो नित्यो विभु: मिथ्याज्ञानरागद्वेषकार्यप्रवृत्तिनिवृत्त्यपायात् धर्माधर्मोपगृहीतदेहेन्द्रियतया बहुविधदु:खा-दुभय परिकलिष्टोऽहमिति निरन्तरमभ्यस्यतस्तद्विषयसाक्षात्कार:। *तत्रैव,* पृ .२७

विरोधो न वर्तते । साध्यवैचित्र्यात् माधने वैचित्र्यं भवितुमर्हः । दुखादीनां विनिवर्तनकार्ये धर्मादयो वहूपाया: वर्तन्ते तदपि एकत्वे कुत्रचिद् न विरोध: । अत्र कन्दलीत: पृथक् उदाहरणं प्रस्तौति यथा-भिदायां बिले जनयितव्ये अवयविविभागहेतो: कुठारादीनामनेकत्वेऽपि एकत्वमिति। किं धर्मस्य ज्ञानकारणतत्वेऽपि एवं भवति । तत्र साक्षात्कार वैचित्र्यमस्ति । केवलज्ञानेनैवापवर्ग इति मतमपि केचननुसरन्ति । वोस्मिन्देवोऽपि आगमविरोधी न वर्तते यतोहि आगमविरोधो न स्यादिति भयात् ज्ञानकर्मसमुच्चयमपि विरमन्ति[62]। तदनन्तरं सशंका **"यतोऽभ्युदयनि:श्रेयससिद्धि: स धर्म:"** इति सूत्रव्याख्या क्रियते । यथाश्रुतं **यदि अस्य व्याख्या क्रियते चेत् अव्यापकमलक्षणं स्यादिति । अभिमतहेतो:** अतीन्द्रियविहित पुरूषस्य गुणो धर्म इति स्वाभिमतं लक्षणं दीयते[63]। अभ्युदयनिश्रेयसयो: पृथक्कथनं अवान्तरभेदप्रदर्शनार्थ मुक्तम् । अनेन यत् किञ्चिद् त्याज्यं हेयत्वं वा अभ्युदयश्च तत्राभ्युदयकार्येण धर्मानुमानं तथा च ज्ञानं नि:श्रेयस - कार्येणानुमीयते । सूत्रमिदं धर्मेण **प्रमाणप्रदर्शनपूर्वकमस्ति । अत्र स्वर्गहेतौ प्रमाणप्रदर्शनं न कृतम् इति न्यूनत्वस्यावसानार्थं एवं विहितम् । इदं नास्ति यदि आत्मसाक्षात्कारो निवर्तकधर्मसहितोऽपवर्गहेतो वर्तते चेदागमविरोध: स्यात्; यतो हि ईश्वरोपासनया अपवर्गकारणता अङ्गीक्रियते** [64]। **अन्ते कथयति यत् ईश्वरेच्छा एका अत: तस्य एकत्वे उपासनारूपसहकारित्वात् विशेषोपाधे: व्यपदेशे विरोधो कथ्यते। द्रव्याणामुद्देशप्रकरणे समेषां पृथक्-पृथक् चर्चा विधीयते । सा भिन्ना न वर्तते अतो न वर्ण्यते ।** नि:श्रेयसं प्रति नवभिन्नद्रव्याणामुपयोगिता न वर्तते, अत: नव एव पदार्था इति कंदलीभिन्नम् । **विभागलक्षणसाध्यव्यवहारस्य व्यवस्थितिमात्रस्य प्रतिपादनार्थे लक्षणमिति उक्तम् । लक्षणवाक्येन यदि स्वकार्यात् भिन्नमर्थं** प्रतिपादयते चेत् वाक्यभेदस्य प्रसङ्ग आपद्यते । मुनिना सर्वार्थोपदेश: कृत इति ज्ञानं तस्य हेयोपादेयव्यतिरिक्तज्ञानाद् प्रमाणत्वसिद्धिना तथा च शास्त्रप्रणयने नि:श्रेयसहेतुत्वाद् प्रदर्श्यते । अनेन स्वग्रन्थे प्रवृत्तिं गमयतीति[65] । अनेन प्रकारेण इतोऽपि विशदम् एकैकश: पदार्था: चर्च्यन्ते,परञ्च एतेषां नियोजनम् अन्ते वर्तमानपदार्थचर्चायां विधास्यते ।

**कुसुमोद्गमे उद्देशसंक्षेप:**-अत्र व्याख्यायां शक्तिसादृश्यादीनां पृथग्द्रव्यत्वस्वीकृतिनिराकरणे बुद्ध्यानारोहण मेव कारणं दीयते । तत्र कथ्यते यत् शक्ति: प्रतिबन्धाभाव:, वस्तुस्वरूपं वा ? प्रतिबन्धाभावे सति अभावे, वस्तुस्वरूपे सति द्रव्यगुणकर्मसु अन्तर्भावो जायते[66] ।

---

62 न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रिय:,श्राद्धकृतसत्यवादी च गृहस्थोऽपि विमुच्यते । *टी.न्या.कं.* पृ.२८

63 अभिमतहेतुरतीन्द्रियविहितानुष्ठानजन्य: पुरूषगुणो धर्म इति । *तत्रैव,* पृ.२८

64 यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवा:, तदा शिवमविज्ञाय दु:खस्यान्तो भविष्यति । *तत्रैव.* पृ.२८

65 *तत्रैव,* पृ.३१

66 *टी.न्या.कं.* पृ.५१-५२

**द्रव्याणां पदार्थाणां च साधर्म्यं वैधर्म्यम्** - अस्मिन् प्रकरणे कंदलीकारेण कुसुमोद्गमकारेण विशदतया विषयविवेचनं कृतम्, परञ्च प्रबन्धेऽस्मिन् अतीव संक्षिप्ततया कुसुमोद्गमदृष्ट्या प्रतिपाद्यते । **१.न्यायकन्दल्यां षड्पदार्थानां साधर्म्यनिरूपणम्**- कन्दल्यामस्य-**"षण्णामपि पदार्थानामस्तित्त्वाभिधेयत्वज्ञेयत्वानि**[67]"सूत्रस्य संक्षिप्तव्याख्या क्रियते[68] । **१.अस्तित्वम्**-वस्तुन: स्वासाधारणरूपम् अस्तित्त्वनाम्ना कथ्यते । [69]**२.अभिधेयत्वम्**-शब्दद्वारा कथनस्य क्षमता तस्याभिधानञ्च वस्तुनामभिधेयत्व रूपेणाभिधीयते । **३.ज्ञेयत्वम्**-इदमेव वस्तुस्वरूपम् अवस्थाभेदाद् ज्ञेयत्वाभि धेयत्वं च नाम्ना उच्यते । [70] **कुसुमोद्गमे षड्पदार्थानां साधर्म्यनिरूपणम्**- वोम्मिदेवेन केवलं वस्तुन: स्वरूपविषये लिखितं यत् विधिप्रत्ययेन विषयीकरणं स्वरूपमि[71]त्यनेन अभावस्य षट्पदार्थेभ्योऽतिरेकं कथ्यते । अस्तित्त्वाभिधेयत्वादीनां विषये निरूप्यते यत् अभावस्य ज्ञानधर्माभावो वर्तते । अत्र नूतनदृष्टान्तमाध्यमेन विषयोऽयं प्रस्तूयते यत् एकस्मिन् वस्तुनि उपाधिभेदाद् पृथक्-पृथक् व्यवहारो विधीयते । यथा चोक्तम्- **"एकमेव वस्तूपाधिभेदाद्भिन्नव्यवहारविषयं,यथैक एव पिता पुत्रश्चेति भाव:"**[72]अर्थात् उपाधिभेदादत्र पितापुत्रयोर्व्यवहारो दृश्यते । तद्वत् अत्र साधर्म्यप्रदर्शने अस्तित्त्वाभिधेयत्वादिषु च वर्तते । **२.न्यायकन्दल्यां द्रव्यगुणकर्मसामान्यविशेषाणां पञ्चानां साधर्म्यनिरूपणम्**–कंदलीकारेण साधर्म्यरूपेण प्रदत्तानां शब्दानां व्याख्या प्रस्तूयते । ते च भाष्ये निम्ना: विद्यन्ते[73] **१.समवायित्वम्**-समवायसम्बन्धेन कुत्रापि स्थितिरिति समवायित्वेन उच्यते[74] । **२.अनेकत्वम्**-विभिन्नत्वं हि अनेकत्वशब्दस्यार्थो निरूप्यते । [75] **कुसुमोद्गमटीकायां द्रव्यगुणकर्मसामान्यविशेषाणां पञ्चानां साधर्म्यनिरूपणम्** -द्रव्यादीनां पञ्चानामिति पंक्ते व्याख्यायां वोम्मिदेवेन कंदलीमतमेव स्वीक्रियते । [76]अस्य व्याख्यायां वोम्मिदेवेन कथ्यते यत् सत्ताया: अनुवृत्तौ हेतुत्वस्य मुख्याभावे सति तस्य गौणत्वप्रतिपादनमपि न शक्यत इति अर्थात् तत्र योऽभाव: स: मुख्यो न तु गौण इति अत: सत्ताया: कल्पना करणीया इति स्पष्टीकरणपूर्वकं कंदलीवदेव प्रतिपाद्यते । **३.न्यायकन्दल्यां गुणकर्मसामान्यविशेषसमवायानां साधर्म्यनिरूपणम्**- तत्र साधर्म्यवैधर्म्यरूपे निर्गुणत्वं निष्क्रियत्वं च कथ्येते[77] । गुणादीनामिति संदर्भेणात्र गुणेभ्य: समवायपर्यन्तपदार्थानां कथनं क्रियते । अभावोऽपि स्वयुक्त भावस्य विशेषणं भवितुमर्हति- यथा'अघटं भूतलम्' इति विशिष्टप्रतीति:[78] ।

---

[67] .प्रशस्तपादभाष्यम्,न्या.कं. व्याख्या,हि.अनु.दुर्गाधर-झा-शर्मा,संपूर्णानन्द-संस्कृत-विश्वविद्यालय:, वाराणसी,१९९७,पृ.४१

[68] न्यायकन्दली,प्रशस्तपादभाष्यम्,हि.व्या.दुर्गाधर-झा-शर्मा, संपूर्णानन्द-संस्कृत-विश्वविद्यालय:, वाराणसी,१९९७,पृ.४१

[69] यस्य वस्तुनो यत् स्वरूपं तदेव तस्यास्तित्वम्। *न्या.कं.प्र.पा.भा.*पृ.४१

[70] "अभिधेयत्वमप्यभिधानप्रतिपादनयोग्यत्वम्,तच्च वस्तुनं स्वरूपमेव । भावस्वरूपमेवावस्थाभेदेन ज्ञेयत्वमभिधेयत्वञ्चोच्यते। *तत्रैव,* पृ.४१

[71] स्वरूपवत्त्वं विधिप्रत्यय विषयत्वम्/ *टी,न्या.कं,* पृ ५४

[72] *टी, न्या.कं.* पृ.५५

[73] द्रव्यादीनां पञ्चानां समवायित्वमनेकत्वञ्च । *न्या.कं.प्र.पा.भा.,* पृ.४२

[74] समवायित्वं समवायलक्षणा वृत्ति:। *तत्रैव,* पृ.४२

[75] *तत्रैव,* पृ.४३

[76] *टी.न्या.कं,* पृ.५४

[77] "गुणादीनां पञ्चानामपि निर्गुणत्वनिष्क्रियत्वे। *प्र.पा.भा.न्या.कं.* पृ.४३

[78] *न्या.कं.प्र.पा.भा.* पृ.४३

निर्गुणत्वादौ गुणस्याभाव इत्यादय: प्रतीतय: विशिष्टप्रतीतयो विद्यन्ते[79] । **कुसुमोद्गमे गुणकर्मसामान्यविशेषसमवायानां साधर्म्यनिरूपणम्**-एतस्यैव प्रकरणव्याख्यायां वोम्मिदेवेन अभावविषये वर्णनं क्रियते । तत्र अभावस्यातुच्छत्वं प्रतिपाद्यते[80] । संयोगादिसम्बन्धयुतां दण्डादीनां विशेषणत्वं यथा, तथैव तद्भावाद् अभावयुक्तमस्तीति विशेषणत्वम् इति तत्र प्रदर्श्यते[81] । ३.स्वसमयार्थशब्दाभिधेयत्वम्,४.धर्माधर्मकर्तृत्वञ्च रूपे एतेषां साधर्म्यं निरूप्यते । **४.न्यायकंदल्यां द्रव्यगुणकर्मणां साधर्म्यनिरूपणम्**- भाष्ये एतेषां साधर्म्यं कथयति-**"द्रव्यादीनां त्रयाणामपि सत्तासम्बन्ध:,सामान्यविशेषवत्वम्, धर्माधर्मकर्तृत्वम्"**[82]। **१.सत्तासम्बन्ध:**-तत्र कथ्यते यत् अनित्याविद्यमानवस्तुषु एव सत्ताया सम्बन्धो दृश्यते । तत्र कारणानां विशिष्टबलादेव सत्ता सम्बद्ध्यते । तत्र खरविषाणवदलीकपदार्थानाम् आपते: प्रसङ्गो नायाति इति उच्यते[83] । **२.सामान्यविशेषवत्वञ्च**[84],**३.स्वसमयार्थशब्दाभिधेयत्वम्** अत्र सूच्यते यत् अर्थ इति शब्देन द्रव्यगुणकर्म - णानि वैशेषिकशास्त्रस्याचार्यै: संकेतितम् । **४.धर्माधर्मकर्तृत्वम्**- द्रव्यादिषु त्रिषु धर्माधर्मयो: कारणत्वे एकेन एव संयोगेन उभयो धर्माधर्मयो: हेतुत्वमुच्यते । तत्र दृष्टान्तं ददाति-**"यथा भूमिरेकैव दीयमानापह्रियमाणा च धर्माधर्मयो: कारणम्**[85]**"** । तदनन्तरं स्पर्शरूपेण एकेन कार्येण कारणत्वं यथा–नरास्थिस्पर्श: अधर्मे तथा च कपिलाया: गो: स्पर्श: धर्मे कारणम् । तत्र धर्माधर्मयो: साक्षात्कारणत्वं विवक्ष्यत[86] इति । **कुसुमोद्गमे द्रव्यगुणकर्मणां साधर्म्यनिरूपणम्**- 'द्रव्यादीनां त्रयाणाम्...'कन्दलीकारप्रयुक्तशब्दानां प्रयोगस्य कारणं तत्र वोम्मिदेवेन प्रस्तूयते तथा च किञ्चिद् स्पष्टीकरणमपि क्रियते । **१.सत्तासम्बन्ध:**- 'इदं त्विति' इति शब्दप्रयोगेण शंकार्थं नास्तिकानां वैतण्डिकानां च मतमुपस्थाप्यते । कारणसामर्थ्यनैव अविद्यमानवस्तुषु सत्तासम्वन्ध इति प्रागभावरूपे यदि सत्तासम्बन्ध: स्वीक्रियेत चेत् शशविषाणोत्पत्तिप्रसङ्ग:[87]अर्थात् अत्र कुसुमोद्गमकारेण अन्यथा स्पष्टीकरणं प्रदत्तम् । **२.सामान्यविशेषवत्वम्,३.धर्माधर्मकर्तृत्वम्**-वोम्मिदेवेन सर्वप्रथमं विषयोऽयम् आक्षेपादिमाध्यमेन प्रस्तूयते । तत्र धर्माधर्मयो: कारणत्वम्-यथा एकस्यैव गङ्गाया: जलं स्तूयमानं निन्द्यमानं च यथाक्रमं धर्माधर्मयो: हेतुरिति निरूपितम् । अत्र स्वशक्तिरेव वस्तुरूपे धर्मा - धर्मयो: सहकारित्वरूपेण उच्यते[88]। द्वितीयो दृष्टान्त:-'गा दद्यात्' इत्यादौ गो: तदन्वयिमात्रत्वस्यैव धर्माधर्मयो: कारणत्वं प्रतिपाद्यते। दानादिकार्ये अनियतदेशकालस्य अन्वये सत्यपि गो: तदन्वयव्यवच्छेदमात्रे व्यापार इति[89] कुत्रचिद् स्वशक्ति: तथा च कुत्रचिद् धर्माधर्मयो: कारणत्वेन अन्वयीक्रियते ।

---

79 *न्या.कं.प्र.पा.भा*, पृ.४३

80 *टी.न्या.कं.* पृ.५६

81 *टी.न्या.कं.* पृ.५६

82 *प्र.पा.भा.न्या.क.* पृ.४३-४४

83 *न्या.कं.प्र.पा.भा*, पृ.४४

84 *तत्रैव.* पृ.४५

85 *तत्रैव*, पृ.४५

86 *तत्रैव*, पृ.४५

87 *टी'न्या.कं*, पृ.५७

88 *तत्रैव*, पृ.५८

89 *टी.न्या.कं.* पृ.५८

५.**न्यायकन्दल्यां कारणवतां द्रव्याणां साधर्म्यप्रतिपादनम्-** प्रश्नोत्तरमाध्यमेन कन्दल्यां विषयोऽयं स्पष्टीकृत:[90] । अत्र साधर्म्यत्वेन कार्यत्वम् अनित्यत्वं च उच्यते[91] । येषां द्रव्यादीनां कारणै: सह उत्पत्तिर्जायते तेषां एते साधर्म्यद्वयमिति च कथ्यते।१. **कार्यत्वम्**-अस्य कार्यत्वं लक्षयति- **"कारणाधीन: स्वात्मलाभ: कार्यत्वमिति लक्षणम्"**[92] लक्षणमिदं कार्यत्वलक्षणस्य सर्वेषु लक्ष्येषु वर्तत इति तत्र सूचितम् । २.**अनित्यत्वम्**-प्रागभावे न उभयो उत्पत्तिविनाशयो: स्थितिरिति[93] । विनाशशीलमिदं शरीरं;विनाशित्वं तस्य लोके इत्यादय: स्वारसिकप्रतीतयो न चिरकालस्थायिन्य:, उत्पत्त्यन्तरं विनाशस्यावश्यंभावित्वं[94] सूच्यते । **कुसुमोद्गमे कारणवतां द्रव्याणां साधर्म्यप्रतिपादनम्**-अत्रापि वोम्मिदेवेन विशेष्य –विशेषणयो: बोधे एकत्वं स्वीक्रियते । विशेष्यविशेषणयो: प्रयोजकत्वं बुद्धिसिद्धमेव मन्यते । तस्य उपलक्ष्यस्य समानकालत्वं न अङ्गीक्रियते । यदि एवं स्वीक्रियते चेत् कुरूक्षेत्रत्वादिव्यवहारस्य लोप एव स्यात्[95]अर्थात् विनाशानन्तरं कथ्यते यत् घटस्य कार्यत्वं पूर्वमपि आसीदिति अनित्यत्वं तस्य तत्रोच्यते । विशेष्यविशेषणयो: प्रतीति: बुद्धिसिद्धा वर्तते । उपलक्ष्यस्य समानकालिकत्वं न स्वीक्रियते यतो हि एवं सति कुरूक्षेत्रत्वादिव्यवहारलोप: स्यात्[96] अर्थात् अनित्यत्वव्यवहारप्रतीति: नैककालिका वर्तते तत्तु प्रागभावमाध्यमेनापि वर्तत इति भाव: । ६.**न्यायकन्दल्यां सामान्यविशेषसमवायानां साधर्म्यम्**-द्रव्यादीनां त्रयाणां साधर्म्यं भाष्यकारानुमतं स्वीकृत्य **"सामान्यादीनां त्रयाणां स्वात्मसत्त्वं बुद्धिलक्षणत्वमकार्यं सामान्यविशेषत्वं नित्यत्वमर्थशब्दानभिधेयत्वञ्चेति"**[97]प्रकरणेऽस्मिन् सामान्यविशेषसमवायानां साधर्म्यं प्रतिपाद्यते । अत्र आचार्येण विशदा व्याख्या प्रस्तूयते[98] । विस्तारभयात् न वर्ण्यते । ७.**अर्थशब्दाभिधेयत्वम्**-'अर्थ'इति शब्देन वैशेषिकशास्त्रस्य द्रव्यगुणकर्मणां त्रयाणां बोधो स्वीक्रियते । तद्वत् अभिधावृत्त्या सामान्यादीनां त्रयाणाम् अनवबोधोऽपि एतेषां साधर्म्यं[99] वर्तत इति निरूप्यते । **कुसुमोद्गमे सामान्यविशेषसमवायानां साधर्म्यनिरूपणम्-२.बुद्धिलक्षणत्वम्-** बुद्धिलक्षणत्वप्रतिपादने वोम्मिदेवेन प्रतिपाद्यते यत् बुद्धिभिन्ना बहव उपलक्षणा: विषयीक्रियन्ते यै: कारणानि अपेक्ष्यन्ते[100] । अत्र कथयितुं शक्यते यत् वोम्मिदेवेनात्रोद्भावना कृता,यद्बुद्धिलक्षणं प्रागभावनित्यद्रव्यगुणेषु अपि वर्तते । वोम्मिदेवेन अस्य व्याख्यानं व्यस्त रीत्या क्रियते[101], परञ्च नात्र विशेष: किञ्चिद् प्रतिपादित: ।

---

[90] कार्य्यत्वानित्यत्वे कारणवत्तामेव।. *न्या.कं.प्र.पा.भा.* पृ.४६

[91] *न्या.कं.प्र.पा.भा.* पृ.४६

[92] *तत्रैव*, पृ.४६

[93] *तत्रैव*, पृ.४६

[94] *तत्रैव, पृ.*४६-४७

[95] *टी.न्या.कं.* पृ.६०

[96] *तत्रैव*, पृ.६०

[97] *प्र.पा.भा.न्या.कं.* पृ.४९

[98] *न्या.कं.प्र.पा.भा.* पृ.४९

[99] *तत्रैव*, पृ.५३

[100] *टी.न्या.कं*, पृ.६४

[101] *टी.न्या.कं.* पृ.६५-६६

२.**द्रव्याणां साधर्म्यं वैधर्म्यं च-१.न्यायकन्दल्यां नवद्रव्याणां परस्परसाधर्म्यवैधर्म्यम्-** कन्दलीकारेणात्र भाष्यस्य शब्दशो व्याख्या प्रस्तूयते । एतेषामपि द्रव्याणां १.द्रव्यत्वजात्या सह सम्बन्ध:,२.स्वात्मनि आरम्भकत्वम्, ३.गुणवत्त्वम्, ४.कार्यकारणाविरोधित्वम्,५.अन्त्यविशेषवत्वञ्च प्रशस्तपादाचार्येण स्वग्रन्थे द्रव्याणां साधर्म्यविषये सूचितम्[102] वर्तते । भाष्यकार: तत्र सूत्ररूपा पङ्क्ति: प्रस्तौति-**"पृथिव्यादीनां नवानामपि द्रव्यत्वयोग: स्वात्मन्यारम्भकत्वं गुणवत्त्वं कार्यकारणविरोधित्वमन्त्य विशेषवत्त्वम्**[103]श्रीधरेण अत्र विशदा चर्चा विधीयते ।

**कुसुमोद्गमे नवद्रव्याणां परस्परसाधर्म्यवैधर्म्यम्-** कुसुमोद्गमकारेण अन्त्यविशेषत्वस्यार्थ: अनाश्रितत्वमित्यङ्गीक्रियते[104] । कंदलीकारेण अन्त्यद्रव्येण सह सम्बन्ध इति स्वीक्रियते । २.**न्यायकन्दल्यां अनित्यद्रव्याणां साधर्म्यं वैधर्म्यम्-** "**आश्रितत्वञ्चान्यत्र नित्यद्रव्येभ्य:**"[105] इति सूत्रे आश्रितत्त्वमित्यस्यार्थ: परतन्त्ररूपेण ज्ञानं हि स्वीक्रियते । समवायसम्बन्धेन वस्तुन कुत्रापि स्थितिर्न विद्यते; यतो हि समवाय: कुत्रापि समवायसम्बन्धेन न वर्तत इति प्रतिपाद्यते । पृथिव्यपतेजवायूनां परमाणुषु तथा च नित्यद्रव्येषु आश्रितत्वं न वर्तते । अत: एतेषां साधर्म्यं नास्तीति प्रतिपाद्यते[106] । **कुसुमोद्गमे अनित्यद्रव्याणां साधर्म्यं-वैधर्म्यम्-"द्रव्याश्रितत्वञ्चान्यत्र नित्यद्रव्येभ्य:"**[107] । अस्या: व्याख्यायां कंदलीकारेण अनित्यद्रव्यगुणकर्मणां द्रव्याश्रितत्वं प्रतिपादितं अत्र नित्यगुणान् व्यतिरिच्य त्रयाणां साधर्म्यं वर्तत इति व्याख्यानोऽपिध्येय इति कुसुमोद्गमकारेण प्रोच्यते[108] । ३.**न्यायकन्दल्यां पारिमाण्डल्यपदार्थभिन्नानां द्रव्याणां साधर्म्यम्-** सर्वप्रथमं कंदलीकार: पारिमाण्डल्यस्य लक्षणं ददाति- यथा **"पारिमाण्डल्यमिति परमाणु परिमाणम्**[109]**"** अर्थात् परमाणु परिमाणयुक्तपदार्थानां साधर्म्यं[110] कारणत्वं न वर्तत इति कथ्यते । **कुसुमोद्गमे पारिमाण्डल्यपदार्थभिन्नानां द्रव्याणां साधर्म्यम्-** श्रीधरेणोक्तानाम् अन्त्यावयविनां परिमाणेतर 'कारणत्वम्' इत्यस्मिन् विषये वोम्मिदेवेनापि स्वमतमुपस्थाप्यते । अत्र 'ग्रहणमि'त्यनेन विनश्यदवस्थायां वर्तमानानां द्रव्याणां संयोगविभागकर्मचरमसंस्कारज्ञानं च गृह्यते[111] । अत्र कंदलीकारभिन्नं प्रतिपाद्यते । ४.**न्यायकन्दल्याम् अनित्यद्रव्याणां साधर्म्यम्–"अनाश्रितत्वनित्यत्वे चान्यत्रावयविद्रव्येभ्य:**[112]**"**इति पंक्ते:

---

102 *न्या.कं,प्र.पा.भा,* पृ.५६

103 *प्र.पा.भा.न्या.कं.* पृ.५४

104 *टी.न्या.कं.* पृ.६८

105 *प्र.पा.भा.न्या.कं.* पृ.४२

106 *न्या.कं.प्र.पा.भा.* पृ.४२

107 *प्र.पा.भा.न्या.कं.*पृ.४८

108 *टी,न्या.कं,*पृ.६२

109 *न्या.कं.प्र.पा.भा.* पृ.४७

110 कारणत्वञ्चान्यत्र पारिमाण्डल्यादिभ्य:। *प्र.पा.भा.न्या.कं.* पृ.४७

111 *टी.न्या.कं.* पृ.६१

112 *प्र.पा.भा.न्या.कं.* पृ.५७

व्याख्यायां निरवयवद्रव्याणां साधर्म्यद्वयम् अनाश्रितत्वं नित्यत्वं च कथ्यते[113] । **कुसुमोद्गमे अनित्यद्रव्याणां साधर्म्यम्-** कुसुमोद्गमे नात्र व्याख्या प्राप्यते । **५.न्यायकन्दल्यां पृथिव्युदकज्वलनपवनात्ममनसां साधर्म्यम्-"पृथिव्युदकज्वलनपवनात्ममनसामेकत्वा-परजातिमत्त्वे"**[114] इति पंक्तेः व्याख्यायां केवलं शब्दानामर्था एव प्रतिपादिताः । **कुसुमोद्गमे पृथिव्युदकज्वलनपवनात्ममनसां साधर्म्यम्- १.अनेकत्वम्-** तत्र कथ्यते यत् द्रव्याणि इति कथनेन आकाशकालदिक्षु अनेकत्वं दृश्यते; अतः अस्य कृते कथितम् 'प्रत्येकमिति[115]' । **२.अपरजातिमत्त्वम्-** पृथिवीत्वादिषु अपसामान्यम् अर्थात् अपरजातिमत्त्वं कथ्यते[116] । **६.न्यायकन्दल्यां क्षितिजलज्योतिरनिलमनसां साधर्म्यम्-"क्षितिजलज्योतिरनिलमनसां क्रियावत्त्वं मूर्तत्वं परत्वापरत्ववेगवत्त्वानि"**[117]इत्यत्रापि कन्दलीकारेण मुख्य-मुख्यशब्दानाम् अर्थाः सूच्यन्ते[118] । **कुसुमोद्गमे क्षितिजलज्योतिरनिलमनसां साधर्म्यम्-**२.क्षितिजलज्योतिरनिलमनसां यत्र क्रियावत्त्वं कथ्यते तत्र उक्तम्- **"क्रियावत्त्वमुत्क्षेपणादिक्रियायोगः"**[119] । 'आत्मा जानाति','आकाशं विद्यते' इत्यादिषु प्रतीतिषु क्रियावत्त्वनिवारणाय 'उत्क्षेपणादि' इति शब्दः प्रयुक्तः[120] । क्रियाया वेगभेदोऽपि वैशेषिकसूत्रकारमुद्धृत्य कथ्यते । क्रियायाः वेगभिन्नत्वे प्रत्यक्षस्य सुप्रसिद्धत्वं प्रतिपाद्यते । तत्र उद्धृतं सूत्रं यथा–**"नोदनादाद्यमिषो कर्म तत्कर्मकारिताच्च संस्कारः तथोत्तरमुत्तर च"**[121] मन्दतायां वेगस्य प्रतीतिर्न भवति इति लोके प्रतीयते । स्फटिकादौ गन्धवत् अत्रापि असमुत्कटतया मन्दगतादयो व्यवहारः प्रतिपाद्यते । यथा चन्दनस्य गन्धत्वं सुप्रसिद्धं तथा शीघ्रगतौ वेगत्वमिति कथ्यते[122] । तत्र क्रियाक्षणानां वेगव्यवहारो नैरन्तर्येणानुमीयते तत्र लौकिकप्रसिद्धिः व्यक्ता चेति कंदलीकारप्रोक्तशब्देनैव सूच्यते; इति वोम्मिदेवेन स्वयमेव अङ्गीक्रियते[123] । **७.न्यायकन्दल्याम् आकाशकालदिगात्मनां साधर्म्यम्-**भाष्यकारेण **"आकाशकाल दिगात्मनां सर्वगतत्वं परममहत्त्वं सर्वसंयोगिसमानदेशत्वञ्च[124]"** इति पंक्तिमाध्यमेन साधर्म्यनिर्देशः क्रियते । आकाशकालदिशां परममहत्त्वमपि साधर्म्यं निर्दिश्यते । आकाशस्य आधारत्वव्याख्याने 'सर्वाधार' शब्दस्य लाक्षणिकप्रयोगो विधीयते, यतो हि आकाशे पदार्थानाम् आधारत्वं पदार्थानां संयोगैरेव संपाद्यते[125]।

---

113 *न्या.कं.प्र.पा.भा.* पृ.५६

114 *प्र.पा.भा.न्या.कं.* पृ.५६

115 *टी.न्या,कं.*पृ.६९

116 पृथिवीत्वादिजातिसम्बन्धित्वमिति द्रष्टव्यम्। द्रव्यत्वजात्यपेक्षया अपरजातिमत्त्वमित्यर्थः। *तत्रैव,* पृ.६९

117 *प्र.पा.भा.न्या.कं.* पृ.५६-५७

118 *न्या.कं.प्र.पा.भा.* पृ.५७

119 *तत्रैव,* पृ.५७

120 *टी.न्या.कं.*पृ.६९

121 *वै.सू.* ४/१/१७

122 *टी.न्या.कं,* पृ.७०

123 *तत्रैव,* पृ.७०

124 *प्र.पा.भा.न्या.कं.* पृ.५८

125 *न्या.कं.प्र.पा.भा. पृ.५९*

**कुसुमोद्गमे आकाशकालदिगात्मनां साधर्म्यम्-१.सर्वगतत्वम्-** कुसुमोद्गमकारेण सर्वगतत्वविषये लिख्यते यत् अत्र सर्वगतत्वेनात्र समेषां संयोग: कथित; यतो हि समवायस्य न तत्र वर्तमानतेति । आकाशादीनां परस्परं क्रिया न संभाव्यते । अमूर्तत्वात् नात्र संयोग: तथा च अज: संयोगोऽपि न तत्र विभुद्रव्येषु जायत इति वोम्मिदेवेन पृथक्त्वेन प्रतिपादितम् । अत्र कंदलीकारेण मूर्तद्रव्याणां संयोगत्वमुक्तम्[126] अर्थात् अत्र कंदलीकारेण कथितं यत् आकाशादीनां नित्यद्रव्याणां चर्चायां द्रव्यत्वात् न तत्र तेषु गुणसंयोगस्य चर्चा क्रियते संयोगोऽपि अज: संयोगवन्न वर्तत इति निरूप्यते[127] । अन्या संपूर्णा चर्चा कंदलीकारवदेव वर्तत इति । **२.परममहत्त्वम्-**आकाशादिषु परममहत्परिमाणं तत्रापि वोम्मिदेव स्वीकरोति[128] । अणुत्वमहतत्त्वयो उभयो: परिमाणभेदाभिन्नत्वात् परिमाणस्येत्ताया: अपचत्वाच्च संख्यापरिमाणत्वयोर्मध्ये परिमाणत्वप्रसङ्ग: समापद्यते । परिमाणस्याधाराभावे 'इह' प्रत्ययविषयत्वमपि तत्राङ्गीक्रियते[129]अर्थात् परिमाणमिदं परमाणुपरिमाणादिवत् महत्वपरिमाणान्तराकाशादिमहत्सु परममहत् परिमाणत्वं वर्तत इति प्रतिपाद्यते । **३.स्वसंयोगिदेशत्वम्-** सर्वमूर्तपदार्थानां संयोग एव आकाशादिषु वर्ण्यते । वोम्मिदेवेनात्र व्याकरणनियम: प्रतिपाद्यते । अनेन आचार्यस्य व्याकरणवैदुष्यमपि प्रतीयते - यथोक्तम्- **कृत्तद्धितसमासेषु सम्बन्धाभिधानत्वं तुल्यमिति न्यायात्"**[130] अर्थात् एतस्माद् न्यायात् आकाशादीनां मूर्तसंयोगित्वेन मूर्तसंयोग: प्रतिपादित: । **८.न्यायकन्दल्यां पृथिव्यादीनां पञ्चानां साधर्म्यम्-"पृथिव्यादीनां पञ्चानामपि भूतेन्द्रिप्रकृतित्व - बाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्त्वानि"**[131]इति भाष्यस्य पंक्ते: व्याख्या विशदा विहिता । अन्येभ्यो द्रव्येभ्यो वैधर्म्यं प्रदर्शयन् कंदलीकारेण पृथिवीप्रभृतीनां द्रव्याणां साधर्म्यं व्याख्यातम् । **१.भूतत्वम्-** तत्र भूतत्वस्यार्थ: अभिधावृत्या भूतत्वशब्देन पृथिवीत्वादीनां चतुर्णाम् अवबोधनार्थे 'भूत' शब्द: संकेतित:[132] । २.**बाह्यैन्द्रियप्रत्यक्षत्वम्**[133]- बाह्यशब्दप्रयोगोऽपि मनस: एकैकेन्द्रियग्राह्यत्वरूपासामर्थ्यं प्रदर्शनाय प्रयुक्त:[134] **कुसुमोद्गमे पृथिव्यादीनां पञ्चानां साधर्म्यम्-** अत्र कंदलीकारस्य मतमेवानुस्रियते । **९.न्यायकन्दल्यां पृथिव्यपतेजवायूनां चतुर्णां साधर्म्यम्-** भाष्योक्तपंक्ते[135] व्याख्यायां कंदलीकारेण सूच्यते यत् 'चतुर्णाम्'इत्यनेन पृथिव्यपतेजोवायूनां बोधो जायते । एतेषां चतुर्णां द्रव्यारम्भकत्वम् अर्थात् द्रव्यसमवायि -कारणत्वं साधर्म्यं सूच्यते तथा च स्पर्शवत्वस्य स्पर्शसमवायत्वमर्थ: सूच्यत[136] इति । **कुसुमोद्गमे पृथिव्यपतेजवायूनां चतुर्णां साधर्म्यम्-** कुसुमोद्गमकारेण चतुर्षु द्रव्येषु द्रव्यारम्भकत्वरूपविशेषणं

---

126 *टी.न्या.कं. पृ.७१*

127 *टी,न्या.कं.* पृ.७१

128 हस्तमितस्त्यादिपरिमित्यभावे अणुत्वान्तरपरमाणुत्वपरिमाणवन्महत्त्वावान्तरपरममहत्वमपि परिमाणमाकाशादिषु स्वीकर्त्तव्यम्। *तत्रैव,* पृ.७१

129 *टी.न्या.कं.* पृ.७१

130 *तत्रैव,* पृ.७१

131 *प्र.पा.भा.न्या.कं.* पृ ५९

132 *न्या.कं.प्र.पा.भा.* पृ.५९

133 *तत्रैव,* पृ.६०

134 *तत्रैव,* पृ.६३

135चतुर्णां द्रव्यारम्भकत्वस्पर्शवत्त्वे। *प्र.पा.भा.न्या.कं.* पृ.६३

136 *न्या.कं.प्र.पा.भा.* पृ.६३

तेषां स्वरूपत्वेन कथ्यते[137]। कुसुमोद्गमकारेण द्रव्यारम्भकत्वं पृथिव्यपतेजवायूनां चतुर्णां स्वरूपत्वेन वर्ण्यते। **१०.न्यायकन्दल्यां पृथिव्यपतेजसां त्रयाणां साधर्म्यम्- "त्रयाणां प्रत्यक्षत्वरूपवत्त्व- द्रवत्वानि"**[138] इत्यस्यां पंक्तौ पृथिव्यपतेजसां त्रयाणां साधर्म्यं प्रत्यक्षत्वं कथितम्[139] । **कुसुमोद्गमे त्रयाणां साधर्म्यम्-** अत्र कुसुमोद्गमकारेण व्याख्यानं न लिखितमिति । **११.न्यायकन्दल्यां पृथिवीजलयो: साधर्म्यम्-** उभयो: पृथिवीजलयो: रसत्वम् गुरुत्वमिति साधर्म्यम् । **कुसुमोद्गमे पृथिवीजलयो: साधर्म्यम्-** अस्य व्याख्या वोम्मिदेवेन न विहिता इति । **१२.न्यायकन्दल्यां भूतात्मनां साधर्म्यनिरूपणम्-** भूतात्मनां वैशेषिकगुणत्वं साधर्म्यम् । [140] तदनन्तरं विशेषशब्दस्यार्थो वक्ति यथा- **"विशेषो व्यवच्छेद: विशेषाय स्वाश्रयस्येतरेभ्यो व्यवच्छेदाय प्रभवन्तीति वैशेषिका:"**[141]। अत्र विशेषशब्दस्यार्थ: भेदक इति स्वीकृत: । **कुसुमोद्गमे भूतात्मनां साधर्म्यनिरूपणम्-**वोम्मिदेवेन अस्य व्याख्यायां केवलम् एतावन्न मात्रं कथितं यत् शुक्लत्वभास्वरत्वादीनामपेक्षया रूपरसादीनां विशेषगुणत्वं वर्तते । यथा च लिखितम्- **"शुक्लत्वभास्वरत्वाद्यवान्तरसामान्यापेक्षयारूपरसस्पर्शानां विशेषगुणत्वं द्रष्टव्यम्"**[142] । **१३.न्यायकन्दल्यां क्षित्युदकात्मनां साधर्म्यम्-**भाष्यवदेव[143]चतुर्दशगुणयोग: कथित:[144] । **कुसुमोद्गमे क्षित्युदकात्मनां साधर्म्यम्-**अत्र कुसुमोद्गमकारेण व्याख्यानं न विहितम् । **१४.न्यायकन्दल्याम् आकाशात्मनां साधर्म्यम्- "आकाशात्मनां क्षणिकैकदेशवृत्तिविशेष- गुणवत्त्वम्"**[145] 'क्षणिकत्वम्' इति शब्देन आकाशात्मनो: अव्याप्यवृत्त्या वर्तमानानां विशेषगुणानां क्षणिकत्वम् आशुत्तरविनाशित्वं वा सूच्यत इति । **कुसुमोद्गमे आकाशात्मनां साधर्म्यम्-** 'आकाशात्मनाम्...'अत्र यत् उत्पत्तिविनाशकारणस्य सन्निधिम् अनुभूय नश्वराणां विशेषगुणानां नाशो शीघ्रमेव दृश्यते[146]। अत: क्षणिकत्वम् एतेषामिति । **१५.न्यायकन्दल्यां दिक्कालयो: साधर्म्यनिरूपणम्-"दिक्कालयो: पञ्चगुणवत्त्वं सर्वोत्पत्तिमतां निमित्तकारणत्वञ्च"**[147] इति पंक्ते व्याख्यायां संख्यापरिमाणपृथक्त्वसंयोगविभागाश्च निर्दिश्यन्ते । तदन्यत् निमित्तकारणत्वमपि एतेषां साधर्म्यरूपेण कथ्यते[148] । यथोक्तम्-**"इदमेव च देशस्य कालस्य च निमित्तत्व,.**

---

137 *टी,न्या.कं.* पृ.७६

138 *प्र.पा.भा.न्या.कं.* पृ ६३

139 *न्या.कं.प्र.पा.भा.* पृ. ६३

140 भूतात्मनां वैशेषिकगुणवत्त्वम्। *प्र.पा.भा.न्या.कं.* पृ.६४

141 *तत्रैव*,पृ.६४

142 *टी.न्या.कं.*पृ.७६

143 क्षित्युदकात्मनां चतुर्दशगुणत्वम्। *प्र.पा.भा.न्या.कं.*पृ ६५

144 *न्या.कं.प्र.पा.भा.*पृ.६४-६६ (पादटिप्पण्यामुल्लिखिता:)

145 *प्र.पा.भा.न्या.कं.* पृ.६५

146 *टी.न्या.कं.* पृ.७८

147 *प्र.पा.भा.न्या.कं.*पृ.६५

148 *न्या.कं.प्र.पा.भा.* पृ.६६

**यदेकत्र कार्योत्पत्तिरन्यत्रानुत्पत्तिरिति"**[149] । अतो उभयो: पञ्चगुणत्वं निमितकारणत्वं च साधर्म्यम् । **कुसुमोद्गमे दिक्कालयो: साधर्म्यनिरूपणम्-** "दिक्कालयो...वोम्मिदेवेनात्र एका व्याकरणज्ञान- परिचायिका कारकसम्बद्धा उक्ति: प्रदत्ता, यत्र वैयधिकरण्यचर्चा तत्र विवक्षात: कारकाणि भवन्तीति कथनवत् दोषो न उच्यते-यथोक्तं वोम्मिदेवेन–**"अधिकरणस्य कारकत्वेऽपि सामान्यापेक्षया अवर्जनीयसन्निधित्वाद् विशेषस्य च व्यवहारो देशनिमित्तत्वम्,वैयधिकरण्यं तु विवक्षात: कारकाणि भवन्तीति परिभाषणान्न दोष:"** [150] । एतदनन्तरं दिक्कालयो: निमित्तत्वस्य अन्वय-व्यतिरेकविषयिणी चर्चा अनुमानवाक्येन प्रस्तौति तद्यथा:"[151]

**१६.न्यायकन्दल्यां क्षितितेजसो: साधर्म्यम्-**कंदलीकारेण अत्र विशदा[152]व्याख्या प्रस्तूयते । 'निमित्तादुपजातं नैमित्तिकम्[153]' इति व्युत्पत्त्यनुगुणं नैमित्तिकत्वं कारणेनोत्पन्नत्वेन कथ्यते । घृतसुवर्णयो: तैजसत्वं वर्तते यतो हि अग्निसंयोगेन उभयो: द्रवत्वं प्रदर्श्यते[154] । एतदनन्तरं सुवर्णस्य नैमित्तिकत्त्वविषयिणी चर्चायां तत्र समासाध्यते यत् पार्थिवद्रव्येषु वर्तमानस्वभावेन अत्यन्ताग्निसंयोगेन नश्वरत्वं तत्तु सुवर्णे नास्तीति प्रतिपाद्यते । सुवर्णस्य पार्थिवद्रवत्वं स्वीक्रियेत चेत् अग्निसंयोगाद् तस्यापि पार्थिवद्रव्यवत् विनाशो भवेदिति[155] । अत: सुवर्णस्य पार्थिवत्वम् अनेन खण्डयत इति । तत्रोच्यते यदसारमनुमानम् इदम् । सुवर्णे वर्तमानं गुरुत्वं तस्यैव लोष्ठादिवत् स्वभाव: । अन्यच्च तत्र घृतादिषु स्नेहवत् अन्यद्रव्यस्य संयोगोऽपि न भवितुमर्हतीति प्रतिपादितम्[156]। तथापि अनेन न जायते तैजस्त्वसिद्धि: । अन्यच्च परप्रकाश्यरूपहेतु: हेत्वाभासत्वेन कथयित्वा सुवर्णस्य रूपम् अनुद्भूतरूपेण मन्यते अर्थात् सुवर्णस्य भास्वरत्वं नोद्भूतम्, अत: परप्रकाश्यं न वर्तत इति प्रतिपादितम् । साधकबाधकयुक्तीनामेतद् केवलं दिग्दर्शनमात्रमिति तत्रैव श्रीधरेणोक्तम्[157] भावोऽयं यत् गुरूत्वं सुवर्णस्य द्रव्यान्तरसंयुक्त लोष्ठादिवत् तस्य स्वभाव एव वर्तते । अनेन प्रकारेण श्रीधराचार्येण सुवर्णस्य तैजसत्वं स्वीकृतं वर्तते । तस्य सुवर्णस्य भास्वरशुक्लं रूपमनुद्भूतं वर्तते ।

**कुसुमोद्गमे क्षितितेजसो: साधर्म्यम्-** स्वयं स्वोद्भावनया एव कुसुमोद्गमकारेण कथ्यते यत् सुवर्णस्य तैजसत्वं स्वीकृत्य एव तद्द्रव्यत्वस्य 'अतद्धर्म' इति आशंका कृत्वैव 'गुरूत्ववदिति' इति शब्देन परिहार्यते । 'अतएव' इति शब्देन सुवर्णस्य द्रवत्वमन्यथा साध्यते । अनेन सुवर्णस्य तैजसत्वं प्रतिपादितमिति । अत्र अनुमान -वाक्यमुपस्थापयति यथोक्तम्- **"सुवर्णपरमाणवस्तैजसा: परमाणुत्वे क्षीयमाणद्रवत्वे च सति**

---

[149] *तत्रैव,* पृ.६६

[150] *टी.न्या.कं.*पृ.७७-७८

[151] दिक्कालविशेषौ कार्यविशेषनिमित्तं तदन्वयव्यतिरेकित्वाद् बीजवदिति प्रयोग:। *टी.न्या.कं.* पृ.७८

[152] क्षितितेजसोनैमित्तिकद्रवत्वयोग:। *प्र.पा.भा.न्या.कं.* पृ.६७

[153] *न्या.कं.प्र.पा.भा.* पृ.६७

[154] *तत्रैव,*पृ.६७

[155] पार्थिवद्रवत्वस्यात्यन्याग्निसंयोगेन भस्मीभावोपलब्धे:, अस्य च तदभावात्। *न्या,कं प्र.,पा.भा.* पृ.६७

[156] तदप्यसारम्, किं तत्र गुरूत्वस्योपलब्धिस्तद्गुणत्वादुतान्यगुणत्वेऽपि घृतादिष्वपि स्नेहवत् स्वाश्रयप्रत्यासत्तिनिमित्तादिति संशयस्याविवृत्ते:। *तत्रैव.* पृ.६८

[157] यदपि साधनान्तरं परप्रकाश्यमानत्वादिति,तदप्यनुद्भूतरूपवत्त्वेनाप्युपपत्तेरसाधनम्। दिङ्गमात्रमस्माभिरूदिष्टम्। *न्या.कं.प्र.पा.भा.* पृ.६८

**अत्यन्त्मिसंयोगेऽक्षीयमाणत्वादिति"**[158] । अत्यन्ताग्निसंयोगेन पार्थिवद्रव्यस्य नाशो जायत इति व्याप्तिभङ्गो दर्शनीय इति । सुवर्णद्रव्यत्वनाशो न भवतीति तु सुवर्णद्रव्यत्ववादिना अपि अङ्गीक्रियते नानवबोधादिति वर्ण्यते[159] । 'आचार्या ह्येवमभिप्रैति' इति शब्दप्रयोगेण वैशेषिकाचार्याणां मतं प्रस्तूयते । तत्रोच्यते यत् यथा द्रवत्वसहचरितपार्थिवरूपस्य अत्यन्ताग्निसंयोगाद् यदि नाश: तथा सुवर्णेऽपि स्याच्चेत् तत्र तस्य विनाशप्रसङ्गो भवेदिति[160] । सुवर्णस्य अम्भसो व्यतिरेकप्रदर्शने केचन हेतव: प्रस्तूयन्ते । ते च रूपत्वात् वाय्वादिभिन्नशैत्य:,स्नेहकार्यसंग्रह:, सांसिद्धिकद्रवत्वं च विद्यन्ते; एते सर्वे जले उपलभ्यन्ते । एभिरेव हेतुभि: सुवर्णस्य पृथक्त्वं प्रतिपाद्यत इति । तदनन्तरं भेदे व्यतिरेकस्य उदाहरणं वक्ति यथा च– **"सुवर्णं न पृथिवी अत्यन्ताग्निसंयोगप्रतिबन्धविरहे अविनश्यद्रूपत्वात् सौरालोकावदिति"**[161] । एवं प्रकारेण सुवर्णे पार्थिवद्रव्यत्वस्य खण्डनं क्रियते । उपर्युक्तानुमाने अबाध्यमान-सुवर्णसमानाधिकरण्यत्वात् 'रूपवद् इति अनुमानं तत्र कर्त्तव्यमिति निर्दिश्यते अर्थात् सुवर्णे रूपवत्त्वं वर्तत इति । सुवर्णस्याद्रवत्वमपि न कथयितुं शक्यते; यतो हि तत्र तैजस्त्वं वर्तते । तत्र सौरालोकेन बाधो विद्यत इत्यपि न वाच्यम् । सौरालोके अद्रवत्वप्रतिपादने अदृष्टविरहप्रयुक्तत्वं प्रतिपाद्यते; नोचेत् पार्थिवघृतादौ लोष्टवत् अद्रव्यत्वनिवारणे कोऽपि हेतुरपि न वर्तत[162]अर्थात् अदृष्टस्याभावकारणात् तत्र सौरालोके द्रवत्वं न वर्तते । एतदनन्तरं सुवर्णस्य अभस्मीभावं व्याख्येय इति कथयति तद्यथा-**"भस्मीभावोपलब्धेरिति पदं पार्थिवद्रवत्वस्य नियमेनात्यन्ताग्निसंयोगेन भस्मीभवत्पृथिव्य -स्समानाधिकरण्येनोपलब्धे:, सुवर्णादिसामान्याधिकरण्येना -नुपलब्धिरिति व्याख्येयम्"**[163] । कंदलीकारेण प्रतिपादितं यत् सुवर्णस्य तैजसत्वे अनुद्भूतरूपं वर्तते । वोम्मिदेवेन तत्र निरूप्यते यत् इह रूपस्यानुद्भवो विवक्ष्यते इतरथा नयनरश्मिवद् द्रव्यस्य अप्रत्यक्षत्वप्रसङ्ग: समापद्यते । यदि रूपम् अभिभूतं तर्हि महा -रजनाभिभूत सितिमा इव प्रत्यक्षमेव लक्ष्येत इति । तत्राभिभावकं तु उपलम्भकपार्थिवभागरूपमेव वर्तत इति । तेजस: शुक्लरूपत्वं वर्तते; अत: पीतिमाया: अनुपपति: तत्र कथ्यते[164] । हिरण्यस्य तैजसत्वे श्रुति: प्रमाणरूपेण स्थापयति- **"तेजो हिरण्यमिति श्रुतिरेव प्रमाणम्"**[165] इति । घृतत्वस्य तैजस्त्वसाधने श्रुते -रेवाभावोऽत: तृणादिसाधर्म्येन श्रूयमाणार्थे बाधो न वर्तत,अत: पार्थिवं घृतम् इति । अस्मिन्नेव संदर्भे वल्लभा -चार्योक्तश्लोकम् उद्धरति –**"अनुच्छिन्नद्रवत्वं[यद्-तद्] वस्तु यस्त्विह भासते । सुवर्णाव्यवहारोऽयं तत्र शास्त्रे प्रवर्तते"**[166]।अन्यच्च सुवर्णे भास्वररूपस्य अनुद्भूतत्वं द्रव्यान्तरसंसर्गेण जायत इति स्वीक्रियते । कुसुमोद्गमकारेण श्रुते: अनादरोऽपि न क्रियते । अत: दशमद्रव्यत्वशंकापि न विहिता यथोक्तम् तेन– **"किञ्च**

---

[158] *टी.न्या.कं.* पृ.७९

[159] *तत्रैव*, पृ.७९

[160] *तत्रैव*, पृ.८०

[161] *तत्रैव*, पृ.८९

[162] *टी.न्या.कं.* पृ.८०

[163] *टी.न्या.कं.* पृ. ८०

[164] तेजस: शुक्लरूपवत्वेन पीतिमानुपपत्ते:। *तत्रैव*, पृ.८०

[165] *तत्रैव*, पृ.८१

[166] *तत्रैव*, पृ.८१

**श्रुत्यनादरे द्रवत्वादिना तेजो व्यावृतौ दशमद्रव्यशंकापि दुर्वारित्यलं बहुनोक्तेन इति"**[167]। अत: कथयितुं शक्यते यत् सुवर्णस्य तैजसत्वे स्वीकारे श्रुतिप्रमाणमङ्गीकृतम्। अत: कंदलीभिन्ना विशदा व्याख्या।
**१७.न्यायकन्दल्यां इतोऽपि साधर्म्यवैधर्म्यनिर्देश:-"एवं सर्वत्र साधर्म्यं विपर्ययाद्वैधर्म्यश्च वाच्यमिति द्रव्यासङ्कर:"**[168]' इति भाष्यस्य पंक्तिमाध्यमेन प्रशस्तपादाचार्येणात्र सूचितं यत् द्रव्याणां साधर्म्यं न अवशिष्टम्,'अतो वैधर्म्यमवगन्तव्यमिति कन्दलीकारेण कथ्यते यत् एवमेव अन्येषु द्रव्येषु अपि साधर्म्यकल्पना कर्त्तव्येति । यत् साधर्म्यं यस्मिन् न विद्यते तत्तस्य वैधर्म्यं वर्तत इति । अयमेव विषय: शिष्याणाम् अवबोधनार्थम्' एवमिति' शब्दमाध्यमेन भाष्यकारेण कथितम् इत्यभिप्राय:[169] ।
**कुसुमोद्गमे इतोऽपि साधर्म्यवैधर्म्यनिर्देश:-**'अन्यदपि' इत्यनेन शब्देन कंदलीकारेण उक्तं यत् अन्यसाधर्म्या - णामपि ऊहा कर्त्तव्या इति । वोम्मिदेवेन तत्र ऊहारूपेण अन्यदपि साधर्म्यमुच्यते । ते च निम्ना: - १.अबादीनामगन्धवत्वम्, २.अनिलादीनामरसवत्त्वं गुरुत्वम्, ३.अनिलादीनामरूपवत्त्वम् ४.प्रत्यक्षादि - साधर्म्यम् अनुवृत्ते: कथनीयमिति पृथक्तया प्रोक्तम्[170] । 'इतरव्यावृतेरिति' इत्यनेन शब्देनोक्तं यत् साधर्म्यं भिन्नं तद् वैधर्म्यत्वेन कथयेदिति कंदलीकारवदेव साधितम् । एतदनन्तरं तत्र वैधर्म्यं वोम्मिदेवेन निर्दिश्यते गुरूत्वं हृदो साधर्म्यं तेजप्रभृते: वैधर्म्यमिति कथनीयम्- उक्तं च– **"हृदो साधर्म्यमपि गुरुत्वं तेज: प्रभृतेर्व्यावृत्तेर्वैधर्म्यमित्याद्यपि बोधनीयमित्यर्थ:"**[171] । अनेन प्रकारेण स्पष्टीभवति यत् वोम्मिदेवेन वैशेषिकदर्शनस्य परम्पराया प्रतिपादितसाधर्म्यवैधर्म्ययो:भिन्ना कल्पनापि विहितेति । पदार्थानां निरूपणानन्तरं भाष्यकारेण ग्रन्थप्रतिपाद्यविषयाणां द्रव्यादीनां निरूपणं क्रियते । तत: पृथिव्यादीनाम् एकैकशो वर्णनं विधीयते । द्रव्याणां साधर्म्यप्रतिपादनानन्तरं द्रव्याणां एकैकश: व्याख्यार्थं शास्त्रप्रवेश: क्रियते; अत: कंदलीकारेण शास्त्रस्य प्रवृत्ति: निर्दिश्यते ।
**न्यायकन्दल्यां शास्त्रप्रवृत्ति:-** उद्देशलक्षणसम्बन्धिनी चर्चा ऊहापोहरूपेण क्रियते । येषां पदार्थानां नाम्नो - ल्लेखो न विद्यन्ते तेषां लक्षणेषु प्रवृत्तिरपि न जायते । अत्र शास्त्रप्रवृत्ति: उद्देशलक्षणरूपे द्विधा संकेत्यते अर्थात् श्रीधरेण मुख्यतया द्विधा एव शास्त्रप्रवृत्ति: स्वीक्रियते । परीक्षारूपशास्त्रप्रवृत्तिप्रसङ्गे कोऽपि नियमो न विद्यत इति प्रोक्तम्। [172] यत्र विरुद्धमतोपस्थितिकारणात् पदार्थानां तत्त्वज्ञानं न जायते तत्रैव विरूद्धमत -खण्डनं विधाय स्वमतोपस्थापनार्थं परीक्षा प्रारभ्यत इति न्यायदर्शनस्वीकृततिसृणां शास्त्रप्रवृत्तीनां खण्डन -माचार्येण क्रियते । तत्राक्षेप:क्रियते यत् षोडशपदार्थेषु प्रयोजनादिपदार्थानां परीक्षा तेषां नैयायिकानां ग्रन्थेऽपि न वर्तते; यतो हि तत्र ते लक्षणमात्रेणैव तत्त्वतो ज्ञायन्त इति । प्रवृत्तिमात्रस्य अनुरोधेनैव शास्त्र -प्रवृत्तिश्चेत् प्रवृत्तय: इतोऽपि न्यूनाधिका वा भवितुं शक्यन्ते[173] । **उद्देश:**-एतदनन्तरम्

---

[167] *तत्रैव,*पृ.८२

[168] *प्र.पा.भा.न्या.कं.*पृ.६८

[169] *न्या.कं.*पृ.६८

[170] *टी.न्या.कं.*पृ.८२

[171] *तत्रैव,*पृ.८२

[172] अत: पदार्थव्युत्पादनाय प्रवृत्तस्य शास्त्रस्योभयथा प्रवृत्ति: उद्देशो लक्षणञ्च।परीक्षायास्त्वनियम:। *न्या.कं,प्र पा. भा,* पृ.६८

[173] *तत्रैव,* पृ.६९

उद्देशस्य लक्षणं ददाति-**"नामधेयेन पदार्थानामभिधानमुद्देश:"**[174] २.**लक्षणम्-** स्वजातीया - विजातीयानिवर्तकत्वाद् लक्षणमुच्यते तच्च लक्षणम्- **"उद्दिष्टस्य स्वपरजातीयव्यावर्तको धर्मो लक्षणम्"**[175]। **परीक्षा-** लक्षणानुसारं लक्षणस्य विचार: परीक्षानाम्ना उच्यत इति तत्र प्रतिपादितम[176]। 'उद्दिष्ट - विभाग'नाम्ना एका विधा पृथक्त्वेन नाङ्गीक्रियते। उद्देशलक्षणमात्रेणैव अस्या: प्रवृत्त: गतार्थेति स्वीक्रियते अर्थात् उद्देश एव तस्य अन्तर्भावो जायते। एतस्या: संभावनायां हेतुद्वयमुच्यते। १.'एतानि एव' इति नियमार्थे,२.विशेषलक्ष्यप्रवृत्त्यर्थे वा इति[177]अर्थात् नियमार्थे विशेषलक्षणप्रवृत्त्यर्थे च इयं प्रवृत्ति विधीयत इति अतो मुख्यतया द्विधा प्रवृत्ति: स्वीक्रियते।

**कुसुमोद्गमे शास्त्रप्रवृत्ति:-** वृत्तवर्तिष्यमाणयोरुभयोर्मध्ये संगति: अत्र प्रदर्श्यते; अनेन भाष्यव्याख्यानं क्रियते। शास्त्रप्रवृत्ति: त्रिधा प्रोक्ता समानशास्त्रे परश्चात्र द्विधा कथयित्वा विरुद्ध्यते। परीक्षाविषये पृच्छयते यत् निष्प्रयोजनाप्रवृत्ति: यदि स्यात् तर्हि अन्यतन्त्रेषु न कर्त्तव्या अर्थात् अन्यग्रन्थोपस्थापितवादेऽपि न करणीया स्यादिति उक्तम्। सप्रयोजना वर्तते प्रवृत्तिश्चेत् परीक्षा विधातव्या इति। कंदलीकारेण कथ्यते यत् विरुद्ध -मतनिराकरणाय प्रवृत्ति:। अत्र वोम्मिदेवेन उक्तं यत् **"प्रवादान्तरव्याकोपो दर्शनान्तरविरोध:"**[178] अर्थात् कथयितुं शक्यते यत् प्रवादे, दर्शनान्तरविरोधे परीक्षा विधातव्येति। अत्रापि वोम्मिदेवेन कथ्यते यत् विप्रतिपतौ सत्यां परीक्षाप्रवृत्ति:। इयं विप्रतिपत्ति सर्वदैव न विरुद्ध्यते यतो हि सर्वतन्त्रेषु या सिद्धा तत्र तस्य अविरोध:, प्रतितन्त्रसिद्धेषु वा विप्रतिपति: प्रतिपाद्यते-यथोक्तं वाक्यमाध्यमेन **"विप्रतिपतौ हि सत्यां परीक्षाप्रवृत्ति:। न च सर्वत्र विप्रतिपत्ति:, सर्वतन्त्रसिद्धेषु तद्भावात् प्रतितन्त्रसिद्धादिषु भवति विप्रतिपत्ति:"**[179]। अत्र कुसुमोद्गमकारेण स्वोद्भावनं विहितमिति। शास्त्रविषयाणां पदार्थानां निर्देशने व्याख्यानात् लक्षणे अतिव्याप्ति: न भवतीति वोम्मिदेवेन उच्यते। यावत्कालं न निर्देश: तावत्कालं न परी - क्ष्यत इति। एतस्मादेव कारणात् कंदलीकारेण लक्षणं प्रदत्तमिति[180]। एतदनन्तरं आशंक्यते यत् यदि उद्देश -लक्षण एव शास्त्रप्रवृत्तिविधि: स्वीक्रियते तर्हि द्रव्यगुणत्वादिभि: उद्देशो विहित:। पृथिवीत्वादीनां लक्षणं पृथिवीसम्बन्धात् करिष्यत इति तत्र प्रतिपादितं कुसुमोद्गमे[181]। अनेन प्रकारेण शास्त्रप्रवृत्ति: मुख्यतया द्विधा एव स्वीक्रियते। दर्शनान्तरप्रवादे सति परीक्षा करणीया इति सप्रयोजना प्रतीतिरिति कथ्यते।

---

[174] *न्या.कं.प्र.पा.भा.* पृ.६९

[175] *तत्रैव,* पृ ६९

[176] लक्षितस्य यथालक्षणं विचार: *परीक्षा। न्या.कं,प्र.पा.भा.* पृ ६९

[177] *तत्रैव.* पृ.६९

[178] *टी.न्या.कं.* पृ.८३

[179] *टी.न्या.कं.* पृ.८३

[180] *तत्रैव.* पृ.८३

[181] *टी.न्या.कं.*पृ.८३

**१.न्यायकन्दल्यां पृथिवी द्रव्यनिरूपणम्-** सर्वप्रथमं भाष्यकारेण सूचितं यत् इदानीम् एकैकश: इति पदस्य संगति वीप्साजनक'शस्' प्रत्ययेन द्रव्यलक्षणपर्यन्तं चलिष्यत इति प्रतिपादितम् । कन्दलीकारेण निर्दिश्यते यत् उद्देशक्रमेण सर्वप्रथमं पृथिव्या: निर्देशो क्रियत इति[182] । **लक्षणकथनप्रयोजनम्-** य: कोऽपि पृथिवीम् अजानन् अपि स्वरूपत: पृथिवीति न व्यवहरति,तं बोधनार्थं पृथिव्या असाधारणधर्म: कथ्यते[183] । 'पृथिवीत्वाभिसम्बन्धात्' इति शब्देन सजातीयविजातीयो व्यावृत्ति: प्रदर्श्यते यतो हि लक्षणं सजातीय -विजातीयविनिवर्तकं भवति इत्युक्त्वा न्यायवार्त्तिकोक्तलक्षणस्य लक्षणद्मुद्धरति तद्यथा-**"समानासमान जातीयव्यवच्छेदको लक्षणार्थ:"**[184] । अनेन लक्षणेन आक्षेपोऽयमपि खण्ड्यते यत् पृथिवीनाम्ना पदार्थप्रसिद्ध:, तर्हि लक्षणवैयर्थ्यम्, अप्रसिद्धश्चेत् इतोऽपि वैयर्थक्यमिति अत्र ग्रन्थस्य अधिकारित्वं बोध्यते । शिरसा पादेन च विद्वद्भि: गौ अवबुध्यते,परञ्च शिरप्रभृतीनां ज्ञानाय नापरस्य लक्षणस्य आवश्यकता वर्तत इति । यदि एवं स्यात् तर्हि न शास्त्रे तस्य अधिकारित्वमिति[185] अर्थात् अतीव विप्रतिपन्नस्य कृते न वर्तते शास्त्रोपदेशत्वमिति । **पृथिव्यां गुणा:-** सूत्रनिर्देशपूर्वकं भाष्यवदेव गुणानां चर्चा तत्र विहिता । तत्र रूपादय:[186]इति ,चाक्षुषावचनात् इत्यत्र 'संख्यापरिमाणानि...इत्यादि सूत्रम्, पृथक्त्वं संयोगविभागौ परत्वापरत्वे च "रूपिद्रव्यसमवायाच्चाक्षुषाणि" इति सूत्रेण च गुणनिर्देशो विहित इति । पतनोपदेशात् गुरूत्वमित्यनेन **'संयोगाभावे गुरुत्वात् पतनमिति**[187] सूत्रम्, सामान्यवचनात् द्रवत्वमित्यनेन **'सर्पिजतुमध्च्छिष्टानां पार्थिवानामग्निसंयोगाद्द्रवत्वमद्भि: सामान्यम्'**[188]इति वैशेषिकसूत्रं च निर्दिश्यते । अनेन पृथिव्यां नैमित्तिकद्रवत्वमिति सूचितम् । नैमित्तिकद्रवत्वं क्षित्युदकयो: समानरूपेण वर्तते । **'उत्तरकर्मवचनात् संस्कार:**[189]'इत्यनेन नोदनाभिघात् शरगमनक्रियया पृथिव्यां वेगो निरूप्यते । शररूपपार्थिवद्रव्ये कर्मण: कारणं वेगनाम्न: संस्कार: कथ्यते । क्षितावेवगन्ध:'इत्यनेन असाधारणधर्मत्वेन पृथिव्यां गन्धो विद्यत इति व्याख्यातम् । **पृथिव्यां रूपकथनम्-**रूपविषयिणि चर्चा तत्र विशदरूपेण विहिता वर्तते । सामान्यरूपेणावलोक्यते चेत् पृथिव्यप्तेजसु त्रिषु एव द्रव्येषु रूपं परञ्च विशेषरूपेणावलोकने सति पृथिव्या एव असाधारणधर्म इति । चित्ररूपमपि आचार्येण वर्णितम्[190]। **चित्ररूपम्-** पृथिव्यां नानारूपप्रतिपादनप्रसङ्गे चित्ररूपविषये प्रश्नोत्तरमाध्यमेन विशदा चर्चा विहिता क्रियते । इयमाचार्यस्य नूतना उद्भावना वर्तते । अवयवैराब्धावयविवत् अत्रापि अवयवरूपद्वारा अवयविरूपोपलब्धि: प्रोक्ता । उक्तपटावयवेषु केवलं श्वेतनीलरूपे न विद्यते अपितुश्यामशुक्लहरितादयो बहुनि रूपाणि वर्तन्त इति ।

---

182 *तत्रैव*.पृ.७०

183 यो हि पृथिवीं स्वरूपतो जानन्नपि कुतश्चिद् व्यामोहात् पृथिवीति न व्यवहरति, तं प्रति विषयसम्बन्ध -व्यभिचारेण व्यवहारसाधनार्थं असाधारणो धर्म: कथ्यत इति। *न्या.कं,प्र.पा.भा.* पृ.७१

184 *न्या.कं,प्र.पा.भा.* पृ.७१

185 यस्तु सर्वथैवाप्रतिपन्नो न तं प्रत्युदेश:;तस्य वालमूकादिवदनधिकारात्। *न्या.कं.प्र.पा.भा,* पृ.७१

186 रूपरसगन्धस्पर्शवती पृथिवी। *वै.सू, २/१/१*

187 *तत्रैव, ४/१/७*

188 *तत्रैव, २/१/७*

189 *न्या.कं.प्र पा.भा.* पृ.७४

190 *न्या.कं.प्र.पा.भा.* पृ.७५

सर्वैरेव अवयवरूपै: स्वकार्यमुत्पाद्यते। परस्परविरोधेन अवयविषु न रूपस्योत्पत्ति इत्यपि न वक्तुं शक्यते। यतो हि चित्ररूपेणावयविप्रत्यक्षो जायत इति व्याख्यातम्। अवयविरूपसम्मेलनात् नीलपीतादिकम् अनेकस्वभावं एकं यद्रूपं उत्पद्यते; तच्च चित्ररूपत्वेन कथ्यते।[191] एतस्य स्वरूपं कथयति–"**तच्चारभ्यमाणं विविधकारणस्वभावानुगमाच्छ्यामशुक्लहरितात्मकमेव स्यात्, चित्रमिति च व्यपदिश्यते**"[192]। एकावयविरूपं विद्यते;अन्यावयविरूपमिव इति प्रतिपादितम् अर्थात् अनेकेभ्यो अवयवरूपेभ्यो समुपजातम् अवयविरूपमेकं चित्ररूपं च वर्तत[193]इति। **रस:**-पृथिव्यां रसस्य षड्विधत्वमाचार्येण तत्र प्रतिपादितम्। **गन्ध:-** सुरभिरसुरभिरूपेण तत्र गन्धस्य द्वैविध्यं प्रतिपाद्यते। केवलं सुरभे: अभावमात्रमसुरभि: न वर्तत; यतो हि न्यूनाधिकरूपेण भावरूपे तस्योपस्थिति: भावरूपा एव वर्तते। अत: उपेक्षणीयो गन्ध इति। **पृथिवी-भेदा**:-कंदलीकारेणात्र विशदा व्याख्या प्रस्तूयते। १.नित्या च अनित्या च' इत्यत्र च शब्देन पृथिव्या: प्रकारान्तरभावो सूच्यत इति प्रतिपादितम्। 'परमाणु - लक्षणानित्या...' इत्यादि लक्षणद्वयेन पृथिव्या: परमाणुस्वभावे प्रमाणमुपस्थाप्यते-"**अणुपरिमाणतारतम्यं क्वचिद् विश्रान्तं परिमाणतारतम्यवद्। यत्रेदं विश्रान्तं यत: परमणुर्नास्ति स परमाणु:**"[194]अर्थात् परमाणुरूपपृथिव्या अवगमने अनुमानप्रमाणं कंदलीकारेण प्रस्तूयत। अन्यथा तत्र अनवस्था स्यात्। वस्तूनां महदल्पव्यवहारो अधिकाल्पसंख्यकपरमाणुनिर्मित्तावयवेभ्यो यथाक्रमं संपद्यते। इयं महदल्प - न्यूनाधिकभावस्य समाप्तिरपि तत्र परमाणुरूप पृथिव्यां विद्यते;अतो अनेन परमाणो: नित्यत्वं तत्र कंदलीकारेण साधितमिति[195]। **द्व्यणुकसत्तायां प्रमाणम्**-त्रयणुकादपि न कार्योत्पत्ति इति निरूप्यते यतो हि तत्र वर्तत महत्परिमाणम्। अनेन महत्परिमाणेन अनुमीयते यत् इतोऽपि न्यूनपरिमाणद्रव्येण अस्योत्पत्ति: संजातेति। अत: अनुमानेन कार्यद्रव्यस्य उत्पत्तौ कारणता अनुमीयते। द्व्यणुकेन तु अणुपरिमाणमेव उत्पाद्यते,अतो हेतो द्वयणुकैबहुभि: परमाणुभिराभ्यत एतत्कार्यमिति।[196] परमाणुक्रमेणोत्पत्तिर्भवति पृथिव्या इति अन्ते कथयति यथोक्तम्-"**तदेव द्वयणुकादिप्रक्रमेण क्रियते कार्यलक्षणा पृथिवी**"[197]। **कार्यलक्षणा पृथिवी**-इयं पृथिवी अनित्या कथिता। अपरजातयोऽपि गौ प्रभृतय अस्यां वर्तन्ते तत्र कंदलीकारेण कथ्यते यत् कार्यरूपपृथिव्या: परमाणुषु एता: गौ प्रभृतयो जातयो न विद्यन्ते ते अदृष्टवशात् तत्र कार्येषु प्रकटीक्रियन्त इति प्रतिपाद्यते।[198] शयनासनप्रभृतीनामनेकेषाम् उपकरणानां संपादनकार्यरूपकार्यं पृथिवीमाध्यमेनैव जायत इति स्पष्टीकरोति। **पृथिव्या: कार्यम्** - एतदनन्तरं तस्या शरीरेन्द्रियविषयभेदात् त्रिविधं कार्यत्वं वर्ण्यते। शरीरस्य लक्षणं ददाति यथा-"**भोक्तुर्भोगायतन शरीरम्" मृते शरीरे तस्याभावात्**

---

191 *न्या.क.प्र.पा.भा.* पृ.७६

192 *न्या.कं.प्र.पा.भा.* पृ,७६

193 विवादाध्यासितं चित्रद्रव्यमेकरूपसम्बन्धि द्रव्यादितरद्रव्यवत्, तदगतं रूपमेकमवयविरूपत्वाद् इतरावयविरूपवत्। *तत्रैव,* पृ.७७

194 *न्या.कं.प्र.पा.भा.* पृ.७९

195 *तत्रैव.* पृ.७९

196 *न्या.कं.प्र.पा.भा.* पृ ८०

197 *तत्रैव,* पृ.८०

198 *तत्रैव,* पृ.८१

न तत्र शरीरव्यवहार: संपाद्यते इति प्रतिपाद्यते[199] । २.इन्द्रियम्- इन्द्रियं शरीराश्रये वर्तमानं जीवानां परोक्षज्ञानसाधनरूपेण निरूप्यते । लक्षणं यथा– "शरीराश्रयं ज्ञातुरपरोक्षप्रतीतिसाधनं द्रव्यमिन्द्रियम्"[200] । शरीरेन्द्रियभिन्नं उपभोगसाधनं तत्र विषयरूपेण कथ्यते । तदनन्तरं शरीरभेदा: योनिजमयोनिजं च उभयथानिरूप्यन्ते । भाष्यवदेव शरीरद्वयं तेन व्याख्यातम् । शुक्रशोणितरहिते देवानां शरीरविषये आक्षेप: क्रियते यत् अन्वयव्यतिरेकेण शरीरकारणत्वं सिद्धं तर्हि कथं तद्भिन्नशरीरोत्पत्तिरूच्यते । 'धर्मविशेष[201]सहितेभ्य' शरीरोत्पत्तिर्जायते अनेनैव तत्र समाधानमुपस्थाप्यते अर्थात् धर्मादिसाहाय्येन परमाणुभिरेव शरीरोत्पत्ति: मन्यत इति प्रतिपादितम् । एतदनन्तरं क्रियाविभागक्रमेण शरीरनाशो निरूप्यते । अत्र शरीरोत्पत्तिनाशप्रक्रिया च वर्ण्यते । **अयोनिजशरीरस्योत्पत्तिविनाशप्रक्रिया-**पूर्वमवयवेषु क्रिया, तदनन्तरं तत्र विभाग:, विभागान्तरमारम्भकसंयोगनाश:,नाशान्तरम् अन्यत्रकार्यद्रव्यनाश:. एतदनन्तरं शुक्रशोणितयो: क्रमश: परमाणुसाहाय्यमाध्यमेन शरीरोत्पत्ति जायत इति तत्र व्याख्यातम्[202] । शरीरविशेषोत्पत्तौ अदृष्ट एव नियामक: । **१.क्षुद्रजन्तूनां शरीरम्-**शलभादीनां शरीरं शुक्रशोणितरहितत्वमेव कंदलीकारेण प्रति –पाद्यते । शुक्रशोणितजनितमेव शरीरं भवतीति तत्र नियमो न वर्तत इति कथ्यते । तदनन्तरं क्षुद्रजन्तूनां यातनाजन्यशरीरविषयिणी चर्चा क्रियते । ते च जन्तव: दंशमशकादिरूपेण कथ्यन्ते तेषां क्षुद्रजन्तूनां नामानि दंशमशकादयो वर्तन्त इति भाष्यभिन्नं प्रतिपाद्यते[203]।**२.देवप्रभृतीनां शरीरम्-** देवादिशरीराणामयोनिजत्वं धर्मविशेषसहकारित्वाद् भाष्यवदेव साध्यते ।अनेन अयोनिजत्व -बाधकमऽनुमानमपि खण्ड्यते । **३.योनिजशरीरम्-** योनिज शरीरस्य तत्र वर्तते विशदा चर्चा क्रियते । शुक्रशोणितयो: संयोगविशेषेण जातं शरीरं योनिजमिति शब्देन व्यवह्रियते । एतदनन्तरं योनिजशरीरनिर्माण प्रक्रिया वर्ण्यते । [204]**योनिजशरीरप्रभेद:-** जरायुजाण्डजरूपेण द्विविधं योनिजं शरीरमित्यत्रापि निरूप्यते । तत्र लक्षणं प्रतिपादयति तद्यथा- "जरायुरिति गर्भास्याभिधानम्,तेन वेष्टितं जायत इति जरायुजम्" । जरायुजा: अस्मदादयो मानुषा, पशव:,छागाश्च कथिता: । न केवलं एत एव अपितु अन्ये चतुष्पादयुक्ता: मृगा: कृष्णसारादयश्चापि वर्तन्त इति तदनन्तरं **अण्डजा:-**अण्डजान् प्रतिपादयति तस्य लक्षणं यथा– **"अण्डं बिम्बं तेन वेष्टितं जायते तदण्ड जम्"**[205] । न केवलं पक्षिसरीसृपादयो अण्डजा: अपितु मत्स्यप्रभृतय अपि तत्र अन्तर्भाव्यन्ते।**२.इन्द्रियम्–**पार्थिवावयवै: निर्मितं गन्धग्राहिकं घ्राणजेन्द्रियं जलाद्यनभिभूतै: पार्थिवावयवेभ्यो द्रव्येभ्यो वा विलक्षणं वर्तते । घ्राणस्य पार्थिवत्वम् अनुमानप्रमाणेन साध्यते । स्वगतगन्ध: घ्राणेन न गृह्यते । घ्राणसाधकमनुमानं यथा- **"पार्थिववत्त्वे रूपादिषु मध्ये गन्धस्यैवाभिव्यञ्जकत्वं प्रमाणम्. कुकुंमगन्धाभव्यञ्जकघृतवत्"** । अत: स्वगन्धयुक्तघ्राणेन न गन्धो ग्राह्यत इति । **३.विषय:-** पृथिवी

---

199 *न्या.कं.प्र.पा.भा.* पृ.८२

200 *न्या,कं.प्र.पा.भा.* पृ.८२

201 विशिष्यत इति विशेष.धर्म एव विशेषो धर्मविशेष.1 *न्या.कं.प्र.पा.भा.* पृ.८३

202 *न्या.कं.प्र.पा.भा.* पृ.८४

203 *न्या.कं.प्र.पा.भा.* पृ.८४-८५

204 *तत्रैव,* पृ.८४-८५

205 *तत्रैव,* पृ.८७

मृत्पाषाणस्थावरयुक्ता वर्तत इति प्रतिपाद्यते। तत्र उपलशब्देन शिला तथा च मणि तृणेन च उलपप्रभृतय: औषधय:,लताशब्देन माधवीलताप्रभृतय: ग्राह्या: कथ्यन्ते । केतकीबीजपूरादयोऽपि अत्रैव गृह्यते[206] । **स्थावर:-** स्वेच्छाचेष्टाविरहत्वं स्थावरत्वम्, स्थावरात् भिन्नरूपेण अपि स्थितिकारणाद् ते स्थावरवर्गे न लिखिता इति[207] । अत: कथयितुं शक्यते यत् मुख्यरूपेण अत्र कंदलीकारेण शरीरविषयिणी चर्चा तथा च इन्द्रियसम्बद्धा चर्चा विशदेन विहिता। पृथिव्यां रूपनिरूपणप्रसङ्गे चित्ररूपस्य, परमाणुरूपशरीरनिरूपणे द्वयणुकादिपरिकल्पना तथा च परमाणूनां अल्पमहदादिसंख्यया परिमाणप्रकर्षादिकं जायत इत्यपि भाष्याद् भिन्नम् इतरं च विशदं निरूपितम् । **कुसुमोद्गमे पृथिवीद्रव्यनिरूपणम्-** कुसुमोद्गमकारेण सर्वप्रथमं 'एकैकश:' इति शब्दे प्रयुक्तप्रत्ययविषये व्याक्रियते यत् अत्र द्विवचनेन पृथिव्यादिषु एकस्य द्रव्यस्य इति धर्मि साकल्येन अर्थात् सर्वेषां सार्धमेव कथनं क्रियते, परश्चात्र'शस्' प्रत्ययेन प्रत्येकस्य अनेकवैधर्म्यं सूच्यत इति अर्थात् 'शस्' प्रत्ययेन पृथग्रूपेण समेषाम् एकैकशो वैधर्म्यम् इति विश्लेष्यते[208] । १.कंदलीकारेण यदुक्तं पृथिव्या: सिद्धासिद्दौ लक्षणवैयर्थ्ये तत्र वोम्मिदेवेनापि चर्चा विहिता । १.पृथिवी पूर्वमेव सिद्धा इति प्रश्ने सति तत्र साधनवैयर्थ्यं सूच्यते इतरथा द्वितीये असिद्धौ आश्रयासिद्धि: तत्र कथ्यते । पृथिवीत्वमित्यनेन पृथिवी निर्दिश्यते अन्यथा तत्र स्वरूपासिद्धिप्रसङ्गो भवितुमर्हो[209]यतोहि तत्र व्यामोहात् व्यावर्तकस्य भेदकस्य चानुपलम्भकारणाद् रूपादीनामनेकसिद्धौ तत्र पृथिव्या: स्वरूपासिद्धिप्रसङ्गो स्यादिति व्याख्यायते[210] । २.एतदनन्तरं व्याख्यायते यत् पृथिव्या: जातिपृथिवीत्वम् इत्यत्र समवायसम्बन्धो वर्तते । तत्रैकार्थसमवायो संयुक्त - समवायो वा न स्वीकर्तुं शक्यते यतो हि व्यभिचारदोष: स्यादिति प्रतिपादितम् अर्थात् अत्र भाष्यादिवत् पृथिवीत्वे जातिरेव उच्यते । ३.कंदल्यां प्रतिपादितं यत् यो पृथिवीति व्यवहारो न जानाति तत्र वोम्मिदेवेन उच्यते यत् यो विवेकेन पृथिवीस्वरुपं न जानाति इति विवेकशब्दोऽत्र तेन योजित इति । अधिकारी-अधिकारिविषयिणी चर्चा अपि कन्दलीतो व्यतिरिक्ता उपस्थाप्यते । १.लक्ष्यलक्षणयो: स्वरूपं जानन्नपि येन विशेषनिमित्तार्थे पृथिवीति व्यवहारजिज्ञासा क्रियते, तादृश अधिकारी (जिज्ञासु: प्रथम:) इति कथ्यते । [211] २.येन इतरभेदव्यवच्छेदमात्रे जिज्ञासा विधीयते सो द्वितीयो जिज्ञासु इति प्रतिपादितम् । अनेन प्रकारेण अधिकारित्वस्य स्वरूपद्य प्रतिपाद्यते[212] **पृथिवी-गुणा:-** कंदलीकारवत् गन्धसहचरितरूपरसादीनां चतुर्दशगुणानां पृथिव्या: वैधर्म्यरूपेण प्रतिपादनं विहितम् । एते गुणा: गन्धैकार्थसमवायरूपेणापि अभिधीयन्त इति । गुणविनिवेशाधिकारे रूपरसगन्धस्पर्शा ये कन्दलीकारेण प्रतिपादिता तत्र वोम्मिदेवेन कथ्यते यत् एते प्रत्यक्षमात्रेण अत्र प्रतिपादिता इति[213] । **गन्ध:-**तत्र पृथक् दृष्टान्तेन विषयोऽयं प्रतिपाद्यत

---

[206] *न्या.कं.प्र.पा.भा.* पृ.८९

[207] *न्या.कं.प्र.पा.भा,* पृ.८९-९०

[208] *टी.न्या.कं,* पृ.८४

[209] पृथिवीमित्युपलक्षणं पृथिवीमित्यपि द्रष्टव्यम्,अन्यथां स्वरूपासिद्धिप्रसङ्गात्, व्यामोहाद्गन्धरूपाद्यनेक- सन्निधौ व्यावर्तकविशेषानवधारणात्। *तत्रैव,* पृ.८५

[210] सिद्धे साधनवैयर्थ्यात् तद्सिद्धौ वाश्रयसिद्धिरत एव पृथिवीसिद्धावितरेतराश्रययित्वमित्यत आह योहीति। *टी.न्या.* पृ.८५

[211] *तत्रैव,* पृ.८५

[212] *तत्रैव,* पृ.८५

[213] प्रत्यक्षप्रमाणेनेति शेष*:।तत्रैव,* पृ.८६

अर्थात् पार्थिवद्रव्यसम्बन्धाद् जलवायुप्रभृतिषु गन्धप्रतीति जायते । स्फटिकोऽपि गन्धवान् इत्यत्र अनुमानमुपस्थापयति यथा-**"तथाहि स्फटिकादौ गन्धवान् पाकनरूपत्वात्,कंदलीफलवत् इति । इतरथा तस्य पाकजरूपवत्तापि न स्यादिति तत्र प्रतिपाद्यते"**[214]अर्थात् पाकजेषु गन्धत्वं भवतीति तत्र निर्दिश्यते । अनेन प्रकारेण स्फटिकादौ अपि गन्धः प्रतीयत इति कन्दलीभिन्नं विस्तारिकृतम् । वोम्मिदेवेन रूपस्यासाधारणत्वं गन्धसाहचर्येणैव साध्यते । रूपवर्णने चित्ररूपं स्पष्टीकरणपूर्वकं कंदलीवदेव वर्ण्यते । [215] । तत्र स्वशब्देन कथयति वोम्मिदेवः-**"यथा नीलमित्यनुवृत्तप्रत्यया नीलत्वजातिरेका एवं चित्रमित्यनुवृत्तिप्रत्यय बलाच्चित्रत्वमपि जातिरेका स्वीकर्त्तव्या जातिमात्रविलयापत्तेरिति"** । [216] चित्ररूपस्यैकत्वम् अवयविरूपत्वात् एकद्रव्यत्वाद् च स्वीक्रियत इति प्रतिपादितम् । भावोऽयं यत् यद्यपि स्वशैल्यामत्र वोम्मिदेवेन व्याख्या विहिता परञ्च कंदलीमतमेवात्र बहुधा अनुस्रियते । **२. रसः-** स्फटिकादौ अनुमानेन पाकजरूपेण सिद्धे सति रसत्वनाम्ना अन्यजातौ तस्य समवायो वैधर्म्यरूपसाम्येन सूच्यत इति तत्र व्याख्यायते।**गन्धः-** परम्परया गन्धनिरूपणं पृथिव्याः भेदनिरूपणमेव वर्तत इति । भास्वराभास्वररूपभेदवत् अत्र गन्धभेदेन द्रव्यभेदनिराकरणत्वनाम्ना भ्रमनिरासो न जायते,अतः पर्युदासवृत्ते आश्रयं गृहीत्वा गन्धस्य समानाधिकरण्यं तत्र व्यवस्थाप्यते यथा-**"सुरभिगन्धादनुकूलवेदनीयादन्यः प्रतिकूलवेदनीयोऽसुरभिरिति व्युत्पादनात् तृतीयप्रकारकल्पनागौरव -प्रसङ्गादिति भावः"**[217] अर्थात् असुरभि गन्धस्य सुरभिगन्धेन सह विरोध एव वर्तते न तु अभाव इत्यनेन कंदलीकार एव अनुस्रियत इति । **स्पर्शः-**अनुष्णाशीतस्पर्शविषयिणी चर्चा तत्र वोम्मिदेवेन विधीयते । अनुष्णाशीतव्यवहारः परम्पराभि - भवयुक्तो वर्तत इति कथयन् तत्र लिखति वोम्मिदेवः-**"शीतोष्णावेव स्पर्शौ, अनुष्णाशीतव्यवहारस्तु परस्पराभिभवप्रयुक्त इति कल्पना-व्यामोहमात्रनिबन्धनमित्यनुसंधेयम्"**[218]अर्थात् अनुष्णाशीतस्पर्श एव पृथिव्याः स्वीक्रियत इति । **पृथिव्याः भेदाः-**अत्रोच्यते यत् पृथिव्याः नित्यत्वे प्रमाणाभावाद् अनित्यत्वनियमे कार्यकारणव्यवस्थायाः अनुपपति न स्यादिति निवारणार्थम् उभयभेदं नित्यानित्ये च क्रियते । पृथिव्याः नित्यत्वे प्रमाणं परमाणुसिद्धिमाध्यमेन कंदलीकारवदेव प्रदर्शितम् । द्व्युकतः अपकर्षपरम्परया परमाणुसिद्धौ वोम्मिदेवेन दृष्टान्ते बिल्वामलककुवलानां यथाक्रमं लघुलघुतरता प्रतिपाद्यते उक्तं च-**"किन्तु बिल्वादामलकमणु सा आमलकात्कुवलमण्विति येयं परिमाणापकर्षपरम्परा सैवाणुपरिमाणतारतम्यमित्युच्यते; सा च विश्रान्तिः"**[219] अर्थात् अणुपरिमाणस्यापि कुत्रचिद् विश्रान्ति भवति; अतः अनेन परमाणुसिद्धिरपि आचार्येण क्रियत इति कथयितुं शक्यते । **कार्यरूपपृथिव्याःकार्याणि–** वोम्मिदेवेन कार्यरूपपृथिव्याः प्रकरणेऽपि कंदलीव्याख्या क्रियते शरीरेन्द्रियविषयभेदात् एतेषामपि त्रैविध्यमुक्तम् । १.**शरीरम्–**शरीरस्य लक्षणमपि शिडिलवोम्मिदेवः तत्र ददाति तद्यथा–**"भोक्तुर्भोग - हेतुभूतसंयोगाधिकरणमन्त्यावयवि शरीरमिति वा** शरीरलक्षणं **निर्व्यूढम्**[220]अर्थात् भोक्तुःभोगहेतौ

---

[214] *टी.न्या.कं.* पृ.८७

[215] *टी.न्या.कं.*पृ.८९

[216] *तत्रैव,* पृ ९१

[217] *टी.न्या,कं*पृ.९२

[218] *तत्रैव, पृ.९२*

[219] *टी.न्या.कं.* पृ.९३

[220] *टी.न्या.कं.* पृ ९८

शरीरस्याधिकरणत्वम् अन्त्यावयवित्वं च कथ्यते । १.योनिजशरीरम्- शरीरस्यापि सुकुमारप्रतीतिकारणाद् हर्षोत्पत्तौ तस्य कारणत्वं विषयरूपेण स्वीकर्तुं शक्यते परञ्चविषयरूपे शरीरग्रहणं निकृष्टलक्षणरूपे द्रष्टव्यमिति निर्दिश्यते[221] अर्थात् न शरीरं विषयो यतो हि एतत्तु तस्य निकृष्टलक्षणत्वं विद्यते । शरीरजन्मविषये कंदल्यां या चर्चा विहिता;तत्र वोम्मिदेवेन कथ्यते यत् शरीरनिर्माणे प्रक्रिया अपेक्षणीया,अन्यथा तत्र नरबीजात् वानरजन्मप्रसङ्गो भवेदिति प्रतिपाद्यते[222] । जरायुजशरीरिणां गणनायां गवादीनामपि गणनां करोति-तद्यथा-"**गवाद्य इति ग्राम्यश्चतुष्पाद इत्यर्थः । अन्येषां मार्जारमूषकादीनामुभयचारिणामित्यर्थः**:"[223] । कंदलीकारेण एतेषां वर्णनं न विधीयते । **२.अयोनिजशरीरम्-** अयोनिजशरीरे अदृष्टानुगतपरमाणूनामेव कारणत्वं उच्यते । क्षुद्रजन्तूनां शरीरस्य अयोनिजत्वं प्रदर्श्य तस्मिन् यातनाजन्यत्वमिति शब्देन तत्र नारकित्वमुपलक्ष्यते अर्थात् एतादृशं शरीरं नरकलक्षणमिति[224] । **२.इन्द्रियम्–** अन्यत्द्रव्येषु पार्थिवद्रव्योपष्टम्भा एव गन्धः प्रतीयते । इन्द्रियविषये कंदलीकारेण उक्तं यत् घ्राणम् अपरोक्षज्ञानसंपादकमिति; तत्र कुसुमोद्गमकारेण 'अतीन्द्रिय'शब्दोऽपि योज्यते अर्थात् इदम् घ्राणम् अतीन्द्रियं विद्यत इतिम्। अदृष्टकारित्वं सृष्टेः कथ्यते यत्र तत्र वोम्मिदेवेन अदृष्टस्यो - पभोजकत्वं निर्दिश्यत इति[225] । **३.विषयः–** मृत्पाषाणयोः स्थावररूपत्वम् उच्यते; परञ्च परस्परं जातिवैभिन्न्यात् मृतत्वम्, स्थावरत्वम्, पाषाणत्वञ्च इतिरूपेण पृथक्त्वमुच्यन्त इति अर्थात् भावोऽयं यत् मृत्पाषाणादयो स्थावरतो भिन्नरूपेणापि कथयितुं शक्यन्त इति प्रतिपादितम् । अन्ते कथयितुं शक्यते यत् वोम्मिदेवेन कंदली अतीव संक्षिप्तरूपेण व्याख्यायते । स्वकथने कन्दल्या भावं स्वीकृत्य यत्र कुत्रचिद् स्वकथनं अपि तेन लिख्यत इति । प्रकरणेऽस्मिन् गन्ध- ग्राहकेन्द्रियस्य तत्र अतीन्द्रियत्वं तथा च अदृष्टस्य उपभोजकत्वं तत्र निर्दिश्यते । योनिजशरीरस्य यातनाजन्यत्वात् तत्र तस्य नारकित्वं तेन पृथक्तया प्रतिपाद्यते । शरीरनिर्माणप्रक्रियायां प्रयोजनं प्रतिपादितं यत् नरबीजाद् वानरजन्मप्रसङ्गो न स्यादिति । न हि शरीरं विषय इति लिखितम् । कंदलीकारभिन्नं शरीरलक्षणमपि अन्त्यावयविरूपेण तत्र निरूपितम् । दण्डचक्रचीवारादीनां माध्यमेन यथा घटनिर्माणं तथा नीलपीतादिभिः चित्ररूपं निर्मियत इति कंदलीकाराद् भिन्नं प्रतिपादितम् । गन्धप्रतिपादने स्फटिकादौ अपि पाकजरूपत्वात् गन्धो वर्तत इति पृथक्तया वर्णितम् । अन्यदपि यद्वैशिष्ट्यं तत् विषयप्रतिपादनप्रसङ्ग एव वर्णितम् ।

**न्यायकन्दल्यां जलद्रव्यनिरूपणम्**-कन्दलीकारेण अब्द्रव्ये विशदा व्याख्या प्रस्तूयते । अस्वादिना जलस्य लक्षणं वैधर्म्यं च प्रदत्तमिति तत्र संकेतितम् । सजातीयविजातीयेभ्यो जलस्य पृथग्ज्ञानकारणमेव तत्र लक्षणस्य प्रयोजनरूपेण निरूप्यते[226] । **जले गुणाः**- गुणानां विषये कथ्यते यत् केवलं जलत्वमेव न वर्तते जलस्यासाधारणधर्मोऽपितु स्नेहादिचतुर्दशगुणानामपि तत्र असाधारणधर्मत्वेन वैधर्म्यत्वेन च निर्देशः प्राप्यते[227] । रूपरसादिरूपेण चतुर्दशगुणानां संकेतः तु भाष्यकारेण हि कृतम् इति । पृथिवीवदेव

---

221 *तत्रैव*, पृ.९८

222 *तत्रैव*, पृ.१००

223 *टी.न्या.कं*, पृ.१०४

224 क्षुद्रजन्तूनां शरीरमित्येतावता अयोनिजशरीरसाधकं प्रत्यक्षं दर्शितमेव तथापि यातनाशरीरमिति पदं नारकिणां शरीरमुपलक्षयति। तत्रैव, पृ.१०१

225 *तत्रैव*, पृ.१०५

226 *न्या.कं.प्र.पा.भा.* पृ.९०

227 न केवलमस्वमपां वैधर्म्यं स्नेहसहचरितं चतुर्दशगुणवत्त्वमपीतरेभ्यो वैधर्म्यमिति। *न्या.कं.प्र.पा.भा*, पृ.९१

सूत्रानुगुणं गुणानां व्याख्यात्र कंदलीकारेण विहिता। "रूपरस...-" इत्यनेन सूत्रेण रूपरसस्पर्शस्नेहप्रभृतीनां गुणानां तथा च नवगुणानां कृते 'संख्यापरिमाणानि ...'इत्यादिसूत्रं कंदलीकारेण प्रदर्श्यते[228] । **रूपरसस्पर्शा:-** रूपेषु जले शुक्लरूपम्,रसेषु मधुररस:,स्पर्शेषु च शीतस्पर्शो जले निरूप्यते । तत्र निर्दिष्टं यत् आश्रयरूपोपाधिभेदेन हि जले अन्यरूपाणि नीलपीतादीनि प्रतीयन्ते । जलस्य मधुरत्वविषयेऽपि आक्षेपो यत् गुडादिवत् न तस्मिन् मधुरत्वप्रतिभासनमिति। **समाधानम्-** तत्र मधुरत्वसाधने कथितं यत् जले गुडादिवत् उत्कटमाधूर्यं न वर्तते । केवलमनेनैव न जले मधुररसस्याभाव इति वक्तुं शक्यते[229] । कटुकषायतिक्तलवणाम्लविलक्षणस्य सप्तमरसस्य न तत्र स्थितिरिति; अत: तत्र मधुररसो विद्यत इति व्याख्यायते। **स्नेह:-**जलस्य स्वाभाविकगुणस्नेहविषये निरूप्यते। स्नेहो निर्विशेषो हि जलस्याधारणधर्मत्वेन वैधर्म्यत्वेन च कथयितुं शक्यते । ईष्टिकाकाष्ठप्रभृतौ न वर्तते स्नेह: । दुग्धादिषु यत् सांसिद्धिकद्रवत्वं प्रतीयते तत्तु जलेन सह संयुक्तसमवायसम्बन्धेन एव वर्तत इति निरूपितम् । अन्यत् दृष्टान्त माध्यमेन कथ्यते यत् अनूपदेशस्था: जलावसिक्तत्वात् स्निग्धा दृश्यन्ते तद्विपरीतजाङ्गलप्रदेशस्था: वृक्षा: रूक्षा: दृश्यन्ते । यदि जाङ्गलीयवृक्षेषु सेचनक्रिया क्रियते तर्हि तत्रापि स्निग्धता अवलोक्यते। अत: जले वर्तते स्नेहगुण एकाकी वैधर्म्यम् इति सिद्धो जायते[230] । **द्रवत्वम्-**जलस्य द्रवत्वं सांसिद्धिकम् निरपेक्षं च निरूप्यते । क्षीरतेलयो: सांसिद्धिकद्रवत्वम् आश्रयसंसर्गेण जन्यते; यतो हि तत्र घनीभूतभाव उपलभ्यते । तद्विषये कथितं यथा– **"क्षीरतैलयोस्त्वाश्रयसन्निकर्षेण तदुपलम्भ:, क्वचित् तयोर्घनत्वोपलम्भात्"**[231]इति । **जलभेदा:-** पृथिवीवत् अपामपि द्वैविध्यं नित्यानित्यरूपेण कथितम् । नित्यापरमाणुरूपा, अनित्या च कार्यरूपा अबिति सूच्यते। **जलस्य कार्याणि-**शरीरेन्द्रियविषयभेदात् जलस्य कार्याणामपि त्रैविध्यमुक्तम्। **१.शरीरम्-**शरीरनिर्देशप्रसङ्गे तत्र केवलमयोनिजं जलीयं शरीरं निर्दिश्यते । प्रसरणशीलस्वभावत्वात् जलनिर्मितशरीरं बुद्बुद्वदेव स्यात् इति । शरीरेऽस्मिन् विशिष्टव्यवहारा योग्यत्वम् उक्त्वा पार्थिवावयवोपष्टम्भात् तस्मिन् उपभोगत्वयोग्यत्वं संपाद्यत इति। शास्त्रद्वारा जलीयशरीरमवगन्तव्य -मिति निर्दिष्टमन्ते कंदलीकारेण[232] अर्थात् जलीयशरीरे आगम एव प्रमाणमिति भाष्यभिन्नं प्रतिपाद्यते। तत्रैव पञ्चभौतिकशरीरविषयेऽपि वर्णनं कृतम्। तत्रोच्यते यत् पाञ्चभौतिकशरीरे गन्धस्य नोपलब्धि:, यतो हि गन्धकारणस्य एकस्य पञ्चसु आरम्भकत्वं न संभाव्यते । शरीरस्य पञ्चभूतनिर्मित्ति स्वीकरणाद् तत्र चित्ररूपेण रसगन्धस्पर्शानां तत्रोपलब्धि: स्यात्। एतस्माद् कारणात् पञ्चमहाभूतानां एकस्मिन् शरीरे न समवायिकारणत्वमिति तत्र निरूपितम्। द्वित्रिचतुर्षु वा महाभूतेषु न शरीरोत्पत्ति इति निर्दिष्टं कंदलीकारेण । महाभूतानां स्वभाववैभिन्न्यात् तत्र शरीरमेककार्यं न संपादयितुं शक्यते[233] । पार्थिवमानवशरीरे जलादीनामुपलब्धि: संयुक्तसमवायसम्बन्धेन वर्तत इति प्रतिपादितम् । **२.इन्द्रियम्-** सर्वप्राणिनां

---

[228] *तत्रैव*,पृ.९२

[229] तासु न मधुरो रसो गुडादिवदप्रतिभासनादिति चेत्?न, कटुकषायतिक्तलवणाम्लविलक्षणस्य रसस्य संवेदनात्, गुडादिवदप्रतिभासनन्तु माधुर्यातिशयाभावात्। *तत्रैव*, पृ.९२

[230] *न्या.कं.प्र.पा.भा.* पृ.९३

[231] *तत्रैव*, पृ.९३

[232] इदं शरीरमपामगमात्प्रत्येतव्यम्। *तत्रैव*, पृ.९४

[233] ये तु पञ्चमहाभूतसमवायिकारणं शरीरमित्यास्थिषत, तेषामगन्धं शरीरं स्यात्, कारणगन्धस्यैकस्यारम्भक- त्वात्। चित्ररूपरसस्पर्शश्च प्राप्नोति, कारणेषु नानारूपरसस्पर्शसम्भवात्। न चैवं दृष्टम्, तस्मान्न पञ्चभूत- प्रकृतिकम्। *तत्रैव*, पृ.९५

रसव्यञ्जकत्वेन रसनेन्द्रियं पृथिव्याद्यवयवानामनभिभूतैः जलीया -वयवैः विलक्षणरूपेण उत्पन्नत्वात् जलीयद्रव्याणामेव व्यञ्जकत्वं प्रतिपाद्यते । अस्मिन् प्रमाणं कथयति-**"रसनेन्द्रियसद्भावे रसोपलब्धिरेव प्रमाणम्, क्रियायाः करणसाध्यत्वात्"**[234] । रसनेन्द्रिय प्रमाणत्वेन रसोपलब्धिरेव तत्र कथ्यते । अन्यच्च रूपादिगुणेषु केवलं रसमेवाभिव्यनक्ति रसनेन्द्रियमिति प्रतिपादितम् । तदनन्तरं मुखे लारादिद्रव्यं रसव्यञ्जकरूपेण कथ्यत इति । **३.विषयः**-जलस्य विषयरूपेण भाष्यवत् अत्रापि सरित्समुद्रौ हिमकरको घनप्रभृतयो निर्दिश्यते । जीवानां सुखदुःखानि साधयन्त इति निरूपितं ततो भिन्नं वर्णितं कंदलीकारेण[235] ।

## कुसुमोद्गमे जलद्रव्यनिरूपणम्-कंदलीकारेण 'इदं तु' इत्यत्र उक्तं यत् प्रत्यक्षादिभिः सजातीयविजातीयेभ्यो भिन्नेरूपेण येन लक्षणं ज्ञातं सैव अन्यं प्रति कथने समर्थः इति । अत्र वोम्मिदेवेन उच्यते यत् 'इदं लक्षणम्' तु सर्वसाधारणं परञ्च पूर्वम् अनिरूपणकारणाद् 'तु' शब्देन निर्दिश्यते[236] ।

**जलस्य गुणाः-** जलस्य चतुर्दशगुणत्वं स्नेहसहचरितत्वेन पूर्वमेव कंथितं परश्चात्र कन्दल्यां तस्य निरूपणं भिन्नरूपेण करणार्थे बुभुत्सोत्पादनतया अस्य निरूपणं क्रियत इति प्रतिपाद्यते । यथा **"इतरथा पृथिवीरूपस्य पाकजत्वेन तारतम्यप्रदर्शनेन विशेषविधेः शेषनिषेधपर इति न्यायाद् द्रष्टव्यम्"**[237] । **रसः-** कटुकादिभ्यो विलक्षणरसो यत्रोच्यते जले तत्र वोम्मिदेवेन ओदनसाधारणम्यापि अव्यक्तमधुरता निर्दिश्यते । मधुरस्यावान्तरस्यापि तारतम्यं प्रतिपाद्यते । एकेन दृष्टान्तेन कथ्यते यत् इक्षुज्लौद्रादिषु **माधुर्यं न स्यात्** ;यदि जले स्निग्धत्वं न स्वीक्रियेत् । जले धूसरादिकस्य या प्रतीति तत्र रूपवदाश्रयसम्भेदो वर्ण्यते । एवमेव अन्यदपि उक्तम्-**"इदं च सामुद्रस्यैव बलहकपीतमुक्तस्य माधूर्योपलम्भात्"**[238] । अन्यच्च द्वितीयस्य समाधानं संयुक्तसमवायसम्बन्धेन दुग्धे द्रवत्वमित्यनेन निषिध्यते । साररूपेण एकां पंक्तिं प्रस्तौति तद्यथा-**"अनैमित्तिकपृथिवीगुणस्य सर्वव्यक्तिविशेषसामान्यविशेषस्यैव सर्वव्यक्तिवृत्तित्वदर्शनादिति भावः"** । [239]तैलसर्पिषो द्रवत्वस्य असांसिद्धिकविषयत्वे कथ्यते यत् दुग्धस्यातपसंयोगेन धनीभावः तथा च अत्यन्ततापेन घृतस्य भस्मीभावो दृश्यते । अतः तत्र सांसिद्धिकद्रवत्वम् अपितु पार्थिवमेवेति । [240]

**जलस्य कार्यम्-** शरीरेन्द्रियविषयकार्येषु शरीरविषये वोम्मिदेवेन अम्भसः शरीरारम्भद्रव्यरूपेण जलस्य स्थितिः प्रतिपाद्यते । तत्रानुमानवाक्यं प्रयुनक्ति-**"अम्भसत्वं शरीरारम्भकद्रव्यसमवेतत्वम्, द्रव्यारम्भ -समवेतत्वात् पृथिवीत्ववदित्यनुमानस्य गन्धैकार्थसमवाय उपाधिरिति भाव"** । [241]एतदनन्तरं कंदलीप्रोक्त-पाञ्चभौतिकशरीरवदत्रापि तस्य निराकरणमेव कृतं[242] नात्र किञ्चिद् विशिष्टं प्रतिपादितम् इति अर्थात्

---

[234] *तत्रैव*, पृ.९६

[235] सरित्समुद्रौ हिमं करको घनोपलमित्यादिर्विषयो भोग्यत्वे भोक्तुर्भोगसाधनत्वात्। *तत्रैव*, पृ.९७

[236] *तत्रैव*, पृ.१०७

[237] *तत्रैव*, पृ.१०८

[238] *तत्रैव*, पृ.१०८

[239] *टी.न्या.कं.* पृ.१०९

[240] पार्थिवं च क्षीरस्यघनीभावे क्षीरमिति प्रत्यभिज्ञानात्। *टी.न्या.कं.* पृ.११०

[241] *तत्रैव*, पृ.१११

[242] अपेक्षणीयसमवायिकारणविरहादिति मा चोदः,एकस्यारम्भकत्वंऽपि समवाय्यनेकत्वात्। पटादौ बहुभिरेवारम्भ दर्शनादित्यपि न,तत्र सजातीयबहुत्वेन तथोपपत्ते.। विजातीयारम्भे त्वन्यथा भविष्यतीति शङ्कायाः दुर्निवारत्वात्। *तत्रैव*, पृ.१११-११२

अत्रापि मानवशरीरं पार्थिवत्वेन स्वीकृत्यजलेऽस्मिन् संयुक्तसमवायेन सिद्धत्वं निरूप्यते । **इन्द्रियम्-** वोम्मिदेवेन भाष्यकारात् भिन्नप्रतिपादनेच्छया 'विजात्य' इत्यत्र 'वि'प्रत्ययस्याभावोऽपि सूच्यते । अत्र समासान्तरमाध्यमेन जात्यानभिभूतत्वमपि जलस्य सूच्यते यथोक्तं–**"जात्यानभिभूतैरिति वदत: प्रशस्तदेवस्य शिष्टतया (समासान्तरविधे रन्यत्वात्सि) विप्रत्ययभावोऽपि द्रष्टव्य:"** [243] शरीरसंयुक्तेषु अन्येष्वुदकेषु सत्स्वपि अनेनैव जलाभिव्यक्ति: नियमेन जायत इति उच्यते[244] । अन्यदपि तत्र कंदलीभिन्नं स्पष्टीकरणं लिख्यते यत् वाताद्युपहिते रसनेन्द्रिये यदि न रसोत्पत्ति: तर्हि तत्र प्रतिबन्धिरूपेण द्रव्यान्तरसंसर्ग एव विद्यत इति तद्यथा लिखितम्-**"वाताद्युपहितरसनस्य रसानुपलब्धे: द्रव्यान्तरसंसर्ग: सामर्थ्य -प्रतिबन्धीत्यनुमानादिति भाव:"**[245]अर्थात् रसनेन्द्रियेण एव रसाभिव्यक्ति: कार्यते जलस्य विषयरूपिणि चर्चात्र कुसुमोद्गमे न कृता विद्यत इति । अनेन प्रकारेण कथयितुं शक्यते यत् जलसम्बद्धविषयोऽयं टीकाभि: इतोऽपि स्पष्टीक्रियते । भाष्यकारेण विषयनिर्देशमात्रं क्रियते परञ्च कंदलीकार: तत्र विशदव्याख्यानं प्रस्तौति । कुसुमोद्गमकारेणापि तत्र स्वरीत्या विश्लेषणं क्रियते । जलस्य कटुकादिरसेभ्यो वैभिन्र्यं वर्तत इत्यस्य तुलना कुसुमोद्गमकारेण ओदनस्य अव्यक्तमधुरतया सह क्रियते । अन्यच्च जले स्निग्धताया अभावो तदि स्यात् तर्हि इक्षुप्रभृतिषु रसो माधूर्यं च न स्यात् । वाताद्युपहितरसनेन्द्रियेण न रसोत्पत्ति: कार्यत इत्यपि उच्यते ।

**न्यायकन्दल्यां तेजस् द्रव्यनिरूपणम्-** कन्दलीकारेण तेजस: लक्षणविषये निर्दिश्यते यत् पूर्वप्रयुक्तवाक्यानामिव अस्यापि व्याख्या करणीयेति अर्थात् तेजस्त्वमात्रेण असाधारणधर्म रूपेण तस्य लक्षणं प्रतिपादितमिति सूच्यते । **तेजस: गुणा:-**गुणविनिवेशाधिकारे वर्णितगुणानामिव सूत्रनिर्देशात् पूर्ववद्(पृथिव्यादिवत्) अत्रापि व्याख्या विधातव्येति । एकादशगुणानां निर्देश: तेजसि वैधर्म्यप्रदर्शनार्थं विहितमिति अर्थात् तेजस्त्ववत् एकादशगुणानामपि तेजसि वैधर्म्यं वर्तत इति[246] । **रूपम्-**'तेजोरूपस्पर्शवत्' इति सूत्रेण तत्र रूपादिकम्, 'संख्यापरिमाणानि...इत्यादिसूत्रेण च तेजसि संख्यादयो गुणा: प्रतिपाद्यन्ते । तेजसि शुक्लं भास्वरं रूपं वर्तते । पृथिव्यादौ यच्छुक्लत्वं तस्मिन् स्वपरप्रकाशकत्वं न विद्यते; केवलं तेजस्येव एतादृशं स्वरूपं वर्तत इति कंदलीकारेण प्रतिपादितम् । अत: तेजसि भास्वरशुक्लत्वरूपं विद्यते । यत्र कुत्रापि लोहितपीतादिकं रूपं तेजसि दृश्यते,तत्तु आश्रयभेदेन उपाधिभेदेन च उपाधिमूलकमेव व्याख्यातम्[247] । **स्पर्श:-** 'तेजसि उष्ण एव स्पर्श:' इत्यनेनात्र वैधर्म्यं निर्दिष्टं तेजस:,यतोहि पृथिव्याम -नुष्णाशीतत्वं शीतत्वं च जले प्रतिपादितम् अर्थात् तेजस उष्णस्पर्श एव वैधर्म्यमिति।
**तेजस: भेदा:-** तेज: परमाणुस्वरूपेण कार्यस्वरूपेण च द्विधा कथितम् । कार्यरूपस्य तेजस: शरीरेन्द्रियविषयभेदात् त्रैविध्यं कथितम् । **१.शरीरम्-** तेजस: शरीरमयोनिजमादित्यलोके प्रसिद्धं च निर्दिश्यते । अग्निस्वरूपत्वात् तेज:शरीरस्य सुखदु:खानुभवविशेषकार्ये न सामर्थ्यमिति आक्षेपमुत्थापितम् । समाधानं चास्य 'पार्थिवावयवोपष्टम्भाच्च' अनेन वाक्येन क्रियते[248] अर्थात् निमित्तभूतानां पार्थिवावयवानां

---

[243] *तत्रैव,* पृ.११३

[244] शरीरसंयुक्तेषूदकान्तरेषु सत्स्वप्यनेनैव रसाभिव्यक्तिरिति/नि/यमस्य दर्शनादित्यर्थ:1 *टी.न्या.कं.* पृ.११३

[245] *तत्रैव,* पृ.११३

[246] *न्या.कं.प्र.पा.भा.* पृ.९७

[247] *न्या.कं.प्र.पा.भा.* पृ. ९८

[248] *तत्रैव.* पृ.९९

विशेषसंयोगाद् उपभोगोपक्षमतेजशरीरस्योत्पत्ति जायत इति प्रतिपाद्यते । २.**इन्द्रियम्–** रूपव्यञ्जकरूपेण कथ्यते तेजसः इन्द्रियं चक्षुः, अस्य उत्पत्तिः जलाद्यनभिभूतावयवै विशेषप्रकारेण कथ्यते,यतो हि अत्र अदृष्टकारणत्वं वर्तते । प्रदीपवत् केवलमनेनैव चक्षुषा रूपप्रत्यक्षं कार्यत इति सूचितम् । अस्मिन् विषये कथ्यते यत् **–"तैजसत्वन्तु तस्य रूपादिषु मध्ये नियमेन रूपस्याभिव्यञ्जकत्वात् प्रदीपवत्"** । [249]एतस्येन्द्रियस्य रूपं स्पर्शं चानुद्भूते अदृष्टकारणाद्; अतः स्वाश्रये दाहं प्रत्यक्षत्वं च न तेन क्रियत इति व्याख्यातम् अर्थात् अनुद्भूतरूपस्पर्शकारणाभ्यां दाहं प्रत्यक्षं च तेन इन्द्रियेण न कर्तुं शक्यत इति प्रतिपादितवान् आचार्यः । **३.विषयः-** 'विषय इति संज्ञा यस्य' इति व्युत्पत्ति विषयशब्दस्य तेन कंदलीकारेण निर्दिश्यते । भौमदिव्योदार्यरूपेण अत्रापि चतुर्विधत्वं तेजसो विषयसंज्ञकत्वेन उक्तम् । कंदलीकारेण एतेषां चतुर्णां व्याख्या नातिविशदा प्रस्तूयते । **१.भौमः-'काष्ठेन्धन'**इत्यत्र काष्ठशब्दस्यो - पलक्षणत्वेन तृणतुषादयो गृह्यन्ते यतो हि एतेषु अपि अग्निर्जायते इति । उर्ध्वज्वलनमित्यनेन उर्ध्वज्वलनरूपस्य तेजसः स्वभावः कथ्यते । [250]**२.दिव्यम्-** सौरविद्युदादि इत्यनेन दिव्यतेजोरूपस्य ग्रहणं तथा च आदिशब्देन तत्र उल्काग्रहणमपि क्रियते । **३.उदर्यम्**-'पचनस्वेदनादि' इत्यनेन पूर्वगुणेभ्यो विलक्षणगुणा रसादय उत्पाद्यन्त इति गुणान्तरप्रतिपादकत्वं लक्ष्यते । 'स्वेदन'शब्देन काठिन्यनाशः, आदिशब्देन च विस्फोटप्रभृतयः सूच्यन्ते । आहारपरिणामादिरूपे उदर्यतेजो गृह्यते । **४.आकरजः-** सुवर्णा - दीनाम् आकरजत्वं वर्णितं भाष्यकारेण; यतो हि तत्र सुवर्णरजतादीनि द्रव्याणि उत्पाद्यन्ते । कंदलीकारः अत्र लिखति **–"आकरः स्थानविशेषः,तस्मिन् सुवर्णरजतादि तैजसं द्रव्यं जायते"**[251] । सुवर्णस्य तैजसत्वे आगमप्रमाणं कथ्यते । एतदनन्तरं कंदलीकारेण बौद्धानां युक्तिखण्डन माध्यमेन अवयविनः पृथक् सत्ता साध्यते । अनेन प्रकारेण कथयितुं शक्यते यत् कंदलीकारेण सुवर्णत्वविषयिणि अवयवविषयिणी च व्याख्या विशदरूपेण प्रस्तुतेति।

**कुसुमोद्गमे तेजस् द्रव्यनिरूपणम्**-कंदलीकारेण यत्र एकादशगुणानां चर्चा विधीयते तत्र रूपे भास्वरत्वम्,स्पर्शे उष्णस्पर्शत्वं च सहचरितम् इति वोम्मिदेवेन[252] व्याख्यायते । **तेजसः गुणाः- रूपम्-** तेजसः स्वप्रकाशकत्वविषये कथ्यते यत् तेजसः भास्वरत्वं स्वपरप्रकाशेनाभिव्यज्यते जातिविशेषेण नेति । नीलपीतादीनाम् उपाधिमूलकता यत्र वर्ण्यते तत्र घनीभूतस्योदकस्य शुक्लरूपत्वं यदि प्रतीयेत तर्हि रूपान्तर स्यानभिभवः स्यादिति प्रतिपाद्यते । अन्यद् उदाहरणमपि तत्र दीयते यथा च **–"जलावसिक्ता नीलशाली(टी) धवला प्रतीयेतेति"**[253] । **स्पर्शः-** तेजसि उष्ण एव स्पर्शो वर्तत इति वर्ण्यते । तत्रोच्यते यत् चन्दचामीकरचक्षुयुक्ता ये तेषामुद्भवाभावे अप्रतीयमानो अपि स्पर्शः तेजस्तया अनुमेयं वर्तत इति कथ्यते[254]अर्थात् तेजस्तयापि उष्णस्पर्शोऽनुमातुं शक्यत इति । **तेजसः कार्यम्- १.शरीरम्-** शरीरविषयिणी चर्चा न क्रियते कुसुमोद्गमकारेण इति । **२.इन्द्रियम्-** रूपोपलब्धि चक्षुषः सद्भावे प्रमाणरूपेण वक्तव्यं यतो

---

[249] *न्या.कं.प्र.पा.भा.* पृ १००

[250] *न्या.कं.प्र.पा.भा.* पृ.१००-१०१

[251] *तत्रैव*,पृ. १०१

[252] *टी.न्या.कं.* पृ.११४

[253] *तत्रैव*, पृ.११४

[254] चन्द्रचामीकरचक्षुषामनुद्भवांदप्रतीयमानस्तेजस्तयाऽनुमेय इति भाव.1 *तत्रैव*, पृ.११५

हि शरीरसंयुक्त अन्तत्तेजसि वर्तमाने अपि अनेनैव रुपोपलब्धि: कार्यत इति प्रतिपाद्यते । इदमेव तस्मिन् विशिष्टं प्रमाणमिति[255] । ३.विषय:- विषये केवलं स्वेदनविषयिणि चर्चा वोम्मिदेवेन विहिता । 'स्वेदनं स्तब्धनाशनम्' इति कंदल्यां प्रतिपादितं । तत्र किञ्चिद् कुसुमोद्गमे कथ्यते यत् अत्र स्तब्धनाशे हेतु: वातश्लेष्मणो अपगमनं वर्तत इति[256] । १.भौम:-भौमे अबिन्धनविषये कथ्यते अनेन जात्युपसंग्रहक - व्यावर्तकधर्मस्य अभिधानमत्र विहितमिति प्रतिपाद्यते । ४.आकरज:- सुवर्णस्य तैजसत्वज्ञाने आगम एव प्रमाणमित्यत्रापि उक्तमिति[257]अर्थात् आगमप्रमाणात् सुवर्णस्य तैजसत्वं वर्तत इति । अन्यविषयिणी या चर्चा कंदलीकारेण संपादिता;अत्रापि तस्यानुकरणं क्रियते । यत्र कुत्रचिद् स्वभावार्थोऽपि तेनाचार्येण प्रतिपाद्यते । बौद्धै: सह चर्चायां वोम्मिदेवेन कंदलीमतमेवानुस्रियते । संयोगस्य अव्याप्यवृत्तित्वमत्रापि उच्यते । अनेन प्रकारेण नातिविस्तरं व्याख्यानमत्र प्रस्तूयते । अन्ते स्पष्टीभवति कुसुमोद्गमकार: सुवर्णस्य तैजस्त्वे आगमप्रमाणं स्वीकरोति ।

**न्यायकन्दल्यां वायुद्रव्यनिरूपणम्**–भाष्यकारेणोच्यते यत् पूर्वं पृथिव्यपतेजसां प्रत्यक्ष - प्रमाणविषयाणां द्रव्याणां व्याख्यानं कृतं वर्तते;इदानीम् अप्रत्यक्षद्रव्याणां निरूपणं प्रारभ्यते । 'वायुत्वाभिसम्बन्धाद् वायु:' इति लक्षणम् असाधारणधर्मरूपेण प्रशस्तपादेनाभिहितम् । **वायु-गुणा:**–स्पर्श -प्रभृतयो गुणाः प्रोक्ता तेऽपि पृथिव्यादिगुणानामिव व्याख्यातव्येति तत्र निर्दिष्टम् । **स्पर्शप्रभृतय:**– वायोः स्पर्शः अपाकजत्वेन कथ्यते । अतः इदमपाकजत्वं वायोः लक्षणमपि भवितुमर्हति इति प्रतिपाद्यते । अस्य अपाकजत्वे कारणं कथ्यते यत् पृथिव्यां तस्याभाव इति । जलतेजसो: यथाक्रमं शीतोष्णस्पर्शवत् न वायो: स्पर्श: अपितु स्पर्शस्यानुष्णाशीततया जलतेजसोः तस्य वैभिन्यं तत्र सूच्यते । [258]'संख्यापरिमाण[259]...इत्यादिसूत्रेण वायौ तत्र संख्यादयो गुणा निर्दिश्यन्त इति तृणकर्मवायुसंयोगात्' इति वैशेषिकसूत्रमुद्धृत्य तृणे कर्मसंपादनात् वायौ संस्कारगुणस्य सताङ्गीक्रियते । वेगरहितेन द्रव्येण न कार्याणि उत्पाद्यन्ते । **वायु-भेदा:–१.शरीरम्-** भाष्यवदेव शरीरस्य द्वैविध्यं सूच्यते । तत्र कार्यलक्षणस्य वायो: चातुर्विध्यं कथितम् । अत्र कन्दलीकारेण वायोः शरीरं वायुलोके वर्तत इति भाष्यवदेव निर्दिश्यते । तदपि शरीरम् अयोनिजमेव कथ्यते । पूर्ववत् पार्थिवावयवसंयोगेनात्रापि सुखदु:खभोगक्षमता उत्पाद्यते[260]। **२.इन्द्रियम्**–पार्थिवाद्यवयवैरनभिभूतवायवावयवानां विशेषप्रकारकेन संयोगेनास्योत्पत्तिर्जायत इति । इदमिन्द्रियम् त्वक् नाम्ना कथ्यते । **स्पर्श:**–रूपादिगुणेषु केवलं स्पर्शो हि अनेनेन्द्रियेण उत्पाद्यते । स्वेदे शीततोत्पादकसमीरवत् इदं इन्द्रियं वायवीयं कथ्यते । शरीरस्य सर्वप्रदेशेषु अस्या: प्रत्यक्षं क्रियते, अतः शरीरस्य सर्वप्रदेशे तस्यावस्थितिः त्वचि वृत्तिकारणाद् इदमिन्द्रियं त्वक् नाम्ना कथ्यते । 'त्वक्' इति शब्द प्रयोगः इन्द्रिये लक्षणया वृत्त्या क्रियत इति भाष्यात् पृथक् प्रतिपाद्यते कंदलीकारेण । अधिष्ठानभेदाद्

---

[255] कार्या रूपोपलब्धिश्चक्षुष: सद्भावे प्रमाणं, सत्यपि तेजान्तरे शरीरसंयुक्तो अनेनैव रूपोपलम्भ इति नियमो विशिष्टारम्भे प्रमाणमित्यर्थ.। *टी.न्या.कं*, पृ.११५

[256] *तत्रैव*, पृ.११६

[257] आगमानुग्राहक इति शेष:। *तत्रैव*, पृ.११७

[258] *वै. सू. २/१*।

[259] *वै.सू.*, *४/१/११*

[260] *न्या.कं.प्र.पा.भा.* पृ.११३

अस्यामेव रूपादिनां शक्तिश्चेत् एकस्मिन्नेव अनेकेन्द्रियप्रसंङ्गः स्यात् । अनेन संसारे वर्तमाना अंधतापि समाप्ता भविष्यतीति । यदि एकस्यामेव त्वचि इन्द्रियपरिकल्पना तर्हि अनेकेन्द्रियस्वीकरणवदेव स्थितिः स्यादिति इन्द्रियकल्पना व्यर्था वर्तत इति[261] अर्थात् एकमेव त्वगिन्द्रियं सर्वशरीरवर्त्तिः विद्यते । तया एकया एव न प्रत्यक्षम् । **३.विषयः** –कंदलीकारेण उक्तं यत् भाष्यकारेण ये वायु-विषयाः प्रोक्ताः ते एत एव वर्तन्ते नाधिकं न्यूनं च विद्यते । वायोः स्पर्शः पृथिव्यप्तेजसेभ्यो विलक्षणस्पर्श इति कथ्यते[262] । अत्र आक्षिप्यते यत् स्पर्शाश्रयद्रव्यस्य सत्तायां प्रमाणं किं वर्तत इति । **१. वायुद्रव्यस्य अनुमाने स्पर्शलिङ्गत्वम्-** अन्योपस्थितप्रत्यक्षमतमस्वीकृत्य स्पर्शहेतोः अनुमाने नात्र द्रव्यानुमानं क्रियत इति । भूयोभूयस्पर्श हेतो वायोः अनुमितिकारणाद् विशेषप्रकारकपाटव्येन अनुमितौ व्याप्तिर्नापेक्ष्यते । तत्र दृष्टान्तेन प्रतिपाद्यते यत् वृक्षादिगतक्रियायाः अनुमितौ न व्याप्तिरपेक्ष्यत इति । शीतोष्णस्पर्शभेदप्रतीतौ सत्यपि"वायोः स्पर्शः" इति प्रत्यभिज्ञा तदाश्रितद्रव्यानुमानेनैव जायत इति । (२)वायोः स्पार्शनप्रत्यक्षो क्रियते यतो हि स्पर्शस्याश्रयः प्रत्यक्षं वर्तते, यथा घटादि इत्यनुमानं शशश्रृंगानुमानवद् अनुपलब्धिमूलकेनानुमानेन दोषयुक्तं प्रतिपाद्यते । अत्रोच्यते यत् चाक्षुषप्रत्यक्षयुक्तद्रव्यस्यैव स्पार्शनप्रत्यक्षो भवितुमर्हतीति प्रतिपाद्यते । अचाक्षुषत्वात् वायो न प्रत्यक्षज्ञानमिति । 'शब्द[263]स्पर्शधृति[264]कम्प[265]लिङ्गेन हेतुना वायुद्रव्यस्य ज्ञाने अनुमानप्रमाणं कंदलीकारेण प्रस्तूयते । अन्यच्च स्पर्शानुमितिः वायुद्रव्येण तद्वत् अन्येषां शब्दादिकार्याणामुत्पत्तिरपि वायुद्रव्येण च वर्तत इति स्पष्टतया वर्ण्यते । अस्य कृते द्रव्यकल्पनायां वैयर्थ्यं कथनमिति । **वायोः स्वभावः-**सम्मूर्च्छनेन वायोः नानात्वम् अनुमीयत इति । अन्यच्च संयोगविशेष सन्निपातोऽपि वायुद्रयस्य उर्ध्वगतिः तृणादीनाम् उर्ध्वगतिमाध्यमेनावबुध्यते यतो हि वायो गतिः अप्रत्यक्षा एव वर्तत इति । अन्यच्च उर्ध्वगमनं परस्परसंघर्षेण हि अनुमीयते । वायोः गतिः तिर्यक्कुटिला च वर्तते । अन्यदपि अणुपरिमाण - द्रव्येण तृणादीनामितस्ततः प्रेरणं न कर्तुं शक्यते; अतो वायोः परिमाणं महदिति कथ्यते[266] । **४.प्राणः**–लोके योगशास्त्रे च प्रसिद्धवायो भिन्नरूपेण प्राणादिवायुः स्वीक्रियते । एतदनन्तरं तस्य क्रियाभेदेन अस्य पञ्चविधत्वं प्राणापानादिना तत्र निर्दिश्यते । प्राणवायोः लक्षणं यथा-**"अन्तःशरीरे यो वायुर्वर्तते स प्राण इत्युच्यते"**[267] । स च प्राणः रस[268]मला[269]दिधातू[270]नां प्रेरको विद्यत इति कंदलीकारेण वर्णितम् । भाष्ये तु अपानादिवायूनां संकेतमात्रं प्रदत्तं परञ्च कंदलीकारेण तत्र प्राणवायोः विभागः,तेषां कार्यकथनपूर्वकं करोति यथोक्तम्–**"मूत्रपुरीयोरधोनयनादपानः रसस्य गर्भनाडीवितननाद् व्यानः, अन्नपानादेरुर्ध्वं नयनादुदानः, मुखनासिकाभ्यां निष्क्रमणात् प्राणः, आहारेषु पाकार्थमुदर्य्यस्य वह्ने समं सर्वत्र नयनात्**

---

[261] *तत्रैव*, पृ.११३

[262] *न्या.कं.प्र.पा.भा.* पृ.११४

[263] *तत्रैव*, पृ.११७

[264] *न्या.कं.प्र.पा.भा.* पृ.११७

[265] स्पर्शानुमितद्रव्यकार्य्यत्वेनैव शब्दादीनामुत्पत्तौ सम्भवन्त्यां द्रव्यान्तरकल्पनावैयर्थ्यमिति। *तत्रैव*, पृ.११८

[266] *न्या.कं.प्र.पा.भा.* पृ.११९-१२०

[267] *तत्रैव*, पृ.१२०

[268] रस इति भुक्तपीताहारेषु पाकजोत्पत्तिक्रमेणोत्पन्नस्य द्रव्यविशेषस्य ग्रहणम्। *तत्रैव*, पृ. १२०

[269] मल इति मूत्रपुरीषयोरभिधानम्। *तत्रैव*, पृ.१२०

[270] धातवस्त्वङ्गमांसास्थिशोणितादयः;तेषां प्रेरणस्येतस्ततो नयनस्य, आदिशब्दाद् व्यीहनस्य च हेतु.1 *तत्रैव*,पृ.१२०

समान इति न वास्तवमेतेषां पञ्चत्वमपि तु कल्पितम्"[271] । अनेन प्रकारेण एकत्वं तस्य कथ्यते यतोहि एकस्मिन मूर्तद्रव्ये अनेकद्रव्याणां समवायो न संभवति इति प्रतिपादितमाचार्येण अर्थात् मुख्यरूपेण एक एव वायुरिति । प्राणापानादीनां विवरणं भाष्यतो विस्तृतं प्रतिपादितमिति ।

**कुसुमोदगमे वायुद्रव्यनिरूपणम्**–कुसुमोदगमकारेण निर्दिष्टं यत् शरीरारम्भकरूपेण प्रत्यक्ष-कारणतया पृथिव्याः, द्वितीयत्वे अपां तृतीयत्वे तेजसः तथा च चतुर्थत्वे वायोः वर्णनं कृतम् । अप्रत्यक्षद्रव्यं वायुरिति तत्र निर्दिश्यते[272] । **वायोःगुणाः**–कन्दलीवदत्रापि वायो अनुष्णाशीत- स्पर्शः, अपाकजत्वं च उच्यते । संख्यादयोऽपि एतेषां साहचर्येण निर्दिश्यन्ते । पृथिवीवद् अत्र परापरत्वमपि वोम्मिदेवेन कथितम्–**"प्रमाणं च वायुः संख्यापरिमाणपृथक्त्वसंयोगविभागवान् मूर्त्तत्वात् पृथिवीवत्"**[273]अर्थात् सः परापरत्ववान् मूर्त्तत्वात् पृथिवीवदिति द्रष्टव्यम् अर्थात् भावोऽयं यत् वोम्मिदेवेन वायुर्मध्ये कन्दलीभिन्नरूपेण परत्वापरत्वगुण निरूपणस्य निर्देशोऽपि पृथिवीवत् क्रियत इति । त्वचि एतेषां रूपादीनाम् अनुमानं विरुद्धमिति कथितम् । **कार्यरूपवायोः कार्याणि-१.शरीरम्-** तत्र शरीरविषयिणी चर्चा न क्रियत इति । **२.इन्द्रियम्** –इन्द्रियविषयिण्यां चर्चायां कंदलीकारेण वाय्वावयवैः निर्मितमिन्द्रियं त्वक् इति उक्तम् । तत्रोच्यते यत् शरीरस्य सर्वेषु अवयवेषु त्वक् वृत्तिरिति । अत्र वोम्मिदेवेन कथ्यते यत् नखलोमदन्तानां शरीरसंयोगित्वमेव न तु शरीरावयवत्वमित्युच्यते अर्थात् इन्द्रियादिवत् न एतेषाम् अवयवावयविभावत्वमिति कथनस्य भावः । वोम्मिदेवेन हि स्वोदभावनया प्रश्नमुत्थापितं यत् शरीरस्य सहजमावरणं पार्थिवं कथं तत्र वायवीयं निर्दिश्यत इति प्रश्नः? 'त्वचि स्थितित्वात् तस्याः स्थितिः लक्षणया आधेयरूपे वर्तत इति । अत्रापि कंदलीवदेव कथ्यते यत् त्वचि एव रूपादीनां स्थितिस्वीकारे अन्धादीनां शक्तिवैकल्यं कथ्यते । लौकिकप्रमाणेन एव त्वचः अधिष्ठानत्वं सिद्धो भवतीति । इदं कंदलीभिन्नं प्रतिपादितमिति । अयमेव भावो गृहीत्वा वोम्मिदेवेन कथयति तद्यथा- **"लौकिक त्वाच्च नोपचारप्रयोजकं श्रद्धेयं तदधिष्ठाने चक्षुरूपगाते तच्छक्तिवैकल्यादन्धादीनां रूपाद्यनुपलब्धिरिति भावः "**[274] **३.विषयः**– वोम्मिदेवेनापि कंदलीवदेव कथ्यते यत् एतावन्त एव विषया इति । अत्र अनियताधिष्ठानत्वेन त्रयाणां निर्देशः विहितः,यथा– **"त्वच एवेति कल्पनम्"**[275] । अत्रोच्यते यत् रूपादिषु रूपस्यैव व्यञ्जकत्वं वर्तते न तैजसि; अनेन प्रकारेण तत्र "उपलभ्यमानस्पर्शस्याधिष्ठानभूत आश्रयो यः स विषय इति" शब्दः योज्यते । इतरथा शब्दयोजनस्याभावे गृहान्तर्वर्त्तिनी तेजसि अतिव्याप्तिः स्यात् । यथोक्तम्– **"पृथिव्यादौ हेमतेजसि विषक्तावयवे आप्ये ग्रीष्मे गृहान्तर्वर्त्तिनी तेजसि वाऽतिव्याप्तिः** । [276] वोम्मिदेवेनात्रापि अनुमानवाक्येन वायौ स्पर्शोऽनुमानप्रमाणरूपेणोपस्थापितमिति यथा प्रयोगः – **"प्रयोगस्तु उपलभ्यमानशीतोष्णस्पर्शाधिष्ठानं स्पर्शवद्द्रव्योपनीतं शीतोष्णस्पर्शाधिष्ठानत्वात् घटाद्यानीतपयः पावकवदिति"**[277]अर्थात् अनुमानादेव जायते । समानजवयोर्वाय्वोः परस्परगति प्रतिबन्धकहेतुना सम्मूर्छनेन वायोः नानात्वमनुमीयते परञ्च एकदिशोर्मध्ये

---

[271] *न्या.कं.प्र.पा.भा.* पृ.१२१

[272] *टी.न्या.कं.* पृ.१२४

[273] *तत्रैव,* पृ.१२५

[274] *टी.न्या.कं.प्र.पा.भा.* पृ.१२६

[275] *तत्रैव,* पृ.१२७

[276] *तत्रैव,* पृ.१२७

[277] *टी.न्या.* पृ.१२८

यत् संयोगः तस्य स्थितिः सर्पकुण्डलावयवानामिव जायत इति[278] वोम्मिदेवेन स्पष्टीक्रियते । अन्यत सर्वं कन्दलीवदेव प्रतिपादितम् । नास्ति तत्र विशेषः । ४.प्राणः– 'भुक्ताहारस्येति' इत्यत्र 'पीत' शब्देन क्षीरपानमेषितव्यो यतो हि जले पाकाभावो विद्यते । अनेन प्रकारेण वायुद्रव्यस्य वर्णनं वोम्मिदेवेन संक्षिप्तरीत्या विहितम् । अनेन प्रकारेण कथयितुं शक्यते यत् कंदलीकारेण भाष्यस्य मुख्यसिद्धान्तं परित्यज्य नान्यथा किञ्चिद् प्रतिपादितम् । कंदलीकारेण त्वगिन्द्रिये त्वक् इति व्यवहार: लक्षणावृत्त्या जायत इति भाष्याद् भिन्नं सूचितम् । अन्यदपि वायुद्रव्यस्य अनुमानविषयिणी चर्चा तथा च प्राणस्य अपानादिभेदविपयिणी चर्चा वायुप्रकरणे लौकिकप्रसिद्ध्यनुसारं योगशास्त्रानुमता च विशदा प्रतिपादिता । कुसुमोद्गमकारेणापि यत्र कुत्रचिद् भिन्नदृष्टान्तमाध्यमेन कंदल्यनुमतमेव वर्णनं कृतम् ।

**न्यायकन्दल्यां सृष्टिसंहारप्रक्रिया**-कंदलीकारेण सर्वप्रथमम् 'उत्पत्तिमन्ति' इत्यादि श्लोक- माध्यमेन कथ्यते यत् उत्पत्तिमत्तां द्रव्याणामुत्पत्त्यनन्तरं तेषां कर्तु: परीक्षा क्रियत इति[279] । ग्रन्थवैशद्यनिवारणार्थे चतुर्णां द्रव्याणामुत्पत्ते: चर्चा सार्धमेव विधीयत इति निर्दिष्टम् । यद्यपि सृष्टिसंहारयो: सार्धमेव वर्णनं परञ्च नायं एतेषां द्रव्याणां साधर्म्यकथनमिति । महाभूतानामुत्पत्तिविनाशश्च उभयमपि द्वयणुकक्रमेण क्रियन्त इति । एतस्माद् कारणाद् द्वयणुकानामुत्पत्ति: अपि अस्यामेव प्रतिज्ञायामन्तर्भाव्यते । द्वयणुकानामुत्पत्तिरपि महाभूतानाक्रमेणैव आचार्येण वर्ण्यत इति तत्र सूचितम्[280] । **संहारक्रम**:-एतदनन्तरं संहारप्रक्रियायां लवनिमेषकाष्ठाकलामुहूर्तादिभ्यो ब्राह्ममानपर्यन्तं तथा च उत्तरायणदाक्षिणायने कालगणनारूपेण वर्ण्यते । चतुर्युगसहस्रयुक्तं ब्रह्मण एकं दिनम्,अनेनैव मानेन शतवर्षस्यान्तरं[281] ब्रह्मण: अपवर्गकाले जीवानां गर्भवासादिदुखेभ्यो मुक्त्यर्थं विश्रामार्थं च करूणया सञ्जीहीर्षा विधीयते; अनया एव द्वयणुकक्रमाद् परमाणुपर्यन्ता सृष्टि: नाश्यते । अत्र कालगणना विशदरूपेण प्रतिपादिता वर्तत इति । महेश्वरस्य इच्छा आत्माणुसंयोगयुक्तात्र वर्ण्यते । माहेश्वरेच्छात्माणुसंयोगजन्यकर्मभ्यो शरीरेन्द्रिययो: कारणेषु विभागोत्पाद्यते,अनेनैव द्वयणुकारम्भकसंयोगो नाश्यत इति प्रतिपाद्यते । अकारणनाशात् परमेश्वरे अकारुण्यादिदोषवारणाय 'निशिविश्रामार्थमिति' शब्द:,तेन लक्षणया वृत्या ब्रह्मणो मोक्षकालं सूच्यते । शरीरेन्द्रिययो: नाशवंत् महाभूतानामपि परमाणुपर्यन्तं विनाशो जायते[282] । ईश्वरेच्छया समेषामेव अदृष्टानां कार्योत्पादिकाशक्ति: कुण्ठीक्रियते । अनया तेषां कार्योत्पादनशक्ति: नाश्यत इति । यद्यपि दिगादयो ये नित्या: तेषां स्थिति:, तथापि जीवानामदृष्टस्य असामर्थ्यकारणादेव तत्र कार्याणि न उत्पाद्यन्त इति निरूपितम्[283] । **सृष्टिक्रम**:-'तत पुन:' इत्यनेन शब्देन सृष्टिक्रमो निर्दिश्यते । यद्यपि तस्मिन् संहारकालेऽपि न विद्यते जीवेषु प्राणसम्बन्ध:, तथापि तेषु प्राणधारणसामर्थ्यं तु वर्तत एव,एतस्माद् कारणात् 'प्राणिन:' इति शब्दप्रयोगो विहित: । प्राणिनां भोगभूतये महेश्वरस्य सिसृक्षा जायते । अनेन

---

[278] सर्पकुण्डलादावयवानामेव च परस्परसंयोग.1 *टी.न्या.कं.* पृ.१३१

[279] उत्पत्तिमन्ति चत्वारि द्रव्याण्याख्याय विस्तरात्। तेषां कर्त्तृपरीक्षार्थमुद्यम.1 *न्या.कं.प्र.पा.भा.* पृ.१२१

[280] *न्या.कं.प्र.पा.भा.* पृ. १२१-१२२

[281] अस्माकं पञ्चदशनिमेषा: काष्ठा। त्रिंशति: काष्ठा: कला। पञ्चदश कला नाडिका। त्रिंशत्कालो मुहूर्त.1 त्रिंशन्मुहूर्तैरहोरात्र.1 पञ्चदशाहोरात्रा: पक्ष.1 द्वौ पक्षौ मास.1 द्वौ मासावृतु.1 षड्ऋतवो द्वादशमासा: संवत्सर.1 ऋतुत्रयेणुत्तरायणोत्तरायणम्,ऋतुत्रयेण दक्षिणायनम्। उत्तरायणश्च देवानां दिनम्, दक्षिणायनश्च देवानां रात्रि.1 *तत्रैव*, पृ.१२३

[282] *तत्रैव*, पृ.१२४-१२४

[283] *तत्रैव*, पृ.१२६-१२७

अदृष्टेषु कार्यकारणसामर्थ्यमुत्पाद्यत इति निर्दिष्टम् । अनन्तादृष्टेषु कार्येच्छोत्पादिका परमात्मशक्ति एका, दिगादीनां पदार्थानामिव नित्या च कथ्यते । तत्तत्कालस्थसहकारिरूपेण सृष्टिसंहारार्थं साहाय्य - संपादनकारणाद् परमात्मेच्छा एकैव कथ्यते[284] । **महाभूतानामुत्पत्ति:-**ईश्वरेच्छया अदृष्टात्माणुषु कार्यकरणशक्तिरुत्पाद्यते । कार्योत्पतौ सत्यां तत्रात्माणुसंयोगा जायन्ते । संयोगेभ्यो वायवीयपरमाणुषु क्रिया उत्पाद्यते । अत्र वायवीयपरमाणव: अस्यां क्रियायां समवायिकारणभूता:,असमवायिकारणीभूता: आत्माणुसंयोगश्च तथा च तेषामदृष्टा: तत्र निमित्तकारणत्वेन विद्यन्त इति कथ्यते । क्रियोत्पत्त्यनन्तरं वायुपरमाणुषु संयोगा:,तदनन्तरं यथाक्रमं द्वयणुकानि त्र्यणुकानि च उत्पाद्यन्ते । अनेन क्रमेण महान् वायुरुत्पत्ति: जायते । एतदनन्तरं समुत्पद्यमानो वायु: नभसि अबाधितरूपेण तिष्ठति इति कथ्यते । एवमेव व्युत्क्रमेण पृथिव्यप्तेजसामुत्पत्तिक्रमो वर्ण्यते । यद्यपि अप्तेजसोर्मध्ये स्वाभाविकरूपेण विरोध:, तथापि जीवानामदृष्टवशात् उभयोर्मध्ये महाभूतानामुत्पत्तिकाले आधाराधेययो: सम्बन्धो निर्दिश्यत इति भाष्याद् भिन्नं कथ्यते[285] । **जीवानां सृष्टि:-**द्वयणुकादिक्रमेण महाभूतानामुत्पत्त्यनन्तरं परमेश्वरस्याभिध्यानमात्रादेव पार्थिवाण्वनुगृहीतेभ्य तैजसेभ्य: परमाणुभ्यो महद्ण्डोत्पति: वर्ण्यते । अनेन उत्कटवैराग्यसम्पन्नस्य ज्ञानयुक्तस्य च सर्वलोकपितामहस्य ब्रह्मणोत्पति:क्रियते । उत्कटवैराग्यग्रहणेन तत्र पक्षपातो निरस्यते । अनेन प्रकारेण प्रजापतिमनुप्रभृतिनां तथा ब्राह्मणवैश्यादीनामुत्पत्ति:[286]अत्र वर्ण्यते । **सृष्टिकरणे प्रवृत्तौ कारणानि-**१.जीवानामदृष्टानुसारमेव ब्रह्मणा ते धर्मज्ञानवैराग्यैश्वर्येण सम्पन्ना क्रियन्ते । सृष्ट्यर्था प्रवृत्ति परार्था जीवानां कर्माशयानुसारं[287], योग्यतानुसारं"[288] करूणया चतुर्थपुरुषार्थे प्रवृत्त्यर्थमेव[289] च क्रियते । कल्पादौ जीवा: शब्दार्थव्यवहारात् अनभिज्ञा एव विद्यन्ते,तेषु शब्दव्यवहारो योनिजशरीरेण महता गर्भवासादिदु:खप्रबन्धेन पूर्वप्रयुक्तशब्दव्यवहारजनितो न स्मर्यते; परञ्च मानसशरीरयुक्तानां न एतादृशी स्थिति: । सुप्तप्रबुद्धवत् तै: पूर्वकृता: शब्दव्यवहारा: स्मर्यन्ते, यतो हि तत्र अदृष्टवैलक्षण्यं विद्यत इति । तेषां व्यवहारादेव सर्वजीवै: शब्दार्थयो: संकेतो गृह्यत इति[290] । अनेन प्रकारेण परम्परया शब्दार्थयो: संकेतो ग्रहीतुं शक्यत इति विशदं प्रतिपादितम् । **ईश्वरसिद्धि:-** आगमशब्दप्रमाणयोर्मध्ये ईश्वरसत्तायाम् उभयमेव प्रमाणमिति कथ्यते । तत्रानुमानं प्रस्तौति- **"महाभूतचतुष्टयमुपलब्धिमतपूर्वकं कार्यत्वात्, यत्कार्यं तदुपलब्धिपूर्वकं यथा घट:"**[291] अर्थात् अवश्यमेव कार्यं ज्ञानी कर्त्रा उत्पाद्यते । अत: पृथिव्यादयो भूतान्यपि ज्ञानयुक्तकर्तु: रचनेति साधितम् । अन्यच्च सावयवत्वात् सर्वेषां महाभूतानां कार्यत्वं साध्यते यतो हि सावयवयुक्तं तत् सर्वमेव कार्यमिति । अत: एतेषां कार्यत्वमपि

---

[284] *तत्रैव*, पृ.१२७

[285] *तत्रैव*, पृ.१२८-१२९

[286] *तत्रैव*, पृ.१३०

[287] आशयानुरूपैर्धर्मज्ञानवैराग्यैश्वर्यै संजोयति। *न्या.कं.प्र.पा.भा.* पृ.१३०

[288] न हि योग्यतानुरूपेण भृत्यानां फलविशेषप्रद: प्रभुरप्रभुर्भवतिशब्दव्यवहारनिष्पत्ति:। *तत्रैव*, पृ.१३३

[289] *तत्रैव*, पृ.१३२

[290] *न्या.कं.प्र.पा.भा.* पृ.१३४

[291] *तत्रैव*, पृ.१३३

साधितम् इति[292] । अत्र विशदचर्चामाध्यमेन ईश्वरसिद्धिर्विधीयते- **तत्र ईश्वर: प्रेरक: परिचालक:, सहजचैतन्ययुक्तश्च वर्तत इति**[293] । **ईश्वरस्वरूपम्**-एतदनन्तरं 'पराञ्चिखानि' इति श्रुतिमाध्यमेन केनचिद् कथ्यते यत् सृष्टिरचनार्थे जीवेभ्यो भिन्नं कर्तृत्वस्वभावयुक्तं कर्ता अधिष्ठातृरूपे आवश्यकमिति । ईश्वर एक: सर्वज्ञश्च स्वीक्रियते[294] । अनेकसर्वज्ञेश्वरस्वीकरणे एकेनैव ईश्वरेण सृष्टिकार्यं स्यात्;अन्येषां तत्र वैयर्थ्य,वैमत्यं च स्यादिति । रागद्वेषविनिमुक्त: स्मृतिसंस्कारभावमुक्त: रागद्वेषरहित: सर्वज्ञ: ईश्वरत्वेन निरूप्यते । संख्यापरिमाणपृथक्त्वसंयोगविभागज्ञानञ्च एते षड्गुणा एव तत्र ईश्वरे वर्ण्यन्ते इति विद्यन्ते[295] । सर्वदा सर्वविषयप्राप्तत्वात् तत्र स्मृतिसंस्कारश्चापि न वर्तन्ते । ईश्वरो बन्धविच्छेदमुक्तिश्च उभौ पर्यायौ । अत: नित्यत्वमुक्तत्वं तस्य कथनार्थं भाष्यकार: पतञ्जलिमुद्धरति-**"क्लेशकर्मविपाकाशयैरवपरामृष्ट: पुरूषविशेष ईश्वर:" इति**[296] । अनेन ज्ञायते यत् पतञ्जलिमतमपि आचार्येण ईश्वरप्रसङ्गे अङ्गीक्रियते । **कुसुमोद्गमे सृष्टिसंहारप्रक्रिया**-अत्रापि अयमेव प्रश्नोत्थापितं यत् वायु निरूपणानन्तरम् आकाशे निरूपयितव्ये कथं तत्र सृष्टिसंहारनिरूपणमिति उक्त्वा'उत्पत्तिमन्ति; इत्यादि उपर्युक्तश्लोकमाध्यमेन एव तस्योत्तरं दीयते । अत्रापि कथ्यते यत् अस्य नित्यानित्यत् रूपविभागो न सम्यगिति । अस्मत्सदृशानां तत्र ज्ञानकारणत्वे न कर्तृत्वं वक्तुं शक्यते तत्तु कार्यवैचित्र्यस्यापादाकेन ईश्वरेण एव क्रियते । यथा चोक्तं कुसुमोद्गमे **-"अविच्छेदे तद्वचनादाम्नायस्य प्रामाण्यम्" इति नोपपद्यते, शिष्योपाध्यायसंप्रदायाविच्छेदेनैवाम्नाय -स्येश्वरप्रणयनानपेक्षत्वात् द्वितीयामनुपपत्तिमपाकर्तुं कार्यवैचित्र्यस्याधिष्ठातास्मदादिविलक्षणो जगत्कर्ता निरूप्यत् इत्यवसरवानेव सृष्टिसंहारवाद:"**[297] । उत्पत्तिविनाशयो: निरूपणेन उच्यते यत् अनेन अस्य मतस्य निराकरणं कृतं यत्कार्यं तदस्मदादिशक्यज्ञानपूर्वकं वर्तते,परञ्च अङ्कुरादौ एतादृशस्य कारणस्याज्ञानाभावात् हेतो: व्यभिचार: । अस्य विपर्यये अस्मदादिशक्यज्ञानं तस्मिन् न अनुमानवाक्यं प्रददाति तद्यथा-**"विपर्यये कार्यकारणसन्तानोऽयं कदाचिदस्मदाद्यशक्यज्ञानोपादानपूर्वक: कार्यकारणसन्तानवत् आरण्यवह्निसंतानवदिति परिशिष्टं चेश्वरवादे स्वंयमेवापाकरिष्यति"**[298] अर्थात् अस्य निवारणं करिष्यत इति । आत्माणुसंयोगेन यो संहारक्रमे कथ्यते । तत्र आत्मन: अदृष्टपरमाणुभि: सह समवायसम्बन्ध:अत्र निर्दिश्यते[299] । कालगणनायां कन्दल्येवानुस्रियते[300] । **सृष्टि:**-सृष्टिकाले पवनपरमाणुषु यत्संयोगो जायते तस्मिन् आगमप्रमाणमपि दृष्टव्य इति कंदलीभिन्नम् अर्थात् सृष्टिकाले महद्वायो: यदुत्पत्ति: तं पवनपरमाणुसंयोग: आगमप्रमाणाद् ज्ञातव्यमिति प्रतिपादितम्[301] ।

---

292 *तत्रैव*, पृ.१३४

293 *न्या.कं.प्र.पा.भा.* पृ.१३७-१४०

294 *न्या.कं.प्र.पा.भा.* पृ.१४१

295 *न्या.कं.प्र.पा.भा.* पृ.१४२

296 *न्या.कं.प्र.पा.भा.* पृ.१४२

297 *टी.न्या.कं.* पृ.१३३

298 *तत्रैव*, पृ.१३३

299 आत्माणुसंयोगश्च इत्यनेन अदृष्टस्य परमाणुभि: प्राप्तिं दर्शयति। *तत्रैव*, पृ.१३३

300 पञ्चदशनिमेषा काष्ठेति परिमाणा.1 स्वावरुद्धनभोदेशपंचदशेह परिकीर्तिता.1 अक्षिपक्ष्मणो: संयोगनिमित्तं कर्म निमेष.1 विभागार्थं च कर्मोन्मेष.1 *टी.न्या.कं.* पृ.१३४

301 *तत्रैव*, पृ.१३७

अन्यच्च 'वायु:'इति शब्दस्थाने 'पवन' इति शब्दप्रयोगोऽपि अत्रैव विहित: । ३.स्वार्थविहीना ईश्वरेण जीवानां भोगभूतये सृष्टि: क्रियत इति सति तत्र यत् कारुणिकत्वं ततु भक्तिश्रद्धातिशययुक्तमेव वर्तते । एतद् वचनं तु परमार्थतत्कारणस्वभावानुरोधि वर्तते;अन्यथा कारूण्यादेव अपवर्गसंपादनप्रमक्ति: तत्र स्यादिति भिन्न: तर्क[302] ५.अचेतनप्रवर्तकत्वादेव ईश्वरस्य ईश्वरत्वमित्युक्तं सृष्टिप्रकरणकृतकंदलीव्याख्यायाम् । [303] । **ईश्वरसिद्धि:**-'ईश्वरसिद्धौ' व्योम्मिदेवेन आगमप्रमाणमपि दीयते तत्र श्रुति: उद्दिध्रयते । तद्यथा-"द्यावाभूमीं जनयं देव एक"[304]इत्यादिप्रमाणं तत्र सुप्रसिद्धमेव इति तेनोच्यते । कंदल्यां केवलमनुमानप्रमाणमेवदीयत इति । तत्रैव चर्चायां कथ्यते योगिनामपि ज्ञानं तदपि प्रमाणपूर्वकमिति कथयित्वा तत्रानुमानवाक्यं प्रदर्शयति-**"योगिनामपि प्रमाणाभावेनाभ्युपगमादि वदनुमानम्, यो य इन्द्रियवान् सोऽस्मदा - द्यतीन्द्रियसाक्षात्कारविरही इन्द्रियत्वादस्मदादिवदित्यप्य व्यभिचारीति द्रष्टव्यम्"** [305] ईश्वरस्य महाभूतादीनां निर्माणे या नित्येच्छाशक्ति वर्तते । आगममतमनुसृत्य तत्र नित्येच्छाप्रयत्नश्च कथयति यथोक्तम्-**'ईशान: सर्वभूतानाम्' इत्यागमबलेन नित्यज्ञानेच्छयोरपि नित्यप्रयत्नेन तुल्ययोगक्षेम - त्वादपरित्याग इति भाव:"** । [306] इच्छाप्रयत्नयो साहचर्यमात्रेणैव कार्यसम्पन्नत्वात् उभयो: परिहारोऽपि क्रियते । बुद्धीनां नित्यानित्यत्वं तु आश्रयभेदेनैव वर्तते यथा पय:परमाणुषु,तद्वत् ईश्वरादिप्रसङ्गे अपि । अस्मदादिबुद्धौ अनित्यत्वं प्रमाणसिद्धमेव वर्तते । अन्ते कथ्यते यत् जीवानामेव अदृष्टद्वारा परमाणूनाम् अधिष्ठानसंभवात् तत्र सिद्धसाधनसाधनता दोषैः आपद्यते,अतः एतावत्पर्यन्तमेव ईश्वरसिद्धिरिति कथितम् । एतदनन्तरं या चर्चा तत्र कन्दल्या: मतमेवोपस्थाप्यते 'इतिभावः' 'इत्यर्थ:' इत्यादि वाक्यद्वारेति । ईश्वरसिद्धिप्रकरणस्यान्ते कथयति–**"नित्योऽसंसारी भगवानीश्वरः सिद्ध इत्यर्थ:"**[307] । अनेन प्रकारेण ईश्वरस्य जगत्कारणत्वं साध्यत इति सुप्रसिद्धमेवेति तेनोच्यते ।

**न्यायकन्दल्याम् आकाशद्रव्यनिरूपणम्**-कन्दलीकारेण कथ्यते यत् संक्षेपेणैव त्रयाणां लक्षणकरणार्थं 'आकाशकालदिशाम्' इति प्रयोग: । आकाशकालदिशां त्रयाणाम् एकैकत्वाद् अपरजात्यभावो वर्तते । एतेषां त्रयाणां संज्ञा पारिभाषिकीति उच्यते । **पारिभाषिकी संज्ञा-** निमित्तविशेषमनपेक्ष्य यया संज्ञया व्यक्तिविशेषो बोध्यते सा पारिभाषिकी संज्ञेति कथ्यते यथा देवदत्तादयः[308] । **नैमितिकी संज्ञा–** नैमितिकी संज्ञा निमित्तविशेषमुपादाय कथ्यते[309]।**आकाश-गुणाः**–आकाशगुणत्वेन शब्दसंख्यापरिमाण पृथक्त्वसंयोगविभागाश्च कथ्यन्ते[310] । **आकाशसिद्धि:**–आकाशस्य प्रामाण्यत्वे आक्षेपा: समाधानानि च कंदलीकारेण समुत्थाप्यन्ते । आकाशे प्रत्यक्षमेव प्रमाणमिति केनचिद् स्वीक्रियत इति । तेषां मते पक्षिणा

---

302 *तत्रैव*, पृ.१४०

303 *तत्रैव*, पृ,१४०

304 *टी.न्या.कं.* पृ.१४१

305 *तत्रैव*, पृ.१४५

306 *टी.न्या.कं.* पृ.१४८

307 *टी,न्या.कं.* पृ.१५२

308 *न्या.कं.प्र.पा.भा.* पृ.१४३

309 यस्या: पुन निर्मित्तमुपादाय सङ्केतः सा नैमित्तिकीति विवेकः। *तत्रैव*, पृ.१४३

310 *न्या.कं,प्र.पा.भा.* पृ.१४३

-मुडड्यनक्रियया एव आकाशो ज्ञायते,एतद् मतं न सिद्धान्तिना मन्यते। रूपरहितस्य द्रव्यस्य न प्रत्यक्ष:। तत्र या अधिकरणताप्रतीति:,सा आकाशे वर्तमानस्य प्रकाशपुञ्जस्य अधिकरणतया जायते। अतः परिशेषानुमाद् आकाशसिद्धिरुच्यते[311]। **आकाशस्य गुणत्वम्**-एतदनन्तरं शब्दस्य आकाशे गुणत्वं साध्यते। शब्दो न पृथिव्यादीनां गुण:। यथा पटरूपं तन्तुरूपाश्रयीभूतत्वेन साध्यते तद्वत् शब्दो स्वसमवायिकारणस्य आश्रयीभूतत्वेन द्रव्यगतशब्देन नारभ्यते यतो हि आश्रयस्योत्पत्यनन्तरं न तस्योत्पत्तिरित्यङ्गीक्रियते। बाह्येन्द्रियरूपेण एकेनैवेन्द्रियेण गृहीतत्वाद् तस्य शब्दस्य विशेषगुणत्वं वर्तत[312]इति। शब्दो विशेषगुणो यतो हि शब्द: *परापरजातियुक्त:*,एकेन्द्रिय -ग्राह्यत्वयुक्त:,अयावद्द्रव्यभावियुक्तश्च वर्तते[313]। एतदनन्तरम् आकाशे गुणत्वस्य सिद्धि: क्रियते। अतः अधिष्ठानदेशेभ्यो विषयानुग्रहणार्थं निर्गतानि इन्द्रियाणि स्वविषयं गृह्णति यथा च लिखति-**"अस्ति च तदुपलब्धि:,सैव तस्य द्रव्यान्तरगुणत्वं साधयति, यस्मिन्नन्तरालव्यापिनि शब्दस्य श्रोत्रप्रत्यासन्नस्य ग्रहणं स्यात्**[314]। **शब्दस्य आकाशगुणत्वसिद्धि:**-आत्माप्रभृतिनित्यद्रव्येषु न शब्दस्य स्थितिरित्यस्मिन् विषये आगम्यमानानाम् आक्षेपादीनां विषये चर्चा तत्र क्रियते। शब्दो न आत्मगुणो यतो हि बाह्येन्द्रियग्राह्य:[315]। शब्दलिङ्गाविशेषात्' इत्यनेन आकाशे एकत्वसिद्धि:,उच्चमन्दादि रूपं यद्भेदमुक्तं शब्दे,तत्रोच्यते यत् शब्दो गुणत्वरूपेण आकाशस्य लक्षणं वर्तते न तु मन्दतरारिभेदेन। अतः मन्दत्वादिभेदेन शब्दस्य अनेकत्वं न आकाशस्य ज्ञापकम् इति[316]। **आकाशे शब्दान्तरगुणचर्चा**–आकाशे अनेकत्वसाधने प्रमाणाभावात् तस्य सर्वसिद्धमेकत्वम्। एकत्वात् एकपृथक्त्वम्। पृथक्त्वप्रतीतिः प्रतियोगिज्ञानाधीना कथ्यते। एतद्रहितपुरुषे प्रतियोगिज्ञानं विनैव स्यात् इति प्रतिपाद्यते। गुणविनिवेशानुसारं आकाशेऽपि परिमाणस्य[317],संयोगस्य, विभागस्य[318]च गुणानां सिद्धिर्विधीयते। **श्रोत्रेन्द्रियम्**-सुखदु:खानां प्रापकं प्राणिनां धर्माधर्मयोर्माध्यमेनैव श्रोत्रेन्द्रियं वर्तते। श्रोत्रस्यापि शब्दप्रत्यक्षे कारणत्वात् शब्दयुक्तत्वं कथ्यते। यथा च लिखति कंदलीकार:–**"यस्य बाह्यैकैकान्द्रियग्राह्यविशेषगुणग्राहकं यदिन्द्रियं तत्तद्गुणकं यथा रूपग्राहकं चक्षुरूपाधिकरणम्।** "[319] प्राणीनां धर्माधर्माभ्यां कर्णशष्कुल्यवच्छिन्ने आकाश एव इन्द्रियत्वं वर्तते। बधिराणामपि शब्दप्रत्यक्षत्वशंकायां'तस्य च' इति शब्देन समाधानं ददाति तद्यथा–**"तस्याकाशस्य नित्यत्वेऽप्युप -निबन्धकयोधर्म्माधर्मयो:सहकारिभूतयोर्वैकल्याद् बाधिर्य्यम्।** "[320]एवं प्रकारेण आकाशस्य तथा च तद्गुणसिद्धि विहिता। कर्णविवरसंज्ञकं श्रोत्रेन्द्रियत्वं कथितम्। तत्र स्पष्टीकरणं प्रस्तूयते, अन्यदपि लक्षणं प्राणिनां धर्माधर्माभ्यामवच्छिन्नत्वात् इन्द्रियत्वं श्रोत्रमिति कथ्यते।

---

311 *तत्रैव*, पृ.१४४-१४५

312 विशेषगुणत्वप्रतिषेधे सामान्यगुणत्वं भविष्यतीति नाशङ्कनीयम्, सामान्यविशेषवततस्य बाह्यैन्द्रियग्राह्यत्वेन रूपादिवद्विशेषगुणत्वसिद्धे:। *तत्रैव*, पृ.१४५

313 *तत्रैव*, पृ.१४५-१४७

314 *न्या.कं.प्र.पा.भा*, पृ १४७

315 यस्तु बाह्येन्द्रियाग्राह्यो नासावात्मगुणो यथा रूपादि:, तस्मादयमपि न तद्गुण इत्यर्थ:। *तत्रैव*. पृ.१४७

316 *तत्रैव*, पृ.१५१

317 विभववान् महानाकाशः। *न्या.क.प्र.पा.भा.* पृ.१५३

318 संयोगाद् विभागात् शब्दाच्च। *न्या.क.प्र.पा.भा.* पृ.१५३

319 *तत्रैव*, पृ.१५४

320 *तत्रैव*. पृ.१५५

**कुसुमोद्गम-टीकायाम् आकाशद्रव्यनिरूपणम्–** कुसुमोदगमकारेणापि संक्षिप्तरूपेण सर्वप्रथमं निर्दिष्टं यत् 'आकाशकालदिशमिति' इति ग्रहणं त्रयाणां समस्य निरूपणार्थं क्रियत इति[321]। **आकाशस्य गुणाः–** गुणेषु संख्यादयः पूर्वोक्ता गुणा निर्दिश्यन्ते। तत्र शब्दविषये कथितं यत् शब्दवद् संख्यादीनामपि तत्साहचर्येण वैधर्म्यं स्यादिति निर्दिश्यते[322]अर्थात् संख्यादयो गुणाः शब्दवत् वर्तन्ते। **आकाशलक्षणे प्रमाणम्–** कंदलीकारेण प्रस्तुतं यत् आकाशस्य सद्भावे किं प्रमाणम्,तत्र वोम्मिदेवेन कथ्यते यत् अनुपलब्धेषु निर्णीतेषु च अर्थेषु न न्यायः प्रवर्ततें[323] अर्थात् आकाश इति धर्मि उपलभ्यते,अतो हेतो लक्षणं दातव्यम्। २.आकाशस्य यत्र अचाक्षुषत्वं कथने'अरूपमिति' प्रोक्तेन शब्देन कथ्यते यत् 'अरूपद्रव्ये' इति शब्दग्रहणं गुणकर्मसामान्य –व्यावृत्यर्थं विहितमिति। 'प्रत्यक्षत्वे सतीति' प्रयोगेन पिठरपाकः निराक्रियते अन्यथा तद्रूपादौ व्यभिचारः तत्र स्यादिति[324]। शब्दस्य यदि वायुगुणत्वं स्वीक्रियते तर्हि श्रोत्रे वायुत्वप्रसक्तिः स्यात् तथा च स्पर्शग्राहकत्वमपि तत्र प्रसज्येत,अतो न वायवीयं श्रोत्रम् इति प्रतिपादितम्। अन्यदपि लिखति– **"ततश्च शब्दोऽपि गुणावान्तरजात्याग्राहकेन्द्रियवर्त्तिगुणजातीयगुणो भवन्त वायुगुण इति चान्तरालव्यापिनीद्वितेन सूचितमिति।** "[325] शंकेयं कंदलीकारतः भिन्ना उपस्थापितेति। अन्यच्च श्रोत्रस्य वायवीयत्वं खण्ड्यते। **शब्दस्य आत्मगुणत्वखण्डनम्–**वीचीतरङ्गादीनां माध्येमन प्रतिपतृभिः शब्दाः गृह्यन्ते,परश्च (धाराक्रमद्वारा)सुखादीनां ग्रहणे अनेकप्रतिपत्तृत्वं न साधयितुं शक्यते अतो न शब्द आत्मगुणः। कुसुमोद्गमकारेण प्रतिपाद्यते यत् श्रोत्रेन्द्रियग्राह्यत्वात् अत्र एकजातीयग्राह्यत्वमुपस्थाप्यते। अनेनैव साध्यते यत् कालदिङ्मनसां न शब्दे गुणत्वम् इति। अत्रानुमानप्रयोगमपि उपस्थापयति तद्यथा– **"अयमभिसन्धिः श्रोत्रग्राह्यत्वादित्यकेन्द्रियजातीयमुपलक्षयति तस्मादेवप्रयोगः शब्दो दिक्कालमनोगुणो न भवति एकेन्द्रियग्राह्यजातीयत्वाद् गन्धादिवदिति"**[326]। एतदनन्तरं अष्टद्रव्यरहितशब्दविषये आकाशसम - वायत्वं प्रतिपाद्यते। तत्र कन्दल्यां परिशेषानुमानं निर्दिश्यते। अस्मिन्नपि न विशेषा चर्चा उपलभ्यते। ततश्चाग्रे शब्दमाध्यमेन आकाशे अपि अनेकत्वं कथ्यते पूर्वपक्षिभि[327]तस्य समाधाने कथ्यते यत् तारतम्ययुक्तशब्दैर्न आश्रयो भिद्यते। यथा च लिखति-**"तीव्रमन्दाद्यभिघातनिमित्तत्वात्कारणतारतम्यान्वयव्यतिरेकानु विधायितया तारतम्यवन्तोऽपि शब्दा नाश्रयभेदः प्रसाधयितुमीशत इति भावः।** [328]अन्यच्च प्रतीतिभेदादपि एकत्वम् एकपृथक्त्वं च भिद्यते। **आकाशस्य परिमाणम्–**अत्र'विभववान् महानाकाशः'इत्यनेन आकाशस्य विभुत्वं निर्दिष्टम्। शब्दप्रकरणेऽस्मिन् वोम्मिदेवेनोक्तं यत् श्रूयमाणशब्दवत्

---

321 समस्यनिरूपणे कारणमाह। *टी.न्या.कं.* पृ.१५३

322 *तत्रैव*, पृ.१५३

323 नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते इति धर्मिण्युपलब्धे लक्षणं वक्तव्यम्। *तत्रैव*, पृ.१५४

324 *टी.न्या.कं.* पृ.१५४

325 *तत्रैव*, पृ. २५६

326 *तत्रैव*, पृ.१५८

327 तदेतमयुतं यद्याकाशं प्रतिशब्दसंतानं भिन्ननविभु च स्या तदा/ऽऽका/शापरिमाणं भवेन्मध्यमपरिमाणं वा,' आद्ये शब्दस्याप्रत्ययत्वप्रसङ्गः;द्वितीये च शब्दस्याप्रत्ययत्वप्रसङ्गः;द्वितीये च मध्यमपरिमाणद्रव्यस्य नियमेन कार्यत्वादस्पर्शद्रव्यस्य अन्यथा समवायेन व्यभिचारः स्यात्। *टी.न्या.कं.* पृ.१६०

328 *तत्रैव*, पृ.१६०

शब्दस्यासमवायिकारणमपि तदवदेवानुसंध्येयम् इति नूतना कल्पना । अत्र कन्दल्यां कथयति– **"दिविमुव्यन्तरिक्षे चोपजाताः शब्दाः एकार्थसमवेताः शब्दत्वात्, श्रूयमाणद्यशब्दवत्, श्रूयमाणाद्यशब्दयोश्चैकार्थसमवायः कार्यकारणभावेन प्रत्येतव्यः"**[329] । नभसो भेदे प्रमाणाभावो विद्यते । अतः तत्र अनुपाधित्वम्, इतरेतराश्रया -नुपत्तिकारणादिति । पुनः स्वयमेव प्रश्नोत्थाप्यते यत् किं एकत्वे प्रमाणम्-१.अनुपाधित्वं वा,२.अनुपाधित्वे एकत्वमिति । १.प्रथमे यदि आकाशं प्रति संतानवैभिन्नयं तर्हि आकाशस्य परिमाणं मध्यमपरिमाणं स्यात् । २.द्वितीयस्वीकारे मध्यम-परिमाणद्वारा कार्यत्वं सिद्धम्,अतः अस्पर्शद्रव्ये व्यभिचारः स्याद् यथा च उक्तम्-**"तदेतमयुतं यद्याकाशं प्रतिशब्दसंतानं भिन्नविभु च स्यातदा[ऽऽका]शापरिमाणं भवेन्मध्यमपरिमाणं वा;आद्ये शब्दस्याप्रत्ययत्वप्रसङ्गः,द्वितीये च शब्दस्याप्रत्ययत्वप्रसङ्गः, द्वितीये च मध्यमपरिमाणद्रव्यस्य नियमेन कार्यत्वादस्पर्शद्रव्यस्य अन्यथा समवायेन व्यभिचारः स्यात्"** । [330]अतः समानासमानजातीया- कारणाभावात् तस्य आकाशस्य नित्यत्वं कथितमिति प्रतिपादितम् । अस्य समाधाने कंदल्येवानु स्त्रियते ३.श्रोत्रे विकारादिपु प्रमातुः अदृष्टत्वादिकमेव दोषो दृश्यते तस्य निवारणं चिकित्सापद्धत्या क्रियन इति विषये कथयति वोम्मिदेवः–"उपलक्षणं चैतत् वातादिना कर्णशष्कुल्युपधानेऽपि चिकित्सानिवर्त्यबाधिर्यदर्शनात्"[331]द्वयं कुसुमोद्गमकारस्य नूतनोद्भावना वर्तत इति । अनेन प्रकारेण तस्य नित्यत्वं,स्वतन्त्रत्वं तथा च गुणायुक्तत्वं साध्यते वोम्मिदेवेन इति । एतदग्रे कंदलीप्रोक्तमुख्य-मुख्यबिन्दूनामुपरि चर्चा विहिता वर्तते ।

**न्यायकन्दल्यां कालद्रव्यनिरूपणम्-**भाष्यकृत-कालवर्णने कन्दलीकारेण स्वव्याख्या प्रस्तूयते । सर्वप्रथमं कालस्य लक्षणरूपेण वर्तमाना पक्तिः निर्दिश्यते । कालस्य स्थितिः दिक्कालयोः उभयोः सापेक्षा निरूप्यते । [332]यथा एकं स्थानं दिग्विशेषस्यापेक्षया सन्निकृष्टम्,अन्यदिशा तदेव स्थानं विप्रकृष्टमपि विद्यते । इदमेव कालस्यापेक्षया परत्वापरत्वयोर्मध्ये व्यतिकरो भेदो वा [333] । एतदनन्तरं कालज्ञापकत्वेन युगपदप्रत्ययोऽयुगपत्प्रत्ययाश्च कथ्यन्ते । एवमेव चिरक्षिप्रप्रत्ययाश्च क्रियन्त इति निरूपितम् । एतासां पूर्वापरादीनां विलक्षणप्रतीतिनां कारणत्वेन कालः कथ्यते । अन्यस्य मतम्- कालदृशा परापरप्रतीतयः सूर्यपरिवर्तनजनितसंयोगानाम् भूयस्त्वाल्पीयस्त्वेन यथाक्रमं वृद्धयुवकयोः व्यवहारः परत्वापरत्वकालरूपेण विधीयते । तत्र प्रतिविधीयते यत् असम्बद्धकारणेन सम्बद्धता स्वीकारणेऽतिप्रसङ्गो भवेदिति[334] । कालस्य व्यवहारः एककालिकत्वविभिन्नकालिकत्वाभ्यामपि विलक्षणरूपेण जायत इति आलोडनविलोडनपूर्वकं प्रति पाद्यते[335] । यद्यपि एकः कालः परञ्च कारणवैभिन्न्यकारणाद् प्रतीतिषु वैभिन्न्यं वर्तते । अनेनैव युगपत्प्रत्ययः चिरक्षिप्रप्रतीतिः कार्यते । कालः एतासु सर्वासु प्रतीतिषु सहकारिकारण -

---

329 *तत्रैव*, पृ.१६०

330 *टी.न्या.कं.* पृ.१६०

331 *तत्रैव*, पृ.१६२

332 *न्या.क.प्र.पा.भा.* पृ.१५५

333 *तत्रैव*, पृ.१५५

334 *तत्रैव*, पृ.१५६

335 *न्या.कं.प्र.पा.भा.* पृ.१५७

रूपेण वर्तते[336] । **काले गुणाः**–सर्वकार्याणाम् उत्पत्तिस्थितिविनाशेषु च कालस्य कारणत्वं साध्यते । 'अयमुत्पत्तिकाल:"अयं विनाशकाल:'इत्यादिषु प्रतीतिषु कालमाध्यमेनैव व्यवहार: । क्षणलवादीनां माध्यमनापि कालस्य कार्याणि कथ्यन्ते यथा-**"निमेषस्य चतुर्थो भागः क्षणः क्षणद्धयेन लवः,अक्षिपक्ष्मकमोपलाक्षितकालो निमेष इत्यादि गणितशास्त्रानुसारेण प्रत्येतव्यम्"**[337]अर्थात् वर्षमासादीनां यो व्यवहार: स: कालत्वेन एव वर्तते । अन्यच्च कालस्यानेकत्वज्ञापने कुत्रचिद् प्रमाणमपि न परिलक्ष्यते[338] । एकस्मिन् स्थाने वर्तमानेन विभागेन व्यधिकरणे वर्तमानसंयोगो न नाश्यते,अतः काले विभागगुणस्थितिः अवश्यमेव स्वीकर्त्तव्येति निर्दिश्यते । आकाशवदत्रापि नित्यत्वं द्रव्यत्वं च निर्दिश्यते । अनाश्रितत्वात्, गुणवत्वात्,समानासमानजातीयकारणयोरभावात् च आकाशे सिद्धस्य द्रव्यत्ववत् कालद्रव्यत्वमपि साध्यत इति । यथा आकाशस्य नित्यत्वं तदवत्रापि काल इति । **कालस्य एकत्वसिद्धिः-** यथा एका एव मणि:स्फाटिकादिनीलाद्युपाधिभेदान्नील इति,'पीत' इति रूपेण कथ्यते तद्वदत्रापि कालोऽप्येकः उपाधिभेदाद्'अयं क्रियाभिव्यक्तिकाल:"निरोध काल:'इत्यादिभि: पृथग्व्यवहारै भिद्यते[339] । काले क्रियायां सम्बन्धो वास्तविको वर्तते । [340] । अन्ते उक्तं यत् प्रारम्भादिक्रियाप्रतीतय: न कालप्रतीतय:,अपितु एतेभ्यो विलक्षणरूपेण जायन्ते"[341] । अनेन प्रकारेण कथयितुं शक्यते यत् कंदलीकारेण भाष्यकारप्रतिपादितविषयाणां मुख्य-मुख्यहेतुनां च वर्णनं विशदम् ऊहापोहरूपेण कृतम् ।

**३.कुसुमोद्गमे कालद्रव्यनिरूपणम्–कालनिरूपणप्रयोजनम्-** १.वोम्मिदेवेन सर्वप्रथमं द्रव्याणां क्रमविषये स्पष्टीकरणं दीयते यत् अप्रत्यक्षद्रव्येषु अणुकार्यभावेन प्रत्यक्षद्रव्यस्य साधर्म्यत्वात् उपभोग्यद्रव्यद्वयो: प्राथम्यमुच्यते,एतदनन्तरं कालस्य उपभोग्यगुणानाम् आश्रयरूपेण नभसः आनन्तर्यं विद्यते । अन्यच्च दिक्कालयो: निरूपणम् उपभोग्यगुणनिमित्ततया विधीयत इति प्रतिपादितम् । तत्रापि तपनधर्मस्य उपनादकतया दिक्पदार्थस्य उत्कर्षत्वं वर्तत इति अभिप्रायवानेन कालनिरूपणस्य निर्देश: क्रियत इति[342] । २.'दिग्विशेषात्' इत्यनेन कंदल्यां निर्दिष्टं यत् दिग्विशेषापेक्षया यद् विप्रकृष्टं तस्मिन् अपर इति व्यवहारः । दिग्विशेषेति अनियममभिप्रेत्यैतदुक्तं अन्यथा कदाचिद् दिगपेक्षया कालस्य अपि परप्रत्ययो संभवेत इति निराकरणायेति[343] । एतत कथनं नियमे दोषो न स्यादिति कृत्वा लिखितम् । तपनं परिस्पन्दनं च आकाशात्मनोः माध्यमेनापि नोपनेयो वर्तते,तथा च उभयोः मिलित्वापि स्वसंयुक्तद्रव्यान्तर्गतधर्ममुपनेतुं न शक्यत इति निरूपितम् । आत्मनः स्वसंयुक्ततया कथिते सति स्फाटिका -

---

336 *तत्रैव*, पृ.१५७

337 *न्या.क.प्र.पा.भा.* पृ.१५९

338 *तत्रैव*, पृ.१५९-१६०

339 *टी.न्या.कं.* पृ.१६१

340 मणेरुपाधिसम्बन्धो नवास्तव:,कालस्य तु क्रियासम्बन्धो वास्तव इति प्रतिपादयितौं दृष्टान्तरमाह-याचकेति। *तत्रैव*, पृ.१६२

341 न तु प्रारम्भादिकियैवकाल:,विलक्षणबुद्धिवैद्यत्वादिति। *तत्रैव*, पृ.१६२

342 *टी.न्या.कं.* पृ.१६४

343 *तत्रैव*, पृ.१६५

दीनां मणिनाम् अनुरञ्जनं संयोगोपनायकतया कल्पनीयं वर्तते[344]। अनेन दिशा नोपानीयत इति प्रतिपादितम्। अतः एतेभ्यो भिन्नं विभुद्रव्यं कल्पनीयमिति। तदेव द्रव्यं महर्षिभिः कालद्रव्यत्वेन कथ्यत इति। यथोक्तं **"स काल महर्षिभिः परिभाषितः"**। [345]३.'सहभावो यौगपद्यमिति' इत्यत्र उभयोः शब्दयोः अर्थाः निर्दिश्यन्ते-१..'युगपद् भवन्ति,' 'युगपदवतिष्ठन्ते' इत्यादयः प्रतीतयोः न कालेन विना संभाव्यते। २.'सह' शब्दस्यार्थं प्रतिपादयन् कथयति–**"एक क्रियावच्छेदको ह्यनेकेषां सहार्थः न चैककालसम्बन्ध इति भावः"**[346]अर्थात् अनेकेषां सहभवनमित्यस्य अर्थः एकक्रियावच्छेदेकत्वं न त्वेककालसम्बन्ध इति। ३.कालस्य कथं विशिष्टबुद्धिरिति विषये कथ्यते यत् विशेषणज्ञानान्तरं विशिष्टप्रत्ययो जायते तेनैव इतरेतराश्रयद्वारा विशेषणमनुमीयत इति निरूप्यते। लौकिकानां तपनपरिस्पन्दनभेदानां विशिष्टतयैव परीक्षकैः कालः अनुमानपुरःसरमेव विवेच्यते[347]। कालस्य गणनायां कंदलीकारेण निमेषस्य चतुर्थभागरूपे क्षणः कथ्यते,परञ्च वोम्मिदेवः तम् अन्यत् परिभाषयति तद्यथा- "उत्पन्ने कर्मणि यावन्न विभागस्तावान् कालः क्षणः इत्यर्थः" [348]अर्थात् उत्पन्नकार्यस्य त्रिभागक्षणं प्रति एव विभागः कथ्यते। अन्यच्च उत्पत्तिशीलानां निमित्तकारणत्वम् अत्र स्पष्टतया सूचितम्। **काले गुणाः**–कालस्य गुणसिद्धौ अपि पञ्चगुणाः तेनापि स्वीक्रियन्ते। तत्रोक्तं यत् संख्यादीनां पञ्चानां साधारणगुणानां सिद्ध्यनन्तरं पुनः तत्कथनं विशेषगुणस्य राहित्यं प्रदर्शनार्थमेव कृतमिति सूच्यते। तत्रैव एका विधिः कथयति तद्यथा- **"संयुक्तसंयोगोपनायकतया संयोगाधारत्वेन द्रव्यत्वे सिद्धे तत एव संख्यादिपञ्चयोगसिद्धे पुनस्तत्कथनं विशेषराहित्यप्रतिपादनायेति मन्तव्यः, विशेष विधिः शेषनिषेधपर इति न्यायात्** "[349]अर्थात् विशेषः शेषनिषेधपरकं भवतीति प्रतिपाद्यते। तस्य व्यापकत्वं तु परममहत्त्वं विना न संभवतीति प्रतिपादितम्[350]। सर्वेषां कार्याणामिति शब्दनिर्देशेन कंदल्यां कालस्य जगत्प्रतिनिमितकारणत्वमुक्तम्। तत्र वोम्मिदेवेन कथ्यते यत् धर्मधर्मिणोर्मध्ये कारणत्वमिति व्याख्येयम्। एतदनन्तरं धर्मापेक्षया धर्मिणामेकरूपत्वेऽपि त्रैकाल्यं तत्र प्रदर्श्यते यथा दृष्टान्तं प्रस्तौति तत्र क्रियाभेदाद् कालवैभिन्न्यं बोध्यते। तद्यथा लिखितवान् कुसुमोद्गमकारः–**"तत्र ह्येकरूपोऽपि कुविन्दः पटोत्पादनव्यापारासन् प्रागभावापेक्षया भावयिष्यतीति तदुपलक्षितः। कालोऽपि तथा(यथा) व्यापारोपरमापेक्षया तदुपलक्षितः।** "[351]अनेन प्रकारेण प्रध्वंसविषयेऽपि एतावदेव काला उपलक्ष्यन्ते। यथा चोक्तं –**"अत्र हि प्रध्वंसस्य धर्मस्य वर्तमानत्वेऽपि तत्प्रतियोगिनी नी (न्यती) तत्वे प्रध्वंस्त इति भूतप्रत्ययः अत्रापि तदुपलक्षितः कालोऽपि यथा (तथा)**

---

[344] आत्मा व स्वसंयुतया यत्र क्वचिद्वर्तमानतया जपदा सर्वानेव स्फटिकमणिननुरञ्जयेत्। न च दिशोपनीयते तस्याः केवलं संयोगोपनायकतया कल्पितत्वम्। तस्मात्तदतिरिक्तं किञ्चिद्विभुद्रव्यं कल्पनीयम्। *तत्रैव*, पृ.१६६

[345] *तत्रैव*, पृ. १६६

[346] *तत्रैव*, पृ. १६६

[347] तपनपरिस्पन्दप्रकर्षनिकर्षाभ्यामवस्थाभेदानुमानाभ्यां विशिष्टप्रत्ययः प्रत्ययः प्रथमसमेव लौकिकानां परीक्षयाऽस्तु व्यधिकरणाना[.] परिस्पन्दाना[.][म/]नवच्छे(ना)कतदा तदुपनायकमनुपा(*मा*)य परादिप्रत्ययाः कालविशिष्टप्रत्यया इति व्यवहरन्ति। *टी.न्या.कं.* पृ.१६८

[348] *तत्रैव*, पृ.१६९

[349] *तत्रैव*, पृ.१६९

[350] *तत्रैव*, पृ.१७०

[351] *तत्रैव*, पृ.१७१

**व्यपदिश्यत इति त्रिष्वतुरंजनीयम्** [352]। अत्र सिद्धपुरुषस्य धर्मोत्पादने सामर्थ्यं परिलक्ष्यत इति भावः। अन्ते वोम्मिदेवेन प्रतिपादितं यत् 'परत्वोत्पत्ति' वर्तमाने घटे धर्मातीतरूपेण भूतप्रत्ययो निर्दिश्यते इत्यपि स्वयमेव ऊहा करणीयेति। भावोऽयं स्वीकृत्य एव कुसुमोद्गमकारः कथयते[353]। अनेन प्रकारेण कालविवरणं वोम्मिदेवेन विशदतया प्रतिपादितम्। वोम्मिदेवेन तपनपरिस्पन्दयोः माध्यमेन परत्वापरत्वप्रतीतिः पृथकतया वर्ण्यते। अन्यच्च जगतः निमित्तकारणत्वरूपेण कालस्य स्पष्टतया निर्देशः तत्र प्राप्यते। **न्यायकंदल्यां दिग्द्रव्यनिरूपणम्** – दिङ्निरूपणे कंदलीकारेण कथितं यत् यौगपद्यप्रतीतौ कालस्य यथा असाधारणधर्मत्वं तथैव पूर्वापरप्रतीतौ दिशः अपि असाधारणधर्मत्वं विद्यते। एतदनन्तरं 'पूर्वपरादि-लिङ्गा दिक्' इत्यस्य व्युत्पतिं. प्रदर्शयति-**"पूर्वमपरमित्याप्रत्ययो लिङ्गं यस्या सा पूर्वापरालिङ्गा"**[354]मूर्तद्रव्यमवधिं कृत्वा एताः प्रतीतय जायन्ते न तु अमूर्ते। अमूर्तद्रव्याणि आकाशादयो न अवधिभूताः क्रियन्ते,यतो हि तत्र परममहत्परिमाणत्वं वर्तते। पूर्वपरादिप्रतीतिनां कार्यत्वं तु सिद्धमेव तेषां कारणत्वमन्वेषणे दिगेव तत्र कार्यत्वरूपेण अन्वयीक्रियते; यतो हि अन्यनिमितस्य तत्र अभावो वर्तते[355]। विरुद्धदिशोर्मध्ये वर्तमानद्रव्यद्वयस्य परस्परापेक्षया पूर्वपरादिप्रतीतयो न जायन्ते,यतो हि एतादृशी प्रतीतिस्वीकरणे उभयाभावप्रसङ्गरूपदोषः स्यात्। अन्यच्च अवधिभूतद्रव्ये पञ्चमी-विभक्तेः प्रयोगोऽपि व्यर्थः स्यात्। यदि द्रव्ये वर्तमानानां गुणकर्मादीनामाधारेण पूर्वादिप्रत्ययाः स्वीक्रियन्ते चेत् पूर्वदिशि अपि पश्चिमदिशः प्रतीतिः स्यात्। एतस्मादिदमिति प्रतीतिस्तु पञ्चम्याम् अवधिभूतार्थे न संभवति इति प्रतिपादितम्। कालवद् दिक् अपि विशिष्टबुद्धेः कारणं वर्तते,[356]यतो हि इयं प्रतीति अप्रत्यक्षा वर्तते। **दिशो गुणाः**-कालवदत्रापि गुणत्वकारणात् यौगपद्यादिप्रतीतित्वात् कालस्यैकत्ववत् दिङ्गजनितपूर्वपरादिप्रतीतिषु अपि एकत्वसंख्या ज्ञेयेति१.एकत्वकारणादत्रापि कालवद् एकपृथकत्वं साध्यते। एवं प्रकारेण संयोगविभागपरिमाणपरत्वापरत्वादयोऽपि साध्यन्ते। एतत् सर्वं 'कालवदेतेसिद्धा' इति अतिदेशवाक्येन प्रतिपादितम्[357]। एकस्मिन् समये एकस्मिन् वस्तुनि अवधिभूतवस्तुवैभिन्न्यात् पूर्वपरादिप्रतीतौ न वर्तते दोषः। यदि वास्तविकरूपेणैव भेदः तर्हि पूर्वप्रत्ययस्य न पश्चिमप्रत्ययः कदापि भवितुमर्हतीति प्रतिपादितं कंदलीकारेण[358]। उपाधिभेदाद् तत्र नानात्वमुपलक्ष्यत इति[359]। **दिग्भेदनिरूपणम्**– आदित्यस्य प्रथमसंयोगाधिकरणस्य तथा च तत्सम्मुखद्रव्ययोर्मध्ये पूर्वं दिक्,एवमेव अस्तकालिकतद्देशसंयोगेन तत्सम्मुखद्रव्यस्यापेक्ष या'पश्चिम' दिक् प्रतीति क्रियते। अन्यच्च मध्याह्नकालस्य सूर्यसंयोगेन एकतः उत्तरदिक् तथा च अपरतः दक्षिणदिक् प्रतीयते। दिशः स्वीकृतिं विना समासाधितं यत्

---

352 *तत्रैव*, पृ.१७१

353 अत्र हि वर्तमान एव पटे परत्वोत्पत्तिरूपधर्मातीतत्वेन भूतप्रत्ययो निर्दिश्यते इत्यादि स्वयमूहनीयम्। यथाश्रुतभाष्यानुरोधे त्वतिरोहितार्थैव कन्दलीति। *तत्रैव*, पृ.१७१

354 *न्या.कं.,प्र.पा.भा.* पृ.१६२

355 *तत्रैव*, पृ.१६३

356 तस्या अप्रत्यक्षत्वेऽपि कालवद् विशिष्टप्रत्ययहेतुत्वं वाच्यम्। *तत्रैव*, पृ.१६४

357 *तत्रैव*. पृ.१६४

358 *तत्रैव*, पृ.१६५

359 *तत्रैव*, पृ.१६५

मूर्तद्रव्याणां संयोगः सूर्येण सह न भवितुं शक्यते । अतः असम्बद्धवस्तुनि ज्ञानकारणाभावात् केवलम् आदित्यसंयोगात् न दिक् व्यवहारःप्रवर्तते । अतो 'दिङ्गलिङ्गाविशेषात्'इति हेतुमाध्यमेन प्रदर्शितं यत् दिक् एका वर्तत इति । तस्यैकत्वसिद्धयनन्तरमेव महर्षिभिः प्राचीप्रतीचीप्रभृतयो दिक् व्यवहारः प्रोक्तः । अनेन यौगिकार्थे अन्वर्थसंज्ञायुक्ता दिशःतत्र स्वीक्रियन्त इति निर्दिश्यते । इन्द्रादिलोकपालैः परिगृही - तदेशादीनां सूर्यस्य संयोगविशेषात् दिक्प्रभृतिव्यवहारो जायते । अनेनैवाधारेण दिशो नामानि दीयन्त इति प्रतिपादितम् । एतदनन्तरं दिशावाचकशब्दानां व्युत्पत्तिः प्रदर्शिता वर्तते । अन्यच्च सूर्यस्य संयोगविभागानामाधारेणापि अत्र दिशाम् अभिधानानि सन्ति । सम्पूर्णसंज्ञाव्यवहार्थे उच्यते यत् सकलव्यवहारः श्रुतिस्मृतिलोकार्थ एव प्रवर्तत इति निरूप्यते[360] । एतदनन्तरं प्राच्यवाच्युदीचि - प्रतीचीतिदिशा व्युत्पतिं प्रदर्शयति तद्यथा-**"प्रथमस्याश्चति सवितेति प्राची अवागश्चतीति अवाची प्रत्यगश्चतीति प्रतीची । उदकश्चतीति उदीची"**[361] । एतानि अभिधानानि सूर्यपरिक्रमणमाधारीकृत्य प्रदतानि सन्ति इति प्रतिपाद्यते । दिक्षु दशत्वव्यवहारः लक्षणावृत्या मन्यते । अन्यच्च माहेन्द्रिप्रभृतयः संज्ञाः अन्यनिमितेन दिक्प्रत्ययनमेव कुर्वन्ति इति निरूपितम् । एतासामपि व्युत्पत्तिं प्रदर्शयति तद्यथा **"महेन्द्रस्येयमिति माहेन्द्री । वैश्वानरस्येयं वैश्वानरीत्यादि सर्वत्र निर्वचनीयम् ।** "[362] एवं प्रकारेण दिङ्निरूपणं कंदलीकारेण भाष्यकारस्य स्पष्टीकरणरूपमेव विहितम् । दिशाम् अन्वर्थसंज्ञानामाधारेण व्युत्पत्त्यादिकं कंदलीकारेण सूच्यते । अन्यच्च वैशेषिकदर्शनस्य परम्परानुगुणमेव दिङ्गनिरूपणं विहितम् ।

**कुसुमोद्गमटीकायां दिग्द्रव्यनिरूपणम्**–कुसुमोद्गमकारेण निर्दिष्टं यत् दिक्कृतपरत्वापरत्वे गुणकाण्डे कथयिष्यते । अतः तस्या लिङ्गत्वं तत्रैव सेत्स्यति इति प्रतिपादितम् । युगपद्प्रतीतिविषये यत् कंदलीकारेणोच्यते तत्र लिख्यते यत् मूर्तद्रव्याणामेवावधिभूतत्वं वर्तते, तैरेव पूर्वापर -प्रतीतयो जायन्त इति । तत्र वोम्मिदेवेन प्रस्तुतं यत् यद्यपि ग्रीष्मात्पूर्वं वसन्तस्यावधित्वं दृश्यते तथापि दक्षिणोत्तरप्रभृतिषु प्रत्ययेष्वेव अवधित्वम् अन्वयव्यतिरेकेण माध्यत इति पृथग्रीत्या विषयः प्रतिपादितः[363] । एतदनन्तरं कथ्यते यत् अनवच्छिन्नपरिमाणे अवधित्वं न वर्तते अर्थात् अनवच्छिन्नपरिमाणयुक्तद्रव्येषु अमूर्तद्रव्येषु परापरप्रतीतयो न विद्यन्ते । केवलं मूर्तद्रव्यावधिकृतत्वेन न पूर्वापरप्रतीतिः,अत्र वोम्मिदेवेन उक्तं यत् अनेन तु घटादिप्रत्ययवत् साधारणत्वप्रसङ्गःसमापतेत;[364]एतस्माद् कारणात् सर्वत्रावस्थित इति विशिष्टं प्रतिपादितं समाधानरूपेण । दृष्टान्तरसाहाय्येनोक्तं यत् ह्रस्वदीर्घादिषु तु परस्परं-परिमाणतारतम्येन परस्परं परापरव्यवहारःसापेक्षरूपेण सिद्ध्यते । दिशं विना परापरप्रतीतयो न भवन्ति इति प्रतिपादितं वोम्मिदेवेन[365] । अन्यच्च नियतावधौ एव पञ्चमीविभक्तेः प्रयोगः पूर्वापरप्रतीतौ क्रियत इति प्रदर्शितं तद्यथा–**"द्रव्यादीनां पूर्वापरादिशब्दप्रवृत्तिनिमित्तत्वानुपपतौ यद्यत्र निमितं तस्यां तस्य स्वस्वाभिधेयस्यापेक्षया नियतादवधेः पञ्चमीति भावः ।** "[366]कंदल्यां कथितभावमेव स्वीकृत्य वोम्मिदेवेन स्वशब्देषु विवरणं क्रियते । तत्रोच्यते यत्– 'मेरुं प्रदक्षिणमावर्तमानस्य आदित्यस्य मेरुणा सह ये संयोगाः ते

---

360 *न्या.कं.प्र.पा.भा.* पृ.१६६

361 *तत्रैव,* पृ.१६६

362 *न्या.क.*पृ.१६७

363 *टी.न्या.कं.* पृ.१७२

364 *तत्रैव,* पृ.१७२

365 *तत्रैव,* पृ.१७३

366 *तत्रैव,* पृ.१७३

तु औपाधिकाः वर्तन्ते । तत्र विशिष्टप्रत्ययनार्थं संयोगस्य क्रियायाः उपनायकरूपेण कालवद् कश्चिद् व्यापकद्रव्यं कल्पितव्यं यतो हि इच्छामात्रेणैव न संयोगः प्राप्यते । अन्यच्च कालवदत्रापि दिशि पूर्वापरादि - प्रत्यायानां न प्रमातृसाधारण्यं वर्तते,यतो हि यत्र यस्य पूर्वप्रत्ययः तत्रैवापरप्रत्ययो जायत इति निर्दिष्टम् एवमुक्त्वा प्रमातृनियमः प्रदर्शयति–"**यत्र हि कस्यचित्पूर्वप्रत्ययः तत्रैवान्यायापरप्रत्यय इति प्रमातृनियमदर्शनात्** ।"[367]एतदनन्तरं श्रुतिस्मृतिसिद्धदिक्कालयोः पृथक् व्यवहारविषये कथयति तद्यथा– "**अवश्यं संयोगोपनायके कल्पनीये प्रमातृनियमे च प्रमाणसिद्धेः श्रुतिस्मृतीतिहासपुराणेषु दिक्कालयोर्भेदसिद्धिमनुसृत्यैव द्रव्यान्तरकल्पनायाविरोधात्**[368]अन्यदपि प्रतिपाद्यते यत् आदित्यसंयोग - साहित्येन तथा च मध्यमसंयोगराहित्येन उत्तरदक्षिणादिदिशां व्यवहारो जायते । सूर्यमपेक्ष्य पृथिव्याः तथा च पृथिवीमपेक्ष्य यतो नक्षत्राणि तत्र उर्ध्वमिति इत्यादिव्यवहारः संपाद्यते । यथा चोक्तं– "**सूर्यमपेक्ष्य यतः पृथिवी सा अधरा, पृथिवीमपेक्ष्य यतो हि नक्षत्राणि सोर्ध्वा**"[369] । इयं अग्रेसारणीया कल्पना अर्थात् कंदलीकारभिन्नं व्योम्मिदेवेन प्रस्तुतेति प्रतिपादिनम् । एतदनन्तरमन्ते दिशां वर्णनार्थे कथ्यते यत् संक्षिप्तप्रकाशनाय'दिकप्रदेशानामिति' पदमावर्तनीयः । अत एवं प्रकारेण संक्षिप्तरीत्या दिग्विषये व्याख्यानं विहितम् । उर्ध्वाधरप्रतीतिविषयेऽपि उक्तं यत् एताः प्रतीतयः सूर्यपृथिव्योः परम्परापेक्षया जायन्त इति ।

**न्यायकन्दल्याम् आत्मद्रव्यनिरूपणम्–** कन्दलीकारेण आत्मद्रव्ये विशद व्याख्या प्रस्तूयते । सर्वप्रथमं लक्षणस्य हेतुत्वं निरूप्यते यत् यस्य तत्त्वज्ञानं निःश्रेयसस्य तथा च तद्विपर्ययस्य संसारस्य कारणं विद्यते;एनं बोधनार्थमेव आत्मत्वाभिसम्बन्धादात्मेति लक्षणमुक्तम् । अयमेव तस्य आत्मनः असाधारणधर्मः, इतरभेदानुमितिजनकश्च विद्यते । १.आत्मसत्ताज्ञापने न प्रमाणाभावः,२.आत्मनो ज्ञापकमनुमानप्रमाणं विद्यते,३. सौक्ष्म्यत्वात् आत्मनः प्रत्यक्षीकरणं न कर्तुं शक्यत इत्येवं रूपेण आक्षेपस्य समाधानं क्रियते[370] । **आत्मनः सिद्धिः-** शरीरेन्द्रियमनसाम् आत्मवैभिन्न्यं जडत्वम् आत्मव्यतिरेकत्वं च प्रतिपाद्यते । १.शरीरभूतद्रव्यनिर्मितं कार्यमतः तस्याचैतन्यम् । यदि शरीरे चैतन्यं स्वीक्रियते तर्हि शरीरावयवरूपेण ज्ञातृत्वबाहुल्यं तत्र स्वीकरणीयं स्याद् । २.१. इन्द्रियाणामपि अचैतन्यत्वं यतो हि तत्रापि दण्डादिवत् करणत्वं विद्यते अर्थात् साधनं तु जडमेव वर्तते[371] । २.२.उपहतेष्विन्द्रिवेषु अपि अनुभूतविषयाणां स्मृतिरवलोक्यते । ३.विषयविशेषे इन्द्रियाणामसम्बद्धत्वे सत्यपि तत्र जायते स्मृतिः,यतो हि येनेन्द्रियेण ज्ञानं गृह्यते तेनैव स्मृतिः स्यादिति प्रस्तुतम् । अन्यच्च स्मृत्यनुभवकरणक्षमतापि न दृश्यते इन्द्रियेषु । स्मृत्यनुभवयोः उभयोः कश्चिदेकः कर्तानुमीयत इति सर्वं सिद्धान्तिना इन्द्रियस्याचैतन्यत्व - प्रदर्शनार्थं प्रतिपादितम्[372] । **विषयस्य चैतन्याधिष्ठातृत्वनिराकरणम्–** उपर्युक्तकारणेषु विषयस्य चैतन्याधिष्ठातृत्वविषये न चर्चा विहिता । कंदलीकारेणैवात्र केचन तर्काः प्रस्तूयन्ते-१.नष्टेषु अपि

---

367 *टी.न्या.कं.* पृ.१७५

368 *तत्रैव* १७५

369 *तत्रैव, पृ.१७६*

370 *तत्रैव,* पृ.१६७

371 *न्या.कं.प्र.पा.भा.* पृ.१७२

372 *तत्रैव,* पृ.१७३

घटादिविषयेषु स्मृति:,ज्ञानाश्रयरूपेण उपलब्धि:[373] तथा च अहं प्रतीते: कर्तारूपेण स नावगन्तुं शक्यते[374] अर्थात् न वर्तते विषयाणां चैतन्याधिष्ठातृत्वम् । अनेन प्रकारेण कथयितुं शक्यते यत् श्रीधरेण न केवलं भाष्यस्य एव व्याख्यानमपितु स्वोद्भावनया नूतना चर्चा अपि विधीयते । **मनसो न चैतन्याधिष्ठातृत्वमिति संपाद्य आत्मन: सिद्धि: विशदतया क्रियते**[375] । अतएव सुखादीनां कर्तृत्वकरणरूपेण आत्ममनसोः सिद्धि जाता, तत्र नाममात्रस्यैव विवाद इति प्रतिपाद्यते । एतदनन्तरमनुमानवाक्यमाध्यमेन आत्मनः कर्तृत्वं प्रतिपादयति श्रीधराचार्यः तद्यथा–"**ज्ञानं तावत् कार्यत्वात् समवायिकारणस्य कार्यम्, शरीरेन्द्रियमनसाञ्च तदाश्रयत्वं प्रतिषिद्धम् । न चान्येषु वक्ष्यमाणेन न्यायेन ज्ञानकारणत्वं प्रति शक्तिरस्ति,अतः परिशेषादात्मकार्यं ज्ञानम् । आत्मकार्यत्वात्तेन ज्ञानेनात्मा समाधिगम्यत इत्युपसंहारः** "[376]अर्थात् भावोऽयं प्रतिपाद्यते यत् शरीरेन्द्रियमनसां अचैतन्यकारणाद् तेषां ज्ञानेऽधिष्ठातृत्वमेव न संभाव्यते; अतः आत्मा एव ज्ञानस्यधिष्ठातेति निरूपितम् । परिशेषानुमानाद् आत्मन: कार्यं ज्ञानमिति कथ्यते[377] । **अक्षणिकवस्तुन: खण्डनं मण्डनञ्च-** एतदनन्तरं क्षणिकत्ववस्तुन: खण्डनं कृत्वा अक्षणिकवस्तुन: स्थापना विज्ञानवादिनां खण्डनं कृत्वा विधीयते[378] । आत्मनो वाचकत्वे 'अहम्' इति शब्दस्य लक्षणया शरीरस्य प्रयोगो जायते यथा भृत्यै 'अहं भृत्यम्' इति प्रतीति:[379] । अनेन प्रकारेण आत्मसिद्धि विहिता कन्दलीकारेण । **आत्मनि गुणा:**–आत्मसिद्ध्यनन्तरम् आत्मनो गुणाः प्रतिपाद्यन्ते ते च सूत्राणामुद्धरणमाध्यमेन भाष्यवदेव विश्लेष्यन्ते । **आत्मन: अनेकत्वम्-** गुणसाधनप्रकरण एव आत्मनः अनेकत्वं वेदान्तमतनिरासं कृत्वा साध्यते[380] । स्वमतसाधने न्यायवार्तिककारमुद्धरति तद्यथा–"**अतएव च विद्वत्सु मुच्यमानेषु सन्ततम् । ब्रह्माण्डलोके जीवानामनन्तत्वादशून्यता । अन्त्यन्यूनातिरिक्तत्वे युज्यते परिमाणवत् वस्तुन्यपरिमेये तु नूनं तेषामसम्भवः ।** "[381] एतदनन्तरं पृथक्त्वगुण: 'तथा चात्मा' इति सूत्रमाध्यमेन साध्यते । अन्यदपि गुरुत्वद्रवत्व -वेगत्वविहीना क्रिया आत्मनो विशेषगुणत्वेनोत्पाद्यते । आत्मनो विनाशो न अङ्गीक्रियते[382] । २.नित्यात्मज्ञानयुक्तपुरुषस्य कृतेऽपि विषयेषु दोषदर्शनं क्रियते,तेन तस्मिन् वैराग्यस्योत्पत्ति र्जायते । अनेन दोषदर्शनरूपवैराग्येण मोक्षोत्पत्तौ प्रवृत्ति:,अतो न तत्र मोक्षस्य असम्भवप्रसङ्ग इति । अनेन प्रकारेण कन्दलीकारेण अतिविशदरूपेण आत्मनो नित्यत्वम् अनेकत्वं च स्थाप्यते, तत्र भाष्यकारात् भिन्ना चर्चा

---

[373] *तत्रैव*, पृ.१७३

[374] न चेन्द्रियचैतन्ये विषयचैतन्ये च रूपमद्राक्षं रसमन्वभवं स्पर्शं स्पृशामि गन्धं घ्रास्यामीति रूपादिप्रत्ययानामेकैकरूपत्वप्रतिपत्तिसम्भव:, रूपादीनां चक्षुरादीनाञ्च भेदात्। *न्या.कं.प्र.प.भा.*, पृ.१७३

[375] *तत्रैव*, पृ.१७३-१७४

[376] *तत्रैव*, पृ.१७५

[377] न चान्येष् वक्ष्यमाणेन व्यायेन ज्ञानकारणत्वं प्रति शक्तिरस्ति, अत: परिशेषादात्मकार्य्यं ज्ञानम्। आत्मकार्य्यत्वात्तेन ज्ञानेनात्मा समधिगम्यत इत्युपसंहार:। *तत्रैव*, पृ.१७५

[378] *न्या.कं.प्र.पा.भा.* पृ. १७७-१९७

[379] ननु शरीरविषय एवायं दृश्यते स्थूलोऽहमिति?न, अहं जानामि,अहं स्मरामीति प्रयोगात्। शरीरस्य च स्मृत्यधिकरणत्वं निषिद्धम्,तस्मादात्मोपकारकत्वेन लक्षणया शरीरे तस्य प्रयोग:, यथा भृत्येऽहमेवायमिति व्यपदेश.1 *तत्रैव*, पृ.२०८

[380] *तत्रैव*, पृ.२१०-२१२

[381] *न्या. क.* पृ. २१३

[382] *न्या.कं.प्र.पा.भा.* पृ.२१४

विषयस्य इन्द्रियानधिष्ठातृत्वसाधने,वस्तुन:अक्षणिकत्वस्वरूपसाधने, आत्मन: अनेकत्वसाधने च विधीयते । **कुसुमोद्गमे आत्मद्रव्यनिरूपणम्**–सर्वप्रथमं कुसुमोद्गमकारेण निर्दिश्यते यत् सर्वेषां भोग्यानां द्रव्याणां वर्णनं जातमिदानीं भोक्तुः आत्मनः वर्णनं प्रारभ्यते । आत्मनि हेतुत्वप्रयोजकरूपेण कन्दल्यां भाष्ये च ये तर्का: प्रोक्ताः, तेषां संक्षिप्तरीत्या निर्देशमात्रमेवाचार्यः वोम्मिदेवः कृतवान् अर्थात् शब्दप्रयोगस्य प्रयोजनमात्रमेव तत्राभिधीयते । १.आत्मनः प्रत्यक्षत्वव्यवहारे वृद्धव्यवहारोऽपि आत्मसंज्ञायामभिधीयत इति प्रतिपाद्यते अर्थात् आत्मनः 'आत्मा' इति संज्ञाकरणे वृद्धव्यवहारोऽपि अपेक्ष्यत इति कन्दलीकारात् भिन्नं प्रतिपादितम्[383] । २.श्रोत्रादीनामिन्द्रियाणां प्रयोजकत्वेनापि कर्ता अनुमीयते यथा च वर्णयति-" **अत्र श्रोत्रादीनि कर्त्रा प्रयुज्यते करणत्वादितिहेतु प्रतिज्ञे ग्रन्थाद् बहिर्द्रष्टव्ये"** । [384] ३.घटपटादिज्ञानेषु आत्मवत् नित्यत्वं न विद्यते यतो हि तेषां उत्पत्तिः विनाशश्च संभाव्यते [385]अर्थात् आत्मा नित्य: अधिष्ठानरूपेण वर्तत इति प्रतिपादितम् । ४.शरीरेन्द्रियमनसां यत्र चैतन्यं निराक्रियते तत्र चार्वाकनिराम: कृतमिति कुसुमोद्गमकारेणोच्यते । ५.इन्द्रियाणां करणत्वस्याचैतन्येऽपि उच्यते यत् कर्तु: अधिष्ठितत्वात् इन्द्रियत्वात् चैतन्ये तदधिष्ठाताभावाद् अनुपपतिः तत्र विद्यते[386]अर्थात् इन्द्रियाणां जडत्वात् न तेषां चैतन्याधिष्ठातृत्वं विद्यते । ६.स्मृति न इन्द्रियकार्या इति दृष्टान्तरेण प्रस्तौति तद्यथा- **"अत्र प्रयोग:,स्मृतिनेन्द्रियकार्या तद्भावेऽपि ज्ञायमानत्वात्,यथा व्रीहिबीजाभावेऽपि जायमानोप:मङ्कुरो न व्रीहिबीजा(ज)कार्य इति"**[387] । ७.अन्यदपि देवदत्तविहितस्य अनुभवस्य स्मरणं यज्ञदत्तेन न क्रियते; अर्थात् स: तद्विषयस्य अकर्ता अस्मरता वर्तत इति प्रतिपाद्यते । ७.एतदनन्तरं सर्वेन्द्रियसन्निधौ रूपप्रत्यक्षत्वे ज्ञानस्य क्रमिकत्वं नर्तकीदृष्टान्तेन तत्र वर्णितम्[388] । अन्यच्च स्मृतिरपि संस्कारोद्बोधरूपेण क्रमा एव वर्तत इति[389]मनस: स्मृतिकार्ये कारणत्वकथनस्याभिप्रायात् कथित: । ८.आत्मनि स्मृतिक्रमः संस्कारोद्बोधकक्रमेणैव लक्ष्यते आत्मनकार्यत्वेन ज्ञानस्योपपादने अनुवाक्यप्रयोगमुपस्थापयति–**"पृथिव्याद्यष्टद्रव्याद्यतिरिक्तद्रव्यकार्यं ज्ञानं तदनाश्रितत्वे सति कार्यत्वात् न यदेवं न च तदेवं यथा गन्ध इति व्यतिरेकी ।** "[390]आत्मनिः अधिष्ठातृत्वरूपेण ज्ञानस्य स्थापने कथ्यते यत् आश्रयाश्रयिभावः स्थैर्येण एव संभाव्यते न तु क्षणिकत्वमाध्यमेनेति । ९.भावसहकारित्व-विषयिणी या चर्चा कन्दलीकारेणोपस्थाप्यते तत्र स्वयंकृतोद्भावनया वोम्मिदेवेन प्रश्नोतराणि प्रस्तूयन्ते यत् भावसहकारिणः किमर्थमपेक्ष्यन्ते स्वात्मसिद्धये, कार्यसिद्धये,उपकारार्थे च । तत्र **समाधानम्**–प्रथमं न

---

[383] प्रत्यक्षयोग्यतया बाधितत्वात् पक्षधर्मतासाहायात् करणत्वसिद्धे.। प्रत्यक्षेऽर्थे वृद्धव्यवहारप्रसिद्धया आत्मेति सञ्ज्ञेत्यभिप्राय.; *टी., न्या. कं.* पृ.१७७

[384] *तत्रैव,* पृ १७७

[385] *टी., न्या, कं,* पृ १७८

[386] कर्त्रधिष्ठितस्यैव कारणत्वादिन्द्रियाणां चैतन्ये तदतिरिक्तस्याधिष्ठातुरभावेन तज्ज्ञानुपपत्ति.। कारणत्वादित्यसानुकूलस्तर्क.। *तत्रैव,* पृ १८०

[387] *टी., न्या. कं.* पृ.१८१

[388] नैष दोषः आवृत्य नर्तकीमुखादिकमित्थं निरीक्षणमाणस्य इन्द्रियान्तरसन्निहितविषयान्तरेषु ज्ञानानुदयाद्वया- सङ्गे तावत् ज्ञानक्रमः स्पष्ट एव दृष्टस्तद् दृष्टान्तबलेन यदा शष्कुलीभक्षणादौ रूपादिप्रत्यानां क्रमानुमानादिति सिद्धान्ते ज्ञानक्रममुपपादयति इति। *कु. पृ. १८२*

[389] *यद्यपि संस्कारोद्बोधक्रमेण स्मृतिक्रमा सिद्धा। तत्रैव. पृ.१८२*

[390] *कु.पृ. १८४*

यतोहि स्वात्मनः स्वकारणसिद्धत्वम्२.द्वितीयमपि न यतो हि समर्थस्य कार्यकर्तृत्वं स्वमाध्यमेनैव,३.तृतीये उपकृतानामुपकरणे अनवस्था दोषमाशक्यं प्रकारान्तरेण तस्य दूषणं क्रियते। अन्यकृतोपकारेण उपकृतत्वे अन्यसम्बन्धित्वात् अतिप्रसङ्गः क्रियत इति कथ्यते;अतः सहकारिसमवधानेन विलक्षणशक्तिरुत्पाद्यत इति प्रतिपादितम्[391] ४.सहकारिकारणप्रसङ्गे एव कन्दलीकारेण प्रतिपादितं यत् सहकारिकारणैः अतिशयमुत्पाद्यते। तत्र वोम्मिदेवेनोच्यते यत् सहकारिकारणत्वस्याभिप्रायो मिलित्वा कार्यकरणं विद्यते न तु अतिशयोत्पादनमिति निरूप्यते। अतिशयोत्पादने तु अनवस्था स्यात् इति लिख्यते। ५.अदृष्टेनैव तत्राभिमतविषयग्रहणे सामर्थ्योत्पादनत्वात् तस्य आश्रयत्वरूपेण आत्मनः सिद्धिं प्रतिपाद्यति अतः कथितम्– **"ततश्चासाक्षात्कृतेऽपि मनसाम् इच्छानुविधायिकर्मादृष्टवशात्प्रयत्नपूर्वक्रमभ्युपगन्तव्यम्। अन्यथा बुभुत्सातिशयेन पटुतरप्रत्ययानुदयप्रसङ्गादिति** [392] अन्यदपि तत्रोच्यते यत् न केवलं कार्यमाध्यमेन अपितु गुणमाध्यमेनापि आत्मनः अनुमानत्वं कल्पनीयः। तत्रैकेन्द्रियग्राह्यत्वेन गुणत्वम्, गन्धादिवत् द्रष्टव्यम्। आत्मविषयकत्वमेतेषां सुखादीनां महर्षेगौरवात् सूत्रसम्मतिप्रदर्शनाय एवोच्यत इति अनुसंधेयम् अत्र वोम्मिदेवेन सूत्रकारसम्मतिप्रदर्शनार्थमेव आत्मविषयरूपेण सुखादयो गृह्यन्ते अन्यथा मनसा तेषामुपपत्ति सर्वैरेव क्रियत इति किञ्चिद् विपरीतमाशङ्कितम्। आत्मनो नानात्वसाधनेऽपि वोम्मिदेवेन पृथक्दृष्टान्तमाध्यमेन तदेवविषय: उपस्थाप्यते। कस्यापि सुखीत्व-दुखीत्वे एकत्वस्योपपत्तिः जायते,परञ्च 'पादं मे सुखं' 'शिरसि मे वेदना' इत्यादिवत् शरीरभावेनापि मुक्तत्वं बद्धत्वं विद्यते अर्थात् तत्रात्मा भेदः। तदनन्तरं व्यवहारः प्रदर्श्यते यत् 'वासिष्ठो मुक्तः''वामदेवो मुक्तः' इत्यादिवाक्यमुक्तिसाधनसम्बन्धमात्रेण नोपचारप्रतीतिरिति कथयितुं शक्यते[393]। अनेन ईश्वरानीश्वरव्यवस्थापि भ्रान्तिसिद्धा एवेति प्रतिपादितम्। एतदनन्तरं अनेनैव भावेन कन्दल्यां अथ केयमित्यनेन आत्मनः एकत्वं बहुत्वं च आशङ्कयते। कन्दलीप्रतिपादितापि चर्चा वोम्मिदेवेन विधीयते। वोम्मिदेवकृतव्याख्या आत्मप्रकरणे नातिविशदा विद्यते,तत्र कन्दलीविवेचिततर्काः संक्षेपेण 'इति भावः' 'इत्यभिप्रायः' इत्यादिशब्दानां माध्यमेन तथा दृष्टान्तरेण विधीयते। वोम्मिदेवेन मुख्यमुख्यरूपेण सर्वेषां तर्काणामुपरि चर्चा विहिता परञ्च तत्र पृथकत्वेन विशेषकथनाभावाद् तेषां पुनरुक्तिः न क्रियत इति।

**न्यायकन्दल्यां मनोद्रव्यनिरूपणम–**कन्दलीकारेण मनस्-द्रव्यस्य व्याख्या विशदरूपेण कृता वर्तते। आत्मनः प्राधान्यत्वात् तस्य वर्णनं पूर्वमेव कृतम्। तदनन्तरं मनोद्रव्यनिरूपणं क्रियते[394]। मनसि भिन्नत्वे सिद्धे तत्र मनस्त्व जातिः अनुमातव्येति। मनसत्वे परसामान्यसूचनार्थं कथितं यत् समानगुणधारिणां समान एव कार्याणि दृश्यन्ते,एवमेव मनोव्यक्तिषु अपि समानकार्याणि निर्दिश्यन्त इति तत्र परसामान्यं प्रतिपादितम्[395]। **मनसः प्रामाण्यम्-** आत्मन: कारणसन्निधियुक्तैरिन्द्रियैः सह विषयाः सम्बद्धाः वर्तन्ते परञ्च यस्मिन् क्षणे एकज्ञानस्योत्पत्तिर्जायते तस्मिन्नेव क्षणेऽपरज्ञानस्य अर्थात् सुखादीनां प्रतीतिर्नानुभूयते। अतः प्रथमज्ञानस्य नाशान्तरं हि अपरज्ञानस्योत्पतिर्कथ्यते। अनेन आत्मेन्द्रिययोः तथा च विषयेन्द्रिय - योर्मध्ये तृतीयकरणस्यानुमानं क्रियते। यस्य सन्निधौ ज्ञानसुखादयोः समुत्पाद्यन्त इति सकलं भाष्यवदेव

---

[391] *टी.न्या.कं.* पृ.१८५

[392] *टी.न्या.कं.* पृ. २१३

[393] *टी.न्या.कं.* पृ.२२०

[394] *न्या.कं.प्र.पा.भा.* पृ.२१६

[395] *तत्रैव,* पृ.२१६

कथितम्। एतदनन्तरं आत्मेन्द्रियसन्निकर्षादिविषये शंकोत्थापनं क्रियते कंदलीकारेण[396]। तत्र प्रतिवि - धीयते यत् तत्र इन्द्रियाधिष्ठानमेव प्रमाणं वर्तते तत्र प्रतिपाद्यते यत् रूपप्रत्यक्षकाले घ्राणादीन्द्रियैः सह तद्विषयाः गन्धाद्यो अधिष्ठानसामीप्याद् सम्बद्धा एव प्रतीयन्त इति समासाधितम्। तत्रैवापरप्रमाणमपि प्रदीयते[397]। २.गन्धादिज्ञानवत् स्मृतिरपि इन्द्रियजन्या वर्तते यतोहि तदपि ज्ञानं परञ्च स्मृतौ श्रोत्रादीनां न हेतुत्वं यतोहि बाधिर्यसमुत्पन्ने सत्यपि स्मृति दृश्यते;अतो हेतुत्वेन तत्र मनसः अनुमानं क्रियत इति निर्दिष्टम्। ३.सुखादीनां प्रतीतावपि मनसः हेतुत्वं यतो हि तत्र चक्षुरादीनां न व्यापारः। ४.सुखादीनां ज्ञानस्वभावमङ्गीक्रियते तर्हि सुखदुःखयोर्मध्ये वैभिन्न्यं न स्यात् परञ्च तद् वैभिन्न्यं तु प्रतीयत एव। **मनसि गुणाः–** मनसि अष्टगुणाः वैधर्म्यरूपेण उच्यन्ते। **मनस एकत्वमनेकत्वं वा-** १.प्रथमा युक्ति यत् आत्मनि ज्ञानद्वयस्य प्रयत्नद्वयश्चत्पत्तिर्न जायते अतः एकत्वं तस्य[398]। २.एकस्मिन् शरीरे मनोवैभिन्न्यं तर्हि बहवः संयोगाः,तैः ज्ञानमपि बहुस्यात्,परञ्च ज्ञानस्योत्पत्तिः क्रमश एवावलोक्यते। ३.मनस्येकत्वं स्वीकारे एकः संयोगः,तेन एकं ज्ञानमुत्पाद्यत इति। ४.कुत्रचिद् एकस्मिन् एव काले ज्ञानस्य प्रतीतौ बाहुल्यं दृश्यते तत्र आशुत्वकारणात् अज्ञातचक्रवत् क्रमशः एव ज्ञानोत्पत्तिः स्वीक्रियते। ५.एकस्मिन्नेव क्षणे वर्तमानस्य ज्ञानबाहुल्यस्यैव खण्डनमत्र अभिप्रेतम् इति[399]। मनसि एकत्व कारणादत्र एकपृथक्त्वम्, अभावकरणाद् मनसि अणुपरिमाणत्वम् अपि वर्तत इति उक्त्वा कणादसूत्रमुद्ध्रियते[400]। नित्यद्रव्यस्य यत्र न विभुत्वं तत्र अणुपरिमाणमेव स्वीक्रियत इत्युच्यते। तत्रापि युक्तयः प्रदीयन्ते-१.एकस्मिन् क्षणे आत्मनि अनेकज्ञानानां नोत्पत्तिः,२.प्रतिशरीरं मनस एकत्वमेव वर्तते[401]। ३.आत्ममनसो उभयोरेव विभुत्वस्वीकारे तयोर्मध्ये न संयोगःसंभाव्यते। ४.आत्ममनसोः संयोग एव ज्ञानसुखादीनामुत्पत्तौ असमवायिकारणं वर्तते। अतो न मनसो विभुत्वमिति[402]। ५.मनसि यदि चैतन्यत्वं तर्हि आत्ममनसोः उभयोरेव भोगायतनत्वं तत्र समापद्यते। शरीरस्य प्रवृत्तिनिवृत्योर्मध्ये एकस्यैव कारणत्वं दृश्यते, अतो मनसो वर्तत अज्ञत्वमिति। मनसः आशुगम्यत्वं आत्मादृष्टयोर्माध्यमेन संभवीति निरूप्यते[403]। ६.केवलं मूर्तत्वहेतुना एव मनसि परत्वापरत्ववेगाश्च साध्यन्ते। ७.इच्छाद्वेष जीवनयोनियत्नेन मनः क्षिप्रगत्या स्थानात् स्थानानन्तरं प्रति गच्छति,एवमेव मरणानन्तरम् अदृष्टसाहाय्येन शरीरात् आशु गच्छतीति पृथग्रूपेण प्रतिपादितं कंदलीकारेणेति[404]। द्रव्यप्रकरणस्यान्ते कन्दल्याः प्रशंसायां श्लोकं दीयते[405]। एवं प्रकारेण मनोद्रव्यप्रकरणं समाप्यते।

---

396 *तत्रैव,* पृ.२१७

397 *तत्रैव,* पृ.२१७

398 प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्च प्रतिशरीरमेकं मन.। *तत्रैव,* पृ.२२२

399 *न्या.कं.प्र.पा.भा,* पृ.२२२

400 तदभावादणु मनः। *वै.सू. ७/१/२२*

401 *न्या.कं.प्र.पा.भा.* पृ.२२३

402 *तत्रैव,* पृ.२२५

403 *न्या.कं.प्र.पा.भा.* पृ.२२६

404 *तत्रैव, पृ.२२६*

405 विशुद्धविविधन्यायमौक्तिक प्रकाराकरः। सेव्यतां द्रव्यजलधिः स्फुटसिद्धान्तविद्रुमः। *तत्रैव,* पृ.२२६

**कुसुमोद्गमे मनोद्रव्यनिरूपणम्–** कुसुमोद्गमकारेण निर्दिश्यते यत् इदानीं तेषां करणरूपमनसो निरूपणं क्रियते। सुखदु:खयो: भेदसाधने वोम्मिदेवेनाशंक्यते यत् ज्ञानत्वं तु सामान्यं वर्तते,अतः सुखदु:खे तस्य विशेष्यौ स्त इति प्रश्नः। [406] तत्र समाधाने कंदलीकारकथनमेव वर्तते अर्थात् बोधाकारस्य साधारणत्वे अपि उभयो: परस्परं व्यावृत्तत्वाद् वैभिन्न्यं वर्तते। रागद्वेषयुक्ता वर्तते वासनेति,तयैव सुखदु:खयोरुत्पत्तिः इतरथा हेमन्तेऽपि चन्दनस्पर्शसुखं तथा च वीतरागेणपि कामिनीम्पर्शसुखं अनुभूयेत इति[407]अर्थात् उपेक्षाज्ञानस्य संसारेऽभावः स्यादिति वोम्मिदेवेन भिन्नरीत्या स्पष्टीकृत्य प्रतिपादितम्। एकमेव वस्तु कार्यं कारणं च न भवितुमर्हति इत्यत्र विज्ञानस्य प्रकाशकत्वे सत्यपि सुखादिभ्यो तस्य भेदादेव करणतया मनस:सिद्धि तत्रैव जायत इति नूतनं प्रतिपादितम्। अनेन प्रकारेण मनसि हेतुप्रभृतय अपि चर्चिता,परञ्च ते कंदल्यविशिष्टमेव। अतो न वर्ण्यन्ते। **मनसि गुणा:–** गुणविशेषस्य चर्चा कन्दलीकारेण विशदरूपेण विहिता परञ्च कुसुमोद्गमकारेण अतिसंक्षिप्तव्याख्यानं तत्र प्रस्तूयते। मनस: एकत्व साधने वोम्मिदेवेन उच्यते यत् एकत्र ज्ञानस्य प्रयत्नस्य वा उत्पतौ तस्यानुपत्तिः विषयान्तरे जायत इति भावं गृहीत्वा कथयति– **"विषयात्मतत्सन्निकर्षव्यतिरिक्तसहकारिविरहयुक्ता तेषु शक्तेषु च कार्यानुत्पत्तित्वात् सम्प्रतिपन्नवदिति प्रयोग:"**[408]इति। परिमाणम्–मनस:परिमाणचर्चायां यत् मनसः परमाणुवद् प्रयोगः, इत्यत्र अनुमानवाक्यप्रयोगं प्रस्तौति-**"मनोऽणु अविभुत्वे सति नित्यद्रव्यत्वात्परमाणुवदिति प्रयोग:"**। [409]यत्र आत्ममनसो: विभुत्वविषये चर्च्यते तत्र वोम्मिदेवेनोच्यते यत् विभुद्रव्ययो: संयोग:,अज:संयोगो न वक्तुं शक्यते। अतो न मनसः विभुत्वमिति भावः। मनसि अपसर्पणोपसर्पणमाध्यमेन यत्र संयोगगुण: साध्यते तत्रोच्यते यत् वीतरागजन्यबहूशरीराणां प्रेत्याभावानुपपत्तिः स्याद्। अतो मनस: सत्त्वं स्वीकरणीयः। अत्र युक्तिं प्रदर्शयति-**"वीतरागजन्मदर्शनादेकस्यानेकशरीरयोगसिद्धे व्यापकस्यसंयोगहेतुक्रिया विरहान्मनसस्तदभावेऽपसर्पणोपसर्पणयोरसिद्धौ प्रेत्याभावानुपपत्तिरिति भावः**। "[410] मनसि अतीन्द्रियसत्वेऽपि तत्र अपेक्षाबुद्धया परत्वापरत्वयो: सत्ता न निषेध्येति। तत्र अदृष्टकार्ययुक्तकर्मयोगिजनेनापि छलनादिवदेव तत्र वेगोऽपि स्वीकर्त्तव्यः। अत उक्तम्**"अदृष्टकार्य-कर्मयोगित्वेनापि छलनादिवदेव वेगोऽपि प्रमाणसिद्धः स्वीकर्त्तव्यः इति भावः**। "[411]अन्यच्च कथ्यते यत् केवलं अस्पर्शमाध्यमेन अमूर्तत्वं न अनुमातव्यम्, अनेन परत्वापरत्वावेगानाम् अनुमानमुच्छिद्यते इति शंकानिराकरणाय भाष्यपठननिर्देशः क्रियते[412]। अन्यदपि कथ्यते यत् गुरुत्वादिवत् अत्रापि प्रयत्नादृष्टयोः क्रियाकारणत्वम् अनुमेयं वर्तते[413]। अनेन प्रकारेण मनोद्रव्यस्य सिद्धिरुच्यते। अन्ते स्पष्टीक्रियते यत् गुणान्वितद्रव्याणि प्रतिपादितानि,तथा च तेषां प्रतिपादने मुनियोगम् अपेक्ष्यत इत्यप्युक्तम्। एतदर्थं सूचितं

---

[406] *टी.न्या.कं,* पृ.२२७

[407] *टी.न्या.कं.* पृ.२२९

[408] *टी.न्या.कं.* पृ.२३४

[409] *तत्रैव,* पृ.२३५

[410] *तत्रैव* पृ.२३६

[411] *तत्रैव,* पृ.२३६

[412] अतीन्द्रियेऽपि मनस्यनुमिति(:) पापेक्षाबुद्ध्या परत्वा/परत्वयोरुत्पत्तिर्न विरुद्ध्यते। *तत्रैव,* पृ.२३६

[413] *तत्रैव,* पृ.२३७

यत ग्रन्थोऽयं कस्य संतोषाय ग्रन्थित इति यथोक्तं-**"वराङ्गब्रह्मावसुन्धराधिपतिना धात्रीधरेन्द्रात्मजवैक्रमोजविकासनालभरणेन्दीवरस्य संप्रीतये ।** " अनेन कथनेन द्रव्यपदार्थसमाप्तिः निर्दिश्यत इति । अनेन प्रकारेण कथयितुं शक्यते यत् यथा कंदलीकारेण प्रत्येकस्य द्रव्यस्य अन्ते ग्रन्थपरिचायकं विवरणं प्रस्तूयते, तद्वत् कुसुमोद्गमकारेणापि दीयते ।

## गुणानां साधर्म्य-वैधर्म्यम्-

१न्यायकन्दल्यां **गुणानां साधर्म्यवैधर्म्यनिरूपणम्**-कन्दलीकारेण नूतनप्रकरणात्पूर्वं सर्वत्रैव मङ्गलाचरणं प्रस्तूयते अतः अत्रापि पूर्वं विष्णवे प्रणम्य गुणनिरूपणकार्यमारभ्यते । **"रूपादीनां गुणानां सर्वेषां गुणत्वाभिसम्बन्धो द्रव्याश्रितत्वं निर्गुणत्वं निष्क्रियत्वम्** [414] **१.गुणत्वजातिसम्बन्धः**[415], **२.द्रव्याश्रितत्वम्**– द्रव्याश्रितत्वेन द्रव्यापेक्षया गुणानां गौणत्वं लक्ष्यत इति । **३.निर्गुणत्वम्**–एकस्मिन् गुणेऽपरस्योत्पत्त्यभावात् गुणानां निर्गुणत्वं प्रोच्यते[416] । **४.निष्क्रियत्वम्**– निष्क्रियत्वेन समेषां गुणानां साधर्म्यं प्रदर्श्यते[417] । **कुसुमोद्गमे गुणानां साधर्म्यवैधर्म्यनिरूपणम्**-कुसुमोद्गमकारेणापि शंभुवन्दनामाध्यमेन नूतनं प्रकरणं प्रारभ्यते[418] । **१.गुणत्वम्** । [419]'गुणत्वमिति' निर्दिश्यते अर्थात् उपदेशमाध्यमेन रत्ने रत्नत्वज्ञानवत् गुणे गुणत्वमिति व्यवहारो विधीयत इति[420] । **४.निष्क्रियत्वम्**– निष्क्रियत्वे कथ्यते यत् तत्र गतिप्रतीतिः स्वाश्रयसंयोगिदेशेभेदेन प्रतीयते[421] । अनेन प्रकारेण कथ्यते यत् श्रीधरेण वोम्मिदेवेन भाष्यकारात् न कस्यापि मूलसिद्धान्ते भेदः ।

२.**न्यायकन्दल्यां मूर्तगुणाः**- कन्दल्यामपि भाष्यवदेव **"रूपरसगन्धस्पर्शपरत्वापरत्वद्रव्यत्व-स्नेहवेगाः मूर्तगुणा'**[422]चर्चा वर्तते । तत्र न पृथक् व्याख्यानं प्रस्तूयत इति । **कुसुमोद्गमे मूर्तगुणाः**– कुसुमोद्गमेऽपि न वर्तते अस्मिन् प्रकरणे कापि विशेषा चर्चेति । **३.न्यायकन्दल्यां अमूर्तगुणाः**- भाष्यकारवदेव विषयो वर्णितः श्रीधरेण न विशिष्टं तत्र प्रतिपाद्यते [423] । **कुसुमोद्गमे अमूर्तगुणाः**–केवलं भावनाविषये कथितं यत् भावना संस्कारविशेषा[424]ः ।

---

414 *प्र.पा.भा.न्या.कं.* पृ २२७

415 *न्या.क. प्र.पा.भ.* पृ२७

416 एवं सत्येकं रूपमणुः शब्द इत्यादिव्यवहार उपचारात् । *तत्रैव.* पृ. २२८

417 आश्रयक्रियया,यथैव सत्तायां नह् सत्ता स्वाश्रयेण सह गच्छति, एकस्य गमने विश्वस्य गमनप्रसङ्गादीति। *तत्रैव,* पृ.२२८

418 गुणग्रामे शम्भो तपति विविशते यस्य धिषणा, गुणैर्बद्धाख्यानैर्न पुनरिह बध्येत स पुमान्। अतस्तेत्पयो स गुण गरिमलातिशयं त्रयीयं तात्पर्यात्प्रकटयति पर्या/य/पटिमा॥ *टी.,न्या,क. पृ.२३९*

419 नित्यास्तु सामान्यवन्तः कार्याश्रया न सन्त्येव नित्याश्रयास्तु परिशिष्यन्ते । *तत्रैव,* पृ.२४०

420 *तत्रैव,* पृ.२३९

421 द्रव्यगुणकर्मणाम् सत्ताश्रयतया सामान्यादित्रयस्य न तदेकार्येवृत्तितया तद्गमने गतिरवश्यं भाविनीति शेषः। *टी.न्या.कं.* पृ २४०

422 *प्र.पा.भा.न्या.कं.* पृ.२२८

423 "बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा अमूर्तगुणाः"। *तत्रैव* पृ.२२९

424 *टी.न्या.कं.* पृ.२४१

**४.न्यायकन्दल्यां उभयगुणा:-** भाष्यकारवदेव विषयो वर्णित: श्रीधरेण न विशिष्टं तत्र प्रतिपाद्यते । भाष्ये यथा लिखितम्-**"संख्यापरिमाणपृथक्त्वसंयोगविभागा उभयगुणा:** [425] । ।

**कुसुमोद्गमे उभयगुणा:-** कुसुमोद्गमकारेण नात्र व्याख्यानं विहितम् ।

**५.न्यायकन्दल्याम् अनेकद्रव्याश्रिता: गुणा:-**संयोगविभागयो: अनेकेषु द्रव्येषु आश्रितत्वं तत्र निर्दिश्यते । द्वित्वद्विपृथक्त्वयोर्मध्येऽपि अनेकाश्रितत्वगुणत्वम् । एवमेव आदिशब्देन 'त्रित्व' -त्रिपृथक्त्वादीनां ग्रहणनिर्देशोऽपि क्रियते[426] । भाष्ये यथा कथितम्-**"संयोगविभागद्वित्वद्व पृथक्त्वादयोऽनेकश्रिता: ।** "[427]

**कुसुमोद्गमे अनेकद्रव्याश्रिता: गुणा:-**संयोगविभाग...इत्यत्र व्युत्पत्तिविषये वैयाकरणिकं परिचयं दीयते । वोम्मिदेवमते उक्तं तद्यथा-**"द्वित्वं द्विपृथक्त्वं चादिर्येषामिति बहुव्रीहिं कृत्वा पश्चात-संयोगविभागशब्दाभ्यां द्वन्द्वस्य करणादस्यार्थस्य सिद्धि:"**[428]इति ।

**६.न्यायकन्दल्याम् एकद्रव्याश्रिता: गुणा:-**एकैकवृत्तित्वस्याभिप्रायो निर्दिश्यते यत् रूपादयो संयोगादिगुणवत् व्यक्तिद्वयं व्याप्यं न विद्यते । अत: तेषां रूपादीनाम् एकैकद्रव्यवृत्तित्वं कथ्यते[429] ।

**कुसुमोद्गमे एकद्रव्याश्रिता: गुणा:-**वोम्मिदेवेन अस्मिन् प्रकरणे न व्याख्यानं विहितम् ।

**७.न्यायकन्दल्यां वैशेषिकगुणा:-**वैशेषिकगुणनिर्देशे कन्दलीकारेण 'विशेष'शब्दस्यार्थो व्युत्पाद्यते-**"रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वबुद्धिसुखदु:खेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा वैशेषिकगुणा:**[430] विशेषशब्दस्यार्थं व्युत्पादयन तत्र श्रीधर: कथयति-**"विशेषो व्यवच्छेद:, तस्मै प्रभवन्ति ये गुणास्ते वैशेषिका गुणा रूपादय:"**[431]अर्थात् एतै: गुणै: स्वाश्रयो व्यवच्छिद्यते; यतो हि तत्र द्रव्यद्वये वर्तमानसंख्याया न भेद:।

**कुसुमोद्गमे वैशेषिकगुणा:-** वैशेषिकगुणसंदर्भे वैयाकरिणक: परिचयो दीयते[432] । संख्यादिभ्यो भेददर्शने उक्तं यत् तत्र स्वाश्रयव्यवच्छेदकत्वं औपयिकतया दृश्यत इति[433] ।

**८.न्यायकन्दल्यां सामान्यगुणानां निरूपणम्-**एतै: स्वाश्रय इतरेभ्यो न व्यवच्छिद्यत इति । ।

**परिमाणम्-**तत्र कथ्यते यत् अणुपरिमाणं अपि विभिन्नजातीयपरमाणुषु समानरूपेणैव वर्तते । अत: साधर्म्यबोधक एव परिमाणमिति तत्र प्रतिपादितम् । सांसिद्धिकद्रव्यत्वं तु जलस्य विशेष गुण:[434]अत: केवलं नैमितिकद्रव्यत्वस्यैव निर्देश:क्रियते ।

---

425 *प्र.पा.भा.न्या.कं.* पृ. २२९

426 आदिशब्दगृहीतास्तु त्रित्वत्रि पृथक्त्वादि-व्यक्तयो यथासम्भवं बहुष्वाश्रिता अनेकशब्दश्च एको न भवति इति व्युत्पत्त्या द्वयोर्बहुष्वपि साधारण:। *न्या.कं.प्र.पा.भा.,* पृ.२३०

427 *प्र.पा.भा.न्या.कं.* पृ २३०

428 *टी.न्या.* पृ.२४२

429 *न्या.कं.प्र.प.भा.* पृ. २३० शेषास्त्वेकैकवृत्तय:। *प्र.पा.भ.न्या.कं.* पृ.२३०

430 *प्र.पा.भा.न्या,कं.* पृ.२३०

431 *न्या.क.प्र.पा.भा.* पृ २३०

432 *टी.न्या.कं* पृ.२४२

433 *तत्रैव,* पृ.२४२

434न्या.कं. प्र.पा.भा. पृ.२३१ संख्यापरिमाण पृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वनैमित्तिकद्रवत्ववेगा: सामान्यगुणा:। *प्र.पा.भा.न्या.कं.* पृ.२३१

**कुसुमोद्गमे सामान्यगुणानां निरूपणम्** –एतस्मिन् विषये न वोम्मिदेवेन चर्चा विहिता ।
**९.न्यायकन्दल्यां बाह्येकेन्द्रियग्राह्यगुणानां निरूपणम्-"शब्दस्पर्शरूपरसगन्धा बाह्यैकैकेन्द्रियग्राह्याः ।**"[435]अत्र व्याख्यायां बाह्यविषयप्रकाशकत्वात् चक्षुरादीन्द्रियाणां बाह्येन्द्रियत्वयुक्तमिति ।
**कुसुमोद्गमे बाह्येकेन्द्रियग्राह्यगुणानां निरूपणम्**-वोम्मिदेवेन अतीव संक्षिप्ता व्याख्या प्रस्तूयते । बाह्येन्द्रियग्राह्या इत्यनेन आत्मनः तद्गुणेभ्यो भिन्नानां संग्रहनिर्देश इत्युक्तः[436] ।
**१०.न्यायकंदल्यां द्वीन्द्रियग्राह्यगुणानां निरूपणम्**-बाह्येन्द्रियगुणानां निरूपणानन्तरं द्वीन्द्रियग्राह्यगुणाभाष्ये **"संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्नेहवेगाद्वीन्द्रियग्राह्याः**[437] प्रदर्श्यन्ते । अत्र द्वीन्द्रियग्राह्येण ये ग्राह्यन्ते गुणाः, ते द्वीन्द्रियग्राह्या उच्यन्ते यथा-चक्षुत्वङ्ग्राध्यमेन स्पर्शसंख्यादयः प्रत्यक्षीक्रियन्ते, स्नेहोऽपि तद्वदेव इति निर्दिष्टम[438] ।
**कुसुमोद्गमे द्वीन्द्रियग्राह्यगुणानां निरूपणम्**-वोम्मिदेवेन नात्र व्याख्या विहितेति ।
**११.न्यायकन्दल्याम् इन्द्रियान्तःकरणग्राह्यगुणनिरूपणम्**-बुद्धितः प्रयत्नपर्यन्ताः गुणाः अन्तःकरणेन्द्रियेण गृह्यन्ते ते च भाष्ये **"बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नास्त्वन्तःकरण ग्राह्याः**[439] । अत्र व्यस्ता व्याख्या विधीयत इति[440]अनेन प्रकारेण बुद्धि न शंकनीयेति ।
**कुसुमोद्गमे इन्द्रियान्तःकरणग्राह्यगुणनिरूपणम्**-कुसुमोद्गमकारेणात्र संक्षिप्ता व्याख्या विहिता वर्तते । तत्रापि काश्चन युक्तयो विद्यन्ते तत्र ब्रह्मणो विषये कथ्यते यत् किं तत्र ज्ञानस्य विनाशो आवरणं वा?तत्र प्रत्युच्यते यत् अंशे स्फुरणमथवा अंशान्तरे स्फुरणम्[441]इति संशयविषये कन्दलीकथनं समाधानार्थे वोम्मि - देवेन स्वीक्रियते यथा–निर्भागस्यैकदेशेन न शंकनीयमिति प्रतिपादितम् अर्थात् ब्रह्मणि अंशादिविभागो न विद्यते । वोम्मिदेवेन तत्र सारग्राहिणी संक्षिप्ता व्याख्या विहिता । भिन्नशैल्यां कंदल्यनुस्रियत ।
**न्यायकंदल्याम् अतीन्द्रियग्राह्यगुणानां निरूपणम्–"गुरुत्वधर्माधर्मभावना ह्यतीन्द्रिया"** इति भाष्ये लिखति [442]कन्दल्याम् अतीन्द्रियविषये कथितं यतं येषां ज्ञानम् इन्द्रियेण न जायते तेऽतीन्द्रिया इति प्रतिपाद्यते[443] ।
**कुसुमोद्गमे अतीन्द्रियग्राह्यगुणानां निरूपणम्**-वोम्मिदेवेन नात्र कापि व्याख्या विहिता ।
**१३.न्यायकन्दल्यां कारणगुणपूर्वकगुणानां निरूपणम्**-कारणगुणपूर्वकानां गुणानां विषये विशदा चर्चा कन्दलीकारेण क्रियते । **यथा वर्णितं भाष्ये अपाकजरूपरसगन्धस्पर्शपरिमाणैकत्वैकपृथक्त्व - गुरुत्वद्रवत्वस्नेहवेगाः कारणगुणपूर्वकाः**"[444]व्याख्यायते यत् तन्तुषु वर्तमानरूपस्य प्रतीतिं पटरूपे विद्यते।

---

[435] *प्र.पा.भा.न्या.कं.* पृ.२३१

[436] *टी.न्या.कं.* पृ.२४३

[437] *प्र.पा.भा.न्या.कं.* पृ.२३२

[438] *न्या.कं.प्र.पा.भा.* पृ.२३२

[439] *प्र.पा.भा.न्या.कं.* पृ.२३२

[440] *न्याय क.* पृ. २३६

[441] *टी.न्या.कं.* पृ.२४६

[442] *प्र.पा.भा.न्या.कं.* पृ.२३६

[443] गुरुत्वधर्माधर्मभावना अतीन्द्रिया:;न केनचिदिन्द्रियेण गृह्यन्त इत्यर्थ.1 *न्या.कं.प्र,पा.भा.* पृ.२३६

[444] *तत्रैव*, पृ.२३६

रूपादिषु ये गुणा दृश्यन्ते ते पटादिषु अपि विद्यन्ते[445]। पाकजविषये कथितं यत् पार्थिवपरमाणवः पाकजा एवोत्पाद्यन्ते। जलादिपरमाणुषु न रूपस्योत्पत्तिः दृश्यते; अतः तत्र साधर्म्यस्य न व्यभिचारः[446]। वेगद्रवत्वयुक्तावयवद्वारा जनितजलरूपावयविनोः मध्ये कारणगुणपूर्वकत्वमवज्ञेयम्[447]। **कुसुमोद्गमे कारणगुणपूर्वकगुणानां निरूपणम्**–कुसुमोद्गमकारेण केवलं कारणगुणपूर्वकानामेव चर्चाया कथ्यते यत् कारणगुणशब्दे कर्मधारयत्वे सति द्रव्यकर्मणां द्वित्वादीनां च तादृशरूपेण वर्तमाने सति तद्रूपादीनां तत्र वैधर्म्यं कथ्यते। तत्र अन्तःषष्ठीसमासः स्वाश्रयस्य अपेक्षया कारणत्वम् आश्रित्य एव कथितम्[448] इति प्रतिपाद्यते। २.तन्तुरूपादीनां पटरूपे यथा कारणगुणपूर्वकत्वमुक्तं तस्मिन् कारणमुच्यते यत् रूपस्य रसोऽपि तदा कारणं स्यादित्यस्मात्कारणात् शंका निरस्यते अर्थात् सजातीया एव परस्परमपेक्ष्य उत्पाद्यन्ते[449]। अस्मिन् विषये अन्यदपि संक्षिप्तं विवेचितं परञ्च तत्र कन्दल्येवानुस्रियते। **१४.न्यायकन्दल्याम् अकारणगुणपूर्वकगुणानां निरूपणम्**-अकारणगुणपूर्वकाः ते गुणा विद्यन्ते येषामाश्रयीभूता नित्या वर्तन्ते[450]। प्रशस्तपादेन **"बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा अकारणगुणपूर्वकाः"**[451] गुणाः भाष्ये कथ्यन्ते। **कुसुमोद्गमे अकारणगुणपूर्वकगुणानां निरूपणम्**-अकारणगुणपूर्वकाः स्वाश्रयगुणैर्न जायन्ते यतो हि ते नित्यद्रव्याश्रिता, स्वसमवायिकारणविरहयुक्ता वर्तन्त[452]इति कंदलीवदेव। **१५.न्यायकन्दल्यां संयोगजगुणानां निरूपणम्**-आत्ममनसोः संयोगेन नवगुणाः उत्पाद्यन्ते ते च बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाः च विद्यन्त इति प्रतिपादतम्। १.भेर्य्याकाशयोः संयोगेन शब्दः, २.तुलमध्ये प्रचयसंयोगेन परिमाणम्३.'उत्तरसंयोगयुक्तशब्देन संयोगजसंयोगः, ३.वह्निसंयोगेन नैमित्तिकं द्रव्यम्, ५.द्रव्यैः सार्धं दिक्कालयोः संयोगेन परत्वापरत्वे,६.पार्थिवपरमाणुषु रूपरसगन्धस्पर्शाः वह्निरूपपाकजनितपाकजाः सन्तीति निरूपितम्। अतः एतेषां न पाकजत्वम् इति कन्दलीकारेणोक्तम्[453]। **कुसुमोद्गमे संयोगजगुणानां निरूपणम्**-१.कुसुमोद्गमे शब्दविषये कथ्यते यत् विभागजे शब्दे संयोगो न वर्ततेऽतः संयोगजत्वाभावः।२.तुलपरिमाणे समानसंख्यापरिमाणैः अवयवैः समारब्धे द्रव्ये सजातीयपरिमाणस्य अपेक्षाधिकपरिमाणस्योपलक्षणत्वं वर्तते,[454]अतः एतस्य शिथिल संयोगस्य

---

[445] नियमेन तद्धर्मानुविधानात्। *न्या.कं.प्र.पा.भा.* पृ.२३७

[446] *तत्रैव*, पृ.२३७

[447] एषां कारणगुणपूर्वकत्वाभिधानं स्वरूपकथनं न त्ववधारणार्थम्, नैमित्तिकद्रवत्ववेगयोरकारणपूर्वकस्यापि सम्भवात्। कारणगुणपूर्वकत्वमनयोर्वेगवदारब्धजलावयविसमवेतयोर्द्रष्टव्यम्। *न्या.कं.प्र.पा.भा,* पृ.२३८

[448] *टी.न्या.कं.* पृ.२४७

[449] अत्र प्रयोगः पटरूपादयः सजातीयांस्तन्तुरूपादीनपेक्ष्योत्पद्यन्ते तत्तारतम्यानुविधायित्वात् यद्य[द]पेक्ष्य न भवति तत्तारतम्यं नानुविधत्ते यथा रूपाद्यनपेक्षं कर्मेति व्यतिरेकी तर्कमाह। *टी.न्या.कं.* पृ.२४७

[450] *न्या.कं.प्र.पा.भा,* पृ.२३८

[451] *प्र.पा.भा.न्या.कं.* पृ.२३८

[452] *तत्रैव*, पृ.२४८

[453] *न्या.कं.प्र.पा.भा.* पृ.२३८-२३९

[454] *टी.न्या.कं.* पृ.२४८

उपलक्षणत्वं कथ्यते । संयोगजसंयोगरूपेण 'प्रचयः'[455] इति भिन्नरूपेण प्रतिपादितम् ।

**१६.न्यायकन्दल्यां कर्मजगुणानां निरूपणम्**-क्रियया ये उत्पाद्यन्ते गुणाः ते कर्मजाः । प्रथमसंयोगविभागयो जन्यत्वं क्रियया एव, तदनन्तरं संयोगेनोत्पद्यमानाः ते संयोगजाः तदितरेभ्यो विभागेभ्यो समुत्पन्नाः गुणा विभागजाः कथ्यन्ते[456] ।

**कुसुमोद्गमे कर्मजगुणानां निरूपणम्**-अस्मिन् विषये वोम्मिदेवेन न चर्चा विधीयते ।

**१७.न्यायकन्दल्यां विभागजगुणानां निरूपणम्**- प्रथमशब्दस्योत्पत्ति विभागेनापि वर्तते परञ्च उत्तरविभागो विभागेन एव जन्यत इति । एतस्माद् कारणाद् विभागज इति कथ्यते[457] ।

**कुसुमोद्गमे विभागजगुणानां निरूपणम्**- विभागजगुणविषये कथ्यते यत् अत्र 'विभाग' शब्दो नियमव्यावृत्यर्थं प्रयुक्तं यतो हि संयोगशब्दयोर्मध्यमेन शब्दस्योत्पत्ति दृश्यते ।

**१८.न्यायकन्दल्यां बुद्ध्यपेक्षानां गुणानां निरूपणम्**–परत्वापरत्वद्वित्वद्वि पृथक्त्वादौ बुद्धिरेव कारणमित्युद्दिश्यते । भाष्ये एते लिख्यन्ते-यथा-**"परत्वापरत्वद्वित्वद्विपृथक्त्वादयो बुद्ध्यपेक्षाः"** । 'आदि' पदेन त्रित्वत्रिपृथक्त्वादयोऽपि बोधनीया इति कंदलीकारेण नियोज्यते[458] ।

**कुसुमोद्गमे बुद्ध्यपेक्षानां गुणानां निरूपणम्**–वोम्मिदेवेन नात्र व्याख्या विहिता ।

**१९.न्यायकन्दल्यां समानजातीयारम्भकगुणानां निरूपणम्**-कन्दल्यां भाष्यनिर्दिष्टगुणविषयिणी या चर्चा पृथग्रूपेण कृता तस्यैव वर्णन करिष्यते । भाष्ये एते लिखिताः-**"रूपरसगन्धानुष्णस्पर्शशब्दपरिमाणैकत्वैक पृथक्त्वस्नेहाः समानजात्यारम्भकाः"**[459] । कारणानुरूपं कार्येषु गुणा दृश्यन्ते । एते रूपगुणतः स्नेहपर्यन्तं नव गुणा विद्यन्ते[460] । अत्र प्रत्येकस्य भिन्नं वर्णनं विहितम्[461] ।

**कुसुमोद्गमे समानजातीयारम्भकगुणानां निरूपणम्**- समानजात्यारम्भके संग्रहनिमित्ते स्नेहस्यापि कथनं विहितं वोम्मिदेवेन । समानजातीयेषु ज्ञानभिन्नगुणैः रूपादिभिः समानजात्यारम्भकत्वं निष्पाद्यते तत्र आत्मव्यतिरेकोऽपि[462]एषितव्य इति कुसुमोद्गमकारेण स्पष्टीकृतं च । स्नेहस्य समानजाती -यारम्भकत्वे कथ्यते यत् 'संग्रहकरणे' स्नेहगुणप्रयोगः स्याद्[463] इति ।

**२०.न्यायकन्दल्यां असमानजातीयारम्भकगुणानां निरूपणम्**-असमानजात्यारम्भकाः– सुखदुखेच्छा द्वेषाप्रयत्नाश्च पञ्चगुणाः असमानजात्यारम्भकाः कथ्यन्ते । मुखप्रफुल्लादिहेतुभिः सुखविषयकप्रतीतिरूपा नुमानप्रतीतिकारणाद् पितरि सुखस्योत्पत्तिर्जायत न त्वत्र सुखेन सुखोत्पत्तिरिति । अन्यच्च सुखमिच्छाया,दुखं

---

455 प्रचयः संयोगजः संयोगः संयोगकाण्डे वक्ष्यति। *टी.न्या.कं.* पृ.२४८

456 *तत्रैव*, पृ.२३९, संयोगविभागवेगाः कर्मजाः। *प्र.पा.भा.न्या.कं.* पृ.२३९

457 *न्या.कं.प्र,पा.भा.* पृ.२३९ ,शब्दोत्तरविभागौ विभागजौ । *प्र.पा.भा.न्या.कं.* पृ.२३९

458 एषामुत्पत्तौ निमित्तकारणं बुद्धिः। आदिशब्दात् त्रित्वत्रि पृथक्त्वादिपरिग्रहः। *न्या.कं.प्र.पा.भा.* पृ.२३९

459 *प्र.पा.भा.न्या.कं.* पृ.२४०

460 *न्या.कं.प्र.पा.भा.* पृ.२४०

461 *न्या.कं.प्र.पा.भा.* पृ.२४०

462 तद्व्यतिरेकेण-आत्मधर्मव्यतिरेकेण। *टी.न्या.कं.* पृ.२४९

463 *टी.न्या.कं.* पृ.२४८

द्वेषस्य,इच्छाद्वेषौ प्रयत्नस्य तथा च प्रयत्न: क्रियाया जनको वर्तते[464] । अनेन प्रकारेण विशिष्टं विश्लेषणं विहितमाचार्येण ।

**कुसुमोद्गमे असमानजातीयारम्भकगुणानां निरूपणम्-** असमानजात्यारम्भकेषु सुखेन अन्यत् सुखोत्पत्तेः चर्चा कंदलीकारेण यत्र क्रियते तत्र वोम्मिदेवेन उच्यते यत् यद्यपि सुखज्ञानेन नापरसुखोत्पत्तिःतथापि पूर्वभावित्वानियमेन इच्छायाः कारणं सुखं वक्तुं शक्यत[465] इत्युदभावना वोम्मिदेवस्येति । अनेन सुखप्राप्तौ इच्छाया: कारणत्वं शिडिलवोम्मिदेवेन कथ्यते ।

**२१.न्यायकन्दल्यां उभयजातीयारम्भकगुणानां निरूपणम्-**उभयजात्यारम्भका:–भाष्यनिर्दिष्ट संयोगतः संस्कारपर्यन्तदश गुणाः समानासमानाजात्यारम्भकाः कथिताः । भाष्ये यथा-**"संयोग विभागसंख्या गुरुत्वद्रवत्वोष्णस्पर्शज्ञानधर्माधर्मसंस्कारा: समानासमान जातीयारम्भका:"**[466] । संयोगेन कार्यद्रव्यं प्रारभ्यते । १.संयोग:-प्रथमं तु संयोगेन उत्तरदेशसंयोगः,द्वितीयम् अवयव द्वयमाध्यमेन तुलस्य महत्परिमाणं च साध्यत इति । विभागेन विभागजविभागः तथा च विजातीयविभागज: शब्दोऽपि उत्पाद्यत इति निर्देशः । २.धर्म:-धर्मेण सजातीयधर्मो विजातीयं सुखं च जन्येते,३.अधर्म:-अधर्ममाध्यमेन अधर्मदु:खयो यथाक्रममुत्पत्तिर्निर्दिश्यते । ४.संस्कार:-संस्कारेणापि संस्कार: सजातीय:,विजातीया स्मृतिश्च प्रारभ्यते । अनेन प्रकारेण भाष्यनिर्दिष्टगुणानां व्याख्यानं विशदतया आचार्येण प्रतिपादितम्[467] ।

**कुसुमोद्गमे उभयजातीयारम्भकगुणानां निरूपणम्-**ज्ञानात् ज्ञानस्योत्पत्तौ उक्तं लिङ्गज्ञानात् लिङ्गिज्ञानमिति । धर्मात् धर्मस्योत्पत्तौ दृष्टान्तो उपस्थाप्यते तद्यथा–**"अयावपज: धनं वादृष्टपर्यन्तं शिवपूजाविधेः फलम् "**[468]स्नेहगुणस्यापि कथनं स्यादिति वोम्मिदेवेन वैभिन्यम् यथा स्नेहे अवयवस्नेहाद् अवयविस्नेहोऽवलोक्यते;अन्यच्च मङ्ग्रहकार्यारम्भेऽपि सजातीयरूपेणोत्पादकत्वकथने न विरोध[469] इति । अनया रीत्या वोम्मिदेवेन अवयवस्नेहे अवयविस्नेहो तथा च स्नेहगुणस्य पृथक्तया उभयजातीयारम्भको नियोजित:। ।

**२२.न्यायकन्दल्यां स्वाश्रयसमवेतारम्भकगुणानां निर्देश:-**भाष्ये एते गुणा: **"बुद्धिसुखदु:खेच्छा द्वेषभावनाशब्दा: स्वाश्रयसमवेतारम्भका:"**[470]इति । एतेषु सुखादयो यत्र स्वयं वर्तन्ते,तत्रैव स्वकार्यान् आरभन्ते । बुद्धे: स्वाश्रयेभ्यो भिन्नपदार्थेषु अपि द्वित्वसंख्यादिषु कार्यत्वं वर्तते । आत्मनो विशेषगुणानां तु उत्पत्ति: बुद्धयादिषु समवायरूपेण जायत इति[471] ।

**कुसुमोद्गमे स्वाश्रयसमवेतारम्भकगुणानां निर्देश:-**विहितनिषिद्धरूपप्रवृत्तिप्रयत्नेन स्वाश्रये धर्माधर्मयो:

---

[464] तदसारम्,पुत्रस्य हि मुखप्रसादादिना सुखोत्पत्तिमनुमीय पश्चात् पितरि सुखं जायते। तत्रास्य पुत्रस्य सुखं न कारणम्,तस्यैतावन्तं कालमनवस्थानात्। किन्तु लैङ्गिकी तद्विषया प्रतीति: कारणमिति प्रक्रिया । *न्या.कं.प्र.पा.भा.* पृ.२४१

[465] *टी.न्या.कं.* पृ.२५०

[466] *प्र.पा.भा.न्या.कं.* पृ.२४१

[467] *न्या.कं.* पृ.२४३-२४४

[468] *टी.न्या.कं.* पृ. २५०

[469] अत्र स्नेहोऽप्युपसङ्ख्येय:, अवयवस्नेहादवयविस्नेह:,समानजातीयेऽपि संग्रहारम्भे न विरोध.1 *तत्रैव,* पृ.२५०

[470] *प्र.पा.भा.न्या.कं.* पृ.२४२

[471] *न्या.कं.प्र.पा.भा.* पृ.२४२

आरम्भकत्वे न विरोध इति पृथक्तस्या कथितम्[472] । **२३.न्यायकन्दल्यां परत्रारम्भकगुणानां निर्देश:-** रूपादीनां सर्वेषां स्वाश्रयेषु भिन्नरूपेण एव कार्याणि विद्यन्ते अर्थात् पराश्रये कार्याणि समुत्पाद्यन्ते । ते च- **"रूपरसगन्धस्पर्शपरिमाण स्नेहप्रयत्ना: परत्रारम्भका:"**[473] । अवयवरूपादिभि: अवयवेषु एव रूपं संपाद्यते । समवायरूपेण प्रयत्न: आत्मनि वर्तते परश्च तेन हस्तपादादिषु कार्याणि संचाल्यन्ते[474] । **कुसुमोद्गमे परत्रारम्भकगुणानां निर्देश:-**अत्र कुसुमोद्गमकारेण न किञ्चिदपि चर्चितम् । **२४.न्यायकन्दल्याम् उभयत्रारम्भकगुणानां निर्देश:-**भाष्योक्तनवगुणै: उभयत्र कार्यारम्भ: निर्दिश्यते[475] इति । अनेन प्रकारेण कारणेषु वर्तमानै: गुरूत्वद्रवत्ववेगस्नेहै: स्वाश्रयीभूतकारणेषु यथाक्रमं गुरुत्वद्रवत्व वेगस्नेहरूपकार्याणि जन्यन्ते; परश्च तै: क्रिया स्वाश्रयेषु एव उत्पाद्यन्त इति । धर्माधर्माभ्यां स्वाश्रये सुखदु:खे तथा च परत्र अग्निप्रभृतिषु उर्ध्वज्वलनादिक्रिया जन्यन्ते इति प्रतिपादितं भाष्यकारेणेति निर्दिष्टम् । [476] **कुसुमोद्गमे उभयत्रारम्भकगुणानां निर्देश:-**उभयात्रारम्भकत्वे स्नेहविषये कथ्यते यत् स्नेह: संग्रहहेतुरिति । धर्माधर्मयो: हेतुत्वेन विहितनिषिद्धविषयक: प्रयत्न: कथ्यते । अत: प्रयत्न उभयथा ज्ञेय इति यथोक्तं कुसुमोद्गमकारेण-**"क्रिया धर्माधर्महेतुर्हितनिषिद्धविषय: प्रयत्न: उभयसख्येयो विशिष्यत इति संयोगत्वान्तरजातिभेदेन वक्ष्यते कर्मकाण्डे"** [477] **२४.न्यायकन्दल्यां क्रियागुणानां निरूपणम्-**कन्दल्यां गुणजनितक्रियाविषये कथ्यते यत् गुरूत्वेन पतनम्, द्रवत्वेन स्यन्दनम्, वेगेन शरस: उत्तरक्रिया, प्रयत्नेन शरीरक्रिया, धर्माधर्माभ्यामुर्ध्वज्वलनादिक्रिया च जायन्त इति । नोदनाधिघातरूपविशेषसंयोगेनापि क्रिया उत्पाद्यत इत्यपि तत्र निर्दिष्टम्[478] । **कुसुमोद्गमे क्रियागुणानां निरूपणम्-** प्रकरणेऽस्मिन् न विशिष्टा चर्चा विधीयत इति । **२५.न्यायकन्दल्याम् असमवायिकारणत्वरूपेण गुणनिरूपणम्-**कंदलीकारेण असमवायिकारणत्वरूपेण भाष्योक्त रूपत: शब्दपर्यन्तं नवगुणा: असमवायिकारणभूता: विराजन्ते । **"रूपरसगन्धानुष्णस्पर्शसंख्या-परिमाणैकपृथक्त्वस्नेहशब्दानामसमवायिकारणत्वम्"**[479] असमवायिकारणस्य प्रकारद्वयं प्रथमं समवायिकारणानुयोगिक: समवाय:,२.अपरं समवायिकारणसमवेत-तदनुयोगिक: समवायश्च कथ्यते । असमवायिकारणस्य लक्षणमपि दीयते[480] । संख्यापरिमाणप्रभृतीनां असमवायिकारणत्वं तत्र विशदं निर्दिष्टम्[481]इति । एवमेव स्वसमवायिकारणरूपाश्रये द्वित्वद्विपृथक्त्वयोरपि असमवायिकारणत्वं

---

[472] *टी.न्या.कं.* पृ.२५१

[473] *प्र. पा,* पृ २४२

[474] *न्या.कं.प्र.पा.भा.* पृ.२४२-२४३

[475] संयोगविभागसंख्यैक पृथक्त्वगुरुत्वद्रवत्ववेगधर्माधर्मास्तूभयत्रारम्भका.1 *प्र.पा.भा.न्या.कं.* पृ.२४३

[476] *न्या.कं.प्र.पा.भा.* पृ.२४३-२४४

[477] *कु.* पृ.२५१

[478] *या.कं.प्र .पा.भा.* पृ.२४४

[479] *प्र.पा.भ.न्या.कं.* पृ.२४४

[480] समवायिकारणप्रत्यासन्नावधृतसामर्थ्यमसमवायिकारणम्। *न्या.कं.प्र.पा.भा.* पृ.२४४

[481] *न्या.क.प्र.पा.भा.* पृ.२४५

कथ्यते[482] । **कुसुमोद्गमे असमवायिकारणत्वरूपेण गुणनिरूपणम्**-धर्माधर्मयो: आत्मनो विशेषगुणोत्पादने असामर्थ्यं कंदलीकारेण प्रस्तुतम्,तत्रैव तं भावं स्वीकृत्य एव अनुमानवाक्यप्रयोगं कथयते[483] । अनेन प्रकारेण ज्ञानादीनाम् असमवायिकारणरूपेण न सुखादयो वर्तन्त इति । तत्र धर्माधर्मौ श्रुतिस्मृतिरपि निमित्तरूपेण प्रदर्श्यन्ते तद्यथा लिखितम्-**"तथाऽरूणया क्रीणाति, वायव्यंगश्वेतमालभेत कपिलां न ताडयेदित्यादि श्रुतिस्मृतिबलाद् भूयस्य धर्माधर्मोत्पत्तौ निमित्त्वादस्यापि दर्शनाविरोध:"**इति[484]अर्थात् श्रुतिस्मृत्योरपि कारणत्वं विद्यत इति कंदलीकारतो भिन्नं प्रतिपादितम् ।

**२६.न्यायकन्दल्यां गुणानां निमित्तकारणत्वम्-** बुद्धिप्रभृतीनां नवगुणानां निमित्तकारणत्वं साधर्म्यरूपेण कथ्यते[485] । भाष्ये यथा- **"बुद्धिसुखदु:खेच्छाद्वेषप्रयत्नधर्माधर्मभावनानां निमित्तकारणत्वम्"**[486] । **कुसुमोद्गमे गुणानां निमित्तकारणत्वम्**-कुसुमोद्गमे बुद्धिप्रभृतीनां निमित्तकारणत्वप्रदर्शने आत्मधर्मं प्रति वर्तमानानां द्रव्यादीनां कारणत्वे बुद्ध्यादीनां हि कारणत्वं 'निमित्तकारणत्वमेव' इति शब्देन इष्यते । अन्यदपि कार्यगुणस्य कार्यगुणत्वं वर्तत एवासमवायिकारणम् ।[487]

**२७.न्यायकन्दल्यां गुणानाम् उभयथाकारणत्वम्-** भाष्योक्तसंयोगतो वेगपर्यन्तं गुणानामुभयथा कारणत्वं वर्तते । संयोगस्य असमवायिकारणत्वं निमित्तकारणत्वं च दृष्टान्तमाध्यमेन तत्र प्रस्तूयते[488] । १.यथा भेर्याकाशयो: संयोगस्य शब्देऽसमवायिकारणं तद्वदेव भेर्याकाशसंयोग: शब्दे निमित्तकारणत्वेन वर्तते । २.विभागेऽपि वंशदलयोर्विभागेन शब्दोत्पत्ति:,तत्र विभाग: शब्दे निमित्तकारणं तथा च वंशाकाशयो: संयोग: शब्देऽसमवायिकारणत्वेन अभिधीयते[489] । **कुसुमोद्गमे गुणानां उभयथाकारणत्वम्-** शिडिलेन प्रकरणस्यास्य व्याख्यानं न प्रस्तुतम् ।

**२८.न्यायकन्दल्यां गुणानामकार्यत्वनिरूपणम्**-परत्वादीनां भाष्यनिर्दिष्टानां चतुर्णां गुणानां कारणत्रयमपि नोपपद्यते । भाष्ये ते गुणा: यथा- **"परत्वापरत्वद्वित्वद्विपृथक्त्वादीनां कारणत्वम्** आदिशब्देन तत्र द्वित्वद्विपृथक्त्वयो ग्रहणमपि करणीय इति निर्दिष्टम् । **कुसुमोद्गमे गुणानामकार्यत्वनिरूपणम्**-अस्य प्रकरणस्य व्याख्यानं न प्रस्तुतम् ।

**२९.न्यायकन्दल्याम् अव्याप्यवृत्तिगुणानां निरूपणम्**-एते गुणा: भाष्ये यथा-**"संयोगविभागशब्दात्म विशेषगुणानां प्रदेशवृत्तित्वम्"**[490]अर्थात् एतेषां स्वाश्रये सत्ता विद्यते परञ्च न व्याप्यत्वरूपेण तेषां स्थितिरिति । क्रियाप्रदेशे धर्मस्यासत्तया अपि धर्मादय आत्मनि विद्यन्ते । विषयोऽयं दृष्टान्तमाध्यमेन

---

[482]संख्या पृथक्त्वयोरुभयथा कारणत्वम्,कारणवर्त्तिनोस्तयो: कार्ये यथासंख्यमेकत्वैक पृथक्त्वारम्भकत्वात्, स्वाश्रये द्वित्वदि पृथक्त्वजनकत्वात् । *न्या.कं.प्र,पा.भा.* पृ.२४६

[483]अत्र प्रयोग: बुद्धादयो न धर्माधर्मसमवायिकारणका: आत्मगुणत्वात् प्रमेयत्वाद्वा अधर्माद्दु:खवद्धर्मात्सुख-वच्चेति। *टी. न्या.कं.* पृ.२५२

[484] *तत्रैव,* पृ.२५३

[485] *न्या.कं.प्र,पा,भ.* पृ.२४६

[486]*प्र.पा.भा.न्या.कं.* पृ.२४६

[487] *टी.न्या.कं.* पृ.२५८

[488]"संयोगविभागोष्णस्पर्शगुरुत्वद्रवत्ववेगानामुभयथा कारणत्वम् *प्र.पा.भा.न्या.कं.* पृ.२४६

[489] *न्या.कं.प्र.पा.भा.* पृ.२४६

[490] *प्र.पा.भा.न्या.कं.* पृ.२४७

उपस्थाप्यते यत् यथा वस्त्रस्यैकान्ते चाण्डालस्य स्पर्शेन अन्यत्रैवर्णिकस्य कृते प्रत्यवाय: क्रियते। तद्वदत्रापि अवगन्तव्यमिति निर्दिश्यते कंदलीकारेण[491]। ।

**कुसुमोद्गमे अव्याप्यवृत्तिगुणानां निरूपणम्-** तत्र कन्दल्येवानुस्रियते[492] । नात्र विशेष:प्रतिपादित: ।

**३०.न्यायकन्दल्याम् आश्रयव्यापित्व-यावद्द्रव्यभावित्व-अयावद्द्रव्यभावित्वगुणानां च निर्देश:-** १.पूर्वोक्तेभ्यो भिन्ना ये गुणा: तेषाम् आश्रयव्याप्यत्वं कथ्यते,न तु संयोगादिवत् अव्याप्यवृत्तित्वं प्रदेशवृत्तित्वं वा इति । यथा च उक्तम्-२.द्रव्यं यावत् येषां गुणानां स्थिति: ते यावद्द्रव्यभावित्वेन कथ्यन्त इति व्याख्यातम्[493] । भाष्ये यथा-**अपाकजरूपस्पर्शपरिमाणैकपृथक्त्व सांसिद्धिकद्रवत्वगुरुत्वस्नेहानां यावद्द्रव्यभावित्वम्**"[494]२.अपाकजरूपादिगुणानां यावद्द्रव्यवृत्तित्वं साधर्म्यं विद्यते। अत्र अपाकजशब्दप्रयोगेणा- वबुध्यते यत् आश्रयकालं यावत् एते न विद्यन्त इति[495]अर्थात् वर्तमानेऽपि आश्रये एते नश्यन्तीति प्रतिपादितम् ।

**कुसुमोद्गमे आश्रयव्यापित्व-यावद्द्रव्यभावित्व-अयावद्द्रव्यभावित्वगुणानां च निर्देश:-**केवलम् अयावद्द्रव्यभावित्वप्रकरणस्य चर्चात्र विद्यते । क्वचित् ज्वालादिषु संयोगस्य यावद्द्रव्य-भावित्वमपि संभाव्यते[496] । अनेन प्रकारेण गुणानां साधर्म्यवैधर्म्यप्रकरणं संक्षिप्तरीत्याचार्येण वर्णितमिति। भाष्यकारेण सूचनामात्रं विषयोऽयं वर्णित:,परञ्च श्रीधरेण विशदा व्याख्या प्रस्तुता । कुसुमोद्गमकारेणापि सारगर्भितं विवरणं प्रस्तुतम्। न केवलं व्याख्यामात्रम् अपितु आवश्यकतानुगुणा नूतना कल्पनापि विहिता।

**चतुर्थाध्याये गुणप्रकरणम्**-गुणानां साधर्म्यवैधर्म्यनिरूपणानन्तरं रूपादिगुणेषु आदौ रूपगुणस्य वर्णनं भाष्यकारेण क्रियते, यतो हि गुणगणनाक्रमे तस्यैव प्रथम: क्रम इति ।

**न्यायकंदल्यां रूपगुणनिरूपणम्–** १.कंदलीकारेणापि रूपत्वादय: असाधारणधर्मत्वेनोच्यन्ते । नीलपीतादिषु सर्वेषु रूपेषु 'इदं रूपमिति' प्रतीतिर्जायते,अत: तत्र तस्य अनुवृत्तिप्रत्ययो विधीयते[497] । २.चक्षुग्रहणमात्रेणैव नीलादिरूपेषु 'इदं नीलमिति' प्रतीति: न जायते। ३.अन्यदपि सर्वेषु रूपेषु चक्षुग्राह्यत्वं विद्यते,अनेन तत्र जातिरपि सिद्ध्यत इति। अनैनेव रसव्याख्यापि स्यादिति उच्यते। तत्र गुणानाम - पेक्षया रूपस्य चक्षुमात्रग्राह्यत्वमित्युच्यते। अन्यच्च रूपत्वजाते: सत्त्वकारणादेव रूपत्वजातिभ्यो रूपस्य भिन्नत्वं कथ्यते । एतस्य पृथिव्युदकज्वलनवृत्ति: विद्यते । आश्रयद्रव्येषु वर्तमानानां क्रियागुण - सामान्यानामपि ज्ञानं रूपमाध्यमेन एव जायते। जलादिषु रूपस्य नित्यत्वं तथा च अनित्यत्वं पार्थिव - परमाणुषु अङ्गीक्रियते। आश्रयविनाशादेव रूपाणां नाशो जायत इति प्रतिपादितम्। रूपस्योत्पत्ति: कारणगुणप्रक्रमेणैव तत्र स्वीकृता वर्तते[498] । तत्र प्रतिविधीयते यत् आश्रयीभूतद्रव्यस्य नाशकाले हि न तद्वद्रूपस्य नाश: । मुदगरादीनाम् आघातानन्तरं कार्यद्रव्येषु क्रिया,तया अवयवेषु विभाग:,अनेनैव क्रमेण

---

491 यथा वस्त्रस्यैकान्ते चाण्डालस्पर्शोऽपरान्तसंयुक्तस्य त्रैवर्णिकस्य प्रत्यवायहेतुस्तथेदमपि द्रष्टव्यम्। *न्या.कं.प्र.पा.भा.* पृ.२४८

492 यद्यप्याकाशस्य देशा न सन्ति निरवयवत्वात् तथापि प्रदेशवृत्तिसंयोगोपाधिना देशव्यवहारो द्रष्टव्य:। *टी.न्या.कं.* पृ.२५६

493 *न्या.कं.प्र.पा.भा.* पृ,२४९

494 *प्र.पा.भा.न्या.कं.* पृ.२४९

495 यावदाश्रयद्रव्यं तावद्रूपादयो विद्यन्ते। पाकजरूपादय: सत्येवाश्रये नश्यन्तीत्यपाकजग्रहणम्। *न्या.कं.प्र.पा.भा.* पृ.२४९

496 *टी.न्या.कं.* पृ.२५७

497 *न्या.कं.प्र.पा.भा.* पृ.२४९-२५०

498 *न्या.कं.प्र.पा.भा.* पृ.२५१-२५२

अवयवोत्पादकसंयोग- नाशेन अवयवी नाश्यत इति साध्यते[499] । अन्यदपि तत्र कथ्यते यत्–यथा अवयवसंयोग: अवयविनां रूपेषु न कारणं तदवदेव कपालादिगतरूपस्यापि न वर्तत कारणत्वमिति प्रतिपाद्यते। अतो नावयवसंयोगस्य अवयविरूपविनाशे कारणत्वं पूर्वं द्रव्यनाशः तदनन्तरं तस्य रूपादीनां नाशो जायत इति क्रमः तत्र अङ्गीकृत:[500] । द्वयणुकरूपस्योत्पत्ति द्वयणुकजन्मान्तरमेव जायते,यतो हि आश्रयं विना न कार्यस्योत्पत्ति: मन्यते। अतः तयोर्न अभेद:[501] । एतदनन्तरं रूपगुणयो: अभिन्नत्वविषये कथ्यते यत् यस्य नाशाद् न अपर नाशः तथा च यस्योत्पत्यनन्तरं नापरस्योत्पत्तिरिति सिद्धिं विना वस्तुनोः अभिन्नत्वं न संभवतीति प्रतिपाद्यते[502] ।सर्वेषु कालेषु गुणस्य द्रव्याश्रयत्वात् तस्य पृथक् स्थितिर्न परिलक्ष्यते । अयमेव वस्तूनां स्वभावः,अतो गुरुचरणैर्विरुद्धं न कल्पनीयमिति समाधानं विहितम्[503] । अनेन प्रकारेण कथयितुं शक्यते यत् द्रव्यगुणयोर्मध्ये न अभेद: । द्वयणुकाद् द्वयणुकरूपस्योत्पत्ति अङ्गीक्रियते ।

**कुसुमोद्गमे रूपगुणनिरूपणम्–** कुसुमोद्गमकारेण शब्दप्रयोगस्य स्पष्टीकरणं प्रस्तूयते । 'सामान्य'शब्दग्रहणात् सामान्यादीनां त्रयाणां तथा च संख्यादिभ्यो व्यावृत्यर्थं पृथिव्युदकज्वलनवृतिरिति कथ्यते[504] । अन्यदपि रूपेण कदाचित् समवायेन,एकार्थसमवायेन तथा च समवेतसमवायेन रूपस्योपलब्धौ कारणत्वं कथ्यते । पुरुषार्थत्वहेतुनापि रूपेण द्रव्याद्युपलम्भ: कार्यत इति वोम्मिदेवेन प्रतिपादितम्[505] । अन्यदपि उच्यते यत् अनाश्रयस्य न कदापि ग्रहणं विद्यते यतो हि कार्येणैव कारणस्यानुमानमाध्यमेन कार्यकारणभावो गृह्यते । द्वयणुकस्य स्वस्वरूपाश्रयत्वं अनुमानवाक्येन कंदलीकारानुगुणमेव स्थापयति वोम्मिदेवः तद्यथा- **"तदयं प्रमाणार्थः द्वयणुकं स्वरूपाद व्यतिरिक्तं तदाश्रयत्वात् बदरादिवत्कुण्डमिति "**[506]अर्थात् रूपद्रव्ययोर्मध्ये बदरकुण्डवत् आश्रयाश्रयिभावो विद्यत इति कंदलीकारेण आक्षेपरूपेण यन्मतमुपस्थापितम् उभयोरभेदरूपेण तत् पिठरपाकवादीनामिति प्रतिपादितम् ।

**२.न्यायकन्दल्यां रसगुणनिरूपणम्–** श्रीधरेणोच्यते यत् एकेन्द्रियग्राह्यप्रत्यक्षयोग्य: तथा च द्रव्यवृत्तिगुणानामेव निरूपणं क्रियते । १.रसगन्धयो: व्याख्या समाना एव विद्यते,परञ्च रसस्य वृत्ति द्रव्यद्वये तथा च गन्धस्य एकद्रव्ये वृत्तिरिति प्रतिपाद्यते[507] । २.रसस्य ग्रहणं केवलं रसनेन्द्रियेण एव क्रियत इति सूच्यते[508] । ३.एतदनन्तरं जलस्य उपयोगित्वं जीवनपुष्टिबलारोग्याणामर्थे प्रतिपादयति तद्यथा–

---

[499] मुद्गराभिघातात् तावदवयवक्रियाविभागादिक्रमेण द्रव्यारम्भकसंयोगनिवृत्तौ तदारब्धस्य द्रव्यस्य विनाशः कारणविनाशात्। *तत्रैव*, पृ. २५२

[500] *तत्रैव*, पृ.२५२-२५३

[501] अथ तद् द्वयणुके आरभते, अविद्यमानस्य स्वाश्रयत्वायोगादुत्पन्ने द्वयणुके पश्चात्तत्र रूपोत्पत्तिरित्यवश्यमभ्युपेतव्यम्, निराश्रयस्य कार्यस्यानुत्पादात्। *तत्रैव*, पृ.२५३

[502] यस्य चोत्पत्तौ यस्यानुत्पत्तिर्यन्निवृत्तौ चान्वृत्तिर्न तयोस्तादात्म्यमिति प्रक्रियेयम्। *तत्रैव*, पृ.२५३-२५४

[503] न चात्यन्तभेदे पृथगुपलम्भप्रसङ्गः, सर्वदा रूपस्य द्रव्याश्रितत्वात्। एतदेव कथम् ? वस्तुस्वाभाव्यादिति कृतं गुरुप्रतिकूलवादेन। *तत्रैव*, पृ.२५४

[504] *टी.*, *पृ. २५१*

[505] *टी. न्या. क.*, *पृ.२५१*

[506] *कुसुम.*पृ. २६१

[507] *तत्रैव*, पृ.२५४

[508] गुणेषु मध्ये रस एव रसनग्राह्यो रसनग्राह्य एते रस:। *तत्रैव*, पृ.२५४

"जीवनं प्राणधारणम्, पुष्टिरवयवोपचयः, बलमुत्साहविशेषः,आरोग्यं रोगाभाव,एषां रसो निमितम् । एतच्च सर्वं वैद्यशास्त्रादव गन्तव्यम्"[509] ४.जलपरमाणुषु रसस्य नित्यत्वं तथा च पृथिवीपरमाणुषु रसस्य अनित्यत्वं विद्यते। ५.रसस्य नाश: आश्रयविनाशादेव विधीयते[510] ।

**कुसुमोद्गमे रसगुणनिरूपणम्**- कुसुमोदगमकारेण अतिसंक्षिप्ततया केवलं रसो निमित्तमित्यस्यैव व्याख्या क्रियते । कंदल्यां जीवनारोग्यप्रभृतीनां वृद्धिरूपेण रसस्य निमित्तत्वं कथ्यते परञ्च कुसुमोद्गमकारेण तद्विपर्यये मरणत्वादौ अपि रसस्यैव निमित्तत्वं कथ्यते तद्यथा- "मरणकार्श्यबलहानिरोगाणामपि रसनिमित्तत्वात् ।[511]नित्यनित्यत्वयोः शब्दयोः भावप्राधान्यत्वं द्रष्टव्यमित्यपि सूचितं कुसुमोद्गमकारेण । अत्र रसस्य हानिरपि सूच्यते ।

**न्यायकंदल्यां गन्धगुणनिरूपणम्**–कन्दलीकारेणापि प्रतिपाद्यते यत् गन्धस्य ग्रहणं घ्राणेन्द्रियेण एव जायते । यस्य गुणस्य ग्रहणं घ्राणजप्रत्यक्षेण एव जायते सैव गन्ध इति प्रतिपादितम्[512] । अस्मिन्नेव सन्दर्भे कथ्यते यत् गन्धस्यैव स्वाभाविकनियमानुगुणम् गन्धस्य घ्राणजप्रत्यक्षेण गृह्यते, न च अन्यगुण इति । अतः प्रत्यक्षानुमानसिद्धविषयेषु न प्रतिषेधो विधातव्य इति कंदलीकारेण निर्दिश्यते[513] ।अन्यत् सर्वभाष्यवदेव प्रतिपाद्यते ।

**कुसुमोद्गमे गन्धगुणनिरूपणम्**- अस्य प्रकरणस्यापि वोम्मिदेवेन संक्षिप्ता व्याख्या क्रियते । केवलं गन्धभेदविषयकं किञ्चिद् निरूप्यते । असुरभिगन्धः केवलं सुरभेः अभावमात्रमेव न विद्यत इत्युपस्था -पयति कुसुमोद्गमकारः तद्यथा–"असुरभिरिति सुरभिविपरीतो भाव **एवानुभवसिद्धः अधर्मवत् । न तु सौरभ्याभावमात्रमिति भावः**"[514]अर्थात् सुरभिगन्धात् विपरीतभावत्वेन असुरभिगन्धो वर्ण्यते । एतदनन्तरं कथ्यते यत् गन्धस्य गणना विशेष गुणेषु वर्तत इति । **न्यायकन्दल्यां स्पर्शगुणनिरूपणम्**- न्यायकन्दल्यां यत्र कुत्रचिद् तत्र वैशिष्ट्यं प्रतिपादितं तदेव लिख्यते । तत्र स्पर्शस्य रूपानुविधायित्वमुच्यते । अत्र कन्दलीकारः तस्य व्युत्पत्तिं प्रदर्शयति–**"रूपमनुविधातुं शीलमस्य"**[515]अर्थात् यत्र रूपं तत्र अवश्यमेव स्पर्श इति प्रतिपाद्यते । अन्यच्च मृदुत्वं काठिन्यत्वं च न पृथक् स्पर्शः,अपितु संयोगविशेष एव यतो हि नेत्रत्वचोः इन्द्रियद्वयमाध्यमेन ग्रहणं जायत इति[516] । स्पर्शस्य नित्यानित्यत्वे पूर्ववदेव सूचिते अर्थात् रसस्य ग्रहणमुच्यते न तु गन्धस्येति कन्दलीकारेण कथ्यते;यतो हि गन्धस्य नित्यत्वं न विद्यते[517] ।

**कुसुमोद्गमे स्पर्शगुणनिरूपणम्**–कुसुमोद्गमकारेण'रूपमनुविधातुं शीलं यस्य' इत्यत्र बहुव्रीहिसमासस्य

---

509 *क.* २५५

510 यथा रूपं पार्थिवपरमाणुष्वग्निसंयोगादुत्पत्तिविनाशवत् सलिलपरमाणुषु नित्यं कार्ये कारणगुणपूर्वकमाश्रयविनाशाद्विनश्यति, तथा रसोऽपि । *तत्रैव,* पृ.२५५

511 *कुसुम* पृ.२६२

512 गन्धो घ्राणग्राह्य:। *तत्रैव.* पृ.२५५

513 ईदृशो गन्धस्य स्वभावो यदयमेव घ्राणेनैकेन नान्यः;दृष्टानुमितानां नियोगप्रतिषेधाभावाद् । *न्या.कं.प्र.पा.भा.* पृ.२५५

514 *टी.न्या.कं.*पृ. २६३

515 *तत्रैव,* पृ.२५६

516 काठिन्यप्रशिथिलादयस्तु संयोगविशेषा न स्पर्शान्तरम्, उभयेन्द्रियग्राह्यत्वात्। *न्या.कं.प्र.पा.भा. पृ.* २५७

517 *तत्रैव,* पृ.२५७

प्रयोगः सूच्यते । अन्यच्च स्पर्शस्य विशेषगुणत्वमपि संख्यासाधारण्यस्य वैधर्म्यमाध्यमेन निरूपितम् । कुसुमोद्गमकारेण अत्र न किञ्चिद् विशिष्टं प्रतिपादितमिति ।

**न्यायकन्दल्यां संख्यागुणनिरूपणम्-** न्यायकन्दलीकारेण संख्यारूपविषये विशदं विचार्यते । तत्रोच्यते यत् यद्यपि सर्वे जानन्ति संख्यां परञ्च अत्यन्तदुष्टदर्शनकारणाद् येषां बुद्धयो विप्रतिपद्यन्ते; तान् प्रति 'एकादि' इति संदर्भेण संख्या वर्णिता[518] । संख्याया: लक्षणे 'व्यवहार:' इति शब्दस्यार्थो ज्ञानं शब्दप्रयोगश्च कथ्यते । अत्र दण्डीपुरूषस्य दृष्टान्तमाध्यमेन संख्याया: विशिष्टप्रतीति: सूच्यते । यथा दण्डीपुरूष: इत्यत्र 'दण्ड:' इति विशेषणयुक्ता विशेष्यप्रतीति: तथैव एकं द्वे त्रीणि इत्यादय: प्रतीतय: संख्यारूपविशेषणै जायन्त इति । एतदनन्तरम् आक्षेपसमाधानपूर्वकं एकं द्वे इत्यादिसंख्याप्रतीतिनां रूपादिविषयकत्वं बौद्धमतनिरास करणानन्तरं साध्यते[519] । अन्यच्च कथ्यते यत् प्रत्यासन्नवृक्षेषु एकत्वा - दिना प्रतीतेरभावे सत्यपि रूपं तु तत्र गृह्यते । अन्यदपि कथ्यते– **"एवंरूपादिव्यतिरेकोऽपि व्याख्यात:, दूरे रूपस्याग्रहणेऽपि द्रव्यप्रत्ययदर्शनात्"**[520] । संख्या रूपादिभ्योऽपि भिन्ना वर्तते अर्थात् एतेभ्यो पृथग्गुण: । **संख्या-भेदा:-**सलिलादिपरमाणुनां रूपरसादीनां नित्यत्वं तद्वत् संख्यायां वर्तमाना एकद्रव्या संख्यापि नित्या । अपरश्च अनित्यसलिलादिषु रूपरसादीनाम् अनित्यत्ववत् विद्यते । अन्यच्च कार्यरूपजलादिषु वर्तमाना: संख्या आश्रयविनाशाद् कारणगुणप्रक्रमात् वा नाश्यते तदवत् कार्यरूपजलादिषु वर्तमाना संख्यापि नाश्यत इति व्याख्यातम्[521] । द्वित्वादिका इति शब्दस्य 'द्वित्वमादिर्यस्या:' तथा च परार्द्धम् इति शब्दस्य 'परार्द्धोऽन्तं यस्या:' इति व्युत्पत्ति: दृश्यते अर्थात् इयत्ता व्यवहारसमाप्ति यत्र वर्तत इति कथ्यते । 'यस्मिन्नियत्ताव्यवहार: समाप्यते स परार्ध:'इयं संख्या अनेकद्रव्येषु वर्तत इति भाष्यवदेव उक्तम् । एकद्रव्ये एकत्वसंख्या समवेत-रूपेण विद्यते परञ्च अनेकद्रव्येषु अयम् अपेक्षाबुद्ध्या जन्यते । कंदलीकारमते अनेकद्रव्यासंख्या केवलम् अनेकैकत्वानां समूहमात्रं न विद्यते;अपितु अनेकैकत्वेभ्यो उत्पद्यमाना एकेत्वेभ्यो भिन्ना स्वतन्त्रा संख्या इति स्पष्टीकृतम् । यथा च लिखति-**"न त्वेकैकगुणसमुच्चयमात्रत्व- मेवमित्यर्थ:**[522]**"** अनेकशब्देन द्वे तदधिका संख्या च गृह्यते । विशेषणज्ञानं विशेष्यज्ञानस्य कारणं विद्यते;अत: संख्यारूप-एकत्वाभ्यां युक्तविशेषणस्य जातिरूपैकत्वेन सह चक्षुषां संयुक्तसमवेतसमवायसम्बन्ध एव कथित: । जातिरूपैकत्वस्योत्पत्त्यन्तरं सामान्यस्य तदाश्रयेन सह सम्बन्ध: तज्ज्ञानेन च 'अयमेक:,अयमेक:, इति बुद्धि जायते । एकस्मिन् समये एकया एव चक्षुरिन्द्रियान्त:करणद्वारा विषयद्वयस्य अधिष्ठानत्वं न संभाव्यते । यतो हि द्वितीयस्य वैयर्थक्यं स्यात्[523] । अनेकविषयकैकबुद्धिमाध्यमेनैव द्वित्वत्वस्योत्पत्ति: 'अयमेक:', 'अयमेक:' इति माध्यमेन क्रियते । तत्र समवायिप्रभृतिकारणानि विश्लेषयति-यथा च उक्तम्-**"यदि**

---

[518] *न्या.कं.प्र.पा.भा.* पृ.२६७

[519] *तत्रैव,* पृ.२६७

[520] *न्या.कं.प्र.पा.भा.* पृ २७०

[521] *तत्रैव,* पृ.२७१

[522] *न्या कं,प्र.पा.भा.*पृ.. २७२

[523] *न्या.कं.प्र.पा.भा.* पृ.२७२-२७३

**नामानेकगुणालम्बनैका बुद्धिरूपजाता ततः किमेतावत? तदैतां बुद्धिमपेक्ष्यैकत्वाभ्यामेक गुणाभ्यां स्वाश्रययोराश्रयद्रव्ययोर्द्वित्वमारभ्यते । स्वाश्रययोः समवायिकारणत्वम्,एकगुणयोरस मवायिकारणत्वम्,अनेकविषया बुद्धेर्निमित्त कारणत्वम्"**[524] । १.प्रथमे क्षणे अयमेकः, अयमेकः इति पूर्वोक्तप्रक्रियया अपेक्षाबुद्धिरुत्पद्यते । तया द्रव्यस्योत्पत्तिः जायत इति द्वितीयक्षणे ज्ञानं जन्यते । 'इत्येक कालः' इति शब्दप्रयोगेण अत्र क्षणद्वयात्मकं 'लव'रूपकालोऽभिप्रेतो वर्तते । एताः क्रियाः क्षणात्मककालानुसारं क्रमश एव जायन्ते । यदि अपेक्षाबुद्धिमाध्यमेन न द्वित्वस्योत्पत्तिः स्वीक्रियेत चेत् साधारण्यस्यापत्तिः स्यात् । येन पुरूषेण अपेक्षाबुद्धिः,तेनैव द्वित्वस्य ग्रहणं क्रियेत सुखादिवत् इति अनुमानवाक्यं प्रदर्शयति–**"प्रयोगस्तु द्वित्व बुद्धिजं नियमेनैक प्रतिपत्तृवेद्यत्वात्,यन्नियनेनैकप्रतिपत्तृवेद्यं तद्बुद्धिजं यथा सुखादिकम् । नियमेनैकप्रतिपत्तृवेद्यं च द्वित्वं तस्मादिदमपि बुद्धिजम्"**[525] । अपेक्षाबुद्धिमपेक्ष्य द्विसंख्याबुद्धिः तदनन्तरं जातिरूपद्वित्वत्वस्य ज्ञानम्,अयं प्रत्यक्षः संयुक्तसमवेत - समवायसम्बन्धेन वर्ण्यते । अन्यच्च जातिरूपद्वयं संख्यारूपद्वित्वस्य विशेषणं वर्तते । 'दण्डी पुरुषः' इतिवद् द्वे द्रव्ये इत्याकारविशिष्टबुद्धिः संख्यात्मकद्वित्वरूपविशेषणं विना न संभाव्यत इति उच्यते । अनेन जातिरूपद्वित्वमपि सिद्ध्यते । अयं विशेष्यविशेषणभावः आपेक्षिको वास्ताविकश्च उभयथा मिलति यतो हि कर्तृत्वकरणादीनाम् उभयथा व्यवहाराः अवलोक्यन्ते[526] । एतदनन्तरम् अपेक्षाबुद्धे लक्षणं ददाति– **"उभयगुणालम्बना बुद्धिरपेक्षाबुद्धिरिति उच्यते"**[527] । जातिस्वरूपद्वित्वविषयकबुद्ध्या अपेक्षाबुद्धेः विनश्यत्ता तथा च गुणस्वरूपद्वित्वविषयकबुद्धे उत्पद्यमानता च प्रतिपाद्यते । उभयमेकस्मिन् काले भवतीति कथ्यते । अपेक्षाबुद्धिनाशात् द्वित्वरूप संख्याबुद्धिरपि विनाश्यते,यतो हि अपेक्षाबुद्धिनाशानन्तरं द्वित्वस्य नोपलब्धिः । अतः अनेनैव द्वित्वबुद्धिरपि नाश्यते[528] । यद्यपि 'द्वे द्रव्ये' इति ज्ञानकाले न द्वित्वस्य सत्ता यतोहि व्यापारजनकत्वं हि कारणस्य कारणत्वमिति कथयति-**"कार्योत्पत्त्यनुगुणं व्यापारजनकत्वं हि कारणस्य कारणत्वम्"**[529]अर्थात् कार्योत्पत्तिः क्षणपर्यन्तं न कारणस्य सत्ता आवश्यकीति यतो न तस्य तस्मिन्काले उपयोगः । अस्य अभिप्रायो यत् व्यापारकारकं द्वित्वस्य न कारणमिति । द्रव्यज्ञानोत्पत्त्यनन्तरं गुणविषयकद्वित्वबुद्धे नाशः तथा च संस्कारोत्पत्ति उक्त द्रव्यबुद्धेः नाशकारणानां संवलनं क्रियते । अग्रिमे क्षणे 'द्वे द्रव्ये' इति बुद्धेः नाशः संस्काराणां विद्यमानत्वे सति जायते । अनेनैव शतसंख्याया उत्पत्तिरपि समर्थ्यते[530] । **शतसंख्याया उत्पत्तिः**-शतद्रव्येषु अपि प्रत्येकेषु अयम् इति अनुभवो जायते;तैरनुभवैः संस्काराणानां क्रमशः उत्पत्तिर्जायते । अन्तिमे'एक' इति गुणरूपेण अनुभवान्तरं शतसंख्या – व्यवहारसंपादकादृष्टेन सर्वे संस्कारा उद्बोध्यन्ते । किन्तु सर्वैः संस्कारैः आत्मनः तथा च तस्य एकस्मादेव संयोगाद् अनेकैकत्वगुणविषयकम् एकमेव स्मरणमुत्पद्यते । एतदनन्तरम् अनुभवस्मरणेभ्योः अपेक्षाबुद्धिभिः

---

524 *न्या.कं.प्र.पा.भा.* पृ.२७४

525 *न्या कं* पृ २७५

526 *न्या.कं.प्र.पा.भा.* पृ.२७६-२७७

527 *न्या.कं,प्र.पा.भा.* पृ २७९

528 *न्या.कं .प्र.प.भा,* पृ.२७६

529 *तत्रैव पृ.* २८१

530 एतेन शतसंख्याद्युत्पत्तिरपि समर्थिता । *तत्रैव,* पृ.२८३

तदाश्रयीभूतद्रव्येषु'शत' नाम्ना संख्योत्पत्तिर्जायत इति प्रतिपाद्यते । द्रव्यविषयकसंस्कारैः उत्पद्यमानायां संख्यायां प्रत्यक्षमेव प्रमाणं विद्यते[531] । शतपिपीलिका मया मारिता इत्यत्र केनचिद् गौणत्वात् शतसंख्या एव न स्वीक्रियते[532] । संस्कारेण अपानीताः पिपीलिका एव शतसंख्याया आश्रयमिति । विनष्टपिपीलिकादिषु वर्तमानकालस्य न सम्बन्धः,अतो न अस्तित्वस्याभाव इति कथयितुं शक्यते । अतएव तर्कसम्मतसहकारिणा विनष्टपिपीलिकासु शतसंख्या व्यवहारः । **समाधानम्-** मूलादेव विनष्टवस्तुनो यदि न कस्मादपि कारणात् उपस्थितिः बोध्यते तावत्कालं न तस्य कारणत्वम् । अतएव प्रकृतविषये अनुभवस्योपस्थापनार्थं संस्कारकल्पना एव संगता । यथा विनष्टापि वर्णा ज्ञानकाले अन्तिमस्याक्षरस्य स्मृत्या उपनीयते;तेन शाब्दबोधं प्रति निमित्तकारणत्वं बोध्यते । तद्वत् विनष्टवस्तुषु समवायिकारणत्वं स्यात्[533] । अन्यदपि संस्कारसचिवात् मनसो यथा बाह्यवस्तूनां स्मरणम् उत्पाद्यते तथैव बाह्यवस्तु विषयकप्रत्यक्षरूपमनुभवोऽपि जन्यते । मनसः प्रवृत्तिबाह्येन्द्रियाधारिता;अतो न तेन अन्धबधिराणामभाव इति । यथा लिखति-**"यथा च संस्कारसचिवस्य मनसो बाह्ये स्मृत्युपादनसामर्थ्यमेव दृष्टत्वादेषितव्यम् । एवं च सति नान्धबधिरायाभावो बाह्येन्द्रिय प्रवृत्त्यनुविधायित्वात्"** । [534] **द्वित्वविनाशप्रक्रिया-** आश्रयवस्तूनां नाशानन्तरं यदि द्वित्वस्योत्पत्तिः नाश उच्यते; तत्र स्मृत्युपनीतानि विनष्टवस्तुनि द्वित्वस्योत्पत्तिःतथा च तस्य नाशोऽपि स्मृतिरूपापेक्षाबुद्ध्या एव जायते । विद्यमानवस्तुनि यदि द्वित्वस्योत्पत्तिप्रभृतिकार्यं तर्हि न केवलं अपेक्षाबुद्धिमाध्यमेन अपितु आश्रयविनाशादपि द्वित्वं विनाश्यते । यतो हि एकस्मिन् द्रव्ये वर्तमाने 'अयं द्वौ ' इति प्रतीतिर्न उत्पाद्यते । गुणरूपद्वित्वबुद्धेः अत्र न अपेक्षाबुद्धिविनाशकारणं यतो हि एकस्मिन्नेव क्षणे नाशःअतएव आश्रयनाशाद् नाशः । 'द्वे द्रव्ये' इति ज्ञानमेव द्वित्वस्योत्पत्तेः प्रयोजनं,परञ्च कारणसामर्थ्यै उत्पद्यमानं कार्यं प्रयोजनं नापेक्षते; अतो न द्वित्वप्रक्रिया व्यर्था । अत्र द्वित्वप्रक्रियायां पूर्वपूर्वज्ञानस्योत्तरोत्तरविनाशः प्रदर्शितः । एतज्ज्ञानं तु ज्ञानयोः परस्परविरोधेन संभाव्यते । भाष्योक्त-वध्यघातकस्य सहानवस्थानस्य लक्षणं कंदलीकारेण प्रस्तूयते । वध्यघातकपक्षे द्वितीयज्ञानमुत्पाद्य क्षणान्तरे प्रथमज्ञानं नाश्यतीति कथयति तद्यथा- **"वध्यघातकपक्षे द्वितीयज्ञानमुत्पद्य क्षणान्तरे पूर्वं विज्ञानं नाश्यतीति पक्षे शोभनमित्यर्थः"**[535] । सहानवस्थानविषये यथा लिखति लक्षणम्-**"सहानवस्थानलक्षणे तु विरोध एकस्य ज्ञानस्योत्पादोऽपरस्य विनाश इति"** । [536]सहानवस्थानविरूद्धपक्षे न द्रव्यज्ञानं यतो हि यस्मिन् काले द्वित्व -स्योत्पत्तिः,तस्मिन् काले जायते तस्य नाश इति । विशेषणेन विशेष्यस्यानुञ्जकत्वं विधीयते । तं विना नानुरञ्जकत्वं विशेष्यस्येति । यथा च लिखति-**"समवायिनः समवेताच्छवैत्यबुद्धेः श्वेतेद्रव्ये बुद्धिर्भवति श्वेतं द्रव्यमिति । ते विशेष्यविशेषणबुद्धी कार्यकारणभूते कार्यकारणस्वभावे इति सूत्रेण विशेषणस्यानुरञ्जकत्वमुक्तम्** ।

---

[531] सा च सर्वद्रव्ये संस्कारसचिवा अन्त्यद्रव्यसंयुक्तेन्द्रियज्ञानविषयत्वात् प्रत्यक्षैव । *तत्रैव,* पृ.२८३

[532] शतव्यवहारस्तु रूपादिष्विव गौण इत्येके समर्थयन्ति । *तत्रैव,* पृ.२८३

[533] तथा चान्त्यवर्णप्रतीतिकाले पूर्ववर्णानां विनष्टानामपि स्मृत्युपनीतत्वाद् अर्थप्रतीतौ निमित्तकारणत्वमस्त्येव। *न्या.कं.प्र.पा.भा.* पृ.२८४

[534] *तत्रैव* पृ.२८४

[535] *न्या कं* पृ.२८७

[536] *तत्रैव* पृ.२८७

**तच्चाविद्यमानस्य नास्तीति भाव:"**[537] । लैङ्गिकज्ञाने साध्यस्य उपसर्जनता न वर्तते,परञ्च विशिष्टबुद्धौ श्वेतगुणविशिष्टमभेद एव भासत इति । अतो 'द्वे द्रव्ये' इत्यत्र द्रव्यवत् द्वित्वसंख्याया: प्रतिभासो कथ्यते । 'द्वे द्रव्ये' इति ज्ञानम् अत्यन्तशीघ्रतया उत्पाद्यते । एतस्माद् कारणात् उभयो भेदो न स्पष्टीकर्तुं शक्यते । अतो 'द्वे द्रव्ये' इत्याकारकविशिष्टज्ञानस्यावभासो जन्यते । अत्र पूर्वं द्वित्वस्य तदनन्तरं द्रव्यस्य ज्ञानं क्रियते यथा च –**"वस्तुवृत्या तु पूर्वं द्वित्वस्य प्रतिभासस्तदनु द्रव्यस्येत्यर्थ:"** । [538]वध्यघातक -रूपविरूद्धपक्षे द्वित्वज्ञानस्यानुत्पत्त्यन्तरं यत्र समाधानरूपेण 'समूहज्ञानरूप' संस्कारकारणत्वं कथितं तत्र 'समूहज्ञानम्' इति शब्दस्यार्थ: 'द्वित्वगुणविशिष्टद्रव्यमज्ञानम् इति कथ्यते अर्थात् तत्र संस्कारेण न द्वित्वस्य नाश: क्रियत इति स्पष्टीक्रियते । अपेक्षाज्ञानात् न संस्कारस्योत्पत्ति:,अपितु गुणविशिष्टद्रव्येण एव बोध्यते । एतदनन्तरं कंदलीकारेण विज्ञानवादिनां शून्यवादिनां च खण्डनं कृत्वा बाह्यार्थं साधयित्वा संख्या साध्यते । [539] बाह्यार्थसत्ताया: लोपसंपादका: सर्वे हेतव: कालात्ययापदिष्टा इति कथितम् । यथा च लिखति कंदलीकार:- **"अस्ति चायं कादाचित्क: प्रत्यक्षप्रतिभास:, स एव प्रतीतिविषय: देशकालकारणस्वभावनियतं बाह्यवस्तु व्यवस्थापयस्तदभावसाधनं बाधत इति कालात्ययापदिष्टत्वमपि हेतूनामित्युपरम्यते"**[540] । समधिगता संख्या इत्यपि कथ्यते । अनेन प्रकारेण बाह्यर्थसिद्धिं विधाय संख्या समधिगम्यत इति 'अन्तिमपंक्तौ' लिख्यते । कंदलीकारेण अत्र शतसंख्याया उत्पत्ति: भाष्यकारेतरतया वर्णिता । द्रव्यसंस्कारिणी संख्या समुत्पाद्यत इति । संख्यासिद्ध्यर्थं बाह्यवस्तुन: सत्त्वसिद्धि: विज्ञानवादीनां शून्यवादीनां च खण्डनं विधाय विहितेति । श्रीधराचार्येण भाष्यकारतो भिन्ना: विषया: अपि प्रतिपाद्यन्ते शतसंख्याया उत्पत्ति:, एतदनन्तरम् अनुभवस्मरणेभ्यो: अपेक्षाबुद्धिभि: च तदाश्रयीभूतद्रव्येषु 'शत'नाम्ना संख्योत्पत्तिर्जायत इति प्रतिपाद्यते । द्रव्यविषयकसंस्कारै: उत्पद्यमानायां संख्यायां प्रत्यक्षमेव प्रमाणं विद्यते। अन्यदपि संस्कारसाचिव्यात् मनसो यथा बाह्यवस्तूनां स्मरणम् उत्पाद्यते तथैव बाह्यवस्तुविषयकप्रत्यक्षरूपमनुभव: अपि जन्यते । मनस: प्रवृत्ति: बाह्येन्द्रियाधारिता;अतो न तेन अन्धबधिराणामभाव इति । स्मृत्युपनीतानि निहतशतपिपीलिकावत् विनष्टवस्तुनि द्वित्वस्योत्पत्ति: तथा च तस्य नाशोऽपि स्मृतिरूपाया: अपेक्षाबुद्ध्या एव जायते । गुणरूपद्वित्वबुद्धे: अत्र न अपेक्षाबुद्धिविनाशकारणं यतो हि एकस्मिन्नेव क्षणे नाश: । अतएव आश्रयनाशाद् नाश: । 'द्वे द्रव्ये' इति ज्ञानम् अत्यन्तशीघ्रतया उत्पाद्यते । एतस्माद् कारणात् उभयो भेदो न स्पष्टीकर्तुं शक्यते । अतो 'द्वे द्रव्ये' इत्याकारकविशिष्टज्ञानस्यावभासो जन्यते । अत्र पूर्वं द्वित्वस्य तदनन्तरं द्रव्यस्य ज्ञानं क्रियत इति विशिष्टं वर्णनमत्र क्रियते ।

**कुसुमोद्गमे संख्यागुणनिरूपणम्-** कुसुमोद्गमकारेण कथ्यते यत् 'संख्यात्वस्याभिसम्बन्धात् संख्या' इत्यनेन रूपादीनां समेषां सार्धं लक्षणं प्रतिपादितम् । संख्यादीनां प्रति दुर्दर्शनाभ्यासात् संख्यानिरूपणं क्रियत इति कंदलीकारेण वर्णितम्,तत्र कुसुमोद्गमकारेण कथ्यते यत् दुर्दर्शनाभ्यास: सौगतानां वर्तत इति

---

537 *न्या कं* पृ.२९०

538 *तत्रैव* पृ.२९२

539 *न्या.कं.प्र.पा.भा. पृ.२९३-३१४*

540 तत्रैव,पृ.३१४

स्पष्टीकृतम्[541] । १.निरालम्बनत्वम् अविशेषे प्रत्यायानाम् आकारवैचित्र्यं नोपपद्यते[542] । २.रूपादिभ्यो भिन्ना संख्या इति कुसुमोद्गमकारेणापि कथ्यते । अन्यच्च समुच्चये संख्याविशिष्टद्रव्यस्यैव प्रतीतिर्जायते । एकत्वस्य अनुवृत्तिकारणाद् स्वरूपाभेद: प्रतिवस्तुनियतो विद्यत इति कथ्यते[543] । ३.पृथिवीत्वादिषु सङ्करप्रसङ्गात् एकत्वादय: सामान्यविशेषा अपि न वर्तन्त इति । एकादिव्यवहारेण गणनामात्रमेव विवक्ष्यते[544] । ५.समुदायस्य स्वरूपासिद्धिकारणात् गणनाहेतो एकस्य एकत्वादिपरार्धपर्यन्तं सर्वसंख्या साधारणत्वं कथ्यत इति कुसुमोद्गमकारेण स्पष्टीक्रियते[545] । **६.अनेकैकत्वबुद्धि:/अपेक्षाबुद्धि:-** अनेकैकत्वगुणविषयिण्या: बुद्ध्या द्वित्वादिकानामुपपतिर्न क्रियते[546] । अनेकद्रव्यबुद्धौ एकत्वानाम् असमवायिकारणत्वम्; अनैकत्वविषयिण्या बुद्ध्या: निमित्तकारणत्वं वर्तत इति शेष: । एवं प्रकारेण कुसुमोद्गमकारेण अत्र एकत्वानाम् असमवायिकारणत्वं प्रतिपाद्यते । यथा वोम्मिदेव: प्रतिपादयति- "एकत्वानामसमवयिकारणत्वम्, अनेकैकविषयिण्या बुद्धेश्च निमित्तकारणत्वमित्यर्थ:"[547] । ७.द्वित्वस्योत्पत्ति अत्रापि अपेक्षाबुद्धिजन्या एव अङ्गीकृता । अभिव्यञ्जकत्वस्य अनुपपतौ बुद्धिनियमद्वारा अनुविधीयमानत्वात् शब्दं प्रति संयोगवत् अपेक्षाबुद्ध्या द्वित्वस्योत्पत्ति: विधीयत इति कुसुमोद्गमकार:[548] । अनेन प्रकारेण अत्र वोम्मिदेवमतं साररूपे वर्ण्यते[549] । विशदतया एतेषां वर्णनं पञ्चमेऽध्याये करिष्यते । एतदनन्तरं वोम्मिदेवेन विशेषणोपलक्षणयो: भेद: स्वीकृत: । अत्रापि तस्य भेद: कथ्यते । उभयो: समानाधिकरण्ये विशेष: तयो वैयधिकरण्याद् जन्यते । अयमेव भावो लिखति तद्यथा- "विशेषणोपलक्षणयो: सामान्याधिकरण्ये वैयधिकरण्याभ्यां विशेष इत्यर्थ: । बहिरिन्द्रियनिरपेक्षमनसा सह कलनात् गणनाकरणात् वा संकलनं जायत इत्येवम् एतस्या: सङ्कलनं क्रियत इति तस्यस्वरूपमिति[550] । ८.निहतशतपिपीलिकाव्यवहार इत्यत्र बाह्येन्द्रियप्रवृत्तावनुविधीयमानस्य कस्य बाह्यं विप्रवर्तितो जायते? बाह्येन्द्रियजनितकार्यसंस्कारस्य स्मृते: अनुदय एव अर्थात् सन्निकर्षाभावादय: कथित:, अत: अनुभवरूपं न विद्यत इति निरूप्यते[551] । ९.एकत्वं सामान्यज्ञानं वर्तते । क्षणत: पञ्चमक्षणपर्यन्तम् अपेक्षाबुद्धे: नाश इति कुसुमोद्गमकारेण संक्षेपत: सूच्यते । अवयवे कार्योत्पत्तिदृशा या प्रक्रिया तत्र चतुर्थे क्षणे भवता द्रव्यनाशाद -पेक्षाबुद्धिनाशस्य समकालमेव द्वित्वस्य नाशो जायत इति संक्षिप्य वर्ण्यते । अयमेव भावो

---

[541] दुर्दर्शनं सौगतादिमतम्। *टी.न्या.कं.* पृ.२७६

[542] निरालम्बनत्वाविशेषे प्रत्ययानामाकारवैचित्र्यं नोपपद्यत इति भाव.1 *तत्रैव,* पृ.२७६

[543] *तत्रैव.* पृ.२७८

[544] एकादिव्यवहार इति च गणनामात्रस्य विवक्षितत्वात् प्रत्येकं भागासिद्धि.1 *तत्रैव,* पृ.२७८

[545] *टी.न्या.कं.* पृ.२७८

[546] *तत्रैव,* पृ.२८०

[547] *तत्रैव,* पृ. २८०

[548] अपेक्षाबुद्धी द्वित्वजननी,अभिव्यञ्जकत्वानुपपत्तौ सत्यां बुद्ध्या नियमेनानुविधीयमानत्वात् शब्दं प्रति संयोगवदिति चापेक्षाबुद्धेर्द्वित्वोत्पादकत्वसिद्धि.1 *तत्रैव,* पृ.२८४

[549] *तत्रैव,* पृ.२८७-२९२

[550] *तत्रैव,* पृ.२९२

[551] *तत्रैव,* पृ.२९३

गृहीत्वा वोम्मिदेवेन उच्यते-"एकत्वसामान्यज्ञानं क्षणमारभ्य पञ्चमे क्षणेऽपेक्षाबुद्धि विनाश: । अवयवे कर्म्मोत्पत्तिक्षणमपि चतुर्थक्षणे भवता द्रव्यनाशेनाऽप्यपेक्षाबुद्धिसमकाल एव द्वित्वविनाश इति प्रक्रियासङ्क्षेपा:"[552] अर्थात् अत्र वोम्मिदेवेन नाशादिकालगणना विधीयते । १०.'शब्दवदाकाशम्, इत्यत्र शब्दज्ञानम्, आकाशज्ञानम्, च एतानि ज्ञानानि क्रमश: अत्यन्तशीघ्रतया उत्पद्यन्ते । अतो न तेषां भेद: परिलक्ष्यत इति श्रीधराचार्येण कथ्यते[553] इति कुसुमोद्गमकारेण सूच्यते । ज्ञानस्य निर्विषयकत्व 'मम माता वन्ध्या' इतिवत् बद्धानां मानसंविद्संवादात् अपेक्षणीयं वर्तते । वाच्यस्योत्पादनं विषयविशेषस्य ज्ञानमुत्पत्त्यर्थं विधीयते ।विषयाभावे तज्ज्ञानं निरूपपत्तिकमिति कथ्यते[554] । ११.वैयाकरणिकज्ञानपरिचायकत्वमपि आचार्यस्य दृश्यते । सहोपलम्भनियमे सहशब्दस्य अर्थद्वयं साहाय्यं यौगपद्यं च सूचयति-**"सह शब्दस्येति-साहाय्ये 'सह'शब्दो यथा महानद्या सह कुल्या समुद्रमुपसर्प्पतीति यौगपद्ये सह शब्दे यथा पुत्रेण सह भुङ्कत इति"**[555] । ते च विन्दव: अधो लिख्यन्तेसंख्याया: एकत्वादि - व्यवहारेण गणनामात्रं विवक्ष्यते । अनेकद्रव्यबुद्धौ समवाय्यसमवायिकारणानां वर्णनं क्रियते । अनेकद्रव्यबुद्धौ एकत्वानाम् असमवायिकारणत्वम्; अनैकत्वविषयिण्या बुद्ध्या: निमित्तकारणत्वं वर्तत इति शेष: । एवं प्रकारेण कुसुमोद्गमकारेण अत्र एकत्वानाम् असमवायिकारणत्वं प्रतिपाद्यते । संख्यादीनां ज्ञाने अपेक्षाबुद्धि अस्मदादीनां जायते न तु परमार्थविदितत्वानां यतो हि परमार्थविदितत्वे सति नैतादृशी अपेक्षाप्रवृत्ति: समुत्पद्यते ।द्वित्वादीनां नाशे अन्यविनाशकस्याभावात् निमित्तविनाशस्यापि गुणविनाशकत्वम् तत्र अङ्गीक्रियते । इतरथा विनाश: आकस्मिक: स्यात् । क्षणत: पञ्चमक्षणपर्यन्तम् अपेक्षाबुद्धे: नाश इति कुसुमोद्गमकारेण संक्षेपत: सूच्यते । अनेन प्रकारेण यद्यपि कुसुमोद्गमकारेण कंदलीप्रतिपादितसर्वे तर्का: चर्चिता:,परञ्च किञ्चिद् व्यतिरेकाभावात् पुनरुक्तिर्न कृतेति । विषयाणां पूर्वोत्तरपक्षनिरूपणपूर्वका सूचना स्वशब्दै: स्पष्टीकरणपूर्वका इति ।

**न्यायकन्दल्यां परिमाणनिरूपणम्–** कन्दलीकारेण सूच्यते यत् परिमाणव्यवहारकारणमित्यनेन परिमाणं निरूपयितव्यम् । अणुमहददीर्घह्रस्वे प्रभृतीनां ज्ञानं तथा च प्रतिपादकशब्दरूपव्यवहारज्ञानम् उभयमेव मानव्यवहारकारणमिति शब्देन अभिव्यञ्जयते । परिमाणस्य प्रत्यक्षव्यवहारो यैः नाङ्गीक्रियते तेषां कृते 'कार्यलिङ्गक'परिमाणस्य सूचना 'तस्य परिमाणमिति' शब्देन दीयते[556] । एतदनन्तरं ज्ञानस्य ज्ञेयार्थत्वं प्रतिपाद्यते । अन्यच्च अर्थेन शब्दज्ञापकत्वं आक्षेपादिपूर्वकं विधीयते । [557] । द्रव्यपरिमाणयोर्भेदे कथितं यत् द्रव्यज्ञानं विना परिमाणज्ञानं न कर्तुं शक्यते,अतः तत्राभेद इति पूर्वपक्षसमाधाने दूराद् द्रव्यग्रहणेऽपि महत्परिमाणमपि अणुरिव दृश्यते;अतो न परिमाण ज्ञानं समीचीनम् । अतः उभयोर्मध्ये भेदो विद्यते[558] । **परिमाणभेदा: –आक्षेप:-** चतुरस्रादिकं तु अवयवानां संस्थान विशेष एव इति आशङ्कयते ।

---

[552] *टी.न्या.कं.* पृ. २९४

[553] अभिहितान्वयनये पदार्थप्रतीतिपूर्वकत्वात्तत्संसर्गप्रतीते /ए/मुच्यते । *तत्रैव, पृ.३००*

[554] *तत्रैव,* पृ,३१९

[555] *तत्रैव,* पृ.३१३

[556] *न्या.कं.प्र,पा.भा.* पृ.३१४

[557] *न्या.कं.प्र.पा.भा.* पृ.३१५-३१८

[558] यच्चोक्तं द्रव्यादव्यतिरिक्तं परिमाणम्, द्रव्याग्रहे तद्बुद्ध्यभावादिति, तदसिद्धम्। दूराद् द्रव्यग्रहणेऽपि तत्परिमाणविशेषस्याग्रहणात्। अत एव महानप्यणुरिव भ्रान्त्या दृश्यते। *तत्रैव.* पृ.३१७

**समाधानम्-** तत्र समाधीयते यत् दूराद् दीर्घत्वादीनां प्रतीतिर्जायते न तु अवयवसंस्थानानामिति । अत उभयोर्मध्ये भेद इति[559]। पारिमाण्डल्यस्य[560] अल्पपरिमाणत्वात् तत्र ह्रस्वत्व आकाशे न दीर्घत्वपरिमाणं कथयितुं शक्यते । एतदनन्तरम् आकाशस्य परममहत्त्वं तथा च दीर्घत्वविषये अन्यस्य मतमुपस्थाप्यते । तत्रोच्यते यत् आकाशपरमाणुर्मध्ये परममहत्त्वस्य परमाणुत्वस्य च व्यवहारः क्रियते[561] । तदवदेव अनयोर्मध्ये दीर्घत्वह्रस्वत्वयोरपि व्यवहारो लोकप्रसिद्धं विद्यते ।अस्मिन् प्रसङ्गे अनुमानप्रमाणप्रयोगमुपस्थापयति तद्यथा–**"दीर्घपरिमाणाधिकरणमाकाशं महत्परिमाणाश्रयत्वात् स्तम्भादिवत्** । एवं **"ह्रस्वपरिमाणाश्रयः परमाणुः, अणुपरिमाणाश्रयत्वात्, द्वयणुकवत्**"[562]एतदनन्तरं प्रकर्षापकर्षेण ईक्षुप्रभृतीनां गौणत्वव्यवहारः भाष्यवदेव सूच्यते ।तत्र परस्परापेक्षत्वेन एव ह्रस्वत्वदीर्घत्वयोः एकस्मिन् आश्रयेऽपि व्यवहारोऽवलोक्यते । तत्र कारणाभावात् गौणत्वेन न व्यवहारोऽवलोक्यते[563] । अन्यच्च यस्य मुख्यत्वव्यवहारो संभवः,न तस्य गौणत्वव्यवहारमाशङ्कयत इति[564] ।१.परिमाणेन स्वजातीयपरिमाणमेवोत्पाद्यत इति नियमः कथ्यते[565] । २.द्वयणुकानामणुपरिमाणत्वं त्र्यणुके न कारणम् अन्यथा त्र्यणुकपरिमाणमपि अणुत्वयुक्तं स्यादिति प्रतिपाद्यते[566] । ३.अन्यदपि त्र्यणुकपरिमाणे संख्याया असमवायिकारणं कल्पयते अन्यथा समवायिकारणबाहुल्येन महत्परिमाणस्योत्पत्ति स्यादिति[567] । ४.अन्यदपि विशिष्टं यत् ईश्वरबुद्धिजन्यत्रित्वस्य नाश अदृष्टेनैव जायते न तु आश्रयविनाशादिति । [568] ५.समानसंख्यैः समानपरिमाणैः प्रारब्धकार्यद्रव्यस्य महत्त्वे उभयोरेव कारणत्वमिति अपरमतं विवेच्यते[569] । ६.परस्परावयेषु वर्तमानप्रशिथिलसंयोगजनिते महत्त्वे तथा च निबिडे संयोगजनितमहत्त्वे भेदो दृश्यत इति प्रतिपाद्यते[570] । प्रचयोत्पन्नमहत्त्वे दीर्घत्वं बहुसंख्यायुक्तत्वं न कारणम् । अत्र युक्तिं प्रदर्शयति **"समानसंख्यापलपरिमाणैरतिशयदर्शनात्** । "[571]अतः आकाशपरिमाणवत् नित्यत्वाद् परमाणुपरिमाणत्वं न कस्यापि कारणम् इति । एवमेव मनसः परमाणुः अपि न कस्यापि कारणमिति प्रदर्श्यते । महत्परिमाणस्योत्पत्तिः कारणबाहुल्येन, कारणमहत्वेन तथा च कारणप्रचयेन कार्यत इति निरूप्यते ।

---

559 *तत्रैव.* पृ.३१७

560 पारिमाण्डल्यमिति सर्वापकृष्टं प्रमाणम् । *तत्रैव,* पृ.३१८

561 *तत्रैव,*पृ.३२०-३२१

562 *तत्रैव,* पृ.३२१

563 अथ कस्माद् दीर्घव्यवहार एव गौणो न भवति ?न, तस्योत्पत्तिकारणासंभवात्। सर्वत्रैव भाक्तो ह्रस्वव्यवहारो भवतु ?। *तत्रैव,* पृ.३२२

564 नैवं मुख्याभावे गौणस्यासंभवात्। *तत्रैव.* पृ.३२२

565 तेषां कारणवृतीनां कार्ये गुणमारभमाणानां समानजातीयगुणान्तरारम्भ एव सामर्थ्यदर्शनात्। *तत्रैव,* पृ.३२३

566 *तत्रैव,* पृ.३२३

567 तेनात्र संख्याया एव कारणत्वं कल्प्यते । *तत्रैव,* पृ.३२४

568 ईश्वरबुद्ध्यपेक्षस्य त्रित्वस्य स्थितहेत्वक्षयाद्विनाशो न तु क्वचिद् आश्रयविनाशादपि विनाश:;ईश्वरबुद्धेर्नित्यत्वात् । *तत्रैव,* पृ.३२४

569 अपरे तु परिमाणस्यैव कारणतामाहुः; समानजातीयात् कार्योत्पत्तिसंभवे विजातीयकारणकल्पनानवकाशात्। *तत्रैव,* पृ.३२५

570 *तत्रैव,* पृ.३२६

571 *तत्रैव.* पृ.३२७

[572]तत्र अदृष्टरूपसहकारिकारणभेद उच्यते। तैरेव विभिन्नकार्याणामुत्पत्ति विधीयत इति[573]। एतदनन्तरं दीर्घत्वमहत्त्वयोर्भेदः प्रतिपादितः। एकस्मिन्नेव द्रव्ये दीर्घत्वमहत्त्वयोः तथा च ह्रस्वत्वाणुत्वयोः स्थितिः साधारणजनानामनुभवसिद्धित्वात् स्वीक्रियते। द्व्यणुके वर्तमानाणुत्वह्रस्वत्वयोः प्रत्यक्षो योगिभिरेव क्रियत इति[574]। **परिमाणनाशः**-भाष्यकारेण चतुर्णामपि परिमाणानां नाशः आश्रयविनाशादेव सूच्यते। कन्दलीकारेण परमाणुह्रस्वदीर्घमहतां चतुर्णां परिमाणानां नाशः आश्रयविनाशाद् एव स्वीक्रियते[575]। अणुत्वादिव्यवहारः न स्वाभाविकं यथा च लिखति-**"अणुत्वमहत्त्वयोःदीर्घत्वह्रस्वत्वयोश्च परस्परापेक्षा -कृतत्वम्,न तु स्वाभाविकमिति चेत्?तत्र केवलावस्थायां हस्तवितस्त्यादिपरिमितस्य परिमाणस्य सापेक्षावस्थायामपि भेदानुपलब्धेः,उदयाभावप्रसङ्गाच्च"**[576]। एकस्मिन्नेव द्रव्ये ह्रस्वत्वदीर्घत्वयो व्यवहारः न्यूनाधिकभावप्रदर्शनाय परस्परापेक्षं भवति इति भाष्यवदेव प्रतिपादितम्[577]। अनेन प्रकारेण विशदतया परिमाणविषये कन्दलीकारेण प्रतिपादितमिति।

**कुसुमोद्गमे परिमाणनिरूपणम्**-कुसुमोद्गमकारेण सर्वप्रथमम् आक्षिप्यते यत् मानस्य इयत्तायां व्यवहारकारणत्वं संख्यागुरुत्वयोरपि विद्यते तर्हि तत्र कथं न अतिव्याप्तिरिति ? **समाधानम्**–अस्य समाधाने कन्दलीशब्दः "मानव्यवहारकारणम्' इत्युच्यते अर्थात् मानव्यवहारस्य प्रसिद्धकारणत्वमत्र[578]परिमाणे विधीयते। १.परममहत्परिमाणस्य आदौ वर्णनस्य कारणं प्रत्यक्षं प्रमाणं कथयति तद्यथा- **"कारणवर्त्तितया अणुपरिमाणस्य प्राथम्येऽपि प्रत्यक्षसिद्धतया महत्त्वस्य प्रथमं व्याख्यानमिति द्रष्टव्यम्"**[579]। २.महत्त्वाद् भिन्नस्य परमशब्दस्य सिद्धौ शास्त्रसिद्धिप्रमाणं स्वीक्रियत इति कंदलीकारात् भिन्नं प्रतिपाद्यते[580]। ३.पारिमाण्डल्यशब्दस्य पङ्कजातिशब्दवत् योगरूढित्वं विद्यत इति कन्दलीमतमेव स्पष्टीक्रियते। तद्यथा- **"पारिमाण्डल्यशब्दस्य पङ्कजादिशब्दवद्योगरूढितां दर्शयति"**[581]। ४.घटादिकार्ये बहुभिराभ्यमाणत्वं कंदलीकारेण कथ्यते परञ्च समवायस्य एकार्थसमवायस्य च सम्बन्धनिर्देशः वोम्मिदेवेन क्रियते। तद्यथा- **"बहुत्ववत्त्वं च आरम्भकस्य समवायेन वा, एकार्थसमवायेन वा द्रष्टव्यमिति व्याख्येयम्"**[582]। ५.अन्यच्च बहुत्ववत्त्वम् इति आरम्भकः समवायेन विद्यते वा एकार्थसमवायेन इत्यपि व्याख्येयमिति निर्दिश्यते।

---

[572] *तत्रैव*, पृ.३२७-३२८

[573] द्व्यणुके ह्रस्वत्वस्यापि द्वित्वसंख्यैवासमवायिकारणमित्याह-अणुत्वादिति। कथमेकस्मात् कारणात् कार्यभेदः? अदृष्टविशेषस्य सहकारिणो भेदात्। महत्त्वविशेष एव दीर्घत्वम्, अणुत्वविशेष एव ह्रस्वत्वमिति मन्यमानमाह-अथेति। *तत्रैव*, पृ.३२९-३३०

[574] द्व्यणुकवर्त्तिनोरणुत्वह्रस्वत्वयोस्तु भेदो योगिनां प्रत्यक्ष इत्याह – अणुत्वह्रस्वत्वयोस्त्विति। *न्या.कं.प्र.पा.भा.* पृ.३३१

[575] एतच्चतुर्विधमपि परिमाणाश्रयविनाशादेव विनश्यति नान्यस्मादिति नियमः। *न्या.कं,प्र.पा.भा.* पृ.३३१

[576] *तत्रैव*, पृ. ३३१

[577] किमर्थं तर्ह्यपेक्षा ? प्रत्येकमाश्रयग्रहणे गृहीतयोरेव परिमाणयोः प्रकर्षभावाभावप्रतीत्यर्था, ययोरधिगमादिदमस्माद्दीर्घमिदं ह्रस्वमिति व्यवहारः स्यात्। *तत्रैव*, पृ.३३२

[578] अत्रैव मुख्यो मानव्यवहारः प्रसिद्ध इत्यर्थः। *टी., न्या.कं.* पृ.३३०

[579] *तत्रैव* पृ.३३१

[580] एवं शास्त्रसिद्धिरित्यर्थः। *टी.,न्या.कं.* पृ.३३०

[581] *टी.,न्या.कं.* पृ.३३१

[582] *टी.न्या. क.*, पृ.३३२

द्वितन्तुकस्य आरम्भकत्वं बहुत्वारभकत्वयुक्तत्वं वर्तते[583] अर्थात् अत्र द्वयणुके बहुत्वारम्भकरूपोपाधि: वर्तते । अनेन त्रयणुकात् व्यभिचारो वार्यते,यतो हि द्वयणुकसंयोगित: अधिकसंयोगित्वं तत्र विद्यत इति[584]६.द्वयणुकप्रक्रियायामपेक्षाबुद्धिरूपेण ईश्वरस्य ग्रहणे स्पष्टीकरणं क्रियते यत् द्वयणुकादयो न अस्मदादिग्राह्या:, अत: तेषां अतीन्द्रियसूचनार्थमेव एतदभिहितम् । ७.अन्यच्च ईश्वरबुद्धि: सर्वविषयग्राहिणी विद्यते,अत: न केवलं त्रयाणामेकत्वं तत्र गृह्यते । त्रित्वस्य उत्पत्ति: द्वयणुकोत्पादकस्य अदृष्टसहकारितया ईश्वरबुद्धि: त्रित्वानुकूलापेक्षाबुद्धिसाहाय्येन जायते तस्य एतस्य प्रमाणत्वं लिखति तद्यथा–"यद्यपीश्वरबुद्धे सर्वविषयत्वात्रीण्येवैकत्वानि समाहृत्य न विषयीकरोति तथापि द्वयणुकोत्पादकादृष्टसहकारितया त्रित्वोत्पत्त्यनुकूलापेक्षया बुद्धि सम्भवत्येवेति भाव: । "[585] । ८.तुलपरिमाणोत्पादने गुणकर्मसु आरब्धेषु प्रचयेषु सापेक्षत्वं विद्यत इति निरूप्यते[586] । तत्रैव 'समानसख्यैस्त्रिभि:' इत्यत्र 'त्रिभि' शब्द: प्रचयस्य सामर्थ्यावधारणाय कृतमिति । अतो नात्र प्रकरणविरोधो यतो हि तत्र बहुत्वमपि विद्यते । अन्यच्च तत्रैव 'समानमहत्त्वैरिति' प्रचयविषयक: प्रयोगोऽपि प्रचयसामर्थ्यावधारणाय एव प्रयुज्यते[587] । १०.अन्यदपि कार्यपरिमाणारम्भे सजातीयस्य उत्कर्षहेतुत्वं तत्र प्रदर्श्यते[588] । १०.व्यापकमहत्त्वे परिमाणगुणोत्पादने संख्याकारकत्वमपि कुसुमोद्गमकारेण परिशेषरूपेण सूच्यते[589] ।द्वयणुकस्य ह्रस्वत्वे कारणम्, वर्तमानद्वित्वसंख्याया: कारणं च कन्दलीकारेण यदुक्तं तत्रैव कुसुमोद्गमकारेण स्पष्टीक्रियते यत् कारणभेदेन हि कार्यत्वभेदे प्रयोजकत्वं संपाद्यत इति[590] । १२.अणुत्वमहत्त्वयोर्व्यवहारे भाक्तत्वं यदुच्यते तत्र भिन्नदृष्टान्तो कुसुमोदगमकारेण कथ्यते । यथा माणवके सिंहवृहस्पतित्वं परम्परापेक्षं तद्वदेव अणुत्वमहत्त्वव्यवहारस्य भाक्तत्वं विद्यत इति । अन्यच्च नैतेषां स्वाभाविकत्वमपितु काल्पनिकत्वमेव विद्यत इत्यर्थ:[591] ।अनेन प्रकारेण कुसुमोद्गमकारेण कंदलीकारमतस्य स्पष्टीकरणमात्रमेव दीयते । परममहत्परिमाणे शास्त्रप्रमाणत्वं कथ्यते । पारिमाण्डल्यम् इति शब्दस्य योगरुढित्वम् इति अर्थो गृह्यते । अन्यच्च अणुत्वमहत्त्वादि यो परिमाणसम्बद्धव्यवहार: स: काल्पनिक इति वोम्मिदेवेन सूच्यत इति ।

**न्यायकन्दल्यां पृथक्त्वगुणनिरूपणम्**–'पृथक्त्वमपोद्धारव्यवहारकारणम्' इत्यत्र अस्मात् अयं पृथक्'तथा च आनुपूर्विशब्दप्रयोग: उभयोरेव 'अपोद्धारव्यवहार' इति शब्देन अर्थो व्यज्यते । भेदेन

---

583 बहुत्ववदारब्धस्योपाधित्वाद्द्वितन्तुकस्य च बहुत्वैकार्थसमवेतारब्धत्वेन बहुत्ववदारब्ध त्वात्,बहुत्वे सतीति विशेषणीयो हेतुर्वा। *टी. न्या.कं,* पृ.३३२

584 त्र्यणुके व्यभिचारपरिहाराय द्वयणुकं व्याप्त्यधिकं व्याप्तितोधिकव्याप्तित्वाकत्वादिति द्वयणुकसंयोग्यधिकसंयोगित्वादित्यर्थ.। *टी.न्या.कं.* पृ. ३३२

585 *कुसुम.*पृ.३३४

586 *तत्रैव,* पृ.३३६

587 *तत्रैव,* पृ.३३८-३३९

588 कार्ये परिमाणमारभ्यमाणस्य सजातीयोत्कर्षहेतुतावगम्यते,तथा महदारब्धं महत्तरम्, एवमण्वो[रा]रब्धमणुतरं भवेदित्यर्थ:। *तत्रैव.* पृ.३४०

589 *तत्रैव.* पृ.३४०

590 व्यापकमहत्त्वस्य संख्याकारकत्वेऽभिहित*:* परिशेष*:* इहापि द्रष्टव्य.। स चास्येति कार्यविशेषणं कारणविशेषसामर्थ्यावधारणं महत्त्वेन तुल्यमित्यर्थ.। *टी.न्या.कं.* पृ.३४०

591 भाक्ते*:* अणुत्वह्रस्वत्वे भिन्नभक्तत्वात् माणवके सिंहबृहस्पतिवत् परस्परापेक्षकृतत्वमिति। ततश्चै[क] काला [वित्य] न्यतराभावा[द्]? उभयाभाव इति न्यायान्न स्वाभाविकत्वं किन्तु काल्पनिक[त्व]मित्यर्थ.। *टी.न्या. कं.* पृ.३४२

पृथक्त्वस्य प्रतीतिर्न जायते यतोहि प्रतिषेधो विधिप्रत्ययस्य विषयो न विद्यत इति[592]। भाष्योक्तस्य एकद्रव्यस्योत्पत्तिः एकं द्रव्यम् आश्रयो यस्य इत्यनेन क्रियते। पृथक्त्वम् उभयद्रव्येषु विद्यते परञ्च परिमाणम् एकस्मिन्नेव द्रव्य एव विद्यत इति सूच्यते[593]।

**पृथक्त्वस्य नित्यत्वम् अनित्यत्वञ्च–** कार्यद्रव्ये वर्तमानम् एकद्रव्यत्वम् अनित्यं यतो हि आश्रयविनाशाद् तस्य नाश: तथा च परमाणुषु वर्तमानस्य एकपृथक्त्वस्य नित्यत्वं विद्यते। अतः पृथक्त्वे नित्यत्वम अनित्यत्वमुभयमेव विद्यते[594]। १.एकपृथक्त्वादिभ्यो द्विपृथक्त्वस्य भेदः संख्यया क्रियत इत्यपि सूच्यते अर्थात् 'अयमेकः पृथक्','द्वाविमौ पृथक्' इत्यादिषु पृथक्त्वव्यवहारः संख्यामाध्यमेन विधीयत इति। विभिन्नपृथक्त्वप्रतीतिषु एकाकारप्रतीतिः अनुवृत्तिप्रतीतिर्वा पृथक्त्वसामान्येन एव वर्तते। पृथक्त्वस्य सामान्यमपि न यतो हि उत्पत्तिक्षण एव न गुणस्य समवायोपलभ्यते।एकद्रव्येऽपि पृथक्त्वस्य प्रतीतिजायते,अत: सामान्यपदार्थतो भिद्यते। अवध्याश्रययो: व्यतिरिक्ता पृथक्त्वस्य प्रतीतिर्न स्वीक्रियते[595]

**कुसुमोद्गमे पृथक्त्वगुणनिरूपणम्**–पृथक्त्वस्य अवच्छिद्यनिधारणत्वेन पञ्चमीविभक्तेः निर्धारणं क्रियते[596]। १.पृथक्त्वमस्मदादिगम्यम् अतो विशेषेऽपि न अन्तर्भाव:[597]२.इह प्रत्ययहेतोरत्र अभावात् पृथक्त्वस्य न समवायसम्बन्धः[598]। एतदनन्तरं पृथक्त्वस्य अन्येभ्योऽपि व्याप्ति: वार्यते-१.पृथक्त्वस्य एकस्मिन्नेव द्रव्ये वृत्तित्वात् सामान्ये,अचलनात्मकत्वात् कर्मणि तथा च निर्गुणत्वात् द्रव्ये न एतस्य व्याप्तिरिति। अतोऽयं परिशेषाद् गुणो वर्तते[599]। २.सर्वत्रैव पृथक्–पृथक् इति व्यवहारः पृथक्त्वेन न जायते यतोहि तत्र तस्य स्वरूपस्य अवधिसपक्षत्वं विद्यते[600]। गुणेषु 'रूपाद्रस: पृथक्'इत्येतादृशी प्रतीति: भाक्ता वर्तत इति प्रतिपादितम्। अवधिसपक्षत्वयुक्तं कथ्यते पृथक्त्वस्य व्यवहारः,अतो रूपादिभिः द्वौ शुक्लौ इत्यादिव्यवहारो न संपद्यत इति। पृथक्त्वे यदि अपरजातिमत्वं न स्वीक्रियते[601]। दिक्पृथक्त्वेन अस्य साक्षादेव प्रयोग: तत्र कुसुमोद्गमकारेण कथ्यते। सामान्यात् भिन्नत्वसाधने अन्यद् अपि अवधित्वं हेतुः तत्रोच्यते[602]। अन्यच्च अनुवृत्तिप्रत्ययस्याप्यभावोऽपि विद्यते। अतः पृथक्त्वस्य भेद: सर्वेभ्यो द्रव्यादिभ्यो व्यतिरिच्य वर्तत इति वोम्मिदेवेन प्रस्तूयते। अन्ते कथयितुं शक्यते यत् कुसुमोद्गमकारेण पृथक्त्वगुणस्य व्यावृत्ति: अन्यपदार्थेभ्यो गुणेभ्यो च विधीयते। द्विपृथक्त्वस्य साक्षादेव प्रयोगो जायतेऽन्यथा तत्र जातिस्वीकरणे जातिसङ्करप्रसङ्ग: समापद्यते।

---

592 *न्या.कं.प्र.पा.भा,* पृ.३३२

593 *तत्रैव,* पृ.३३२

594 *तत्रैव,*पृ.३३३

595 क्रमेणोपजायमानेषु द्रव्येषु साम्,आन्यवद् गुणस्य समवायादर्शनात्। अथेदं सामान्यमेव भविष्यति? न, पिण्डान्तरानुसंधाने समान्यबुद्धिवत् पृथक्त्वबुद्धेरभावात्। *न्या.कं.प्र.पा.भा.* पृ. ३३५

596 अपोद्धारव्यवहार::-अवच्छिद्य निर्धारणं पञ्चम्या निर्धारणमित्यर्थ.1 *टी.न्या.क.* पृ.३४३

597 *टी.न्या.कं.* पृ ३४३

598 इहप्रत्ययहेतुत्वाच्च न समवाय.1 *तत्रैव.* पृ.३४३

599 एकद्रव्यस्यापि संभवात् [न] सामान्ये,अचलनात्मकत्वान्न कर्मणि निर्गुणत्वात् द्रव्ये, परिशेषाद् गुण.1 *तत्रैव,* पृ.३४३

600 एक पृथक्तस्य ह्याश्रयव्यतिरिक्तं सर्वमेवावधि:;द्वि पृथक्त्वादयस्तु पुनरिति ? *तत्रैव,* पृ.३४४

601 *तत्रैव,* पृ.३४४

602 सामान्यं हि विनावधिना निरूप्यते, पृथक्त्वम्सवधिनैव निरूप्यत इति सामान्याद्भिद्येत इत्यर्थ.1 *टी.न्या.कं.* पृ. ३४५

**न्यायकन्दल्यां संयोगगुणनिरूपणम्–** कन्दलीकारेण भाष्यस्य विस्तरीकरणं क्रियते । 'संयुक्तप्रत्ययनिमित्तसंयोगः'इत्यनेन शब्देन संयोगस्यास्तित्वं बोध्यत इति कथ्यते । संयोगस्य प्रतीतिः 'इदमनेन संयुक्तमिति' रूपेण जायते[603] ।**संयोगेन द्रव्योत्पादनम्–** तन्तुसंयोगः पटद्रव्यस्य कारणम्,आत्ममनसोः संयोगः बुद्धिप्रभृतीनां गुणानां तथा च प्रयत्नवद् हस्तसंयोगः हस्तक्रियायाः कारणमिति रूपेण द्रव्यगुणकर्माणि संयोगोत्पाद्यन्त इति निरूपितम् । भाष्यकारेण संयोगेन कर्मोत्पत्ते दृष्टान्तो नोपस्थाप्यते । अन्यच्च वेगयुक्तवायुसंयोगेन तृणकर्म अपि उत्पाद्यते । द्रव्यनिर्माणे द्रव्यस्य समवायिनिमिते कारणे केवलं तत्र अपेक्ष्येते । एतस्मादेव कारणाद् तत्रानपेक्ष इति पदं प्रयुज्यते,तत्र स्पष्टीक्रियते अनपेक्षस्य नायमभिप्रायो यत् पश्चाद्भाविगुणाः तत्र न अपेक्ष्यन्ते,अन्यथा श्यामादिगुणविनाशान्तरभाविवह्निसंयोगस्य पाकजत्वं निरपेक्षःस्यादिति प्रतिपाद्यते । द्रव्योत्पादकत्वे अन्यदपि आक्षेपः क्रियते यत् अवयवानां संयोगेन न द्रव्यस्योत्पत्तिः,यतो हि बीजनाशाद् अङ्कुरोत्पत्तिः तथा च मृत्पिण्डानाशानन्तरं घटोत्पत्तिः दृश्यत इति प्रश्नः[604] । अवयवानां विशेषप्रकारकसंयोगेन द्रव्योत्पत्तिर्जायते । अभावेन कार्योत्पत्तिस्वीकरणे कार्यविशेषस्याकस्मिकत्वम् । १.द्रव्यादीनामुत्पत्तिः कथं संयोगेन जायते,इत्यत्र परमाण्वग्निसंयोगे पाकजोत्पत्तौ उष्णस्पर्शस्य तथा च आत्ममनसोः संयोगजनितबुद्धेः उत्पादने धर्मादीनां वस्तूनाम् आवश्यकता वर्तत इति निरूपितम् । अन्यद्रूपेण ऊहा करणीया इत्यपि तत्र सूच्यते । एतदनन्तरं कार्याणामुत्पत्तिप्रकरणे असत् कार्येण एव कार्यस्योत्पत्तिर्जायत इति सांख्यानां सत्कार्यवादस्य खण्डनानन्तरं आवापोद्वाप्रूपेण स्थाप्यते[605] । एतदनन्तरं शक्तिनाम्ना मीमांसकोक्तातीन्द्रियपदार्थस्य चर्चा विहिता वर्तते[606] । संयोग 'अप्राप्तयोः प्राप्तिः'इति लक्षणे 'अप्राप्तयोः' इति शब्दप्रयोगः समवायेऽतिव्याप्ति वारणार्थं क्रियते । एतदनन्तरं संयोगभेदा एव विशदीकृस्तेति अन्यतरकर्मजसंयोगस्य लक्षणे निष्क्रियत्वमिति शब्दः तत्रोपस्थापितदृष्टान्तानां माध्यमेन एव दत्तम् । 'तत्र एकाश्रयं सर्वदैव निष्क्रियं भवेत् इति न आवश्यकमिति कन्दलीकारेणोच्यते[607]।

**अन्यतरकर्मजसंयोगः-** अन्यतरकर्मजसंयोगे श्येनस्य दृष्टान्तः उपस्थाप्यते श्येनवृक्षयोर्मध्ये संयोगक्रिया जायते; अनेन अत्र अन्यतरकर्मजसंयोग न तु कर्मजसंयोगः संयोगजसंयोग इति निराक्रियते[608] । अनेन अवयविषु निष्क्रियत्वस्य प्रसङ्गः स्यात्, अतः तत्र अन्यतरकर्मजसंयोग एव विद्यते[609] संयोगजसंयोगविषये कथ्यते यत् एकः संयोगः अपरस्य जनकत्वमित्यनेन नैतद् अभिप्रायो यत् गुणैः गुणम् उत्पाद्यते अपितु गुणस्यापरगुणत्वे कारणत्वमेव विद्यते । अन्यदपि संयोगो न नित्य इति आकारकल्पना विद्यते । अन्यच्च विभुद्रव्येषु संयोगो नान्यतरकर्मजः तथा च न उभयकर्मजो विद्यते यतो हि तत्र निष्क्रियत्वं विद्यते । आकाशादीनां विभुत्वे दिक्प्रदेशेभ्यो संयुक्तत्वविषये अनुमानप्रमाणमुपस्थापयति तद्यथा–**"अस्ति च तेषां संयोग आकाशममूर्तेनापि द्रव्येण समं संयुज्यते मूर्तद्रव्यसंयोगित्वात् पटवदित्यनुमात् प्रतीतः ।** स

---

603 *न्या.कं.प्र.पा.भा.* पृ.३३५

604 *न्या.कं.प्र.पा.भा.* पृ.३३६-३३७

605 *तत्रैव,* पृ.३३९-३४४

606 *तत्रैव,* पृ.३४५-३४६

607 *न्या.कं.प्र.पा.भा.* पृ.३४८

608 *तत्रैव,* पृ.३४९

609 *तत्रैव,* पृ.३५०-३५१

**चाकारणवन्नित्यं तस्मादनुपपन्नमिदम्, अजः संयोगो नास्तीति**[610]अर्थात् भावोऽयं यत् विभुद्रव्येषु नित्यत्वं विद्यते,अतो न तेषु संयोग इति । विभुद्रव्येषु अपि युतसिद्धेरभावात् संयोगो न विद्यते[611] । अन्यच्च संयोगगुणस्य आश्रयविनाशाद् नाशः । कंदलीकारेण भाष्यस्य विशदा व्याख्या विहिता । तत्र प्रशस्तपादभाष्यतो भिन्ना चर्चा अपि विधीयते । संयोगगुणे सदसतो: चर्चायां सांख्यानां सत्कार्यवाद: तथा च कार्यकारणयो: संदर्भे मीमांसकानाम् अतिरिक्त: शक्तिपदार्थ: खण्ड्यते । अनेन प्रकारेण कंदलीकारेण विषयोऽयं विशदतया विश्लेषित: ।

**कुसुमोद्गमे संयोगगुणनिरूपणम्**-यद्यपि कुसुमोद्गमकारेण कन्दलीकारेणोपस्थापिविषयाः संक्षिप्तरूपेण चर्च्यन्ते,परञ्च तत्र यत्र कुत्रचिद् वैशिष्ट्यं विद्यते तस्य एव चर्चा करिष्यत इति । १.यत्र कन्दलीकारेण सांख्यमतनिराकरणे उक्तं यत् विशेषप्रकारकसंयोगेन विशेषद्रव्योत्पत्तिर्जायते,न तु अभावेन द्रव्योत्पत्तिरिति । तत्रोच्यते यत् अनुवर्तमानावयवानाम् उत्तरव्यूहविशिष्टानामेव कारणत्वं विद्यते कार्यम् इति स्पष्टीक्रियते । अन्यच्च दृष्टान्तमाध्यमेन कथ्यते यत् अभावेन यदि द्रव्योत्पत्ति: स्वीक्रियते तर्हि ब्रीहियवबीजयो स्वारसिकविशेषो न संभाव्यन्त इति प्रतिपाद्यते[612] । २.असत्कारणानामेव उत्पत्तिर्विद्यते, एनं स्वीकृत्य साख्यानां मतखण्डनार्थम् एव कुसुमोद्गमकारो लिखति-**"अस्यैव विपर्ययोऽसत्त्वसाधनं द्रष्टव्यं,प्रयोगस्तु कार्यमुत्पत्ते: प्राक् स्वकारणेष्वसत्,उपलब्धिकारणेषु सत्सु उपलभ्यमानत्वात् भूतलघटादि वदिति"** । [613]२.एतदनन्तरं यत्र मीमांसकानां शक्तेः खण्डनं विहितं तत्र कुसुमोद्गमकारेणोच्यते षडेव पदार्था विद्यन्त इति[614] । ३.प्रागभावरूपेण यत्र मन्त्रादीनां सन्निधिमात्रेण कार्योत्पत्तिरूच्यते,तत्र कुसुमोद्गमकारेण किञ्चिद् वर्णनं क्रियते । 'प्राक्' इति शब्द विशेषणत्वेन सूच्यते । यथा मन्त्रादिना निर्विशेषीभावो विद्यते,तथैव सर्पादीनामपि दृश्यत इति[615] । परमार्थतस्तु तत्र कारणस्वरूपस्य अविनाशक एव प्रतिबन्धकरूपेण कथ्यते । अन्यच्च तत्र जातिसंसर्गस्यभावोऽपि कारणं विद्यत इति अर्थात् संयोगस्य स्वरूपलक्षणं[616] विद्यते । संयोगजसंयोग एव कथितं यत् गुणेभ्यो गुणान्तरोत्पत्तिःक्रियते तस्य निराकरणे उक्तं यत् गुणस्य गुणे कारणत्वं विद्यते । तत्रैव स्पष्टीकरणे वर्ण्यते यत् परमाणुवृत्तिगुणाभ्यां द्वयणुके कस्यापि गुणस्यानारम्भकत्वात् द्वयणुकस्य निर्गुणत्वप्रसक्ति: जायते,अतः अत्र महान् दोषः समुत्पाद्यत[617] इति निरूपितम् । शरीरावयवेषु अन्यविनाशरहिताया: पाकप्रक्रियाविषये कथ्यते यत् तत्र पाकनिक्षिप्त कुम्भतुल्य -तया एव विनाशकारणं संभाव्यत[618] इति प्रतिपाद्यते अर्थात् पटस्य खण्डावयवानामिव तस्य बालकस्य शरीरोत्पत्तौ अवयवानामुपलब्धिर्नजायत इति । द्रव्याणामारम्भकत्वं सजातीयतया जायते,यथा

---

[610] *न्या.कं.प्र.पा.भा.* पृ. ३६०

[611] *तत्रैव,* पृ.३६२

[612] अभावमात्रस्य कारणत्वे ब्रीहियवबीजयोरभावस्य स्वारसिकविशेषाभावादङ्कुरयो: कस्यचिद्यपाङ्कुरस्य ब्रीह्यङ्कुरत्वमिति विशेषानुपपत्ते:,अनुवर्तमानानां तदवयवानामुत्तरव्यूहविशिष्टानामेव कारणत्वमपि भवितव्यमिति भाव.1 *टी.न्या,कं.* पृ.३४९

[613] *तत्रैव,* पृ.३५२

[614] समय षडेव पदार्था इति । *तत्रैव,* पृ.३५४

[615] *तत्रैव,* पृ.३५५

[616] लक्षणशब्दस्वरूपवचन इति कर्मणि ल्युडन्त.व्यावृत: स्वरूपवचन.1 *तत्रैव,* पृ.३५७

[617] *टी.न्या.कं.* पृ.३५९

[618] *तत्रैव,* पृ.३६२

पार्थिवद्रव्याणाम् द्व्यणुकादीनां क्रमेण उत्पत्तिरिति प्रतिपाद्यते। संयोगस्य अनित्यत्वं यत्रोच्यते तत्र वर्ण्यते यत् संयोगजाति न नित्या[619]। आकाशादिविभूनां संयोगविषये यत्र पूर्वपक्षिमतमुपस्थाप्यते तत्र वोम्मिदेवेन किञ्चिद् स्पष्टीक्रियते यत् आकाशे यद्यपि अवयवात्मकप्रदेशाभावयुक्तत्वं विद्यते तथापि तत्र उपाधिभेदाद् आकाशोऽपि प्रदेशयुक्त इति प्रतीतिर्जायत इति[620]। प्राप्तानां विद्यमानत्वमेव युतसिद्धेः व्यापकलक्षणं विद्यत इति प्रतिपाद्यते[621]। अतः कथयितुं शक्यते यत् कुसुमोद्गमकारेण अत्र टीकायाः स्पष्टीकरणमेव बहुलतया क्रियते। अस्मिन् प्रकरणे यत्र कुत्रचिद् किञ्चिद् विशदवर्णनमपि क्रियते। संयोगनाशप्रक्रियायां व्यापकस्य निवृत्या व्याप्यनिवृत्तिर्जायत इति लक्ष्यते। अन्यच्च यत्र एकद्विबहुभ्यां संयोगाभ्यां संयोगनिर्देशःतथा च तत्र आरम्भ-आरम्भकवादः प्रत्यक्षतया निर्दिश्यते।

**न्यायकन्दल्यां विभागगुणः**—कन्दलीकारेण निर्दिश्यते यत् संयोगस्याभावे हि विभक्तप्रत्यय व्यवहारो जायते। विभागस्य अस्वीकरणे कथं संयोगभावोत्पत्तिर्जायेदिति?क्रियया न विभागोत्पत्तिः तथा च न कर्मणा कुत्रचिद् गुणनाशोऽवलोक्यते। गुणेन एव गुणनाशो दृश्यते,अतः संयोगनाशाय विभागस्वीकृतिः अपरिहार्या विद्यते। संयोगस्याभावमात्रं न विभागः,अपितु स्वतन्त्रो गुणः[622]। तत्र कथ्यते यत् गौणप्रतीतावपि विभागः स्वीकरणीयो,यतो हि प्रधानं विना गौणत्व न संभाव्यत इति। विभागो न केवलं विभक्तप्रत्ययस्य अपितु शब्दस्यापि कारणमित्यापि कथ्यते। वंशदलविभागात् यो आद्यः शब्दः,सैव भेरीदण्डसंयोगवत् विभागेन जन्यत इति[623]। **लक्षणम्**— लक्षणे 'प्राप्तिपूर्विकाऽप्राप्ति विभागः'इति यदुक्तम्,अत्र अधर्मवत् अप्राप्तेःअपि नञ्समासेन संयोगगुण -विरूद्धविभागो बोध्यते। विभागात् पूर्वं संयोगः केवलं सत्त्वं परञ्च विभागे कारणत्वं विद्यते यतो हि अनेन द्रव्यानुत्पत्ति प्रसङ्गः तत्रापद्यते[624]। ध्वंसात् पूर्वं नियमतो भावस्य सत्त्वं विद्यते,यतो हि विरोधिस्वभावः तत्र तस्य दृश्यते। तद्यथा लिखति-**"विभागोत्पत्तौ संयोगस्य पूर्वकालतानियमः,विभागस्य तद्विरोधिस्वभावत्वात्"**[625]। **विभागस्य भेदाः**—त्रयो भेदा अत्रापि संकेत्यन्ते इति-१.अन्यतरकर्मजोभयकर्मजभेदद्वयं संयोगवदेव सन्तीति निर्दिष्टम्। निष्क्रियसक्रिययो र्मध्येऽन्यतरकर्मजविभागः तथा च मल्लयोर्मेषयोर्मध्ये उभयकर्मजविभागो विद्यत इति सूचितम्[626]। २.प्रथमो विभागजविभागः विभागकारणीभूतद्रव्येण तथा च अपरः कारणाकारणीभूतयोः द्रव्ययोः उभयोर्माध्यमेन संपाद्यते। एतदनन्तरं कारणीभूतद्रव्येण जायमानस्य विभागस्य चर्चा भाष्यवदेव विहिता

---

[619] संयोगजातिर्निनित्या अयेजेति व्याख्यानादुक्तसंयोगत्रितयापेक्षया न सिद्धसाधनम् पृथगनभिधानादिति हेतुर्नित्याश्रयतया अनभिधानादिति योजनीया। *तत्रैव*, पृ.३६५

[620] *तत्रैव*, पृ.३६५

[621] व्यापकं तु लक्षणमप्राप्तयोर्विद्यमानत्वं युतसिद्धिरिति। तद्भेदकथनं तु भाष्यकारीयम्। *तत्रैव* पृ.३६७

[622] दृष्टं च गुंणविनाशे गूणानां हेतुत्वम्, तेनात्रपि गुणान्तरकल्पना। किञ्च संयोगाभावेऽसंयुक्ताविमाविति प्रत्ययः स्यान्न विभक्ताविति, अभावस्य विधिमुखेन ग्रहणाभावात्। *न्या.कं प्र.पा.भा..* पृ.३६३

[623] *तत्रैव*, पृ.३६४

[624] *तत्रैव*, पृ.३६४-३६५

[625] *तत्रैव*, पृ.३६५

[626] तत्र तेषु मध्येऽन्यतरकर्मजोभयकर्मजौ संयोगवत्। यथा क्रियावता निष्क्रियस्य संयोगोऽन्यतरकर्मजस्तथा विभागोऽपि। यथोभयकर्मजः संयोगो मल्ल्योर्मेषयोर्वा तथा विभागोऽपि। *तत्रैव*, पृ.३६६

वर्तते,अतो न वर्ण्यते[627] । अन्यच्च यस्यां क्रियायाम् आकाशविभागकर्तृत्वं विद्यते,तस्यां विरोधिविभागकर्तृत्वं न विद्यत इति नियमो न व्यभिचर्यत इति सूच्यते । १.विभागात् विभागोत्पत्तौ क्रियाया निमित्तकारणत्वं विद्यते अन्यथा तदभावे न निष्क्रिये द्रव्ये विभाग इति[628] । उत्तरदेशसंयोग एव क्रियायाः मुख्यप्रयोजनं विद्यते । २.सक्रियेष्वेव विभाग उत्पाद्यते । ३.विभागजविभागस्य आश्रयीभूतद्रव्ये समवायेन वर्तमानस्य विभागस्यैव विभागेऽसमवायिकारणत्वं विद्यत इति निरूप्यते[629] । **कारणाकारणीभूतविभागः–** हस्तक्रियया यत्र कारणाकारणीभूतद्रव्यविभागोत्पाद्यते, तत्र शरीरं प्रति हस्तस्य कारणत्वेन तथा आकाशादीन् प्रति हस्तस्य अकारणत्वेन विभागोत्पाद्यत इति । अतो विभागोऽयं कारणाकारणविभागपूर्वकं विद्यते । अन्यच्च उत्तरदेशस्य संयोगाभिमुखक्रियया दिग्सहायकारणात् कार्याकार्ययोः विभाग मुत्पाद्यते अत्र हस्तस्य कार्यं शरीरं तथा च अकार्यं आकाशादयोः कथ्यन्ते । अतः तेभ्यो विभागः कार्याकार्यविभाग इति[630] । ४.एकस्मिन् अधिकरणे वर्तमानक्रियया न व्यधिकरणे विभाग: जायते । कमलपत्रभेदेन यौगपद्यस्य क्रमानुमानवत् कुड्यादिदेशाद् हस्तशरीरविभागस्यापि सविषयकत्वं साध्यते[631] । निर्विषयकप्रत्यक्षोऽनुमानेन बाध्यते,अतः तत्र क्रमेणैव हस्तशरीरविभागप्रक्रिया इति निरूप्यते । अन्यच्च तत्र वृद्धजनानां प्रामाण्यमुपस्थापयति–"तथा च दिङ्मोहादिष्वनुमानमेवबलवदिति मन्यते वृद्धाः 'भवति वै प्रत्यक्षादप्यनुमानं बलीयः इति वदन्तः । "[632] १.द्वयणुकसमवायस्य परमाणुद्वयमेव सक्रियं तथा च आकाशपरमाणुर्मध्ये केवल परमाणोः सक्रियत्वं विद्यत इति नित्यद्रव्याणां युतसिद्धिः कथ्यते । एतदनन्तरं युतसिद्धेः लक्षणं प्रतिपादयति कन्दलीकारः–**"द्वयोरेकस्य वा परस्परसंयोगविभागहेतुभूत कर्मसमवाययोग्यता युतसिद्धिः"**[633] । २.अनित्यद्रव्याणां युतसिद्धि विषये कथ्यते यत् तत्र युतसिद्धेः पृथक् लक्षणमनुसंधेयमिति । ततो तं लक्षणं कथयति–"अनित्यानां युतेष्वाश्रयेषु समवायो युतसिद्धिः"[634]अर्थात् युतेषु आश्रयेषु समवाय एव युतसिद्धिनाम्ना अभिधीयते । त्वगिन्द्रिय -शरीरयो यद्यपि स्वतन्त्ररूपेण न गतिमत्त्वं परञ्च युतश्रयेषु उभयोरेव समवायः अतः उभयोर्मध्ये संयोग एव सिद्ध्यत इति प्रतिपाद्यते । अतः कथ्यते यत् पृथगाश्रयाश्रयित्वं हि अनित्यानां युतसिद्धि न तु पृथक् गमनमिति । ३.विभुद्रव्येषु परस्परं न संयोगः,यतो हि तत्र पृथग्गतिमत्वं न विद्यते[635] । ४.हस्तशरीरयोर्मध्येऽपि न युतसिद्धिः,अतः तत्रापि न संयोगः, अतः तत्र समवाय: सम्बन्धो विद्यत इति कथ्यते ।अन्यच्च उभयो पृथगाश्रयाश्रयित्वमपि न वर्तत इति। एतदनन्तरं भाष्यवदेव आश्रयविनाशाद्विभागनाश प्रक्रिया तत्र वर्ण्यते ।विभागः क्षणिकः,तस्य स्थितिः उत्तरदेशसंयोगपर्यन्तमेव विद्यत इति[636] । तत्र संयुक्तप्रत्ययवत् इति वाक्यं दीयते अर्थात् 'एते संयुक्ताः'

---

627 *न्या.कं.प्र.पा.भा.*पृ.३६७

628 विभागाद् विभागोत्पत्तौ कर्मापि निमित्तकारणम्,तस्याभावान्न निष्क्रियस्य विभाग.। *तत्रैव,* पृ. ३७०

629 *तत्रैव,* पृ. ३७०

630 *न्या.कं.प्र.पा.भा.* पृ.३७०-३७१

631 *तत्रैव.* पृ.३७४-३७५

632 *तत्रैव,* पृ.३७५

633 *तत्रैव,* पृ.३७९

634 *तत्रैव,* पृ.३७९

635 *न्या.कं.प्र.पा.भा.* पृ.३८१

636 *तत्रैव,* पृ.३८०

इति प्रतीति: चिरकालपर्यन्तं विद्यते,अपितु विभागप्रतीतयो न चिरकालयावत् तिष्ठन्त इति साध्यते । अन्यच्च संयोगेनैव विभागेनैव विभागस्य नाशो विधीयत इति निरूपितम् । अन्यद् वर्णनं भाष्यवदेव व्याख्यारूपं विद्यते,अतो नात्र वर्ण्यते । समानजातीयद्रव्याणां संयोगे सति द्रव्याणामुत्पत्त्यनन्तरम् आश्रयविनाशाद् क्रियाविभागत उभयोरेव नाशो जायत इति समानजातीयानां विभागविनाशत्वमुक्तम्[637] ।

**विजातीयद्रव्यनाशप्रक्रिया**-विजातीयद्रव्ययो तन्तुवीरणयोः विभागनाशस्य सैव प्रक्रिया वर्तत इत्युच्यते । यद्यपि विजातीयद्रव्यसंयोगेन न द्रव्योत्पत्तिः,परञ्च तत्र संयोगाश्रयविनाशाभ्यां विभागो विनाशः कथ्यते । उत्तरदेशसंयोगात् आश्रयविनाशाद् च विभागस्य विनाशः क्रियते[638] । यथा च श्रीधराचार्यो वर्णयति- **"तन्त्वारम्भकांशौ कर्मोत्पत्तिसमकालं वीरणे कर्म, ततोऽशुक्रिया अंश्वन्तराद् विभागो वीरण कर्मणा च तस्य विभज्यमानावयवेन तन्तुना आकाशदेशेन च समं विभाग: क्रियते,ततोऽशुविभागादंशुसंयोगविनाशो वीरणविभागाच्च तन्तुवीरणसंयोगस्य आकाशवीरणसंयोगस्य च विनाश:,ततोऽशुसंयोगविनाशात् तन्तुविनाशो वीरणस्य चोत्तरसंयोगोऽत उत्तरसंयोगाश्रय विनाशाभ्यां तन्तुविभागस्य विनाश इति प्रक्रिया"**[639] । अनेन प्रकारेण विजातीयेन सह विभागनाशप्रक्रिया तत्र कंदलीकारेण भाष्यकारतो इतर वर्ण्यते । अन्यच्च आलोडनविलोडनपूर्वकं विषयोपस्थापनं स्पष्टीकरणं विश्लेषणं च क्रियते । **कुसुमोद्गमे विभागगुण:**– कुसुमोद्गमकारेण विभागगुणस्य संक्षिप्तैव चर्चा विधीयते । कन्दलीभावं स्वीकुर्वन्नेव कथ्यते यत् कर्मणा संयोगविभागौ न नाश्येते,यतो हि कर्मव्यधिकरणे विद्यते । २.विभागात् पूर्वं संयोगस्य स्थिति: निमितत्त्वमात्रं पूर्वकालभाविमात्रेणैव कुसुमोद्गम -कारेण कथ्यते परञ्च कन्दल्याम् अवस्थितिमात्रमेव उच्यते[640] । कन्दल्यामुक्तं यत् यस्यां क्रियायाम् अन्वयव्यतिरेकाभ्यां सामर्थ्यं निश्चीयते तयैव विभागः । अयमेव भाव: कुसुमोद्गमकार:सूचयति-विभागप्रकरणस्य आरम्भ एव लिखति-**"अयं भाव इह त्वन्वयव्यतिरेकाभ्यां संयोगविनाशस्य कर्म कारणमेषितव्यं तौ च कारणकारणतया[641]प्युपपद्यमानौ न नियतं कर्मण: संयोगनाशकारणत्वं गमयितु मर्हत:"** । [642]संयोगस्य विभागोत्पत्तौ निमित्तत्वं कन्दलीकारेण साध्यत इति वोम्मिदेवेन सूच्यते । उत्तरदेशपर्यन्तमेव विभागस्यावस्थितिः इत्यपि तत्र कथ्यते । तद्यथा– उत्तरसंयोपर्यन्तमवतिष्ठमानं तत्प्रतिबन्धकसंयोगविनाशकविभागोत्पत्तेः पूर्वभावितया कर्म्मणो निमित्त कारणत्वमेषितव्यमिति भाव:[643] । एतदनन्तरं कथ्यते यत् कर्मणो विभागो असमवायिकारणको न विद्यते,अतः तत्र अनुमान प्रयोगो दर्शयति–**"अत्र प्रयोगः विमतो विभागो न कर्मासमवायिकारणकस्तदुत्पत्त्यनन्तरमनुत्पद्यमानतो सति विभागत्वाद,अत्र यदेवं न तदेवं यथा प्रथमो**

---

637 *तत्रैव*, पृ.३८२-३८३

638 *न्या.कं.प्र.पा.भा.* पृ.३८३

639 *तत्रैव*, पृ.३९२-३९३

640 अवस्थितिमात्रमेवेति-निमित्तत्वमात्रमित्यर्थ:। *तत्रैव*, पृ.३७१

641 एवमेव विद्यते । अत्र कारणाकारणतया इति भवितुमर्हति ।

642 *तत्रैव*, पृ.३६९

643 "उत्तरसंयोगपर्यन्तमवतिष्ठमानं तत्प्रतिबन्धकसंयोगविनाशकविभागोत्पत्तेः पूर्वभावितया कर्म्म निमित्तकारणमेषितव्यमिति भावः'। *तत्रैव*, पृ.३७५

**विभाग:'** । "[644]आश्रयनाशाद् विभागनाशप्रक्रियायां आरभ्यारभ्यकवाद: इत्यनेन तत्र स्पष्टतया सूच्यते[645] । अन्यदपि तन्तुसंयोगेन यद्विनाशो विधीयते,स: तन्त्वारम्भकसंयोग विनाश एव कथ्यते[646] । विभागे कर्मणो निमित्तत्वं प्रोच्यते । अत: कथयितुं शक्यते यत् कंदल्या व्याख्याने आरभ्यारम्भकवाद: तथा च व्याप्यस्य निवृत्ति: व्यापकाधारेणैव जायत इति ।

**न्यायकन्दल्यां परत्वापरत्वगुणनिरूपणम्-** न्यायकन्दलीकारेण परत्वापरत्वविषये नाति विशदा व्याख्या प्रस्तूयते । परापराभिधाननिमित्तत्वेन शब्दप्रयोगनिमित्तत्वेन च 'परापर' इति शब्दप्रयोगो विधीयते । एते सामान्यगुणा: विद्यन्ते,तत्र विशेषप्रतीत्यर्थं प्रयुक्तविशेषशब्दानां सिद्धिरावश्यकीति कथ्यते[647] । अत: परत्वापरत्वशब्दाभिधानं क्रियत इति अर्थात् परत्वापरत्वयो:शब्दप्रयोगे व्यवहारे च उभयोरेव अर्थे प्रयोग: । दिक्कृतपरत्वापरत्वे दिक्पिण्डयो: संयोगेन तथा च कालकृतपरत्वापरत्वे कालपिण्डयो: संयोगेनैव परत्वापरत्वयोरवगम्यते । उभयोर्मध्ये भेद: कार्यवैभिन्न्येन जायते;एतस्य कृते दिक्कृतम् इति शब्द: प्रयुज्यते । दिक्कृतपरत्वापरत्वभ्यां देशविप्रकृष्टत्वं प्रत्यायते तद्यथा लिखति कंदलीकार:-**"दिक्कृतं परत्वं देशविप्रकृष्टत्वं प्रत्यायति, अपरत्वं च देशसन्निकृष्टत्वम्"[648]** । एवमेव वयोभेद: कालकृतपरत्वापरत्वाभ्यां प्रत्ययायत इति प्रतिपाद्यते । अन्यच्च दिक्कृत परत्वापरत्वे एकस्यां दिश्यवस्थितपरत्वापरत्वाभ्यां जायते न तु विरूद्धदिशोर्मध्ये इति । तत्र परत्वापरत्वप्रतीतौ समवाय्यसमवायिनिमित्तकारणानां निर्देशो विधीयते;तत्र स्पष्टीकरणं दीयते यत् कुत्र किं कारणमिति? परत्वस्य समवायिकारणम् आश्रयीभूतद्रव्यम्,पिण्डेन सह वर्तमान: संयोग: असमवायिकारणं तथा च सन्निकृष्टबुद्धि: तत्र निमित्तकारणत्वं विभर्ति इति स्पष्टीकरोति"[649] । अन्यदपि सन्निकृष्टविप्रकृष्टबुद्धिभ्यामेव परत्वापरत्वयो: प्रतीति: कार्यत इति ।दिक्प्रदेशस्य बहुसंयोगै: सह ज्ञातद्रव्यस्यापेक्षया एव सन्निकृष्टबुद्धिरुत्पद्यत इति प्रतिपाद्यते । अतो नात्र परस्परापेक्षत्वमिति । कालकृतपरत्वापरत्वेऽपि इदमेव यत् उभयोर्मध्ये यदि एकस्यापि द्रव्यस्य अभावश्चेत् तत्र न परत्वापरत्वे उत्पद्येत इति[650] । परत्वापरत्वनाशप्रक्रिया आश्रयनाशाद् जन्यत इति ।

**कुसुमोद्गमे परत्वापरत्वगुणनिरूपणम्:-**कुसुमोद्गमकारेण प्रकरणेऽस्मिन् अतीव संक्षिप्ता टीका प्रस्तूयते । वोम्मिदेवेन दिक्कालयो: सर्वोत्पत्तिनिमित्तकारणत्वं सूच्यते । दिक्पिण्डयो: असमवायिकारणाधार -

---

[644] *तत्रैव*, पृ.३७५

[645] आरभ्यारम्भकवादे यथा तन्त्वो: संयोग आरम्भकस्तथा तन्त्वंशुसंयोगोऽपि। ततश्च तत्तद्विभागोऽपि तन्तु विभागवद् द्रव्यारम्भकसंयोगप्रतिद्वन्द्वी भवत्येवेति भाव.1 *तत्रैव*, पृ.३९०

[646] तन्तुसंयोगे विनाश*:* तन्त्वारम्भकसंयोगविनाशैत्यर्थ.1 *तत्रैव*, पृ.३९२

[647] यद्यप्याकाशं कण्ठाद्याकाशसंयोगादिकं च परापराभिधानयो कारणं भवति, यद्यप्यात्ममन.संयोगादिकं च परापरप्रतीतिकारणं स्यात्, तथापि निमित्तान्तरसिद्धि*:*, विशिष्टप्रत्ययस्य कारणविशेषमन्तरेणोत्पत्त्यभावात् । *तत्रैव*, पृ.३९४

[648] *न्या क.* पृ. ३९४

[649] ततो विप्रकृष्टबुद्ध्युत्पत्त्यनन्तरं विप्रकृष्टां बुद्धिमपेक्ष्य परेण संयोगभूयस्त्ववता दिक्प्रदेशेन संयोगादसमवायि- कारणाद् विप्रकृष्टे पिण्डे समवायिकारणभूते परत्वस्योत्पत्ति.1 द्रष्टु*:* स्वशरीरापेक्षया संयुक्तसंयोगभूयस्त्ववन्तं विप्रकृष्टं चावधिं कृत्वेतरस्मिन् संयुक्तसंयोगाल्पीय -स्त्ववति सन्निकृष्टा बुद्धिरुदेति। तां सन्निकृष्टां बुद्धिं निमित्तकारणीकृत्यापरेण संयुक्तसंयोगाल्पीयस्त्वविशिष्टेन दिक्प्रदेशेन सह संयोगादसमवायिकारणात् सन्निकृष्टे पिण्डे समवायिकारणे परत्वस्योत्पत्ति.1 *न्या.कं.प्र.पा.भा.* पृ.३९६

[650] *तत्रैव*, पृ.३९७-३९८

कृतविशेषेण दिक्कृतपरत्वापरत्वव्यवहारो भवति इति विशेषरूपेण तत्र प्रदर्शयति- **"असमवायिकारणाधारकृतो विशेष इत्यर्थ: । असमवायिकारणाधारत्वसाम्येऽपि समवायिकारणनियम: कारणनियम:,कारणस्वभावात् । यथा मन:संयोगजापि बुद्धिरात्मन्येव न मनसि"**[651] । अन्यदपि लिख्यते यत् दिक् अन्येषां गुणानां कृते अपि असमवायिकारणतया कारणं विद्यते। तद्यथा लिखितम्-**"अग्न्य(न्य) गुणयोरपिपरत्वापरत्वयो -रसमवायिकारणसंयोगाधार तया उपाध्यवच्छिन्ना दिगपि कारणमित्यर्थ:"** । [652]कंदल्यां यत्र एकस्यां दिशि अवस्थितभावयोरेव अवधिभावत्वं कथ्यते;तत्र अन्यदपि व्याक्रियते यत् अविद्यमानस्य असतो वा समवायिकारणत्वं अवधित्वं च उभयमेव न संभाव्यत[653]इति स्पष्टीक्रियते । अन्यच्च कंदल्यां यत्र अपेक्षा -बुद्धि प्रभृतिभि:परत्वापरत्वनाशप्रक्रिया उच्यते यत् अपेक्षाबुद्धिरपि तदानीमेव अवशिष्यते । परत्वविनाशप्रक्रिया व्याप्यव्यापकनिवृत्तिमाध्यमेन क्रियते । तत्र व्याप्तिं लिखति- **"यत् परं तद्विप्रकृष्टं(तद्) यदपरं तत्सन्निकृष्टमिति व्याप्तेर्व्यापकनिवृत्तौ च व्याप्यनिवृतावश्यं भावित्वादपेक्षाबुद्धिविनाशस्य च पूर्वकालभाविविरहात् संयोगविनाशस्यैव** परत्वविनाशकारणत्वमेषितव्यमिति भाव:" कथ्यते । अस्या: व्याप्ते व्यापकत्वस्य निवृत्तौ व्याप्यनिवृत्तिरवश्यं भावित्वात् तत्र संयोगविनाशस्यैव परत्वविनाशकारणत्वं विद्यते यतो हि पूर्वकालभाविरूपेण तत्र अपेक्षा बुद्धिर्न विद्यत इति। अन्यदपि कंदलीप्रोक्त -समवाय्यसमवायिनिमित्तानां परत्वनाशप्रक्रिया अतिरोहार्था एव विद्यत इति कथयति– **"तदेतं समवाय्य -समवायि निमित्तविनाशानां प्रत्येकं परत्वं चिन्तितम्; द्वयोर्द्वयोस्त्रयाणां च समुच्चयस्य परत्व -विनाशकारणप्रक्रियातिरोहार्थ:"** । [654] अनेन प्रकारेण वोम्मिदेवेन परत्वापरत्वयो व्याख्या विहिता इति ।

**बुद्धि प्रकरणम्:-** बुद्धिप्रकरणे पूर्वम् संशयविपर्ययानध्यवसायस्वप्ररूपा अविद्या चतुर्धा आचार्येण वर्णिता वर्तते । अविद्याया निरूपणानन्तरम् तत्र आचार्येण विद्यानिरूपणं विधीयते । अविद्यावत् सापि चतुर्विद्या विद्यते । सा च प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणारूपेण कथ्यते[655] ।१.प्रत्यक्षा, २.लैङ्गिका, ३.स्मृति:,४.आर्षलक्षणा च । अत: पूर्वंप्रत्यक्षस्य वर्णनं क्रियते ।

**न्यायकन्दल्यां प्रत्यक्षाविद्या–** कन्दलीकारेण प्रत्यक्षस्य विशदा व्याख्या प्रस्तूयते । 'अक्षमक्षम्प्रतीत्योत्पाद्यन्ते' इत्यस्य स्पष्टीकरणे कथ्यते यत् इन्द्रियाणां प्राप्तिसम्बन्धेन उत्पद्यते यज्ज्ञानं तत्प्रत्यक्षत्वेन अभिधीयते । कन्दलीकार:लक्षणं लिखति यथा–**"अक्षमक्षं प्रतीत्य प्राप्य यदुत्पद्यते, तत् प्रत्यक्ष प्रमाणमिति"**[656] । विशेषकारेण उत्पन्नत्वात् लक्ष्यं सजातीयविजातीयेभ्यो व्यावर्त्यते यथा यवबीजात् यवाङ्कुरस्य प्रभवत्वम् । १.इन्द्रियजज्ञानं प्रत्यक्षत्वेन कथ्यते न तु सुखदु:खादिज्ञानम् । अन्यच्च

---

[651] *टी. न्या.कं.* पृ.३९४

[652] *टी.न्या.कं.* पृ ३९४

[653] न ह्यसत: समवायित्वमवधित्वं च संभवतीति भाव.। *टी.न्या.कं.* पृ.३९५

[654] *कु.* पृ ३९६

[655] विद्यापि चतुर्विद्या- प्रत्यक्षलैङ्गिकस्मृत्यालक्षणा। *प्र.पा.भा.न्या.कं.* पृ.४४१

[656] *न्या.कं.प्र.पा.भा.* पृ.४४२

प्रत्यक्षलक्षणं बुद्धेः अनन्तरं कृतम् अतो न सुखादीनां प्रत्यक्षमिति स्पष्टीक्रियते[657]। २.इन्द्रियसम्बन्धस्यापि तत्र प्रामाण्यं यतो हि प्रमितेः कारणत्वं तत्र विद्यते[658]। एतदनन्तरं लक्षणपरीक्षा क्रियते[659]। अन्येऽपि प्रत्यक्षविषये ये विशेषविन्दवः तेषां क्रमशः वर्णनं क्रियते-१.सांख्यानां एकादशेन्द्रिय –पक्षखण्डनार्थं पञ्चेन्द्रियाणां तत्र अभिधानम्[660]। २.'इन्द्रियजन्यं प्रत्यक्षम्' इति कथनेन स्मृतेरपि प्रत्यक्षत्वप्रसङ्गः[661]। ३.द्रव्यगुणकर्मसामान्यानामेव प्रत्यक्षो जायते न तु विशेष समवाययोः[662]। ४.द्रव्येषु द्रव्यस्य प्राधान्यात् द्रव्य एव प्रथमतया प्रत्यक्षो विहितः[663] । **प्रत्यक्षज्ञानकरणे अपेक्षिता सामग्री–** प्रत्यक्षकरणे१.'अनेकद्रव्यत्वम्',२.उद्भूतरूपवत्वम्३.अनेकत्वमहत्त्वत्युक्तत्वम्, ४.रूपप्रकाशः इति निर्दिश्यते । अन्यच्च अवयविषु स्फुटत्वम् अस्फुटत्वं च' उभयमपि दृश्यते, अतः 'रूपप्रकाश इति शब्दप्रयोगः प्रत्यक्षज्ञाने आवश्यक इति ।**चतुष्टयसन्निकर्षः**–आत्ममनसोः,इन्द्रियमनसोः, इन्द्रियार्थयोः च संयोगः,धर्माधर्मदिक्कालजन्यत्वं च प्रत्यक्षस्य कथ्यते चतुष्टयसन्निकर्षमाध्यमेन । यथा कंदलीकारः अत्र विश्लेषयति- **"अवयवभूयस्त्वप्रकर्षाप्रकर्षाभ्यामवयविनि स्फुट त्वास्फुटत्वातिशयानतिशयदर्शनादनेकद्रव्यत्त्वं कारणम् । सत्यपि महत्त्वेऽनेकद्रव्यवत्त्वे च वायोरनुपलम्भाद् रूपप्रकाशो हेतुः । सर्वस्यैव ज्ञानस्य सुखदुःखादिहेतुत्वाद् देशकालादि नियमेनोत्पादाच्च धर्माधर्मदिक्काल जन्यत्वम् । अन्तरेणात्ममनःसंयोगं मनइन्द्रियसंयोगमिन्द्रियार्थसंयोगं च प्रत्यक्षाभावाच्चतुष्ट्यसन्निकर्षः कारणम्"**[664]अर्थात् ज्ञानस्योत्पत्तिः नियतदिक्कालादिषु जायते, अतो धर्माधर्मदिक्कालानामपि प्रत्यक्षे कारणत्वं विद्यते । चतुष्टयसन्निकर्षेषु एकस्या विरहे न प्रत्यक्षज्ञानमुत्पद्यत इति निर्दिश्यते[665]। **निर्विकल्पकप्रत्यक्षः-**१.प्रत्यक्षे सामान्यविशेषयोः न सहोपलम्भनियमः[666]। २.निर्विकल्पकज्ञाने यदि वस्तुस्वरूपज्ञानं स्वीक्रियते अन्यथा वस्तुस्वरूप - वाचकशब्दस्य स्मृतिरेव न स्यात् । ३.निर्विकल्पकज्ञाने व्यक्तिभेदमेव न आभासते, केवलमनुभवेन एव कथ्यते यत् सामान्यं भासत इति । निर्विकल्पकज्ञानकाल अपरस्य व्यक्तेः अनुसंधानं न विद्यते,अतः सामान्यस्य अनुवृतिः व्यावृत्तिश्च न संभाव्यते । निर्विकल्पकज्ञाने विशेष्यविशेषणभावानुगमो न विद्यते यथा कथ्यते कन्दल्याम्–**"अत एव निर्विकल्पकेन सामान्यविशेषस्वलक्षणां न विशेषणविशेष्यभावानुगमः, तस्य भेदावगतिपूर्वकत्वान्निर्विकल्पकेन च सामान्यादीनां परस्परभेदानध्यवसायात्"**[667] ।

---

[657] सुखदु.खसंस्काराणामपीन्द्रियजत्वात् प्रत्यक्षप्रमाणत्वप्रसङ्ग इति चेन्न, वुद्ध्यधिकारेण विशेषितत्वात् । *तत्रैव*, पृ.४४३

[658] *तत्रैव*, पृ.४४३

[659] *न्या.कं.प्र.पा.भा.* पृ.४४३-४४४

[660] तानि च सांख्यैरेकादशविधान्युक्तानि,तन्निवृत्त्यर्थं परिसंख्यां करोति-घ्राणरसनचक्षुस्त्वक्छ्रोत्रमनांसीति। *तत्रैव*, पृ. ४४४

[661] अक्षजं विज्ञानं प्रत्यक्षमित्युक्ते स्मृतिरपि प्रत्यक्षा स्यात्। *तत्रैव*, पृ. ४४४

[662] तत् प्रत्यक्षं द्रव्यादिष्वेव द्रव्यगुणकर्मसामान्येष्वेवोत्पद्यते, न विशेषसमवाययोरित्यर्थः। *तत्रैव*, पृ.४४४

[663] द्रव्यस्य प्राधान्यात् प्रथमं तत्प्रत्यक्षोत्पत्तिमाहद्रव्ये तावदिति। *तत्रैव*, पृ.४४४

[664] *तत्रैव*, पृ.४४५

[665] रूपस्य प्रकाश उद्भवसमाख्यातो रूपस्य धर्मः, यदभावाद् वारिस्थे तेजसि प्रत्यक्षाभावः चतुष्टयसन्निकर्षादात्मनो मनसा संयोगो मनस इन्द्रियेण इन्द्रियस्यार्थेनैतस्मात् कारणकलापाद्धर्मादिसान्मग्रये च सति धर्माधर्मदिक्कालादीनां समग्राणां भावे अति प्रत्यक्षं स्यात् । *न्या.कं.प्र.पा.भ.* पृ.४४४

[666] *तत्रैव*, पृ.४४६-४४७

[667] *न्या.कं.प्र.पा.भा.* पृ.४४७

२.**सविकल्पकप्रत्यक्ष:**–निर्विकल्पकज्ञानान्तरं"इदं विशेष्यं विशेषणं च"इति सर्वं विशेषणविशेष्यभावं सविकल्पकज्ञाने प्रतीयते। तत्र सामान्यविशेषानां सकलरूपेण ज्ञानं विद्यते यथा लिखितं कन्दल्याम्–"**अतः परं सविकल्पकं सामान्यविशेषरूपतां प्रत्येति पिण्डान्तरमनुसन्दधानस्या त्मनोऽनुवृत्तिव्यावृत्ती धर्मो प्रतिपद्यमान स्येन्द्रियद्वारेण तथा भूतप्रतीत्युपपतेः।** "[668]एतदनन्तरं बौद्धानां खण्डनं कृत्वा उभयो प्रत्यक्षयो: वैभिन्य्यं प्रतिपादितं सविकल्पकस्य कल्पना शब्द संयोजनात्मिका विद्यते[669]। अस्मिन् पक्षेऽपि सविकल्पकज्ञानस्य प्रामाण्यं न खण्डितो जायत इति। विशिष्टज्ञाने विशेष्य-विशेषणयोः तथा अनयो व्यवच्छेद्य-व्यवच्छेदकभावः तिस्रोऽपि प्रतीतयः वास्तविक्यो विद्यन्ते न तु कल्पनाजन्या इति। [670]प्रथमेन्द्रियसंपातेन एव विशिष्टबुद्धेः अनुत्पत्तौ विशेषणरूपसहकारिकारणस्याभाव एव विद्यत इति साध्यते[671]। **गुणानां प्रत्यक्ष:**–रूपादीनां प्रत्यक्षस्य कारणं तेषां स्वाश्रयद्रव्ये समवायो विद्यते। यथा लिखति कन्दलीकारः–"**तस्मात् स्वाश्रयसन्निकर्षाद् रूपादीनां य आश्रयस्तस्य ग्राहकैरिन्द्रियः सन्निकर्षान्नियतेन्द्रियनिमितं चक्षुर्निमितं रूपे,रसननिमित्तं रसे, घ्राणनिमितं गन्धे,त्वगिन्द्रियनिमित्तं स्पर्शे ज्ञानमुत्पद्यते। स्वगतविशेषणां हेतुत्वाद् रूपादिष्विन्द्रिय व्यवस्था,अन्यथा परिप्लवः स्याद् विशेषाभावात्।**"[672]अन्यच्च श्रोत्रसमवेतशब्दस्य इन्द्रियार्थेन तथा च संख्यादीनां त्रयोदशानां चक्षुत्वचोः माध्यमेन प्रत्यक्षीकरणं क्रियत इति भाष्यवदेव प्रतिपाद्यते। **कर्मणां प्रत्यक्ष:**-एतदनन्तरं कन्दलीकारेण कर्मणः अनुमितिः मन्यमानस्य आचार्यमतस्य खण्डनं बहुयुक्तीनां माध्यमेन क्रियते। साररूपेण पूर्वपक्षिणा द्रव्यचलने कर्मण: अनुमिति क्रियते। अस्य दूषणं कृत्वा आचार्येण कर्मणः प्रत्यक्षत्वमुच्यते। यथा च लिखति-"**यदि त्वेकस्य व्योमप्रदेशस्य संयोगविभागा: क्रियानुमितिहेतव: कल्प्यन्ते? न शक्यं कल्पयितुम्, अतीन्द्रिय व्योमाश्रयाणां विभागसंयोगानामप्रत्यक्षत्वात्**"।[673] **भूगोलकप्रदेशविभागसंयोगसन्तानानुमेयत्वे गच्छतो वियति विहङ्गस्य कर्म दुरधिगमं स्यात्। वियद्विततालोकनिवहविभागसंयोगप्रवाहो यदि तस्य लिङ्गमिष्यते?अनिच्छतोऽप्यन्धकारे वायुदोषादेकस्मादुपजातावयकम्पस्य भुजाग्रं मे कम्पते भ्रूश्चलतीत्य दृष्टान्त:करणाधिष्ठितत्वगिन्द्रियजा कर्मबुद्धिरनिबन्धना स्यात्। रात्रौ महामेघान्धकारे क्षणमात्रस्थायिन्यां विद्युति चलतीति प्रत्ययस्य का गति:?**"[674]आत्मनि समवेतानां बुद्ध्यादीनां प्रत्यक्षं संयुक्तसमवायसम्बन्धेन क्रियते[675]। भावद्रव्यत्वगुणत्वादीनां प्रत्यक्षः तेषामाश्रयप्रत्यक्षजन्येन इन्द्रियेणैव जायते[676]। **षड्सन्निकर्ष:**-अत्र षोढासन्निकर्षः न्यायदर्शनानुसारम् आचार्येण वर्ण्यन्ते। अस्य मतस्य खण्डनं आचार्येण न

---

668 *तत्रैव*, पृ.४४८

669 एवं तावच्छब्दसंयोजनात्मिका प्रतीति: कल्पना न भवतीति। *तत्रैव*, ४५७

670 अर्थसंयोजनात्मिकापि विशिष्टग्राहिणी न कल्पना, विशेषणस्य विशेष्यश्च च तयो: सम्बन्धस्य च व्यवच्छेद्यव्यवच्छेदकभावस्य वास्तवत्वात्। *तत्रैव*, पृ.४५७

671 प्रथममिन्द्रियेण न तथा गृह्यते, गृहीतेषु विशेषणादिषु गृह्यत इत्यर्थेन्द्रियजं तावद्विशिष्टज्ञानम्। *तत्रैव*, पृ.४५८

672 *तत्रैव*, *पृ*. ४५९

673 *न्या.कं.प्र.पा.भा.* पृ.४६२

674 *तत्रैव*, पृ. ४६२

675 आत्मसमवेतानां संयुक्तसमवायाद् ग्रहणम्। *न्या.कं.प्र.आ.भा.* पृ.४६२

676 *तत्रैव*, पृ.४६२

क्रियते। अनेन कथयितुं शक्यते यत् तत्र सहमतिः स्यादिति[677]। **१.योगज प्रत्यक्षः**–योगिनो भेदद्वयमत्र कथ्यते-युक्तः,वियुक्तश्च। असंप्रज्ञातजनितयोगजप्रत्यक्षे धर्मसाहाय्यं न विद्यते। यथा च लिखितं कन्दल्यां योगजप्रत्यक्षस्य लक्षणं–**"युक्तानां समाध्यवस्थितानां योगजधर्मानुगृहीतेन मनसा स्वात्मनि स्वात्मान्तरेषु स्वात्मन आत्मान्तरेषु परकीयेषु, आकाशे दिशि काले वायौ परमाणुमनस्सु तत्समवेतेषु गुणादिषु समवाये चावितथमविपर्यस्तस्वरूपदर्शनं भवति।** "[678] तत्रोच्यते 'अहममेति' स्वामित्वकर्तृयुक्तप्रतीतिस्तु उपाधिमूला एव, आत्मनः स्वभावप्रत्यक्षं तु योगिभिरेव क्रियत इति निरूप्यते। एकाग्रतया उपनिषद् वाक्यानाम् अभ्यासप्रभृतीनां माध्यमेन कर्माशयादिनाशात् आत्मनः स्वरूपं योगिभिः ज्ञायते। सर्वथा अज्ञातविद्याशिल्पादीनां सकलं ज्ञानं योगाभ्यासेन योगिभिरेव कर्तुं शक्यते। अस्मद्वद् योगिनोऽपि प्राणिनः,अतो न तेषाम् अतीन्द्रियज्ञानम् इति मतं न समीचीनम्। प्राणित्वहेतुमाध्यमेन असर्वज्ञता न साधयितुं शक्यते। अतःअस्मत्सु असर्वज्ञत्वमिति कथ्यते[679]। **२.वियुक्तयोगिनां प्रत्यक्षः-** वियुक्तयोगिनः अत्यन्तयोगाभ्यासजनितधर्मस्य अतिशयेन अतीन्द्रियवस्तुदर्शनेऽपि समर्थाः सन्तीति निरूप्यते। योगजधर्मानुग्रहेण एव सम्मुखवस्तूनि सकारणं ज्ञायन्ते। अन्यच्च मनप्रभृति सूक्ष्माणां, व्यवहितविषयाणां नागलोकादीनां तथा च ब्रह्मलोकप्रभृतीनां प्रत्यक्षीकरणं क्रियते। [680] **प्रत्यक्षत्वे प्रत्यक्षप्रमाणम्**–प्रत्यक्षस्य व्याख्यानान्तरं किं तत्र प्रत्यक्षप्रमाणं किं तस्य करणमिति व्याख्याकन्दलीकारेण क्रियते। 'सामान्यविशेषेषु स्वरूपालोचनमात्रं प्रत्यक्षप्रमाणम् इति लक्षणे उक्तम्। तत्र करणत्वेन स्वरूपालोचनं निर्विकल्पकप्रत्यक्षो वा कथ्यते। प्रमातुः कृते साधकतमत्वेन निर्विकल्पकप्रत्यक्षम् एव सविकल्पकप्रमोत्पादकः। अस्याभावे अन्यथा वर्तमाने सत्यपि न प्रमा उत्पद्यते। अन्यच्च प्रमेयाः द्रव्यादयः चत्वारः, प्रमितिः हानादिव्यवहारप्रभृतिरिति वर्णनं भाष्यवदेव कथ्यते[681]। यथा चोक्तं कन्दल्याम् **"प्रमेयाः द्रव्यादयः पदार्थाः, द्रव्यादयश्चत्वारः पदार्थाः प्रमेयाः प्रमिति विषयाः प्रमितौ जातायां तेषु हानादिव्यवहारः प्रवर्तत इत्यर्थः'**[682]। अतः तस्य इन्द्रियार्थसन्निकर्ष एव करणम्[683]। यथा च कन्दल्यां स्पष्टीकरोति 'चतुष्टयसन्निकर्षः' इति शब्द प्रयोगः तु उदाहरणार्थमेव। द्वित्रिसन्निकर्षजन्यमपि

---

[677] तत्र संयोगाद् द्रव्यग्रह्जणम्,संयुक्तसमब्वायाद् गुणादिप्रतीतिः, संयुक्तसमवेतसमवायाद् गुणत्वादिज्ञानम्, समवायाच्छब्दग्रहणम्, समवेतसमवायाच्छब्दत्वग्रहणम्, सम्वद्धविशेषणतया चाभावग्रहणमिति षोढा सन्निकर्षः यत् संयुक्तसमवेतविशेषणत्वेन रूपे रसाद्यग्रहणम्, या च संयुक्तसमवेतविशेषणविशेषणत्वेन रूपत्वे रसत्वाद्यभावप्रतीतिः, यश्च समवेतविशेषणतया ककारे खकाराद्यभावावगमः, यच्च समवेतसमवेतविशेषणतया गत्वे खत्वाद्यभावसंवेदनम्, तत् सर्वं सम्बद्धविशेषणभावेन संगृहीतम्। *तत्रैव*, पृ.४६३

[678] *न्या.कं.प्र.पा.भा.* पृ.४६६

[679] *तत्रैव*, पृ. ४६५-४७०

[680] अत्यन्तयोगाभ्यासोपचितधर्मातिशया असमाध्यवस्थिता अपि येऽतीन्द्रियं पश्यन्ति ते वियुक्ताः, तेषामभिमुखीभूतनिखिलविषयग्रामाणामप्रतिहतकारणगणानां चतुष्टयसन्निकर्षादात्ममनैन्द्रियार्थसन्निकर्षाद् योगजधर्मानुग्रहसहकारितात् तत्सामर्थ्यात् सूक्ष्मेषु मनः परमाणुप्रभृतिषु व्यवहितेषु नागभुवनादिषु विप्रकृष्टेषु ब्रह्मभुवनादिषु प्रत्यक्षमुत्पद्यते ज्ञानम्। *तत्रैव*, पृ. ४७१

[681] *तत्रैव*, पृ.४७१-४७२

[682] *तत्रैव*, पृ.४७२

[683] *न्या.कं.प्र.पा.भा.* पृ.४७३-४७४

ज्ञानम् अवितथं संशयविपर्ययरहितं च भवितुमर्हति इति प्रयोगः। "[684]शब्दश्रवणानन्तरं यत्'अयं गौ' इत्यत्र गौ प्रकारकज्ञानं जन्यत इति वाक्येन तत्र चक्षुषः कारणत्वमपि न ज्ञानम् स्याद्। तथापि तज्ज्ञानं न प्रत्यक्षमिति। इन्द्रियं तत्र सहकारिकारणं करणं च तत्र शब्द इत्यङ्गीक्रियते। 'हेय' इत्यनेन दोषदर्शनं तथा चोपादेयेन गुणदर्शनमिति कथ्यते। उभयार्मध्ये न रागः तत्र माध्यस्थदर्शनं कथ्यते। हेयोपादेयस्तु पदार्थरूपविशिष्टज्ञानस्य फलम् न तु सुखादिकस्य यतो हि ताः प्रवृत्तयो व्यापाररूपा विद्यन्ते[685]। आचार्यैः करणवृत्यनन्तरं कार्योत्पत्तेः पूर्वं मध्ये च यज्ज्ञानं तदेव कारकस्य व्यापारत्वेनाङ्गीक्रियत इति कथ्यते[686] कथ्यते। एतेषां सर्वेषां ज्ञानम् अपरोक्षरूपेण जायते। लिङ्गादिजन्यत्वं स्मरणादिजन्यत्वमपि च नैतेषां विद्यते।अतः सविकल्पकः,अन्यच्च एतेषु ज्ञानेषु प्रत्यक्षरूपप्रमाणस्यैव फलमेतत्। तत्र ज्ञानोत्पादादभ्यास - जनितपाटव्यम् अपि सहकारिकारणत्वेनाङ्गीक्रियते[687]। कंदलीकारेण अत्र भाष्यकारतो व्यतिरिक्ता चर्चा गुणानां प्रत्यक्षसंदर्भे षड्सन्निकर्षाणाम्, योगजप्रत्यक्षे युक्तवियुक्तयोगिनोः विषये व्यस्ता च विधीयते। अन्यच्च बौद्धैरङ्गीकृतस्य केवलं निर्विकल्पकज्ञानस्य च खण्डनम् आवापोद्वापरूपेण संपाद्यते।

**कुसुमोद्गमे प्रत्यक्षाविद्या**–अक्षमक्ष प्रति इति वीप्साप्रयोगः अव्ययीभावस्य शंकया तथा च स्त्रीलिङ्गस्य अनुपपतिप्रसङ्गकारणात् विद्यते। एतस्मादेव कारणात् 'प्रत्यक्षः प्रत्ययः' ,'प्रत्यक्षाबुद्धिरिति प्रयोगाः तत्र क्रियन्त इति[688] ४.प्रत्यक्षे यत्र धर्माधर्मदिक्कालजन्यत्वम् अङ्गीक्रियते तत्र आलोकस्य मनमः चापि संग्रहीकरणीयः इति कंदलीकारतो भिन्नं योज्यते अर्थात् धर्माधर्म -दिक्कालमनमाम् आलोकस्य च तत्र प्रत्यक्षे माधारणकारत्वं विद्यते[689]। ५. प्रथमाक्षसन्निपातानन्तरं उपाधिवासनायाः परिपाकेन एव विशिष्टज्ञानं कल्प्यते[690]। अत्र 'वासनापरिपाकविशेषः' इति कन्दलीतः पृथग्रूपेण उक्तम् इति। अनेकद्रव्येषु समवेतानां रूपादीनां प्रत्यक्षे,अत्र 'अनेकद्रव्य' इति कथने 'द्वयणुकरूपस्य' प्रत्यक्षत्वं निराक्रियते[691]। अन्यच्च कथ्यते यत् संख्यादीनां कर्मपर्यन्तं ग्रहणं चक्षुस्पर्शाभ्यां क्रियते। कुसुमोद्गमकारः तत्र तद्धर्माणां सहायम् इत्यपि योजयति[692]। अनेन प्रकारेण कंदलीकारतो भिन्ना अपि चर्चा तत्र प्रस्तूयते।तत्र योगजधर्मानुगृहीतावरणप्रक्षयमाध्यमेन प्रत्यक्षे युक्तमनसः अपि सहकारिभावः कथ्यते। अभ्यासस्य अतिशयाधायाकतया एव एतादृशं साक्षात्कारं क्रियत इति अन्यत्र सूच्यते[693]। ज्ञानस्योत्कर्षविश्रामः तु साक्षात्कारेण एव क्रियते यतो हि उत्कर्षपारम्पर्यमपि कुत्रचिद् समाप्यत इति प्रतिपादितम्[694]। यथा-

---

[684]द्वयसन्निकर्षात् त्रयसन्निकर्षादवितथं संशयविपर्ययरहितमव्यपदेश्य व्यपदेशे भवं व्यपदेश्यं न व्यपदेश्यम -व्यपदेश्यं शब्दाजन्यं यद् विज्ञानं ज्ञायते तत् प्रत्यक्षं प्रमाणम्। *तत्रैव*, पृ.४७४

[685] *तत्रैव*, पृ.४७५

[686]अन्तराले तु यस्तत्र व्यापारः कारकस्य सः। *तत्रैव*, पृ.४७५

[687] *न्या.कं.प्र.पा.भा.* पृ.४७५-४७६

[688] *टी.न्या.कं.* पृ.४३३

[689]आलोके मनः समाधौ च सति प्रत्ययस्य भावात्तयोरपि सङ्ग्रह इति भाव.1 *तत्रैव*, पृ.४३६

[690] *तत्रैव*, पृ.५४०

[691]बहुवचनेन द्वयणुकरूपस्य प्रत्यक्षत्वं निवारयति 1 ,उद्भवसमाख्यातोऽपि स्वगतो विशेषो द्रष्टव्य.1 *तत्रैव*, पृ,४५१

[692] *तत्रैव*, पृ.४५३-४५४

[693]योगजधर्मानुहीतेनेति मलाव्रणप्रक्षया/त्/सामर्थ्येऽपिप्रक्रममात्रजनिते युक्तमनः सहकारी भवत्येवेति भाव.1 *तत्रैव*,पृ.४५६

[694] *तत्रैव*, पृ.४५८

"अस्त्वभ्यासस्यातिशयाधायकत्वं सोऽतिशयः साक्षात्काररूप इति कुतोऽपसितमित्यत आह्" । **यत्रोत्कर्षसमाप्तिः सैव साक्षात्कार इत्यभिधीयते**[695] । **कुसुमोद्गमकारेणापि योगजधर्मविरहेण अस्मदादीनाम् असर्वज्ञत्वम् इत्येव स्वीक्रियते**[696] । साररूपेण तेन कथ्यते यत् पुराणप्रामाण्यवादिनाम् अस्मदादीनां मते योगजधर्म एव अतीन्द्रियत्वे कारणं विद्यत इति[697] । **चतुष्टयसन्निकर्षविषये कथ्यते यत् इदं तु उपलक्षणमात्रं** द्वित्रयाणां च सन्निकर्षेण अपि ज्ञानं जायत इति कंदलीकारतो भिन्नं प्रतिपादितम् । कुसुमोद्गमकारेण यद्यपि कन्दलीप्रोक्तसर्वेषां विषये यथावश्यकं स्पष्टीकरणं दत्तम् परञ्च यत्र कुत्रचिद् विशेषः तस्यैव **वर्णनं शोधेऽस्मिन् कृतं विद्यते । प्रत्यक्षे यत्र धर्माधर्मदिक्कालजन्यत्वम् अङ्गीक्रियते तत्र** आलोकस्य मनसः चापि संग्रहः करणीय इति **कंदलीकारतो भिन्नं योज्यते अर्थात् धर्माधर्मदिक्कालमनसाम् आलोकस्य च तत्र प्रत्यक्षे साधारणकारणत्वं विद्यते।संख्यादीनां कर्मपर्यन्तं ग्रहणं चक्षुस्पर्शाभ्यां कथ्यते । योगजप्रत्यक्षप्रकरणे ज्ञानस्योत्कर्षविश्रामः तु कुत्रचिद् समाप्यते, सैव स्थितिः साक्षात्कारत्वेन कथ्यते । साररूपेण तेन कथ्यते** यत् पुराणप्रामाण्यवादीनाम् अस्मदादीनां मते योगजधर्म एव अतीन्द्रियत्वे कारणं विद्यत इति । **न्यायकन्दल्याम् अनुमानविद्या**-लिङ्गदर्शनात् जायमानं ज्ञानम् इत्यत्र सर्वप्रथमं कंदलीकारेण 'दर्शनम्' इति शब्दस्य अर्थः स्पष्टीक्रियते । तत्रोच्यते यत् न केवलं चक्षुषा गृहीतं ज्ञानं 'दर्शनम्'इति शब्देन कथ्यते,अपितु उपलब्धिः तस्य अर्थः । लिङ्गदर्शनात् जायमानं सम्यक् ज्ञानमेवानुमानं चेत् अनेन संशय विपर्ययप्रभृतीनामपि निरासः क्रियते[698] । **हेतुः**– सद्हेतु पक्षसत्त्वम्,विपक्षासत्त्वम्,सपक्षसत्त्वत्वेन च त्रिधा कथ्यते।[699]एतदनन्तरं हेत्वाभासानां निर्देशः क्रियते-१.अनुमेयस्य पक्षवृत्तित्वाभावे असिद्धहेत्वाभासः,२.विपक्षाव्यावृतःहेतु अनैकान्तिकः,[700] ३.सपक्षे अवृत्तित्वं विपक्षे च वृत्तित्वं विरूद्धहेत्वाभासः । अत्र सदहेतोः लक्षणद्वयस्यभावात् दोषाः संज्ञायन्ते । [701] एतदनन्तरं बौद्धानां हेत्वाभाससम्बद्धमतस्य असङ्गतता प्रकटीक्रियते [702] । ततो हेतोः भेदा वर्ण्यन्ते । ते भाष्ये न परिगणिताः विद्यन्ते १.केवलान्वयि २. केवलव्यतिरेकी ३. अन्वयव्यतिरेकी । **केवलान्वयि**-तत्रान्वयी **"विशेषोऽभिधेय प्रमेयत्वात् सामान्यवत्"**[703] अत्र हेतु केवलान्वयि विद्यते । असद्वस्तु परित्यज्य सर्वं भावाभाववस्तुनः पक्ष एव विद्यते । अन्यच्च प्रमाताद्वारा शब्देनाभिधेयोऽपि वर्तते । असत्वस्तुनां न कश्चित् स्वभावः, अतो न तेषां पक्षसपक्षविपक्षत्वं च विद्यते । सत् वस्तुनाम् तत्र सपक्षत्वं कथ्यते, अनेन अत्र विपक्षो न विद्यते अर्थात् अत्र व्यतिरेकहेतुः नेति[704]अर्थात् नात्र व्यभिचारः । **केवलव्यतिरेकि**–

---

695 उत्कर्षपरम्परा क्वचिद्विश्रान्तेत्यर्थः ज्ञानोत्कर्षविश्रमस्तु साक्षात्कार एव । *टी.न्या.कं.* पृ.४५८

696 *तत्रैव*, पृ.४६०

697 *तत्रैव*, पृ.४६०

698 लिङ्गदर्शनाल्लिंगविषयः संस्कारो जायते,किन्त्वस्य न परिग्रहः,बुद्ध्यधिकारेण विशेषितत्वात्। संशब्देन सम्यगर्थवाचिना संशयविपर्ययस्मृतीनां व्युदासः। *न्या.कं.प्र.पा.भा.* पृ. ४६७

699 *तत्रैव*, पृ.४७८-४७९

700 अत्र विपक्षस्थितिमात्रमिति एकस्मादेव लक्षणकारणाद् हेतुर्मध्ये दोषः कथ्यते ।

701 न्या.कं.प्र.पा.भा. ४८०-४८१

702 *न्या.कं.प्र.पा.भा.* पृ.४८१-४८६

703 *तत्रैव*, पृ.४८६

704 *तत्रैव*, पृ. ४८६-४८७

व्यतिरेकहेतोर्मध्ये व्याप्तिः विपक्षयुक्ता भवति इति। दृष्टान्तमाध्यमेन व्यतिरेकिहेतुः वर्ण्यते– 'जीवच्छरीरं सात्मकं प्राणादिमत्त्वात्'। अत्र पक्षं परित्यज्य सर्वो विपक्ष एव कथ्यते तथापि सः हेतुर्विद्यत इति। साध्यस्य निरात्मकरूपाभावः घटादिषु विद्यते, तेषु अप्राणादिमत्त्वरूपस्यभावोऽपि अवश्यं विद्यत इति वर्ण्यते। अनेन प्रकारेण अप्राणादिमत्त्वरूप -हेत्वभावेन सह निरात्मकत्वरूपसाध्याभावव्याप्तिर्गृह्यते। जीवितशरीररूपपक्षे अनेन अप्राणादिमत्वरूपस्य हेत्वाभासस्य निवृत्तिः क्रियते। जीवितशरीरेषु एव वैशेषिकाभिमते आत्मनो बुद्धेश्च सत्वं तथा च कार्योत्पतिः दृश्यते। अतः व्यतिरेकि हेतु विद्यत इति सिद्धिः[705]। केवलान्वयि केवलव्यतिरेकि च हेतुद्वयं वैशेषिकाभिमते न विद्यन्ते,अतः समानतन्त्रेण ज्ञेयम् इति अन्येन प्रतिपाद्यते। साररूपेण अन्ते कथ्यते यत् येन साध्यस्य साधनं क्रियते सैव हेतुः कथ्यते अन्यच्च यथार्थपरिच्छेदकत्वं येन संपाद्यते सैव प्रमाणम् इति उभयोः सामान्यलक्षणं समस्तरूपेण कथ्यते। केवलान्वयिकेवलव्यतिरेकिणो हेतोः सत्ता वैशेषिके न विद्यते। परमतमाध्यमेन समानतन्त्रतुल्यत्वं प्रदर्श्य वैशेषिकप्रोक्तश्लोकज्ञातलक्षणानुसारं तत्र अव्याप्तिदोषो वार्यते[706]। एतदनन्तरं हेत्वादिमाध्यमेन वर्ण्यते। **अनुमितेःविधि–** 'यत्र धूमस्तत्र वह्निः' इति समयस्य व्याप्ते वा असन्दिग्धज्ञानं पुरूषेण यदा क्रियते,तदा 'धूमोऽयं न वाष्पादि'इति आकारस्य ज्ञानं जन्यते। धूमवह्न्यो साहचर्यस्य अनुस्मरणानन्तरं वह्नेरनुमितिर्जायते। २.पक्षधर्मताज्ञानरूपलिङ्गमाध्यमेन एव अनुमितेः पक्षनियमनं विधीयते। परार्थानुमाने उपनयवाक्यप्रयोगस्य वैयर्थ्यं पक्षधर्मतामाध्यमेन वार्यते,यतो हि तस्याः प्रतिपादनम् उपनयं व्यतिरिच्य वाक्यान्तरेषु न संभाव्यत इति[707]। एतदनन्तरं व्याप्तिसम्बन्धिनी चर्चा अतिविस्तृतरीत्या आक्षेपसमाधानपूर्वकं प्रस्तूयते। बौद्धानां खण्डनं कृत्वा स्वमतस्थापनं तत्र कन्दलीकारेण विहितम्[708]। बौद्धैः अविनाभावसम्बन्धे तादात्म्यं कार्यकारणभावश्च स्वीक्रियते। **वैशेषिकमतस्थापना–**१.स्वभावेन एव साध्यहेतुर्मध्ये नियमो भूयोभूयसाहचर्यदर्शनेन व्याप्तित्वेन कथ्यते। धूमवह्न्योः सम्बन्धः उपाधिकृतोऽपि न विद्यते[709]। ३.भूयोभूयः साध्यहेतुसाहचर्यदर्शनमाध्यमेन एव उपाधिन अभावः सिद्ध्यते। अतः पुनर्पुनः सामान्याधिकरणविषयकसविकल्पकप्रत्यक्षमाध्यमेन हि व्याप्तिनियमस्य ग्रहणं क्रियते[710]। ५.अन्यच्च देशकालाविनाभूतस्य हेतोः साध्यत्वज्ञापकत्वं विद्यत यथा– धूमेन ज्ञापकेन वह्निः ज्ञाप्यते[711]। **व्याप्तिभेदाः१.दैशिकव्याप्तिः**-दैशिक[712]कालिक[713]भेदेन व्याप्तिरपि द्विधा। **अनुमानस्य भेदाः** – दृष्टं सामान्यतोदृष्टमाध्यमेन अनुमानस्य भेदद्वयमुच्यते। **१.दृष्टम्** –हेतुना सह पूर्वमेव प्रसिद्धरूपेण

---

705 *न्या.कं.प्र.पा.भा.* पृ.४८७

706 *तत्रैव,* पृ. ४८८-४८९

707 *तत्रैव,* पृ. ४९२

708 तत्रैव, पृ.४९२-४९९

709 को वै ब्रूते न प्रविष्टा इति। किन्तु सामान्यरूपतया, न विशेषरूपेण। अत एव धूमसंवित्त्या वह्निमात्रमेवानुसन्दधानस्तमनुधावति, न विशेषमाद्रियते। *न्या.कं.प्र.पा.भा,* पृ.५०१

710 *न्या.कं.प्र.पा.भा.* पृ.५०१

711 *तत्रैव,* पृ.५०३

712 *तत्रैव,* पृ.५०३

713 *तत्रैव,* पृ. ५०३

सम्बद्धसाध्यस्य पूर्वं ज्ञानं विद्यते,तदा यदनुमानं तद् दृष्टत्वेन कथ्यते[714] । **२.सामान्यतोदृष्टम्-** सामान्यतोदृष्टस्य व्याख्याकरणे कंदलीकारेण तत्र शब्दव्युत्पतिः प्रदर्श्यते । सास्नामात्रदर्शनाद् वनान्तरे यदनुमीयते गोत्वसामान्यं तस्य स्वलक्षणं पूर्वंनगरे दृष्टमिति कृत्वा **प्रसिद्धसाध्ययोरत्यन्तजातिभेदे लिङ्गानुमेयधर्मसामान्यानुवृत्तितोऽनुमानं सामान्यतो-दृष्टम्**[715] । 'एतदनन्तरं तत्र विस्तृतरीत्या चार्वाकमतं निरस्य दृष्टान्ता: प्रस्तूयन्ते[716]। **अनुमानप्रमाणम्-** 'प्रमीयतेऽनेनेति' इत्यत्र करणव्युत्पतिमाध्यमेन प्रमारूपविषये कथ्यते। अनुमानस्थले लिङ्गज्ञानं हि प्रमाणं तथा च प्रमाणस्य फलं प्रमितिः अग्ने: ज्ञानरूपेण निरूप्यते[717] । लिङ्गलिङ्गिमाध्यमेन यज्ज्ञानं तत्र लिङ्गज्ञानरूपव्यापार एव कारणम् । एतदनन्तरं समस्तरीत्या स्पष्टीकरणं विधीयते यत् अग्नेः (साध्य) ज्ञानं प्रमाणं,प्रमिति प्रमाणफलम्[718],अनया अग्निमध्ये गुणदोषमाध्यस्थ्यज्ञानानि क्रियन्ते । यथा कन्दलीकार: अनेन एव भावेन लिखति–"[719]अर्थात् अग्निज्ञानान्तरं हि सुखदुःखादिगुणा उत्पद्यन्ते । अतो गुणदर्शनाद् अग्निज्ञानरूपप्रमायाः फलानि एव विद्यन्त इति । कन्दलीकारेण बौद्धानां खण्डनमाध्यमेन अनुमानविधिप्रकरणे अविनाभावस्य वर्णनं क्रियते । तत्र तदुत्पत्ते: तथा च कार्यकारणभावस्य खण्डनं विधीयते । पक्षसपक्षादीनां विशदं वर्णनं विधीयते । हेतो: भेदगणनाप्रसङ्गे केवलान्वयि, केवलव्यतिरेकि च हेतुद्वयं भाष्यकारतो पृथक्तया वर्ण्यते । अन्यच्च चार्वाकीणां खण्डनमपि अनुमानज्ञानजनितप्रवृत्तिनिवृत्तिप्रसङ्गे संपाद्यते ।

**कुसुमोद्गमे अनुमानम्-** कन्दलीकारेण'दर्शन' शब्दस्यार्थो स्पष्टीक्रियते यत् तत्र कुसुमोद्गमकारेण पाणिनीस्मृतेः कथनं कृत्वा कथ्यते यत् दृशिज्ञानमात्रम् इति अर्थात् पश्चार्थानामा लोचनम् इत्यनेन दर्शनशब्दस्यार्थोऽभिधीयते । यथा- **"पश्चार्थैश्चालोचन इति पाणिनिस्मृतेर्दृशि: ज्ञानमात्रेऽपि वर्तते इत्येतदुक्तं संशयविपर्ययस्मृतीनामिति"** । [720] अत्र संशयविपर्ययस्मृतिरिति कथनेन स्मृतिव्युदास: क्रियते[721] । अनुमानस्य कुसुमोद्गमकारकृतचर्चा पञ्चमाध्याये अवलोकनीया,अत्र विषयविस्तृति: न क्रियते । अत्र केवलं सारमात्रं प्रदीयते । वोम्मिदेवेन कंदलीकारोक्त सर्वेषां विषयाणां चर्चा विहिता वर्तते । शोधेऽस्मिन् यत्र कुत्रचिद् विशेषनिर्देशो विधीयते तस्यैव वर्णनं संकेतो वा क्रियते । अत्र बह्वो न्याया: उद्ध्रियन्ते ते च मृतमारणकल्पना, काकतालीय -न्याय:,कोडीकृतन्याय:,ब्राह्मणपरिव्राजकन्याया: च सन्तीत। हेत्वादीनां वाक्यानां स्पष्टीकरणे उपनयवाक्यस्य पक्षधर्मप्रतिपादकत्वं कथ्यते । अविनाभावस्य साहचर्यभावस्मृति: लिङ्गस्मृति पूर्वकत्वमेव जन्यते । अत्र स्मृतेः अनुमाने व्याप्तेः स्मरणमविरोध इति कथ्यते । लिङ्गदर्शनस्यस् विषयनाशात् नाशो न जायते । अनेन प्रकारेण यत्रोचितं यथावश्यकं स्पष्टीकरणं दीयते ।

---

714 पूर्वं गोत्वजातिविशिष्टायामेव गो व्यक्तौ सास्नोपलब्ध्या सम्प्रत्यपि गोत्वजातिविशिष्टायामेव गोव्यक्तेरनुमान- मत्यन्तजात्यभेदे *तत्रैव,* पृ.५०८

715 *तत्रैव,* पृ.५०१-५०९

716 *तत्रैव,* पृ.५०९

717 तत्रानुमाने लिङ्गज्ञानं प्रमाणं प्रमीयतेऽनेनेति व्युत्पत्त्या, प्रमिति: प्रमाणस्य फलमग्निज्ञानम्। *न्या.कं.प्र.पा.भा.* पृ. ५११

718 अग्निज्ञानं प्रमाणम्, प्रमिति: प्रमाणस्य फलम्। *तत्रैव,* पृ.५११

719 अग्नौ गुणदोषमाध्यस्थ्यदर्शनम्– गुणदर्शनं सुखसाधनमेतदिति ज्ञानम्,दोषदर्शनं दुःखसाधनत्व ज्ञानम्, माध्यस्थ्यदर्शनं सुखदुःखसाधनत्वाभावज्ञानम्,अग्निज्ञाने सति तथा प्रतीत्युत्पादात्। *तत्रैव,* पृ. ५११

720 *टी.न्या.कं.* पृ.४६४

721 यद्यपि संशयविपर्ययौ न लिङ्गदर्शनाज्जायेते तज्जनकस्य वक्ष्यमाणलिङ्गलक्षणग्रहात्तथापि स्मृतिव्युदासाय क्रियमाण: संशब्दो मन्द्बुद्धीन् प्रति तावपि व्युदास्यतीति भाव:। *तत्रैव,* पृ. ४६४-४६५

एतदनन्तरं कंदलीकारेण शब्दस्य, आप्तशब्दस्य, स्वत:प्रामाण्यवादस्य, सम्भवस्य, अर्थापत्ते: अभावस्य,ऐतिह्यस्य च अनुमाने अन्तर्भाव: क्रियते ।कन्दल्यां कुसुमोद्गमे च शब्दस्य[722],स्वत: प्रामाण्यवादस्य, चेष्टाया:[723],उपमानस्य[724], अर्थापत्ते:[725],संभवस्य[726],अभावस्य[727]ऐतिह्यस्य[728]च अन्तर्भाव: अनुमान एव क्रियते । तत्र अभावस्य चतुर्विधत्वमुच्यते ।स च चतुर्व्यूह:- प्रागभाव:[729],प्रध्वंसाभाव:,इतरेतराभाव:, अत्यन्ताभावश्चेति"[730] । अत: एतेषां संक्षिप्तं वर्णनं क्रियते । अत्यन्ताभावस्यासत्वे 'षडेव पदार्था:' इत्यत्र एतेभ्यो भिन्नं न वर्तते;कोऽपि पदार्थ इति न संभाव्यते । यथा चोक्तं-**"यथा षड्पदार्थेभ्यो नान्यत् प्रमेयमस्तीति । यदि चात्यन्ताभावो नेष्यते, षडेव पदार्था इत्ययं नियमो दुर्घट: स्यात्"**[731] । अत: अत्यन्ताभावस्य सत्तावश्यकीति निरूप्यते । अन्यच्च पदार्था षडेव न अभाव: तद्भिन्नमित्यपि कंदलीकारेण प्रतिपाद्यते । अनेन प्रकारेण वोम्मिदेवेन व्यस्ता व्याख्या विधीयते । [732]अर्थात् अनुमानं परार्थानुमानमिति प्रतिपादितम् । अनेन प्रकारेण कंदलीकारेण अन्विताभिधानाभिहितान्वयवादिनो: खण्डनं विधाय पञ्चावयववाक्यस्य परार्थानुमानत्वं साधितम् । भाष्यकारेण केवलं सिद्धान्तमतमेव निरूप्यते।

**कुसुमोद्गमे परार्थानुमानम्**-परार्थबोधनार्थे परार्थानुमानमित्येवं कुसुमोद्गमकारेण प्रतिज्ञायां अवयवत्वसाधने कथ्यते यत् तन्तूनां पटसाधने एककार्यत्वं यथा विद्यते तद्वदेव प्रतिज्ञाया: अपि समुदायवाक्यस्याप्रसङ्गत्वं विद्यते अत्रापि सारमात्रमेव लिख्यते[733] । पञ्चावयववाक्यस्य साध्यव्याप्तहेतुत्वद्वारा कथनेन परार्थानुमानत्वमिति प्रयोग:[734] । तस्य शाब्दत्वप्रसङ्गवारणाय क्रियत इति कथ्यते । संशयितविपर्यस्तानां व्युत्पनानां कृते निश्चितार्थप्रतिपादनं यत्रोक्तं तत्र वोम्मिदेवेन विपर्यस्तस्यार्था: स्पष्टीक्रियन्ते । 'परार्थानुमानम्' इति शब्दे कुसुमोद्गमकारेण शंकोपस्थाप्यते यत् 'परार्थ:','अनुमानम्' इति पदद्वयं मुख्यवृत्या तु न ज्ञायते न चानुमानेन । तस्य तत्र औपचारिकं समानाधिकरण्यम् इति प्रतिपाद्यते

---

722 शब्दादीनामप्यनुमानेऽन्तर्भाव:, समानविधित्वात्। यथा प्रसिद्धसमयस्यासन्दिग्धलिङ्गदर्शनप्रसिद्ध्य-नुस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानमेव शब्दादिभ्योऽपीति। *प्र.पा.भा.न्या.कं.* पृ.५१२

723 प्रसिद्धाभिनयस्य चेष्टया प्रतिपत्तिदर्शनात् तदप्यनुमानमेव। *प्र पा.भा.न्या.कं.* पृ. ५२९

724 एवं हि तदायमनुसंधत्ते अस्यैव तन्मया पूर्वमेव तृतच्छब्दवाच्यत्वमवगतम् 'इत्यनुमानाभाव.1 *तत्रैव.* पृ. ५३४

725 अर्थ एव तु तेनाभिहितोऽर्थान्तरेण विनानुपपद्यमान: प्रतीत्यनुसारेण स्वोपपत्तये मृगयतीत्यव्याहतं शब्दश्रवणादनुमितानुमानमिति । *तत्रैव,* पृ.५४२

726 सहस्रंशतेनाविनाभूतम्, तत्पूर्वकत्वात्। तेन सहस्राच्छतज्ञानमनुमानमेव। *तत्रैव,* पृ.५४२

727 भाष्ये विद्यादनुमानमेवेत्युपलक्षणम्। इन्द्रियव्यापारानुविधानात्प्रत्यक्षमप्यभावज्ञानमस्तीत्याह। *टी.न्या.कं.* पृ.५३४

728 *तत्रैव,* पृ.५५७

729 उत्पन्नस्य स्वरूपप्रच्युति प्रध्वंसाभाव:;स चोत्पत्तिमानप्यविनाशी भावस्य पुनरनुपलम्भात्। *न्या. कं.प्र.पा.भा.* पृ.५५६

730 *तत्रैव,* पृ.५५६

731 *न्या. कं*५५८

732 *तत्रैव.* पृ.५५८-५६५

733 *टी.न्या,कं,* पृ.५४७-५५०

734 *तत्रैव,* पृ. ५३९-५५१

[735]अत: अत्र लौकिक एव प्रचार विद्यते। कुसुमोद्गमे अधिकारिण: सुसन्दिग्धत्वं तता च तम्य कृते विषय: संशयरहितो बोधनीय: । अनेन प्रकारेण कुसुमोद्गमकारेण अपि विशदं विवरणं प्रस्तूयते । तत्र मीमांमकमतस्य वाक्यस्फोटदीनां च विश्लेषणं क्रियते ।

**न्यायकन्दल्यां प्रतिज्ञावाक्यम्-** पदार्थानुमानोत्पादकमहावाक्यस्य पञ्च अवयवा: विद्यन्ते । प्रतिज्ञादिरूपेण तेषां निर्देशो भाष्यकारेण विहितः। तत्र प्रथमस्य प्रतिज्ञायाः लक्षणं भाष्यकारेण लिखितम् यत् **"अनुमेयोद्देशोऽविरोधी प्रतिज्ञा"**[736]प्रतिज्ञा केवलं वाक्यमात्रम् । २.प्रतिज्ञा उद्देशमात्रं विद्यते,तस्य सान्निध्यं हेतुना सह न विद्यत इति सूच्यते। एवं कथयित्वा स्ववचनस्य सिद्ध्यर्थं विरूद्धवाक्यं लिखति– **"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता"** [737] इति। एतदनन्तरं प्रतिज्ञावाक्यस्य उपयोगित्वं साधयति तद्यथा- **"न विद्यते प्रत्यक्षविरोधी,तस्य वचनं प्रतिज्ञा"** । [738]**१.प्रत्यक्षविरोधिप्रतिज्ञा–** 'अनुष्णो वह्निः'दृष्टान्तेऽस्मिन् वह्ने अनुष्णत्वं अनुमानेन तावत् कालं न साध्यते,यावत्कालं वह्ने अनुष्णत्व प्रत्यक्षेण सिद्धं न स्यात् यतो हि प्रत्यक्षाधारितं हि अनुमानम् [739]। २.**अनुमानविरोधिप्रतिज्ञा**– 'घनमम्बरम्' इत्यत्र आकाशस्य निरवयवत्वं नित्यत्वं तु अनुमानेन एव साधितम्, अतः आकाशस्य अवयवयुक्तत्वम् अनुमानविरूद्धं वर्तते[740] । ३.**आगमविरोधिप्रतिज्ञा –** 'ब्राह्मणेन सुरापेया' इति प्रतिज्ञावाक्येन बोध्यते[741] । ४.**स्वशास्त्रविरोधिप्रतिज्ञा**–वैशेषिकशास्त्रानुयायिभि: यदा स्वशास्त्रं प्रमाणत्वेन वादे स्थाप्यते तदा अनुमाने प्रतिज्ञावाक्यस्य प्रयोगः 'कार्यं उत्पत्ते पूर्वं सत्' इति रूपेण प्रतिज्ञा क्रियते चेत् स्वशास्त्रविरोधदोष: कथ्यते, यतो हि वैशेषिके असतः कार्योत्पत्तिः जायत इति सिद्धान्तः[742] । **५.स्ववचनविरोधिप्रतिज्ञा–** 'शब्देन अर्थावबोधो न जायते'इति ज्ञानार्थं यदा 'शब्दो नार्थप्रत्यायकः' इति वाक्यं प्रयुज्यते[743] । एवं प्रकारेण वैशेषिकदर्शने ज्ञानम् इतोऽपि संवर्धितम् ।

**कुसुमोद्गमे प्रतिज्ञानिरूपणम्–**प्रतिज्ञावाक्यस्य प्रारम्भकाले पञ्चावयववाक्यानां निर्देशः 'अवयवाःपुन'इति शब्देन क्रियते । तेन जिज्ञासादीनाम् अवयवत्वस्य निरास: तथा च वाक्यालंकारार्थं क्रियते । वाक्यालङ्कारस्य अर्थो वाच्यभेदात् वैभिन्न्यप्रतिपादनमितिवर्तते । एतदनन्तरं वाच्यार्थयुक्तवाक्यस्य उदाहरणं वोम्मिदेवेन प्रस्तूयते । यथा- 'यज्ञदत्तौ भुङ्गते', 'देवदतः पुनरधीयते' च इति[744] भावोऽयं यत् प्रतिज्ञा वाच्यभेदात् भिन्ना वर्तते । कंदलीकारनो भिन्नं स्पष्टीकरणमिदं विहितम् ।

अत्रापि समेषां प्रतिज्ञावाक्यानां विशदं विवेचनं प्रतिपादितम्[745]। प्रत्यक्षानुमानपूर्वकं पूर्वपक्षिणा

---

[735] *तत्रैव*, पृ. ५५३-५५४

[736] *न्या.कं.प्र.पा., भा.* पृ.५६६

[737] *तत्रैव*, पृ.५६६

[738] *न्याय. क. पृ.* ५७०

[739] *तत्रैव*, पृ.५७१

[740] *तत्रैव*, पृ.५७२

[741] *तत्रैव*, पृ.५७३

[742] *न्या.कं.प्र.पा.भा.* पृ. ५७३

[743] *तत्रैव*, पृ. ५७३-५७४

[744] वाक्यस्य वाऽलंकारो वाच्यभेदप्रतिपादनं यथा यज्ञदत्तौ भुङ्क्ते, देवदत्त: पुनरधीते इति। टी.न्या.कं. पृ.५५४

[745] *तत्रैव*, पृ.५५८-५६२

शास्त्रमुक्तं तस्यैव स्पष्टीकरणं कुर्वता कथ्यते यत् यद्यपि शास्त्रमनुमानमेव, शब्दस्य पृथक्प्रमाणत्वनिषेधात् तत्र उदाहरणानां पौनरुक्त्यं न विद्यत इति । वाक्यालंङ्कारस्य अर्थो वाच्यभेदात् वैभिन्यप्रतिपादनमिति प्रतिपादितम् । एतदनन्तरं वाच्यार्थयुक्तवाक्यस्य उदाहरणद्वयं 'यज्ञदतौ भुङ्गते', 'देवदतः पुनरधीयते' इति रूपेण वोम्मिदेवेन प्रस्तूयते । भावोऽयं यत् प्रतिज्ञा वाच्यभेदात् भिन्ना वर्तते । कंदलीकारतो भिन्नं स्पष्टीकरणमिदं विहितम् । **न्यायकन्दल्यां हेत्वाभास:**-पञ्चावयववाक्येषु प्रतिज्ञाया: अनन्तरम् अपदेशस्य हेतो वा व्याख्या कंदलीकारेण प्रस्तूयते । लिङ्गवचनमपदेश:' इति रूपेण भाष्यकारेण हेतो: लक्षणं दीयते । हेतो उदाहरणे 'द्रव्यवायु:' इत्यस्मिन् क्रियात्वात् गुणत्वात् हेतुद्वयमुपस्थाप्यते । अनेन 'गुणवत्त्वम्' इति हेतु द्रव्येषु विद्यत इति । अत: तस्य सर्वसपक्षत्वं विद्यते । उभयोरेव न विपक्षे सत्त्वं विद्यते अत: सद्हेतु इति[746] । **हेतो: भेदा:**-हेतो भेदविषये कथ्यते यत् 'अनुमेयेन सहचरितम्'इति लक्षणेन असिद्धविरूद्धसन्दिग्धानध्य- वसितप्रभृतीनामर्थत: कथनं जायते । एतेषु 'असिद्धवचनम्' इति हेतौ हेत्वाभासस्य आक्षेप: तथा च विरूद्धानध्यवसितवचनयोर्मध्ये हेत्वाभासो व्यज्यते । सन्दिग्धवचनमित्यत्र हेत्वाभासस्य ध्वन्यत्वं कथ्यत इति कंदलीकारेण निरूप्यते[747] । **१.असिद्ध:**-असिद्धहेतु: प्रथमो हेतु:,अस्य चत्वारो भेदा:- १.उभयथासिद्ध, २.अन्यतरासिद्ध:, ३.तद्भावासिद्ध:, ४.अनुमेयासिद्ध: च इति रूपेण भाष्यकारेण प्रोक्ता इति निर्देश:[748] । **१.उभयथासिद्ध:**-वादिप्रतिवादिनोरुभयोरेव हेत्वो पक्षेऽसत्त्वे उभयथासिद्धरूपेण कथ्यते। यथा 'शब्दोऽनित्य: सावयवत्वात्' इत्यत्र नैयायिकै: अनित्यत्वयुक्तस्यापि शब्दस्य सावयवत्वं नाङ्गी क्रियते तथा च मीमांसकै: द्रव्यत्वादपि शब्दस्य नित्यत्वं स्वीक्रियते । अत: 'सावयवत्वम्' इति हेतु: उभयथासिद्धरूपेण कथ्यते[749] । **२.अन्यतरासिद्ध:**-एकस्य वादिन: प्रतिवादिनो वा मते हेतो: असिद्धत्वम्, अन्यतरासिद्धत्वम् इति भाष्यकारेण एव उक्तं यथा- 'शब्दोऽनित्य: कार्यत्वात्'अत्र यद्यपि नैयायिकानां वैशेषिकानां च मते शब्दस्य कार्यत्वं परञ्च मीमांसकै: शब्दस्य नित्यत्वात् 'कार्यत्वम्'इति हेतु: शब्दे न स्वीक्रियते । अत: अन्यतरसिद्धहेतुना कार्यं न साध्यत इति प्रतिपादितम्[750] । **३.तद्भावासिद्ध:**-वाष्पमेव धूमं ज्ञात्वा यदा हेतुसाहाय्येन वह्निरन्विष्यते तदा तद्हेतु: तद्भावासिद्धाभासत्वेन कथ्यते[751] । **४.अनुमेयासिद्ध:**यत्रानुमेय एव असिद्ध: तद्हेतु अनुमेयासिद्ध: । यथा 'पार्थिवं तम: कृष्णरूपत्वात्' तम: नाम्ना किमपि द्रव्यमेव न विद्यते,तेजसो गुणस्य अभावमात्रे एव आरोपो विद्यते । अत: अनुमेयासिद्धत्वात् अनुमेयासिद्ध: आश्रयासिद्धश्च कथ्यते । अत्र कंदलीकारेण असिद्धहेत्वाभासस्य प्रकारद्वयं सूच्यते । प्रथमप्रकारकहेतु वादिप्रतिवादिनोरुभयोर्मध्ये असिद्ध: । यथा-

---

[746] *न्या.कं.प्र.पा.भा.* पृ.५७५

[747] तत्समानजातीयेच प्रसिद्धमित्यनेन विरुद्धानध्यवसितवचनयोरपदेशत्वम्। तद्विपरीते नास्त्येवेत्यनेन सन्दिग्धवचनस्यानपदेशत्वमिति विवेक.। तत्रैव, पृ. ५७७

[748] *तत्रैव*, पृ.५७७

[749] उभयोर्वादिप्रतिवादिनोरसिद्ध:. यथाऽनित्य: शब्द:,सावयवत्वादिति शब्दे सावयवत्वादिति शब्दे सावयवत्वं न वादिनो नापि प्रतिवादिन: सिद्धमित्युभयथासिद्ध.। *तत्रैव*, पृ.५७७

[750] *न्या.कं.प्र.पा.भा.* पृ.५७८

[751] *तत्रैव*, पृ.५७८-५७९

१.उभयासिद्ध:,२.अनुमेयासिद्धच । द्वितीयकं वादिप्रतिवादिनोरन्यतरस्य मतेऽसिद्धो, यथा अन्यतरासिद्ध: तद्भावसिद्धश्च । अत: हेतो: सिद्धि: प्रकारद्वयेन एव क्रियते । अत: अयं हेत्वाभास: असिद्धहेत्वाभासनाम्ना द्विधा विद्यत इति[752] । १.अन्यतरासिद्धप्रसङ्गे कथ्यते यत् कोऽपि हेतु वादिमते सन्दिग्ध: परञ्च प्रतिवादिमते सन्दिग्धासिद्धो भवितुं शक्यते[753] । विशेषणासिद्धहेत्वाभासस्य अन्तर्भाव: अन्यतरासिद्धस्य मध्येऽन्तर्भाव इति निर्देश: । अन्यद्हेतु वादिनो: कृते विपर्ययासिद्ध: सन्दिग्धश्च प्रतिवादिनो मते भवितुं शक्यत इति[754] । **२.विरुद्धहेत्वाभास:**-हेत्वाभासस्य द्वितीयभेदो विरुद्धेति वर्ण्यते । अत्र विस्तृतिमात्रमेव । वनान्तरिते गोपिण्डेऽनुमानवाक्यं केनापि प्रयुज्यते । 'अयं पिण्डोऽश्वो विषाणित्वात्' इत्यत्र विषाणित्वहेतु: अश्वपक्षे तत्सजातीये सपक्षे रासभादिषु न विद्यते परञ्च अश्वविपर्यये गोप्रभृतिषु विद्यते । अतो विरूद्धसाधितत्वात् विरूद्धहेत्वाभास इति कथ्यते[755] **३.सन्दिग्धहेतु:**-यस्य हेतो सत्त्वं पक्षे सपक्षे विपक्षे च त्रिषु विद्यते तदा उभयजातीययोर्मध्ये संदेहोत्पाद्यत इति । अत: सन्दिग्धहेतो: पक्षे गवि,विपक्षे च महिष्यां सत्त्वम्,अत: सन्देहो जायते यत् 'गौर्वामहिष:' इति । अस्य संदेहस्य उत्पत्तिकारणात् विषाणित्वहेतु: सन्दिग्धहेत्वाभासेन कथ्यते[756]। सकलसपक्षविपक्षवृत्तियुक्तसंन्दिग्धस्योदाहरणं कंदलीकारेणैव दीयते[757] । **४.असाधारणहेतु:**-असाधारणहेतुना सपक्षविपक्षयो उभयो व्यावृत्तिर्न कर्तुं शक्यते यतो हि तुल्यबलत्वं विद्यते । पृथिव्यां गन्धत्वमिति असाधारणहेतुना अनित्येषु अवृत्तिकारणाद् पृथिव्यां नित्यत्वं तथा च गगनादिरूपनित्येषु अपि गन्धस्यावर्तमानत्वात्,तेन पृथिव्याम् अनित्यत्वं साध्यते,परञ्च उभयो: सिद्धि न कर्त्तु: शक्यते[758] । अन्यदपि विशदा चर्चा तत्र प्रस्तूयते[759] । **असाधारणहेत्वाभास:-(अनध्यवसितम्)**असाधारणनाम्ना प्रथितो हेत्वाभास: शास्त्रेऽस्मिन् अनध्यवसितशब्देन कथ्यते[760] । यस्य केवलं पक्षे सत्त्वं विद्यते न तु सपक्षे विपक्षे च तद्हेतु: अनध्यवसितहेत्वाभास: कथ्यते । एतदनन्तरं सांख्यमतनिरासचर्चा क्रियते[761] । अन्यच्च अत्र कथ्यते यत्'अयमप्रसिद्धोऽनपदेशो'इति सूत्रेण अनध्यवसितहेत्वाभासस्य संग्रहो विधीयते । असाधारणधर्मोऽपि संशयकारणं चेत् षडपदार्थेष्वपि संशयस्यापत्ति जायते, यतो हि तेषां सर्वेषाम् असाधारणधर्मयुक्तत्वं विद्यत इति प्रतिपाद्यते । अन्ते साररूपेण कथ्यते यत् साधारणधर्मेण एव परस्परविरुद्धधर्माणां स्मृति: क्रियते[762] । 'साधारणधर्मो

---

752 *तत्रैव*, पृ. ५७९

753 यथा च हेतु: कश्चिद् वादिनोऽज्ञानादसन्दिग्ध.प्रतिवादिन: सन्दिग्धासिद्ध इति। *तत्रैव*, पृ. ५७९

754 यद्वा वादिनोऽज्ञानासिद्ध:, यदि वा प्रतिवादिनो विपर्ययासिद्ध.1 *न्या.कं.प्र.पा.भा.*, पृ. ५७९

755 *तत्रैव, पृ. ५७०-५७१*

756 *तत्रैव*, पृ.५८१

757 *तत्रैव*, पृ.५८३-५८४

758 *न्या.कं.प्र.पा.भा.* पृ. ५८५

759 *तत्रैव, पृ.५९३*

760 अनध्यवसित इत्यसाधारणो हेत्वाभास: कथ्यते। *तत्रैव*, पृ..५९३

761 *तत्रैव*, पृ. ५९३

762 साधारणो धर्मो विरुद्धविशेषाभ्यां सह दृष्टसाहचर्य:, तयो: स्मरणं शक्नोति कारेअयितुमतस्तद्दर्शनादेव संशयो भवति, नासाधारणधर्मदर्शनादित्युपसंहारार्थ.1 *न्या.कं.प्र.पा.भा.* पृ.५९८

विरूद्धविशेषाभ्यां सह दृष्टसाहचर्य:, तयो: स्मरणं शक्नोति कारयितुमतस्तद्दर्शनादेव संशयो नासाधारणधर्मदर्शनमित्युपसंहार: । अनेन प्रकारेण विशदतया विषयोऽयं प्रतिपादित: कंदलीकारेण इति । **कुसुमोद्गमे हेत्वाभासा:**-कुसुमोद्गमकारेण निर्दिश्यते यत् अपदेशस्य प्रसिद्धि: समानतंत्र' हेतुत्व'रूपेण वर्तत[763]इति । अनेन अत्र न्यायदर्शनस्य अनुमोदनं क्रियते । अपदेशलक्षणेन विशेषप्रविधे: शेषनिषेधपरत्वमुच्यत इति अर्थात् अपदेशलक्षणं विशेषप्रविधिरिति निर्दिश्यते ।अन्यच्च लिङ्गवचनस्यापदेशत्वकथनेन लिङ्गवचनस्यापदेशत्वं सिद्ध्यते यतो हि अलिङ्गलक्षणरहितत्वं तत्र विद्यत[764]इति । यथा च वर्णयति–असिद्धम् इति शब्दनिर्देशो अवान्तरभेदसूचनार्थं[765] क्रियते । असिद्धहेत्वाभासस्य उभयथासिद्धहेतौ स्पष्टीकरणं कंदलीवदेव विधीयते । शब्दस्य अनित्यत्वस्वीकरणेऽपि न सावयवत्वं न्यायवैशेषिकै: स्वीक्रियते तथा च शब्दस्य नित्यत्वस्वीकृतिकरणाद् मीमासकै: अनित्यत्वं न स्वीक्रियते, अत: अत्र उभयथासिद्धो विद्यते हेतुरिति[766] । अत्र विशेषोऽयं सूच्यते यत् भाट्टेन शब्दस्य नित्यद्रव्यत्वं तथा च प्राभाकरेण नित्यगुणत्वं च स्वीक्रियत इति कुसुमोद्गमकारेण कथ्यते[767] । एतदनन्तरम् असिद्धस्य भेदद्वयस्य केवलं निर्देशमात्रमेव क्रियते । अन्यतरासिद्धहेतुविषये कुसुमोद्गमकारेण दृष्टान्तो दीयते यत् 'श्रृङ्गत्वेन गो श्रृंगवत्' इति । यथोक्तम्- **"तत्रान्यतराश्रयासिद्धं यथा शृंङ्गत्वाद्गोशृंङ्गवदिति"** । कंदलीकारेण यत्रोक्तं यत् विशेषणादय:, अर्थात् विशेषणसिद्धहेत्वाभासस्यापि असिद्धहेत्वाभास एव अन्तर्भाव: क्रियते,तत्र कुसुमोद्गमकारेण सूच्यते यत् आदिशब्देन विशेषासिद्धस्य व्यधिकरणासिद्धस्य चापि ग्रहणं क्रियत[768] इति । अन्यच्च अन्यतरपक्षोपमर्दनेन अन्यतरपक्षज्ञानरूपसंशयो विद्यत इति मनसो मूर्तामूर्तत्वविषये निरूप्यते[769] । अनध्यवसितत्वहेत्वाभासे कथ्यते यत् अक्षपादमते असाधारणहेत्वाभास: अस्माकं मते अनध्यवसित इति नाम्नाभिधीयते[770] । अन्यच्च कथ्यते यत् यावत्कालं साधारणधर्म: समानधर्मेण अनुसंधीयमानेन विरुद्धविशेषस्य स्मारणमिष्टं विद्यत इति निरूप्यते[771] । विशेषस्यापि सामान्यप्रत्ययादेव संशय: प्रतिपाद्यते[772] । अनेन प्रकारेण समस्तं प्रतिपादितं विषयोऽयं कंदलीकारेण इति मुख्यबिन्दूनां निर्देशमात्रमेव क्रियते कुसुमोद्गमकारेण इति । विशेषणासिद्धस्य हेत्वाभासस्य असिद्धहेत्वाभासे श्रीधरेण अन्तर्भाव: सूच्यते,परञ्च तत्र वोम्मिदेवेन विशेषासिद्धस्य व्यधिकरणस्य च अन्तर्भावो बोध्यते । अन्यतरासिद्धस्य शृंङ्गत्वात् गोशृंङ्गवदिति उदाहरणं प्रदीयते ।

---

763 समानतंत्रप्रसिद्धिहेतु*(त्व)* देशपदं व्याचक्षाणस्तत्र स्वसाधनत्वव्याख्या एकमिति विशेषणमिह द्रष्टव्यमिति सूचयति। *टी.न्या,कं.* पृ.५६३

764 विशेषविधे*:* शेषनिषेधपरत्वादिति भाव.1 लिङ्गवचनमपदेश इत्युक्तेऽलिङ्ग वचनस्यानपदेशत्वं सिद्धम्। अलिङ्गलक्षणेन रहितं येन वा लिङ्गलक्षणेन रहितमित्युक्तं तत्र विवेकमाह-अनुमेयेति'। *तत्रैव*, पृ.५६३

765 अवान्तरभेदनेति शेष.1 *तत्रैव*,५६४

766 *तत्रैव*, पृ.५६४-५६५

767 भाट्टस्य प्राभाकरस्य वा न शब्दे सावयवत्वं सिद्धम्। भाट्टेन नित्यद्रव्यतया प्राभाकरेण नित्यगुणतया स्वीकारात्। *टी.न्या.कं.* पृ.५६४-५६५

768 आद्यग्रहणाद्विशेषासिद्धव्यधिकरणासिद्धादयो गृह्यन्ते। *तत्रैव*, पृ.५६६

769 *तत्रैव*, पृ.५७५

770 अक्षपादमतेऽसाधारणो हेत्वाभासोऽस्मन्मतेऽनध्यवसित इति कथ्यत इत्यर्थ.1 *तत्रैव*, पृ.५७७

771 *तत्रैव*, पृ.५७९

772 विशेषस्यापि सामान्यतया प्रत्यक्षीकरणादेव संशय इति व्याख्येयम्। *तत्रैव*, पृ.५८१

अनध्यवसितत्वहेत्वाभासे कथ्यते यत् अक्षपादमते असाधारणहेत्वाभास: अस्माकं मते अनध्यवसित इति नाम्नाभिधीयते । अन्या चर्चा कंदल्या एव विश्लेष: । **न्यायकन्दल्यां निदर्शनवाक्यम्**-कंदलीकारेण प्रकरणेऽस्मिन् विशदव्याख्या प्रस्तूयते । भाष्यवद् निदर्शनस्य भेदद्वयस्य च लक्षणनिर्देश: क्रियते । साधर्म्यनिदर्शनस्य लक्षणं यथा लिखति कंदलीकार:-**"साध्यसाधनयोरनुगमो निर्देश्यते येन वाक्येन तद्वचनं साधर्म्य निदर्शनम्"**[773]अर्थात् येन वाक्येन हेतुसाध्ययोरेकस्मिन् स्थाने सत्त्वं बोध्यते । तद्वाक्यं साधर्म्यनिदर्शनरूपेण कथ्यत इति कंदलीकारेण प्रस्तूयते व्याख्यायते च । **निदर्शनाभास**:-येन वाक्येन साध्याभावेन हेत्वाभावो निर्दिश्यते तद्वाक्यं वैधर्म्यनिदर्शनरूपेणाभिहितम् । लक्षणस्य कंदलीकारो भिन्नशब्दै: प्रस्तौति तद्यथा -**"साध्यव्यावृत्या साधनव्यावृत्तिर्येन वचनेन निर्दिश्यते तद्वैधर्म्यनिदर्शनम्"**[774] **इति ।** निदर्शनवत् असत्यपि यदा निदर्शनवद् भान्ति ये ते निदर्शनाभासा इति कथ्यते । एतेषां षड्भेदा भाष्यकारेण सूचिता वर्तन्ते; तेषां व्याख्या स्पष्टीकरणं वा कंदलीकारेण प्रस्तूयन्ते । **१.लिङ्गासिद्ध**:-'नित्य: शब्दोऽमूर्तत्वात्, यथा परमाणु:' इत्यत्र 'यदमूर्तं तन्नित्यम्' इति वाक्यम् अमूर्तहेतुना नित्यत्वसाधने प्रयुज्यते चेत् अत्र लिङ्गासिद्धनिदर्शना भासो विद्यते यतो हि परमाणो: मूर्तत्वात् तत्र अमूर्तत्वं हेतु एव न वर्तते[775] । **२.अनुमेयासिद्ध**:-यत्र अनुमेयस्यैव असिद्धत्वं तत्र अनुमेयासिद्धो निदर्शनाभास: कथ्यते यथा-नित्यशब्दोऽमूर्तत्वात् इति अनुमाने 'यदमूर्तं दृष्टं तन्नित्यम्,यथा कर्म' इति वाक्यं प्रयुज्यते चेत् क्रियाया: नित्यत्वरूपोऽनुमेयो एव न साधयितुं शक्यते, यतो हि तस्य नित्यत्वम् इति[776] । **३.उभयासिद्ध**:-दृष्टान्ते 'यदमूर्तं दृष्टं तन्नित्यम्,यथा स्थाली' इति निदर्शनवाक्यं प्रयुज्यते चेत् स्थाल्यां नित्यत्वरूपसाध्य: हेतुश्च अमूर्तत्वम् उभयमपि असिद्धं वर्तते[777] । अत: अत्र उभयथासिद्ध इति निदर्शनाभासो विद्यते । अन्येऽपि निदर्शनाभासा: आश्रयासिद्ध: [778],अननुगत: [779], विपरीतानुगतप्रभृतय[780]श्च विद्यन्ते । **६.विपरीतानुगत**:-विपरीतानुगतस्य दृष्टान्ते'द्रव्यं वायु: क्रियात्वात्'इत्यत्र अनुमानार्थे यदि 'यद्द्रव्यं तत् क्रियावद् दृष्टम्' इति वाक्यं न प्रयुज्यते, अपितु एतद्विपरीतं वाक्यं प्रयुज्यते तर्हि तत्र विपरीतानुगतत्वात् तत्र निदर्शनाभासो विद्यते । अन्यच्च व्याप्तिविषये कथ्यते यत् व्याप्ति: हेतौ एव वर्तते न तु साध्ये,न च संयोगवत् हेतुसाध्ययो: संयुक्ताव्याप्ति: कथ्यते । 'घटोऽनित्य: कृतकत्वात्' इत्यत्र कृतकत्वम् इति हेतौ यद्यपि व्याप्यत्ववत् साध्यव्यापकत्वमपि विद्यते,न तु साध्यस्य व्याप्तिरिति व्याख्यायते[781] अर्थात् व्याप्ति: साध्यव्याप्यत्वादेव विद्यत इति यथा-यद् क्रियावत् तदद्रव्यमिति । **वैधर्म्यनिदर्शनाभास**:- साधर्म्यनिदर्शनाभास इव अस्यापि

---

[773] *न्या.कं,प्र.पा.भा.* पृ. ५९८-५९९

[774] *तत्रैव*, पृ.५९९

[775] नित्य: शब्दोऽमूर्तत्वात्, यथा परमाणुरिति लिङ्गासिद्धो निदर्शनाभास: परमाणोरमूर्तत्वाभावात्। *तत्रैव*, पृ.६०१

[776] यथा कर्मेत्यनुमेयासिद्ध:, कर्मणो नित्यत्वान्भावात्। *तत्रैव*, पृ. ६०१

[777] यथा स्थालीत्युभयासिद्ध, न स्थाल्यां साध्यं नित्यत्वमस्ति, नापि साधनममूर्तत्वत्वम्। *तत्रैव*, पृ. ६०१

[778] यथा तम इत्याश्रयसिद्ध.1 *न्या.कं.प्र.पा.भा.* पृ. ६०१

[779] *तत्रैव*, पृ.६०१

[780] *तत्रैव*, पृ.६०१

[781] व्यापकत्वगृहीतस्तु व्याप्यो यद्यपि वस्तुत: आधिक्येऽप्यविरूद्धत्वाद् व्याप्यं न प्रतिपादयेत्। *तत्रैव*, पृ.६०२

पृथक्-पृथक् रूपेण स्पष्टीकरणं क्रियते। **ते च१.लिङ्गाव्यावृत्त:**[782] **२.अनुमेयाव्यावृत्त:,**[783]**३.उभयाव्यावृत्त:**[784]**,४.आश्रयासिद्ध:**[785]**,५.अव्यावृत्त:,६.विपरीताव्यावृत्त:**[786]**च विद्यन्ते ।** उद्धरणेषु प्रोक्तपृष्ठेषु एतेषां विवरणं प्राप्यते । अनुमित्यर्थे साध्यस्य हेतोव्यापकत्वं तथा च हेतो: साध्येन व्याप्यत्वमिति तथा च साध्याभावस्य हेतोरपेक्षया व्याप्तत्वमपि अनुमितौ सहायकमिति व्याख्यायते । अन्ते व्युत्पत्ति: कंदलीकार:**"लिङ्गानुमेयोभयाव्यावृत्तश्चाश्रयसिद्धश्च अव्यावृत्तश्च विपरीताव्यावृत्तश्चेति व्याख्या"**[787] इति रूपेण व्याख्या करणीया । अत: कथयितुं शक्यते यत् भाष्यकारेण अत्र निदर्शनाभासानां निर्देशो विहित:,परञ्च सोदाहरणव्याख्या कंदलीकारेण एव विधीयते । **कुसुमोद्गमटीकायां निदर्शनम्**-निदर्शनस्वरूपस्येति इति कंदलीकारेण प्रयुक्तशब्दे साध्यसाधनयो: उभयो व्याप्तिवचनेन निदर्शनरूपं प्रोक्तमिति कथ्यते अर्थात् अवयवानाम् अर्थानुसारं प्रसिद्धस्य सामान्यलक्षणस्य बोधो जायत इति । साध्यसाधनयो इति कथनेनात्र विशेषाणां व्यावृत्तिरपि जन्यते[788] । एनं भावं गृहीत्वा लिखति-तद्यथा–**"दृश्यते साध्यसाधनयोर्व्याप्तिरनेन वचनेनेत्यवयवार्थानुसारेण प्रसिद्धसामान्यलक्षणस्येति शेष: ।** "[789]२.तमसो आश्रयासिद्धत्वं यत्र उच्यते तत्र कुसुमोद्गमकारेण कथ्यते यत् परमार्थस्तु नीलम्; अरूपस्य तमसि आरोप: क्रियत इति[790] । ३.अन्यच्च विपरीत्यानुगतनिदर्शनाभास इत्यत्र यत् अभिधानगतं विपरीतत्वं तदनुगतरूपेण उपचर्यते[791] । अन्यच्च साध्यस्यार्थिना साधनस्य प्रथमाकाङ्क्षित्वं विद्यते । अत्र निषेधस्यापि पारमार्थिकेन अधिकरणेन निरूपणीयत्वं कथ्यते अर्थात् निषेधस्यापि पारमार्थिकेऽधिकरणे प्रकृष्टरूपेण व्याप्यगत्वेन साधितत्वं विद्यते । अनेन प्रकारेण कुसुमोद्गम-कारेण समस्तमेव विषयोऽयं प्रतिपाद्यत इति निदर्शनाभास: । नीलरूपस्य तमसि आरोपो वर्तत इति निरूप्यते । वचनविशेषे उदाहरणस्य आभास एव अननुगतत्वं कथ्यते । **न्यायकन्दल्याम् अनुसंधानम्**-कंदलीकारेणापि लक्षणस्य व्युत्पत्ति: अनुसंधीयतेऽनेनेति अनुसंधानमिति क्रियते।भाष्ये लिख्यते लक्षणं यथा-**"निदर्शनेऽनुमेयसामान्येन सह दृष्टस्य लिङ्गसामान्यमनुमेयेऽन्वानयनमनुसंधानम्"**[792]अभिप्राय: स्पष्टीक्रियते । हेतो: साध्यस्य अन्वय-व्यतिरेको तथा च पक्षे हेतो: सत्त्वं उभयमेव साध्यज्ञापनशक्तिर्विद्यते,इयं शक्ति: प्रतिज्ञाहेतुवाक्येन न अवबोद्धुं शक्यते । अज्ञातशक्तियुक्तनिदर्शनवाक्ये हेतुसामान्येन सह साध्यसामान्यस्य निदर्शनं तथा च तत्र दृष्टानुमेयस्य

---

782 नित्य: शब्दोऽमूर्तत्वात् यदनित्यं तन्मूर्तं यथा कर्मेति लिङ्गाव्यावृत्तो वैधर्म्याभास:, कमणो मूर्त्यभावात्। *न्या.कं.प्र.पा.भा.* पृ.६०४

783 यथा परमाणुरित्यनुमेयाव्यावृत्त.1 *तत्रैव*, पृ.६०४

784 यथाकाशमित्युभयव्यावृत्त:, अनुमेयं नित्यत्वं परमाणोरव्यावृत्तम्। *तत्रैव*, पृ. ६०४

785 यथा तम इत्याश्रयासिद्ध.1 *तत्रैव*, पृ.६०४

786 *तत्रैव*, पृ. ६०४-६०५

787 *न्या.कं.प्र.पा.भा.* पृ. ६०६

788 विशेषाणां व्यावृत्यर्थत्वादित्यर्थ.1 *टी.न्या.कं.* पृ.५८२

789 *टी.न्या.कं.* पृ.५८२

790 आरोपिनीलरूपस्य तमस्त्वेन प्रतिपादितत्त्वादित्यर्थ.1 *तत्रैव*, पृ.५८३

791 अभिधानगतं विपरीतत्वमनुगत उपचर्यते । *तत्रैव*, पृ..५८३

792 *प्र.पा.भा.न्या.कं.* पृ.६०६

पक्षेऽनुसंधानप्रतिपादनं येन वाक्येन क्रियते तदनुसंधानमिति पदेनाभिधीयते[793] अर्थात् यस्मिन् क्रमे बौद्धुरिच्छा तस्मिन्नेव क्रमे परार्थे तस्य प्रवृत्तिर्जायत इति निरूप्यते। उपनयवाक्यस्य पञ्चावयववाक्यज्ञाने क्रमिकत्वं प्रतिज्ञावाक्यानन्तरं हेतोः,तदनन्तरं निदर्शनस्य जिज्ञासा जायते । हेतुजिज्ञासया हेतुवाक्यं प्रयुज्यते,तेन केवलं हेतुसामर्थ्यमेव बोध्यते न तु पक्षधर्मतारूपसामर्थ्यम् । हेतो ज्ञानान्तरं साधारणरूपेण जिज्ञासा जायते यत् साध्यज्ञानं कया रीत्या उत्पद्यते,तस्याः जिज्ञासायां व्याप्तिवचनस्य प्रयोगो विधीयते । हेतोः साध्यव्याप्तियुक्ताविनाभावज्ञानान्तरं पक्षे साध्यव्याप्ति युक्तत्वस्य जिज्ञासा जायते, तां निवृत्त्यर्थम् उपनयवाक्यं प्रयुज्यत इति वाक्यानां क्रमिकत्वं प्रतिपाद्यते[794] । उदाहरणे निश्चितरूपेण हेतोः पक्षसत्त्वप्रतिपादनार्थम् उपनयवाक्यं प्रयोक्तव्य[795] उपनयो न वाक्यानामिव साधारणवाक्यमिति[796] । ३.अन्यच्च हेतुवाक्यम् अपरार्थस्य बोधको वर्तते, तस्मिन् व्याप्तेः बोधनार्थे न सामर्थ्यं विद्यते । अतः पृथक्त्वेन उदाहरणवाक्यं प्रयुज्यत इति चेत् उपनयप्रसङ्गेऽपि सैव रीतिरनुगन्तव्येति[797] । न्यायभाषायाः पंक्तिः कंदलीकारः अत्र प्रामाण्यप्रतिपादनार्थं करोति तद्यथा- **"असति हेतौ कस्य साधनाभावः प्रदर्श्यते"**[798] इति । अतः उपनयवाक्यस्यावश्यकता वर्तत इति ।भाष्योक्तसाधर्म्य-वैधर्म्योदाहरणस्य निर्देशः तथा च अनुमेयाभावे इति शब्दद्वयेन विधीयते । अनेन प्रकारेण कथयितुं शक्यते यत् अत्र श्रीधरेण न्यायभाषायाः मतमनुस्रियते[799] । आवापोद्वापमाध्यमेन उपनयवाक्यस्य आवश्यकता वर्ण्यते तथा च पञ्चावयववाक्येषु उपनयपर्यन्तं क्रमिकत्वं बोध्यते ।

**कुसुमोद्गमे अनुसंधानम्-** कुसुमोद्गमकारेण अनुसंधानस्य व्याख्यायां सर्वप्रथमं तस्यार्थस्य स्पष्टीकरणं क्रियते । तत्रोच्यते यत् उदाहरणसाध्ये संघटितसाधनान्तरं पक्षे संघटनमनुसंधानं विद्यत इत्ययमर्थः । यथा च व्याख्यायति वोम्मिदेवः-**"उदाहरणे साध्ये न संघटितसाधनस्य पश्चातपक्षे संघटनमनुसंधानमित्यर्थः**[800] । हेतुवाक्यादुपनयस्य भेदप्रतिपादने कथ्यते यत् हेतुवाक्येन अनुमातव्ये सति साधनं विद्यत एतावन्मात्रमेव बोध्यते न तु तेन साध्यते पक्षधर्मतेति[801] । तत्र कथ्यते यत् साधनस्य साध्यप्रयोजकत्वे निश्चिते सति पश्चातधर्मविशेषसम्बन्धस्य जिज्ञासा जायत[802] इति साधितम् । अन्यदपि तत्र कारणं विद्यते यत् अस्याभावे हेतुत्वाभिधायिका पञ्चमीविभक्तिर्न स्याद् इत्यपि

---

793 *न्या.कं.प्र.पा.भा.* पृ.६०६

794 *तत्रैव,* पृ.६०७

795 *तत्रैव,* पृ.६०८

796 *न्या.कं.प्र.पा.भा.* पृ.६०८

797 हेतुवचनस्यान्यार्थत्वान्न तदुपनयसामर्थ्यमस्तीति तदुपस्थापनमुदाहरणेन क्रियत इति चेत्? इहापि सैव रीतिरनुगम्यताम्, अलमन्यथा सम्भावितेन । *तत्रैव,* पृ. ६०९

798 *तत्रैव,* पृ. ६१०

799 तथा च न्यायभाषायां-'असति हेतौ कस्य साद्धनभावः प्रदर्श्यते'इति । *तत्रैव,* पृ. ६१०

800 *टी.न्या.कं.* पृ. ५८६

801 अनुपाख्ये व्यावृत्त्या साध्ये सति अनुमातव्ये सति साधनमस्तीति एतावन्मात्रं प्रतिपादितं न तु पक्षधर्मत्वेनेत्यर्थ.। *तत्रैव,* पृ.५८७

802 साधनस्य साध्यप्रयोजकत्वे निश्चिते पश्चाद्धर्मविशेषसम्बन्धजिज्ञासा भवतीति भाव.। *टी.न्या.कं.* पृ.५८८

प्रतिपादितम्[803]वोम्मिदेवेन कंदल्यां चर्चितसर्वविषयाणां संक्षिप्तरूपेण स्पष्टीकरणं 'दूषयति','भाष्यमवतारयति' इत्यादिरूपेण विहितम्। हेतौ प्रयुज्यमानाया: पञ्चमीविभक्ते: प्रयोजनमपि वोम्मिदेवेन दीयते। हेतुप्रभृतीनां वाक्यानां साध्यसाधनाद्यकरणत्वमपि प्रकरणस्य प्रारम्भ एव सूच्यते। अनेन प्रकारेण पक्षधर्मताप्रतिपादकत्वेन अनुसंधानवाक्यस्य सार्थक्यमिति वर्ण्यते। **न्यायकन्दल्यां प्रत्याम्नायवाक्यम्-** कंदलीकारेण प्रकरणेऽस्मिन् नातिविशदा व्याख्या प्रस्तूयते। भाष्यकार: अस्य लक्षणं लिखति- **"अनुमेयत्वेनोद्दिष्टे चाद्दिष्टे चानिश्चिते च निश्चयापादनार्थं प्रतिज्ञाया: पुनर्वचनं प्रत्याम्नाय:"**। [804] प्रतिज्ञावाक्यद्वारा उद्दिष्टस्य साध्यरूपधर्मस्य पुनर्प्रतिज्ञावाक्येनाभिधानं प्रत्याम्नायत्वेनाभिधीयते[805]। पुनर्कथनं कुत इति शंकायां परेषां निश्चयापादनार्थम् इति वाक्यप्रयोगो विधीयते यतो हि प्रतिज्ञावाक्यमाध्यमेन तत्राभिधानमात्रं न तु निश्चय इति। १.अन्यच्च प्रतिज्ञावाक्यप्रयोगमात्रेण एव न बौद्धु: कृते अर्थनिश्चयो किन्तु हेतूदाहरणोपनयमाध्यमेन पक्षसत्त्वादीनां ज्ञानात् निश्चयात्मकं ज्ञानं जायते,तमेव बोधनार्थं प्रतिज्ञावाक्यस्य पुनर्प्रयोगो विधीयते[806]। २.प्रतिज्ञावाक्यादीनां परस्पराकांक्षया एव अङ्गाङ्गिभावरूपेण विशिष्टार्थपरिसमाप्ति क्रियत इति प्रतिपाद्यते[807]। अनेन प्रकारेण पक्षे कुत्रचिद् व्याप्तिपक्षधर्मताया सत्त्वेऽपि साध्यप्रतीतिर्न जायते। अत: निश्चयार्थम् उपनयवाक्यं प्रयोजनीयम्। अनेन अतिप्रसङ्गो न जायत इति प्रतिपादितम्[808]। एतदनन्तरं प्रत्याम्नायसम्बद्धं बौद्धमतं खण्ड्यते[809] निगमनवाक्यप्रयोगेण हेतो: पूर्णसामर्थ्यं प्रतीयते। तेन तत्र अर्थपरिणतिरपि जायते। विपरीतप्रमाणस्यासत्त्वमपि निगमनं विना न प्रतीयते। अत: निगमनवाक्येन हि सद्हेतु सामर्थ्यस्य परिसमाप्तिर्विधीयत इति स्पष्टीकृतम्[810]।

**कुसुमोद्गमे प्रत्याम्नाय:**-कुसुमोद्गमकारेण प्रत्याम्नायविषये संक्षिप्ता व्याख्या प्रस्तूयते। वोम्मिदेवेन भावोऽयं बोध्यते यत् यद्यपि आकाङ्क्षादिमाध्यमेन सन्निधिर्विद्यते परञ्च तत्र ज्ञानस्याभावेन अन्वज्ञता एव वर्तते[811] अर्थात् अवयवेषु प्रत्याम्नायवाक्यं विना न ज्ञानं विद्यत इति। प्रत्याम्नायवाक्यं प्रयोक्तव्यम् इति विषये कथ्यते यत् सिद्धे सति नियम: आरम्भार्थे भवतीति न्याय: कुसुमोद्गमकारेण वाक्यानाम् अङ्गाङ्गिभावो बोधनार्थं क्रियत इति[812]। तत्रैव प्रतिज्ञाहेतुप्रभृतीनां क्रमश: आकांक्षाबोधनार्थे कुसुमोद्गमकारेण स्पष्टीक्रियते यत् आकांक्षाया द्योतनात् परस्परप्राधान्यात् अपसर्पणभावं प्रतिसंधीयमानै:

---

803 *टी.न्या.कं.* पृ.५८८

804 *प्र.पा.भा,न्या.कं.* पृ ६११

805 प्रतिज्ञावचनेन पक्षे अनुमेयत्वेन प्रतिपाद्यत्वेन उद्दिष्टे साध्यधर्मेऽनिश्चिते तस्यैव धर्मिणि प्रत्याम्नाय: प्रत्यावित्त्याभिधानं येन वचनेन क्रियते प्रत्याम्नाय.1 *न्या.कं.प्र.पा.भा.* पृ. ६११

806 *तत्रैव*,पृ. ६१२

807 सति त्वेतस्मिन्नाङ्काक्षोपगृहीता अङ्गाङ्गिभावमुपगच्छन्त: शक्न्वन्तीति युक्त: प्रत्याम्नाय.1 *न्या.कं.प्र.पा.भा.* पृ. ६१३

808 *तत्रैव*, पृ. ६१४

809 *न्या.कं.प्र.पा.भा.* पृ.६१६

810 यस्मान्निगमने सति हेतो: समग्रं सामर्थ्यं प्रतीयते तस्मात्रैव निगमने अर्थस्य साध्यस्य परिसमाप्ति: प्रतीतिपर्यवसानम्। *तत्रैव.* पृ. ६१६

811 आकांक्षासन्निधिमत्वेपि योग्यतया ज्ञानाभावेनान्वयज्ञाभावादिति भाव.1 *तत्रैव*, पृ.५९०

812 सिद्धो सत्यारण्भो नियमायेति न्यायात्। *तत्रैव*, पृ.४९०

अवयवैः संसर्गरूपस्यैकस्यार्थस्यावगमनं क्रियत इति निरूप्यते। यथा च लिखति-**"एतदु[आ]कांक्षोद्यतनतया चाकांक्षया वाक्यानां परस्परं प्राधाना(न्या)पसर्पणभावमानाकुल: प्रतिसन्दधान: प्रतिपत्त्वासंसर्गरूपमेकमर्थमवगच्छतीति भाव:"**[813] । भावोऽयं यत् अत्र एक: संसर्गरूपोऽर्थो बोध्यते । अवयवानां रूपम् एकत्र संहृत्य 'प्रत्येकमुक्तमेव' इति शब्देन कथ्यते चेत् वोम्मिदेवेन स्पष्टीक्रियते यत् वर्णनमिदं शिष्यबुद्धिवैशद्याय विहितमिति[814] । अन्यच्च प्रत्याम्नायस्य संगतिप्रदर्शने कथ्यते यत् अस्य वाक्यस्याभावे शब्दस्य अनित्यत्वं न सिद्ध्यत इति अर्थ: । वाक्यानां परस्परमुपक्रमेण साध्यधर्मपरत्वं विद्यते । अनेन साध्याभावस्य शंका वार्यते तथा च साध्यधर्मपरत्वे निगमनवाक्यमपि प्रयोक्तव्यमिति वर्ण्यते[815] । अन्यच्च तत्र प्रतिपाद्यते यत् सामान्येन व्यामुग्धस्य व्याप्तिग्राहकं प्रमाणम् अनुस्मार्यत[816] इति । अनेन तत्र प्रत्याम्नायस्य भेदभ्रमो [817]वार्यते । प्रत्याम्नायवाक्यमाध्यमेन ज्ञानं जायते । परस्परं वाक्यानां साध्यधर्मपरत्वं वर्तते । अस्मिन् प्रसङ्गे कंदल्या: पर्याप्ता व्याख्या विधीयते । मुख्यत: कंदलीकारमतमेवावलम्ब्यते,नात्र विशेष: प्रतिपाद्यत इति ।

**न्यायकन्दल्यां पञ्चावयववाक्यानाम् आवश्यकता**-पञ्चावयववाक्यानां प्रतिपादनानन्तरं प्रतिपाद्यते यत् कथमेतेषाम् अवयवानामावश्यकता इति दृष्टान्तमाध्यमेन प्रतिपाद्यते। यथा शब्दस्य नित्यानित्यत्वजिज्ञासाया उपशमनार्थं 'अनित्य: शब्द:' प्रयत्नान्तरीयकत्वात्" यद् कृतकं तदनुष्णं दृष्टम्' यथा घट:, तस्मादनित्य: शब्द: [818] । अन्ते शब्दोऽनित्य एव इति अर्थसमाप्तिरपि विधीयत इति प्रतिपादितम्[819] । निगमनवाक्येन कृतकत्वसामान्ये अनित्यत्वसामान्यस्य व्याप्ते: स्मरणं कार्यते, येन भ्रान्तरूपेण अपि शब्दस्यानित्यत्वम् अवबोध्यते । अन्यच्च प्रतिज्ञावाक्ये अपि अबाधितत्वम् असत्प्रतिपक्षत्वञ्च हेतुद्वयं विद्यते यतो हि उभयो: सत्त्वं पक्ष एव विद्यत इति[820] । तत्र सिद्धान्तिना भाष्यकारेण च कथ्यते यत् पञ्चावयववाक्यमाध्यमेनैव हेतो: सकलसामर्थ्यं प्रतीयते तथा च साध्यानुमितिर्जायत इति प्रतिपाद्यते । पञ्चावयववाक्येन भिन्नं न्यूनम् अधिकम् अनेनैव साधितं यत् पञ्चावयववाक्यं हि परार्थानुमानमिति । तद्यथा- **"यस्मात् पञ्चस्वेवावययवेषु समग्रस्य साधनसामर्थ्यस्य प्रतीतौ साध्यप्रतीति: पर्यवस्यति, नापरं किञ्चिदपेक्षते, तस्मात् पञ्चावयवेनैवान्यूनाधिकेन वाक्येन स्वनिश्चितस्यार्थस्य प्रतिपादनं क्रियत इति कृत्वा एतत्पञ्चावयवं वाक्यं परार्थानुमानमिति सिद्धं व्यवस्थितम्"**[821] । **चार्वाकमतखण्डनम्**-एतदनन्तरं प्रत्यक्षैकप्रमाणं मन्यमानानां चार्वाकिणां खण्डनं क्रियते । भूतभविष्यकज्ञानयुक्तप्रत्यक्षस्य अन्य पुरुषेषु

---

813 *तत्रैव.* पृ.५९२

814 *तत्रैव,* पृ.५९३

815 तदेवमुपक्रमे स्वनिश्चितार्थशब्दस्य लिंगपरतायां भाष्यं योजितम्। इदानीं तस्यैव साध्यधर्मपरत्वे निगमनस्यापि साध्यपरत्वं वक्तव्यम्। *तत्रैव,* पृ.५९५

816 *तत्रैव,* पृ.५९६

817 तदिदमुक्तं व्यामुग्धस्य सामान्येन प्रवृत्तव्याप्तिग्राहकप्रमाणमनुस्मार्येति अनेन प्रत्याम्नायस्य भदभ्रमनिवारकत्वं दर्शयति । *तत्रैव,* पृ.५९६

818 *न्या.कं.प्र.पा.भा.* पृ.६१६-६१९

819 *तत्रैव,* पृ.६१९

820 *तत्रैव.* पृ.६२१

821 *तत्रैव,* पृ. ६२१

अपि प्रामाण्यं वा न?तेषां प्रामाण्यं स्वीक्रियेत चेत् स्वभावलिङ्गकमनुमानं तु स्वीकृतमेव। २.भ्रमात्मकं ज्ञानं स्वीक्रियते चेत् भ्रमज्ञानविषये कथं ज्ञायते, यदिदं भ्रमज्ञानमिति ? तत्र प्रत्युत्तरे पूर्वपक्षिणा पुरूषवचनात् एव भ्रमज्ञानविषये ज्ञानं चेत् तत्र कार्यहेतुकम् अनुमानं स्वीकृतमेव[822]। अन्यदपि अनुमानप्रमाण्यं प्रत्यक्षेण न निषेद्धुं शक्यते यतो हि भावविषयकं प्रत्यक्षज्ञानम्। अन्यच्च यदि अनुपलब्धिद्वारा बोध्यते तर्हि अनुपलब्धिलिङ्गकमनुमानं स्वीकर्त्तव्यम्। अतो न प्रत्यक्षमेव प्रमाणम् अन्येषाम् अनुमानप्रभृतिभिरपि प्रमाणानि एव इति निरूप्यते। अनेन प्रकारेण चार्वाकस्य प्रत्यक्षैकप्रमाणस्वीकृतिमत्त्वं श्रीधरेण खण्डितम्[823]। तत्र खण्डने स्वभावलिङ्गत्वम्, कार्यहेतुकत्वम्, भावविषयकत्वं च अनुमाङ्गरूपेण वर्ण्यन्ते।

**कुसुमोद्गमे पञ्चावयववाक्यानाम् आवश्यकता**-वोम्मिदेवेन सर्वप्रथमं कथ्यते यदधिकसंख्याव्यवच्छेदार्थं प्रमाणद्वं व्याख्यातम्[824]। तत्रैव न्यूनत्वसंख्याया: व्यवच्छेदार्थं चार्वाकमते आक्षेप: क्रियते यतो हि तै: प्रत्यक्षमेव प्रमाणं मन्यते। चार्वाकिणां कृते कथ्यते यत् यदि प्रत्यक्षमेव प्रमाणं तर्हि विमतमेव प्रत्यक्षम्[825],यतो हि लक्षणान्तरेण प्रामाण्यं स्वीक्रियते अर्थात् कंदलीप्रोक्तस्वभावलिङ्गकानुमानस्य अत्र निर्देश: क्रियते। अन्यच्च अनुमानाभासेन स्वलक्षणस्य अप्रमाणतया ग्रहणं विधीयते। यदि एतत् प्रमाणं तर्हि तज्जातीय: अनुमानाभ्यासानन्तर: कल्पनीय:,अनेन दूषणमुत्पद्यत इति निरूप्यते। अत्र पुरुषान्तरगता व्याप्ति: उपलक्षणत्वेन कथ्यते। बौद्धदृशापि अत्र खण्डनं विधीयते। अनुमानानुमानाभासयो: पृथक्तया ज्ञानाभावात् एतेषाम् एकजातीयत्वं स्यात्। यथा च लिखति- **"तदज्ञाने संप्रतिपन्नपरि- त्यागात्प्रमाणतदाभाससामान्यावस्थानादिति प्रमाणानां तदाभासानां च प्रत्येकमेक जातीयत्वावस्थानादित्यर्थ:। तदेतद्बौद्धमतेन चार्वाकनिराकरणम्"**[826] **अर्थात्** अनेन प्रकारेण चार्वाकिणां मतं खण्ड्यते। अतो नात्र विशिष्टा चर्चा विधीयते। एतदनन्तरं न्यायकन्दलीकारेण कुसुमोद्गमकारेण च निर्णय:,स्मृतिरूपा प्रमा, आर्षप्रत्यक्षरूपा प्रमा, तथा च सिद्धदर्शनं वर्ण्यते। चतसृषु विद्यासु स्मृति: आर्षप्रत्यक्षं च कथ्येते। निर्णयस्य सिद्धदर्शनस्य च यथासंभवं प्रत्यक्षे अनुमाने च अन्तर्भाव: क्रियते। एतेषु विषयेषु वोम्मिदेवेन न किञ्चिद् भिन्नं प्रतिपादितम्, तत्र स्पष्टीकरणमात्रमेव विद्यते। एतेषां वर्णनं पञ्चमाध्याये अवलोकयितुं शक्यते। अतो विषयविस्तृतिकारणात् अत्र न वर्णनम्। **न्यायकन्दल्यां निर्णय:**-निर्णयस्य कृते 'विशेषदर्शनजम्'इति शब्दो भाष्यकारेण प्रयुज्यते[827]। **"विशेषदर्शनजमवधारणज्ञानं संशयविरोधी निर्णय:"**[828]। विभ्रमविवेकग्रन्थे निर्णयप्रामाण्यं 'स्थाणुर्वा पुरूषो वा' इत्यस्मिन् दृष्टान्ते असाधारणधर्मबोधनपूर्वकनिश्चयरूपत्वेन कथ्यते। अवधारणा -त्मकज्ञानमेव निर्णय:। निर्णयान्तरं संशयस्य निवृत्तिर्जायते। तस्याभि प्रायोऽयं यत् प्रत्यक्षेण ज्ञातम् अवधारणात्मकज्ञानं प्रत्यक्षनिर्णयेन तथा

---

822 अङ्गीकृतं स्वभावनुमानस्य प्रामाण्यम्। *तत्रैव*, पृ, ६२२

823 *तत्रैव*, पृ. ६२२

824 *टी.न्या.कं.* पृ. ५९७

825 यत्प्रत्यक्षं तत्प्रमाणम्,विमतं च प्रत्यक्षमेव। *तत्रैव*, पृ.५९७

826 *तत्रैव*, पृ.५९८

827 *तत्रैव*,पृ. ६२३

828 *प्र.पा.भा.न्या.कं.* पृ.६२३

च अनुमानेन ज्ञातम् अवधारणात्मकं ज्ञानम् अनुमाननिर्णयत्वेन कथ्यते[829] । कंदल्यां यथा-**यद् विशेषदर्शनात् संशयविरोध्युत्पद्यते स: 'प्रत्यक्षनिर्णय:"**[830] । यद्यपि सर्वाणि ज्ञानानि निर्णय एव तथापि संशयज्ञानान्तरं यज्ज्ञानं तन्निर्णयत्वेनाभिधीयते । अत:प्रत्यक्षानुमा०९नप्रमाणयोर्मध्य एव निर्णयस्य अन्तर्भाव इति प्रतिपाद्यते[831] । भाष्यकारेण न तत्र स्पष्टतया संकेतो विहित: । **कुसुमोद्गमे निर्णय:-** कुसुमोद्गमकारेण न नूतनं प्रतिपाद्यते । **न्यायकन्दल्यां स्मृति:-"लिङ्गदर्शनेच्छानुस्मरणाद्यपेक्षादात्ममनसो: संयोगविशेषात् पट्वाभ्यासादरजनित प्रत्ययजनिताच्च संस्काराद् दृष्टश्रुतानुभूतेष्वर्थेषु शेषानुवसायेच्छानुस्मरण –द्वेषहेतुरतीतविषया स्मृतिरिति"**[832]भाष्यकारेण स्मृते: परिभाषा दीयते । स्मृते: लक्षणस्य स्पष्टीकरणं कंदलीकारेण प्रस्तूयते । तत्र संयोगस्य अभिप्रायेण आत्ममनसो: संयोगे सहायकीभूता: प्रणिधानादयो गृह्यन्ते,यतो हि एतेषामभावे न स्मृतिरुत्पद्यत इति कथ्यते[833] । १.'पटुप्रत्यय' इत्यनेन स्फुटतरप्रत्यय: यथा-पटुप्रत्ययाभावात्था- 'गच्छन् तृणं स्पर्शति' इत्यनेन न स्मृतिसंस्कार:, अत: अत्र व्याप्तिर्न स्यादित्यर्थे पटुप्रत्यय इति उक्तम् ।[834]२.दृष्टानुभूतविषयाणां पुनर्पुनरावृत्तिकारणादेव अभ्यासपाटवम्, ३.अत्यन्ताद्भूतवस्तुन: सकृदेवोपलब्धिकारणाद् अपि आदरप्रत्ययेन संस्कार:,तस्य स्मृति: बहुकालानन्तरम् अपि अनुभूयते । ४.अनुव्यवसायस्य लिङ्गज्ञानरूपव्यवसायजनितत्वात् शेषानुव्यवसायस्य उत्पत्ति व्याप्ते: स्मृतिनापि कथ्यते[835] । सुखस्मरणेन विषयेच्छा उत्पद्यते,अनेन स्मृते इच्छाकारणत्वमपि सूच्यते । पूर्वानुभवोपस्थापनकारणात् अतीतविषयस्योपस्थापनकारणात् तस्या: प्रमात्वं भाष्यकारेण न स्वीक्रियत इति सूच्यते[836] । अन्यच्च अनुमानात् स्मृतिवैभिन्न्यं प्रतिपादनसंदर्भे प्रोक्तं यत् यद्यपि अनुमानस्य परापेक्षत्वं साध्यरूपस्य असाधारणविषयस्य ज्ञापने तथापि तस्य न परापेक्षत्वं विद्यते यतो हि तत्र स्मृतिवत् साध्यज्ञाने पूर्वानुभवस्यापेक्षा न विद्यत इति व्याख्यातम्[837]। पूर्वज्ञानं विना तस्या: प्रामाण्यं नावगम्यते[838] एवं प्रकारेण श्रीधरेण शब्दानाम् अर्थप्रतिपादनम्, तेषां प्रयोगप्रयोजनं च व्याख्याकरणे स्पष्टीक्रियते । अन्यदपि स्मृते: अतीतविषयत्वं सुखदु:खेच्छाद्वेषकारणत्वं च विधीयते । उद्धरणेषु तन्त्रटीकाया उद्धरणमपि प्रस्तौति । **कुसुमोद्गमटीका-स्मृति:-** विषयोऽयं पञ्चमाध्याये अवलोकनीय: । साररूपेण कथ्यते चेत् तत्र उदाहरणादीनां व्याख्यामात्रम् एव विद्यते । न तत्र नूतनं प्रतिपादनं विद्यते । **न्यायकन्दल्याम् आर्षज्ञानम्-** कंदलीकारेणात्र **"आम्नायविधातॄणामृषीणाम् अतीतानागत-**

---

[829] *न्या.कं.प्र.पा.भा,पृ.६२३*

[830] खलु स्थाणावूर्ध्वत्वेन विशेरते । *तत्रैव,* पृ.६२३

[831] यच्चानुमानविषयेऽवधारणज्ञानं सोऽन्माननिर्णय इति उपरितनेन। तत्रैव,पृ.६२४

[832] *तत्रैव,* पृ.६२५-६२६

[833] *न्या.कं.प्र.पा.भा.* पृ.६२५

[834] *तत्रैव,* पृ. ६२५

[835] *तत्रैव,* पृ.६२६

[836] *तत्रैव,* पृ.६२७

[837] तस्या: पूर्वानुभवविषयत्वोपदर्शनेनार्थं निश्चिन्वत्या अर्थपरिच्छेदे पूर्वानुभवपारतन्त्र्यात् । अनुमानज्ञानं तूत्पत्तौ परापेक्षम्,स्वविषये स्वतन्त्रमेव स्मृतिरिव । तस्मात् पूर्वानुभवानुसंधानेनार्थप्रतीत्यभावात्। *तत्रैव,* पृ.६२७

[838] पूर्वविज्ञानविषयं विज्ञानं स्मृतिरिष्यते । पूर्वज्ञानाद् विना तस्या: प्रामाण्यं नावगम्यते । *न्या.कं.प्र.पा.भा.* पृ.६२७

**वर्तमानेष्वतीन्द्रियेषु धर्मादिषु ग्रन्थोपनिबद्धेष्वनुपनिबद्धेषु चात्ममनसो: संयोगाद् धर्मविशेषाच्च यत् प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तदार्षमित्याचक्षते"**[839]अत्र व्याख्यामात्रं प्रस्तूयते । विशदार्थोऽयं कथयितुं शक्यते यत् वेदानां ये विधातार ऋषिप्रभृतय:,तेषां धर्मधर्मिदिशाकालप्रभृतीनाम्,अतीतानागतकाले वर्तमानानाम् अतीन्द्रियवस्तूनाम्, आगमग्रन्थेषूप निबद्धानुपनिबद्धानां विषयाणां संशयविपर्ययरहितं विषयानुरूपं ज्ञानं विद्वद्भि:आर्षज्ञानत्वेन कथ्यते । अन्यदपि यथार्थज्ञानसाधनानामभावेऽपि यज्ज्ञानं तद् प्रतिभात्वेनाभिधीयते[840] । सर्वमेतद् ज्ञानं सहकारिधर्मविशेषाद् विद्यातपस्यासमाधिमाध्यमेन जायते[841] । कन्यकाज्ञानवत् लौकिकानामपि तज्ज्ञानं संभाव्यत इति निरूपणं भाष्यवदेव क्रियते । कन्यकाया: ज्ञानानुसारं तत्र कार्यं दृश्यते, अतो न तत्र संशयो विपर्ययश्च कथयितुं शक्यत[842] इति निरूपितम् ।

**कुसुमोद्गमे आर्षज्ञानम्**-आर्षज्ञानं विषये कुसुमोद्गमकारेण समस्ता व्याख्या प्रस्तूयते[843] ।

**न्यायकन्दल्यां सिद्धदर्शनम्**-सिद्धदर्शननाम्ना न वर्तते पृथक् ज्ञानम्। यत्नपूर्वकविशेष प्रकारकेण अंजनलेपेन खड्गगुलिकाप्रभृतीनां विशेषदर्शनसामर्थ्यरूपसिद्धियुक्तपुरूषाणां सूक्ष्मम्, व्यवहितम्,विप्रकृष्टं च ज्ञानं यदस्मदादिविलक्षणं उत्पद्यते तत्प्रत्यक्षमेव विद्यते[844] । दिव्यान्तरिक्षप्रभृतिषु यत् धर्मादिज्ञानं तत्तु ग्रहसंचारादिलिङ्गकै: ज्ञायते तस्य अनुमान एव अन्तर्भाव: । अन्यच्च धर्मादिज्ञानं यदि इन्द्रियै: जायेत् तर्हि प्रत्यक्षमेव, इन्द्रियानपेक्षत्वात् यदि ज्ञानं तर्हि आर्षज्ञानमेव इति कथ्यते[845] ।'एवम्' इति शब्देन बुद्धिप्रकरण - स्योपसंहारो विधीयते[846] । अनेन प्रकारेण सिद्धदर्शनस्य प्रत्यक्षे अनुमाने आर्षदर्शने च अन्तर्भावो क्रियते ।

**कुसुमोद्गमे सिद्धदर्शनप्रकरणम्**-कुसुमोद्गमकारेण नात्र टीका विहिता ।

**न्यायकन्दलीटीकायां कर्मपदार्थनिरूपणम्**-कर्मनिरूपणे भाष्यकारेण उत्क्षेपणादीनां पञ्चानां कथनं क्रियते । द्रव्यगुणाभ्यां साधर्म्य: वैधर्म्यं निरूपितं परञ्च कर्मादीनां साधर्म्यादिकं प्रकरणस्याप्रम्भे आचार्येण निर्दिश्यते।तत्र साधर्म्यं यथा-१,कर्मत्वजात्या: सह संबन्ध:,एकस्मिन् समये एक द्रव्ये स्थिति:,३.क्षणिकत्वम्,४.मूर्तद्रव्येषु स्थिति:,५.गुणरहितत्वम् ,६.गुरूत्वद्रवत्वप्रयत्नसंयोगगुणेभ्यो जन्यता, ७.स्वोत्पन्नेन संयोगेन नाश:,८.अन्येभ्यो निरपेक्षरूपेण संयोगविभागयो: जनकत्वम्, ९.असमवायि - कारणत्वम्,१०.स्वाश्रयद्रव्येषु तद्भिन्नद्रव्येषु समवायसम्बन्धेन वस्तूत्पादनसामर्थ्यम्, ११.स्वसमानजातीय - वस्तूनामनुत्पत्तिमत्वम्,प्रत्येकक्रियासु उत्क्षेणादीनां नियतसम्बन्ध:,१२.प्रत्येकासु जातिषु उत्क्षेपणत्वादीनां सम्बन्ध:,१३.दिग्विशिष्टकार्यस्य कर्तृत्वं च एते त्रयोदशकर्मण: असाधारणधर्मत्वेन भाष्यकारेण

---

839 *प्र.पा.भा.न्या.कं.* पृ.६२७-६२८

840 *तत्रैव,* पृ. ६२८

841 विशिष्यत इति विशेष:,धर्म एव विशेषो धर्मविशेष:, विद्यातप.समाधिज: प्रकृष्टो धर्मस्तस्मात् प्रतिभोदय.1 *तत्रैव,* पृ.६२९

842 *तत्रैव,* पृ.६२९

843 *टी.न्या,कं.* पृ.६०१-६०२

844 सिद्दर्शनं न ज्ञानान्तरम्, कस्मात्? प्रयत्नपूर्वकमञ्जनलेपखड्गगुलिकादिसिद्धानां दृश्यद्रष्टृणां सूक्ष्मव्यवहितविप्रकृष्टेष्वर्थेषु यद् दर्शनं तत् प्रत्यक्षमेव। *प्र.पा.भा.न्या.कं.* पृ.६२९

845 यदि धर्मादिदर्शनमिन्द्रियजं तदा प्रत्यक्षम्। अथेन्द्रियानपेक्षं तदार्षमित्यर्थ.1 *न्या.कं.प्र.पा.भा.* पृ.६३१

846 एवमनन्तरोक्तेन क्रमेण। बुद्धिरिति बुद्धिर्व्याख्यातेत्यर्थ.1 इतिशब्द: परिसमाप्तिं सूचयति। *तत्रैव,* पृ. ६३१

परिगण्यन्ते[847]। एतदनन्तरम् उत्क्षेपणादिषु पञ्चसु प्रथमोत्क्षेपणस्य निर्देश: क्रियते। कन्दलीकार: सर्वप्रथमं मङ्गलाचरणमाध्यमेन कर्मप्रकरणस्य व्याख्यां प्रस्तौति। कर्मप्रकरणस्य विषयवर्णने यत्र कुत्रचिद् विशेषो तस्यैव वर्णनं करिष्यते। पञ्चकर्मणां कर्मत्वविषये अत्र वर्णनं विहितम्। शब्दानां व्याख्या एव आचार्येण विधीयते तत्र मुख्य-मुख्य बिन्दूनां चर्चा करिष्यते। १.संयोगविभागयो: इतरानपेक्षकारणं'कर्म' इत्यनेन अभिधीयते[848]। २.एकस्मिन् द्रव्ये युगपद् संयोगविभागयो: उत्पत्ति अविरूद्धदिक्संयोगात् एव कर्तुं शक्यते;यतो हि विरूद्धक्रिययो: प्रतिरोधकारणात् विशेषदिशा सह न क्रियाश्रयीभूतद्रव्यस्य संयोग इति[849]। ३.क्रियावेगोत्पादने विशेषप्रकारकसंयोगविभागमपेक्षते;परञ्च संयोगविभागयो: कृते नैतदावश्यकम्। ४.क्रिया केवलम् असमवायिकारणमेव वर्तते, परञ्च गुणस्य असमवायिकारणत्वं च उभयमपि संभाव्यते[850]। ५.क्रियास्वाश्रयद्रव्येषु तद्भिन्नेषु द्रव्येषु समवायसम्बन्धेन वर्तमानस्य कार्यैकस्य संयोगविभागरूपकारणं वर्तते[851]। ६.क्रियायाम् अपरक्रिया कर्मणा नोत्पाद्यतेऽपितु इच्छाप्रयत्नयो: माध्यमेनैव उत्पाद्यते। उत्तरदेशसंयोगरूपक्रियानाशादेव द्रव्योत्पत्तिर्जायत इति कथ्यते। ७.उत्क्षेपणादिपञ्चसु उत्क्षेपणत्वा - दिजातिसम्बन्ध: पञ्चानां साधर्म्यमिति निरूप्यते[852]। एतदनन्तरम् उत्क्षेपणादिपञ्चकर्मणां वर्णनं भाष्यवद् विधीयते। गमनक्रियया सह उत्क्षेपणादीनां यत् अभेदो निर्दिश्यते तस्य प्रत्युत्तरे कथ्यते यत् नाभेद: तत्र उचित:,यतो हि वर्गश: उत्क्षेपणादिक्रियासु समानाकारस्य प्रतीतय: अनुवृत्तिप्रत्यया वा जायन्ते,एवमेव अपक्षेपणाद्यपरवर्गक्रियया भिन्नरूपप्रतीतिरपि व्यावृत्तिबुद्धिमाध्यमेन जायत इति। अतो न अभेद:। अन्यच्च 'उपलक्षणम्' इति पदस्यार्थ जातिरेव विद्यते। केवलम् अनुवृत्तिव्यावृत्तिप्रत्ययमाध्यमेनैव न उत्क्षेपणादीनां जातित्वम् अपितु उदप्प्रभृतिषु उपसर्गेषु बोध्यो नियतदेशेषु एव कार्योत्पत्तिकारणादपि जाति: साध्यत इति प्रतिपाद्यते[853]। अन्यच्च नालिकायां पतितपत्रादीनां प्रत्यक्ष: पार्श्वत: क्रियते चेत् अवयवानां संयोगविभागद्वयं पार्श्वे विद्यमानत्वकारणात् तत्र 'भ्रमण' इति व्यवहारो जायते। **सत्प्रत्ययविधि:**-प्रयत्नपूर्वकं यत्र कर्मोपाद्यते तत् सत्प्रत्ययकर्म इति नाम्नाभिधीयते। यथा कंदलीकार: लिखति –**"सत्प्रत्यय कर्मविधि:-प्रयत्नपूर्वककर्मप्रकार: कथ्यत इत्यर्थ:**[854]। **अप्रत्यय:**-अप्रत्यये प्रयत्नविहीनं कार्यमुपपाद्यते।मुसलोत्पातनरूपक्रिया तत्र मूसले विद्यते।अत: अप्रत्ययक्रियाया: वेगो निमित्तकारणम्,मूसलं समवायिकारणं तथा च संस्कारसाहाय्येन हस्तमुसलयो: संयोगरूपम् असमवायिकारणं च कथ्यते[855]। अनेन वेगाख्यसंस्कारसाहाय्यरूपहस्तमुसलसंयोगेन प्रयत्ननिरपेक्षा क्रिया उत्पाद्यत इतिरूपेण कारणानां निर्देश: कंदलीकारेण क्रियते। मूसलोलूखलयो: संयोगाभ्यां पटुकर्मोत्पादक:

---

847 *प्र.पा.भा.न्या.कं.* पृ.६९७-६९८

848 यद्येकस्मिन् द्रव्ये युगपद्विरुद्धोभयकर्मसमवाय: स्यात्, तदा तयो: परस्परप्रतिबन्धाद्दिग्विशेषसंयोगविभागा-नुत्पत्तौ संयोगविभागयोरनपेक्षकारणं कर्मेति लक्षणहानि: स्यात्। *न्या.कं.प्र.पा.भा.* पृ.६९७

849 *तत्रैव*, पृ.६९८

850 असमवायिकारणत्व,यथा गुणानां निमित्तकारणत्वमपि नैवं कर्मणाम्, किन्त्वसमवायिकारणत्वमेवेत्यर्थ.1 *तत्रैव*, पृ. ६९८

851 स्वाश्रये पराश्रये च व्यासज्य समवेतं यत् कार्यं संयोगविभागलक्षणं तदारम्भकत्वम्। *तत्रैव*, पृ.६९८-६९९

852 एतत् सर्वमपि पञ्चानां साधर्म्यम्। *न्या.कं.प्र.पा.भा.* पृ.६९९

853 *तत्रैव*, पृ.७०२

854 *तत्रैव*, पृ.७१३

855 तं प्रयत्नं निमित्तकारणभूतमपेक्षमाणादात्महस्तसंयोगादसमवायिकारणाद्धस्ते कर्म भवति। *न्या.कं.प्र.पा.भा.* पृ.७१३,७१६

संस्कारजनकाभिघातकर्मोप्पाद्यते यद्यपि तत्र प्राक्तनसंस्कारो विनष्ट:तदपि पटुसंस्कारोत्पत्ति विधीयत इति व्याख्या क्रियते । अभिघातविशेषसंयोगे वेगाख्यसंस्कारोत्पादने साहाय्यसामर्थ्यं कथ्यते । पक्षेऽस्मिन् हस्तमुसलयो: उत्पतनक्रिया: क्रमश एव जायन्ते न तु युगपद् इति योगपद्यग्रहणं तत्र आशुभावात् च कथ्यते[856] । हस्ते स्थाप्य तोमरादीनां प्रक्षेपणप्रभृतिक्रिया: आकर्षणं विना नोत्पादयितुं शक्यत इति स्पष्टीक्रियते । प्रक्षेपणेच्छानुकूलमेव आकर्षण विधीयते[857] । उदाहरणानन्तरं नोदनादिजन्या क्रिया वर्ण्यते एतस्माद् विभागात् नोदनसंयोगो नाश्यते तदा पतनपर्यन्तं वेगनामकसंस्कारमाध्यमेन एव क्रिया जायते;तस्य नाशो गुरूत्वप्रतिबन्धक-संस्कारनाशाद् जायत[858] इति कंदलीकारेण भाष्यकारेण च वर्णितम् । अन्यच्च कथ्यते यत् प्रक्षेपिततीरमध्ये बहव: संयोगा: दृश्यन्ते । अत: कल्प्यते यत् बहुनि कर्माणि उत्पद्यन्त इति वर्णयति तद्यथा-**"क्षिप्तस्येषोरन्तराले बहव: संयोगा: दृश्यन्ते । तेन बहूनि भवन्तीत्याश्रीयते"**[859] । पृथिव्यादिषु महाभूतेषु या नोदनक्रिया सा तु संस्कारविशेष: । यथा कन्दल्यां लिखति- **"तत्र नोदन गुरूत्वद्रवत्वप्रयत्नवेगान् समस्तव्यस्तानपेक्षमाणो य: संयोगविशेष:"**[860]इति वाक्येन लिख्यते । नोदनक्रियया नोद्यनोदकयो: विभागोत्पत्तिर्न क्रियते अर्थात् नोदनमविभागहेतुकर्मणं कारणम् इति । नोदनरूपसंयोगेन सहैव नोदक: स्वनोद्यस्य नोदनं करोति इति कंदलीकारेण स्पष्टीक्रियते । पृथिव्युदकप्रभृतीनां पतनकारणत्वेन गुरूत्वं कथ्यते । मुसले हस्तसंयोगो गुरूत्वस्य प्रतिबन्धक: तस्याभावे मूसलस्य पतनं जायत[861] इति कथ्यते । एवमेव शरीरपतनं शरीरधारकप्रयत्नाभावात् गुरूत्वात् च जायत इत्यत्रापि गुरूत्वं शरीरपतनस्य कारणमिति ।अनेनैव प्रकारेण वेगयुक्तशरीरादीनां पतनविषये गुरूत्वप्रतिबन्धकाभाव एव[862] इति कथ्यते । एतदनन्तरं स्यन्दनप्रभृति क्रियाणां व्याख्या तत्र क्रियते । तीरप्रभृतिषु कथं संस्कारद्वारा क्रिया इति वर्णनं भाष्यकारेण विहितं तत्र चक्रप्रभृतिषु उत्पद्यमानाया: क्रियाया निर्देशमात्रं विहितम् । कंदलीकारेण व्याख्या क्रियते यत् चक्ररूपदण्डसंयोगेन क्रियाया उत्पत्ति जायते । तदनन्तरम् अवयवान्तरेषु क्रिया संयुक्तसंयोगात् अर्थात् नोदनाभिघातात् संस्कारात् जायन्ते । दण्डविगमानन्तरं या: क्रिया: चक्रे तदवयवेषु च दृश्यन्ते तेषां कारणं संस्कार एव विद्यत इति । अतोऽत्र गमनमेव इति निष्कर्षरूपेण प्रतिपाद्यते । तत्र अवयवानां प्रथमा क्रिया संयोगात् तथा च अपरा संयुक्तसंयोगाद् जायत इति कथ्यते[863] । भाष्यकारेण प्राणादिवायुर्मध्ये क्रिया वाय्वात्मसंयोगात् तथा च इच्छानुविधानात् कथ्यते अर्थात् रेचकपूरकप्रभृतिप्राणायामेषु प्राणवायो: क्रिया इच्छानुगुणा दृश्यते । एवमेव नासारन्ध्रप्रविष्टे सति सा क्रिया द्वेषाद् अपि अवलोक्यत इति स्पष्टीकरोति[864] । सुप्तस्य मनस्क्रिया

---

856 *तत्रैव*, पृ. ७१७

857 *तत्रैव*, पृ. ७१९-७२०

858 *तत्रैव*, पृ. ७२३-७२४

859 *तत्रैव*, पृ.७२४

860 *तत्रैव*, पृ.७२६

861 *तत्रैव*, पृ.७२६

862 *न्या.कं.प्र.पा.भा.* पृ.७२८-७२९

863 *तत्रैव*, पृ.७३२-७३३

864 *तत्रैव*, पृ.७३४

जीवनयोनिसाहाय्येन आत्ममनसो: संयोगात् जन्यत इति[865] । तदनन्तरं जीवनस्य स्वरूपं कथ्यते यत् **"विशिष्टात्ममन: संयोगो जीवनम्, तस्य स्वकार्यकरणे धर्माधर्मौ सहकारिणौ"**[866] । उपभोगप्रक्षयानन्तरं परस्परप्रतिबन्धकारणात् धर्माधर्मयो: स्वकार्यकरणे असामर्थ्यमुत्पद्यते, तेन जीवनेनोत्पद्यमानस्य प्रयत्नाभावात् धर्माधर्मयो: वैकल्यात् च प्राणवायु: निरूध्यत इति वर्ण्यते ।तत्र समवायिप्रभृतिकारणानामपि निर्देशो विहित: कंदलीकारेण । आत्ममनसो: संयोग: अपसर्पणक्रियायाम् असमवायिकारणं समवायिकारणं मनस: तथा च कार्यक्षमधर्माधर्मयो: तत्र निमित्तकारणत्वं विद्यत इति निरूप्यते[867] । अन्यच्च शरीरोपजातं स्वर्गे नरके वा कुत्रापि स्यात् तत्र मनस: सम्बन्ध: अपरिहार्यमिति । मनसो न विभुत्वम्, अत: आत्माप्रभृतिवत् स्वर्गादिप्रदेशे न गत्वा तत्रैवा तस्य शरीरेण सह सम्बद्धत्वं न सिद्ध्यते[868] अतो गमनं विना मनस: अपरशरीरै: सह न सम्बन्ध इति तत्र स्पष्टीकृतम् । शरीरासम्बद्धमनसि न क्रिया जायते, अत: स्थूलमृतशरीरस्य पार्श्वे एकस्य उपलम्भायोग्यस्य आतिवाहिकशरीरस्य च कल्पना क्रियते । यस्योत्पत्ति: द्वयणुकादिसक्रियपरमाणुभि: जायते । मृतशरीरात् मनस: स्वर्गादिषु अतिवहनकारणादस्याभधानम् आतिवाहिकमिति। केवलं महाप्रलय एव शरीरसम्बद्धमनसि क्रिया तिष्ठति; अनेन ज्ञायते यत् मरणजन्मनो: अन्तराले मनसि या क्रिया सा तस्मिन् काले केनापि शरीरेण सह सम्बन्धमाध्यमेन एव संभाव्यते यतो हि इयं मनस: क्रिया समर्थिता वर्तत इति निर्दिश्यते[869] ।कर्मप्रकरणस्य उपसंहारं कुर्वन् कथयति यत् सुखप्राति:,दु:खपरिहारश्च क्रियामाध्यमेन एव कर्तुं शक्यन्ते तद्यथा लिखति-**"हिताहितफलोपाय - प्राप्तित्यागनिबन्धनम् । कर्मेति परमं तत्त्वं यत्नत: क्रियतां हृदि**[870] । स्वर्गीयेण नारकीयेण च शरीरेण सह सम्बद्धार्थमेव मनसि उपसर्पणक्रिया जायते । यद्यपि कंदलीकारेण सर्वेषु विषयेषु व्याख्या विहिता तथापि विशेषरूपेण विषयस्पष्टीकरणमपि तत्र दत्तमिति कथयितुं शक्यते ।

**३.कुसुमोद्गमटीकायां कर्मपदार्थनिरूपणम्**-कुसुमोद्गमकारेण कर्मप्रकरणस्य भाष्य-कन्दल्यो: अपेक्षया संक्षिप्ता समस्ता च टीका प्रस्तूयते । एकस्मिन् समये एकद्रव्ये एकमेव कर्म विद्यत इति कथ्यते यथा रूपादय: स्वसमानजातीयेन रसादिभि: सह तिष्ठन्ते तद्वत् उत्क्षेपणादीनां न स्थिति:[871] । एकस्मिन् द्रव्ये विरूद्धकार्यसमवायोऽपि न विद्यते यतो हि तत्र प्रत्यक्षमेव प्रमाणं विद्यत इति कुसुमोद्गमकारेण सूच्यते । उत्क्षेपणकर्मकाले अपक्षेपणस्याभाव: प्रतीयते । अत एकस्मिन् समये एकस्यैव कर्मण: स्थितिकर्मत्वात् तत्र परस्परं सम्प्रतिपन्नत्वं विद्यत इति कथ्यते । [872]कर्मणां कर्मान्तरे आश्रितत्व न विद्यते यतो हि परस्परविरुद्ध

---

865 *न्या.कं.प्र.पा.भा.* पृ.७३४-७३५

866 *तत्रैव,* पृ.७३६

867 अपसर्पणकर्मोत्पत्तावात्ममन.संयोगोऽसमवायिकारणम्, मन*:* समवायिकारणम्, लब्धवृत्ती धर्माधर्मौ निमित्तकारणम्।
*न्या.कं.प्र.पा.भा.* पृ..७३८

868 *तत्रैव,* पृ.७३८

869 *तत्रैव,* पृ.७३९

870 *न्या.कं.प्र.पा.भा.* पृ.७४०

871 *यथा रूपादय:* स्वसमानजातीयेन रसादिना सहैकद्रव्ये वर्तन्ते, नैवमुत्क्षेपणादय*:* स्वसमानजातीयै*:* सहैकस्मिन्द्रव्ये वर्तन्त इत्यर्थम् द्वितीयं तु व्याख्यानं संयोगादिवदनेकद्रव्यवृत्तिव्युदासाय स्वरूपादिसाम्यं प्रथमेव्याख्यातेऽर्थे प्रमाणं सूचयितुं तर्कमाह। *तत्रैव,* पृ.६४०

872 तत्र तावद्विरुद्धकर्मद्वयसमावेशाभावे प्रत्यक्षमेव प्रमाणम्। प्रतीयते हि उत्क्षेपणकर्मवदपक्षेपणाभाव.1 *तत्रैव,* पृ. ६४०

कर्मद्वयस्य अभावे प्रमाणं विमतमेव वर्तते **यथा-"अविरुद्धकर्मद्वयसमावेशाभावे प्रमाणं विमतं(?) कर्मान्तराश्रिते न वर्तते"**[873] । अन्यच्च एकया क्रियया यद्द्रव्यचालनं तदपरया न संभाव्यते यतो हि एकेन सह गम्यमानानां संयोगादीनां गमनभेद: प्रत्यक्षप्रमाणेन एव सिद्धो वर्तते। क्रियाणां क्षणिकत्वप्रभृतय: परस्परसाधर्म्यमात्रं तत्तु गुणादिष्वपि संभाव्यत[874] इति सूच्यते । गुरुत्वसंयोगप्रयत्नद्रवत्वै: चतुर्भि: समस्तेन व्यस्तेन अन्यतमेन वा कर्मोत्पत्ति: विधीयते। तद्यथा उक्तम्- **"गुरुत्वादिष्वन्यतमेन समुदितैर्वा जायमानत्वमित्यर्थ:"**[875] । इच्छाप्रयत्नादिमाध्यमेन यत्र कार्योत्पत्ति: तत्र 'आदि' शब्देन वेगस्यापि ग्रहणं कुसुमोद्गमकारेण सूच्यते । अन्यच्च कुसुमोद्गमकारेण सूच्यते यत् क्रिया दिग्विशेष एव जायत[876] इति व्याख्येयम् । उत्क्षेपणादिकर्मणामुत्पत्ति गुरुत्वसंयोगप्रयत्नादिभ्यो जायते । तत्र एकस्यापि विश्लेषे न उत्क्षेपणादिकर्मोत्पत्तिरिति । सत्प्रत्ययस्य पञ्चप्रकारा विद्यन्ते[877] । उत्क्षेपणादिषु 'उत्क्षिपति, 'अपक्षिपति' इत्यादिरूपेण अनुवृत्तिव्यावृत्तिप्रत्यय: साक्षादेव प्रत्यक्षरूपेण दृश्यत इति स्पष्टीक्रियते । अत्र दृष्टान्तमाध्यमेनापि स्पष्टीक्रियते यत् यथा एकस्यां व्यक्तौ एकस्मिन् समये निरूपणीये नमनत्वकर्मणि हस्तत्व-करत्ववत् परस्परं भिन्नत्वं विद्यते[878] । कर्मणि यत्कर्मोत्पादकत्वं तत् संस्कारजनकत्वेन विद्यते । यथा अभिघातेन हस्ते संस्कार जनककर्मत्वम् उत्पाद्यते[879] । 'वामेन' इत्युपलक्षणं विद्यते यतो हि 'सव्यसाचि' इति क्रियायां तस्य विपर्ययो दृश्यते[880] । ईश्वरस्यैव सर्वकर्माधिष्ठातृत्वं विद्यते यतो हि स ईश्वर: संपूर्णजगतो निमित्तकारणत्वेन विद्यतेतत: तस्यात्माधिष्ठितेषु कथं कर्म इति प्रश्न:? अस्य समाधाने कथ्यते यत् स: असाधारणजीव इति[881]नाम्नापि कुसुमोद्गमकारेण निरूप्यते ।अनेन प्रकारेण कुसुमोद्गमकारेण सारग्रहणरूपकर्मप्रकरणं व्याख्यायते अत: सारमात्रमेवात्र प्रस्तूयते । १.यथा रूपादय: स्वसमानजातीयेन रसादिभि: सह तिष्ठन्ते; तद्वत् उत्क्षेपणादीनां न स्थिति: । अत एकस्मिन् समये द्रव्ये एकमेव कर्म विद्यत इति कथ्यते ।परस्परविरुद्धकर्मण अभावो द्रव्ये प्रत्यक्षप्रमाणेन एव विद्यते ।कर्मोत्पादने गुरुत्वसंयोगप्रयत्नादीनां समुदितानामपि कारणत्वं वर्तते ।नालिकायां पतितपत्रादिषु भ्रमणप्रत्यय: आश्रयभेदाद् तथा च तत्र वायो: प्रवेश: अपेक्षाभेदाद् जायते । कर्मण: उत्पत्ति इच्छाप्रयत्नादिमाध्यमेन जायते, तत्र आदिशब्देन वेगोऽपि निर्दिश्यते । चक्रं भ्रामयतु: दण्डस्य विगमे वेगसंस्कारविनाशात् कर्मसंतानस्योपरमो जायते । योगिना प्राणकर्मवत् प्राणायामवेलायां प्राणकर्म: स्वेच्छया प्रेर्यते,तद्वत् द्वेषजन्यप्राणक्रियाप्रेरणे नासारन्ध्रमाध्यमेन द्वेषकार्योऽपि उत्पाद्यते । ईश्वरस्य जगतनिमित्तकारणत्वसाधने असाधारणत्वजीवत्वं कथ्यते । अनेन प्रकारेण ज्ञायते यत् यद्यपि वोम्मिदेवेन अस्मिन् प्रकरणे भाष्याद्यपेक्षया संक्षिप्तचर्चा विहिता, तथापि अनेनाचार्येण वैशेषिकदर्शने इतोऽपि नूतनो विषयो योजित:।

---

[873] *तत्रैव*, पृ.६४०

[874] *टी.न्या.कं.* पृ.६४०

[875] *तत्रैव*, पृ.६४०

[876] *तत्रैव*, पृ.६४१

[877] अत्र स प्रत्यय शरीरावयवे तत्सम्बन्धवति पञ्चविधं चासत्प्रत्ययं त्वनियताधिकरणं गमनमेवेति । *तत्रैव*, पृ.६४४

[878] *टी.न्या.कं.* पृ. ६४७

[879] *तत्रैव*, पृ.६४९

[880] *तत्रैव*, पृ.६५१

[881] *तत्रैव*, पृ. ६५७

**न्यायकन्दल्यां सामान्यपदार्थः**:-कंदलीकारेण ब्रह्माविष्णुमहेश्वरेभ्य: प्रणम्य सामान्यद्रव्यविषयिणी चर्चा प्रारभ्यते । सामान्यपदार्थ:स्वविषयेषु सर्वगतरूपेण वर्तते । 'स्वविषय' इति शब्देन अभिप्राय: सर्वेषु विषयेषु इति तत्र सामान्यं समवायसम्बन्धेन विद्यते यतो हि तेषु विषयेषु सामान्यप्रतीतिर्जायत इति[882] । अभिन्नात्मकम् इति शब्देन ज्ञायते यत् येन स्वरूपेण एकस्मिन् विषये सत्त्वं तद्वद् तेनैव स्वरूपेण तस्य तद्भिन्नाश्रयेषु तस्य स्थितिरिरिति निरूप्यते[883]।द्वित्वादिव्यासज्यवृत्तिगुणानामपि अनेकवृत्तित्वम् अभिन्नस्वभावो विद्यते ततो निवृत्त्यर्थम् 'एकद्विबहुषु' इति वाक्यं लिखितम् अर्थात् द्वित्वादिव्यासज्यवृत्ते: प्रतीति: स्वाश्रयेषु भवितुमर्हति परञ्च न तद्घटके एकस्मिन् आश्रये इति[884] । अनेकवस्तुषु एकाकारप्रतीति अनुवृत्तिप्रत्ययत्वेन कथ्यते । पिण्डं पिण्डं प्रतिपिण्डम् इति व्युत्पत्त्यनुसारं यया रीत्या सामान्यज्ञानं तया रीत्या पुनर्पुन: अभ्यासप्रतीति: समुपद्यते । तया दृढसंस्कार:,तेन ज्ञानसमूहस्य प्रत्यवेक्षणं जायते;अनेनैव स्मृतिरुत्पाद्यते तया अनुवृत्तिप्रत्ययो जन्यते । तदेवानुवृत्तिप्रत्यय: सामान्यत्वेन कथ्यत इति प्रतिपाद्यते[885] । एतदनन्तरं नीलाम्बरघटादिषु नीलत्वप्रतीतिरूपेण तथा च द्रव्यादिषु 'इदं सत्' रूपेण च सत्ताया वर्णनं[886] भाष्यवदेव विद्यत इति । सत्तासामान्यमेव न विशेष इत्यपि प्रतिपादितम् । अतएव सामान्यशब्दस्य मुख्यार्थ: कथ्यते । अन्यच्च विशेषशब्दस्य तत्र लाक्षणिकविशेष शब्दप्रयोग इति निरूप्यते[887] । 'दण्डी पुरुष:' इति विशिष्टबुद्धौ एक: सामान्यविधया,अपरो विशेषविधया च प्रतीयते । तद्वत् 'अयं गौ' इत्यत्र विशेषणविशेष्यरूपे प्रतीतिर्न जायते ।अत: अत्र तादात्म्यप्रतीतिर्विद्यत इति । तत्र कंदलीकारेण बौद्धयुक्तीनाम् अपोहादीनां खण्डनमाध्यमेन सामान्यस्य सिद्धि क्रियते[888] । प्रत्यक्षेण अज्ञातार्थस्यापि शब्देन व्यवहार: कथ्यते यतो हि सर्वेषु प्राणिषु हितप्राप्त्यर्थं प्रवृत्ति: आहितार्थे च निवृत्ति दृश्यते येन लोकयात्रा निर्वाहो विधीयते । अनया लोकयात्रयापि भिन्नव्यक्तिषु जातिरेका साध्यते[889] । **लोकयात्रायां कथं सामान्यस्योपयोगिता**– येन शब्देन यं विषयं ज्ञात्वा प्रवृत्ति: तज्जातीयेषु अपि समानजातीयतया तस्य कार्यक्षमताया बोधो जायते । अनेन तज्जातीयेषु अपि लोकस्य प्रवृत्तिरिति कथ्यते । एनं भावं स्वीकृत्य श्लोकमेकं ददाति तद्यथा-भिन्नेष्वनुगताकारा बुद्धेर्जातनिबन्धना,अस्या अभावे नैवेयं लोकयात्रा प्रवर्तते । अनेन प्रकारेण सामान्यस्य लोकोपयोगित्वमपि आचार्येण स्पष्टीक्रियते[890]।

---

882 *न्या.कं.प्र,पा.भा.* पृ. ७४२

883 *तत्रैव*, पृ.७४२

884 द्वित्वादिकमप्यभिन्नस्वभावमेकत्र वर्तते तस्मात् सामान्यस्य विशेषो न लभ्यते तत्राह- एकद्विबहुष्वति। *तत्रैव*, पृ.७४२-७४३

885 एकस्मिन् पिण्डे यत् स्वरूपं तत् पिंण्डान्तरेऽपि। तस्मादभेदेनाधारेषु प्रबन्धेनानुपरमेण पूवपूर्वपिण्डापरित्यागेन वर्तमानं सदनुवृत्ति: प्रत्ययकारणं स्वरूपानुगमप्रतीतिकारणं सामान्यम्। *तत्रैव*, पृ.७४३

886 *न्या.कं.प्र.पा.भा.* पृ.७४५

887 अत एतानि मुख्यया वृत्त्या सामान्यान्येव न विशेषा:, विशेषसंज्ञां तूपचारेण लभन्ते । *तत्रैव*, पृ. ७४७

888 *न्या.कं.प्र.पा.भा.* पृ.७४९-७६३

889 *तत्रैव*, पृ.७६४-७६५

890 भिन्नेष्वनुगताकारा बुद्धिजातेर्निबन्धना । अस्या अभावे नैवेयं लोकयात्रा प्रवर्तते। *तत्रैव*, पृ.७६५

**कुसुमोद्गमटीकायां सामान्यपदार्थ:**-कुसुमोद्गमकारेण सामान्यस्य संक्षिप्ता व्याख्या प्रस्तूयते । परापरसामान्यविषये कथ्यते यत् एकस्मिन् व्यक्तौ समाविष्टस्य परापरयो: नियमेन परापरभावो भवति[891]इति कंदलीभावमेव स्पष्टीक्रियते। १.सर्वसामान्यं सर्वेषु वस्तुषु आकाशादि -सामान्येन वर्तत इति मतं स्पष्टीक्रियते[892]भावोऽयं यत् आकाशादिवत् सामान्यस्य सर्वगतत्वं वर्तते । २.सामान्यस्य यत् स्वाश्रयं तस्य भेदो मत्स्यसंयुक्तजलरूपाश्रयात् भिद्यते[893] । अतो भावार्थो अयं यत् भेदकारणात् मत्स्यविषयकं जलरूपाश्रयं न तस्य सामान्यमिति कुसुमोद्गमकारेण स्पष्टीक्रियते । ३.'अनेकभाजनगतफलानि' इतिवत् विशेषे अनुवृत्तिप्रत्ययो न संभाव्यते, अर्थात् विशेषत्वेन अनुमाने अयोग्यत्वं वर्तते । द्वित्वादिकमिति व्यासज्यवृते: यदुल्लेख:,तत्तु लक्षणसंगत्यर्थमेव विहितमिति ।यद्यपि कुसुमोद्गमकारेण कंदल्यां चर्चितानामन्यविषयाणामपि चर्चा क्रियते परञ्च पुनरूक्तिकारणात् नात्र लिख्यते । कुसुमोद्गमकारमते केचन बिन्दवो दृष्टिपथे आयान्ति,ते अध: चर्च्यन्ते,एतेषां विशदवर्णनं पञ्चमेऽध्याये करिष्यते सामान्यस्य एकस्वभावत्वं कथ्यते । अनेकभाजनगतफलानि' इतिवत् विशेषे अनुवृत्तिप्रत्ययो न संभाव्यते । द्वित्वादिषु सामान्यस्य लक्षणसंगतिकारणात् व्यासज्यवृत्ते: निषेध: क्रियते । सामान्यस्य नित्यत्वविषये कथ्यते यत् सामान्यस्य नित्यत्वं तस्य विनाशकारणाभावात् भावरूपत्वाद् च विद्यते । यादृशो विषय: तादृशी बुद्धि:, अत एकस्मिन् वस्तुनि तस्यैव परापरयो: भेदाभेदो न सामान्ये न विरुद्ध:,यतो हि सामान्यस्य परापररूपं यद् भेद: तस्मिन् कारणं तेषां न्यूनाधिकभावो विद्यत इति कुसुमोद्गमकारेण कंदलीकारतो भिन्ना कल्पना विहिता । सामान्ये एकक्रियाकारित्वयुक्ता: न गृह्यन्ते; एवं सति अदुग्धप्रदात्र्य: गावो वृषभस्स्य च गोत्वसामान्ये न अन्तर्भाव: स्यादिति कथनस्याभिप्राय: ।

**न्यायकन्दल्यां विशेषपदार्थनिरूपणम्**-कन्दलीकारेण विशेषप्रकरणस्य प्रारम्भो मङ्गला चरणेन क्रियते । तत्र सर्वप्रथमं चतुर्विद्याज्ञात्रे वर्णव्यवस्थास्थापकाय तथा च पञ्चत्वशून्याय ब्रह्मणे नमस्कारो विधीयते[894] । विशेषपदार्थव्याख्यानाय'अन्त्येषु भवा अन्त्या:' इति वाक्यम् अर्थात् अन्त्यपदेन नित्यपदार्था: अभिधीयन्ते,ते विशेषा प्रतिद्रव्यमेकैकशो वर्तन्ते प्रतिद्रव्यमेकेनैव विशेषेण स्वाश्रयस्य व्यावृत्तिप्रत्ययो विधीयते,अनेकविशेषाणां कल्पनायां कल्पना वैयर्थ्यमेव विद्यत इति कथ्यते[895] । गवादीनामुदाहरणेन यत्र विशेषस्य विशेषसत्त्वं प्रदर्श्यत, तत्रोच्यते कन्दलीकारेण यत् पूर्वं विशेषपदार्थस्य सत्ता तदनन्तरं तस्यां प्रमाणं प्रदर्शितव्यमिति कथ्यते । समानाकृतिगुणक्रियासु मुक्तात्ममनस्सु व्यावृत्तिबुद्धिजनकत्वेन विशेषा एव विद्यन्त इति प्रतिपाद्यते । तत्र लिखितं यथा-"**तथास्मद्विशिष्टानां योगिनां तुल्याकृतिगुणक्रियेषु तुल्या -कृतिषु तुल्यगुणेषु तुल्यक्रियेषु परमाणुषु मुक्तात्ममनस्सु चान्यनिमित्तासम्भवाद् येभ्यो निमित्तेभ्य:**

891 एकव्यक्तिसमाविष्टयोर्नियमेन परापरभाव इत्यादि व्या(*ख्या*)त[*मि*]-त्यर्थ.1 *टि.न्या,कं.* पृ.६६८

892 आका[*शा*]दिसामान्येनेति शेष.1 *तत्रैव,* पृ.६६८

893 *तत्रैव,* पृ.६६८

894 चतुर्युग-चतुर्विद्या-चतुर्वर्ण-विधायिने। नम*:* पञ्चत्वशून्याय चतुर्मुखभृते सदा। न्यायकन्दली*(प्र.पा.भा.),*श्रीधर*:*,सं एवं हि.अनु.दुर्गाधर-झा-शर्मा,संपूर्णानन्द-संस्कृत-विश्वविद्यालय*:*,वाराणसी,१९९७, पृ .७६५

895 प्रतिद्रव्यमेकैकशो वर्त्तमाना इति । द्रव्यं द्रव्यं प्रत्येकैको विशेषो वर्तत इत्यर्थ.1 एकेनैव विशेषेण स्वाश्रयस्य व्यावृत्तिसिद्धेरनेकविशेषकल्पनावैयर्थ्यात् । *तत्रैव,* पृ.७६६

**प्रत्याधारमयमस्माद् विलक्षण इति प्रत्ययव्यावृत्तिर्भवति तेऽन्त्या: विशेषा:"** । 896 अन्यच्च परमाणुषु ये व्यावृत्तिप्रत्यया: ते साधारणप्रतीतिवत् परमाणुनां परस्परवैभिन्न्याद् न जायन्ते,यतो हि तत्र तादात्म्यं विद्यते । तेषां प्रतीतिषु अन्यत्कारणमपि नोपलभ्यते;यतो हि परमाणुप्रभृतीनाम् आकृतिक्रिययोर्मध्ये न भेद:,अतो विशेषस्वीकृतिरावश्यकीति निरूप्यते । तदेव परमाणुप्रतीतिनामसाधारणकारणमिति । १.योगजधर्मेण ज्ञायमानेषु अतीन्द्रियेषु योगजधर्मव्यतिरिच्य विषयादीनां निमित्तत्वम् अपेक्ष्यत इति सूच्यते अर्थात् केवलं योगजधर्मेण न ज्ञानम् । २.अन्त्यविशेषेषु विशेषान्तरकल्पना न करणीया यतो हि तत्रानवस्थादोषप्रसङ्ग: समापद्यते । ३.अत्यन्तव्यावृत्तिस्वभावयुक्तानाम् अन्त्यविशेषाणां व्यावृत्तिप्रत्ययो व्यावृत्तिस्वभावकारणाद् एव जायते,तस्य कृते नापरस्य सम्बन्धकल्पना करणीयेति । ४.अतदात्मकस्वभावपरमाणुषु व्यावृत्तिबुद्धि: विशेषपदार्थसम्बन्धकारणादेव विद्यते।तत्र सा प्रतीति: स्वतो न उत्पद्यते ।५.एक एव साधारणधर्मयुक्तनित्यपदार्थानां परस्परव्यावृत्यर्थं तेषु पृथग्रूपेण विशेष: कल्पनीय इति वर्णितं कंदलीकारेण[897] । अत: कथयितुं शक्यते यत् कंदलीकारेण भाष्यस्यैव विशदं व्याख्यानं संपाद्यते । यत्र कुत्रचिद् भाष्यकारमतस्य स्पष्टीकरणमपि प्रदीयत इति ।

**कुसुमोद्गम-टीकायां विशेषपदार्थनिरूपणम्**-कुसुमोद्गमकारेण विषयेऽस्मिन् संक्षिप्ता टीका प्रस्तूयते । पूर्वमाशंक्यते यत् 'अन्ते' इत्यस्य अर्थो विनाश:,तत्र तु निवृत्तकार्यावयवा एव विद्यन्ते तर्हि कथं तत्र विशेष इति प्रश्न: । एतदनन्तरम् 'एकैकश:' इति कथनस्य प्रयोजनं सूच्यते यत् एकस्मिन् द्रव्ये नित्यमिति अर्थो स्वीक्रियते तर्हि तत्र एकस्मिन्नेव द्रव्ये अनेक–विशेषस्वीकृतिप्रसङ्ग: स्याद् इति प्रतिपादितम् । एकैकश: इत्यत्र प्रथमासमर्थाच्छसिद्(दि)[898] इति सूत्रेण शस् प्रत्ययो जायत इति सूच्यते । इदमेतेषां वैयाकरणज्ञानपरिचायकं विद्यते । अत्यन्तव्यावृत्तिबद्धे हेतुत्वं कथनेन व्यासज्यवृत्तिरपि तत्र निषिद्ध्यते । परमाणुषु परस्परभेदात् यदि अत्यन्तव्यावृत्तिहेतुत्वं तर्हि तत्र सिद्धसाधनत्वप्रसङ्ग: स्यादिति वर्ण्यन्ते । प्रत्येकमनु- वर्तन्त इति शब्देन तत्र ऽसूच्यते यत् विशेषा: प्रत्येकमनुवर्तन्त नित्यतया च विद्यन्त[899] इति । अत्यन्तव्यावृत्तिबुद्ध्या विशेषस्य ज्ञानं जन्यते,अनेन व्यासज्यवृत्तेरपि निरासो जायते । विशेषाणां नित्यत्वमत्र स्पष्टतयोररीक्तम् । भाष्यकारेण कंदलीकारेण च वर्णितविषयस्य इतोऽपि स्पष्टीकरणं कुसुमोद्गमकारेण क्रियते । ग्रन्थत्रयमपि परस्परं भावयन्त: पूरकरूपेण च प्रतीयन्ते। **न्यायकन्दल्यां समवायपदार्थ:**-भाष्यकारेण समवायस्य लक्षणम्**"अयुतसिद्धानामाधार्याधारभूतानां य: सम्बन्ध इहप्रत्ययहेतु: स समवाय:"**[900]इति दीयते । न्यायकन्दलीकारेण पूर्वानुष्ठितमङ्गलाचरणवत् समवायप्रकरणस्य प्रारम्भेऽपि मङ्गलाचारो विधीयते । सोमाय शम्भवे[901]च नमस्कृत्य समवायप्रकरणमिदं प्रारभ्यते । तत्र

---

896 , प्रशस्तपादभाष्यम्,(*न्यायकन्दली व्या.*) सं एवं हि.अनु.दुर्गाधर-झा-शर्मा,संपूर्णानन्द-संस्कृत-विश्वविद्यालय:,वाराणसी,१९९७, पृ,७६७

897 नित्यद्रव्येषु सर्वेषु परस्परधर्मसु,प्रत्येकमनुवर्तन्ते विशेषा भेदहेतव.। *तत्रैव,* पृ.७७२

898 अत्र 'प्रथमासमर्थाच्छसि' इति सूत्रं भवितुमर्हति । टी.न्या.कम्.पृ.६८४-६८५

899 नित्यतया वर्तन्त इत्यर्थ:। टीकात्रयोपेता(*न्यायकन्दली-पञ्जिका,टिप्पणम्.कुसुमोद्गम:* च),सं,जे.एस.जेटली,वसन्त-पारीखश्च, ओरियन्टल-इंस्टीट्यूट,वडोदरा,१९९१, पृ.६८६

900 *प्र.पा.भा.न्या.कं.* पृ. ७७३

901 अन्तर्ध्वान्तभिदे विश्वसंहारोत्पत्तिहेतवे। निर्मलज्ञानदेहाय नम: सोमाय शम्भवे। *प्र.पा.भा.न्या.कं.* पृ.७७३

द्रव्यगुणकर्मसामान्यविशेषाणाम् अयुतसिद्धत्वं तथा च कार्यकारणभूतानाम -कार्यकारणभूतानां च इत्यनेन समवेतार्हवस्तुनियम: प्रदर्श्यते । अत्रापि अवयविनि अवयवानाम् अनित्यद्रव्येषु गुणानाम्, नित्यद्रव्येषु गुणानाम्,क्रियाश्रये क्रियाणां च कार्यकारणभाव: समवायो वा सूचनार्थं कार्यकारण -भूतानामिति पदं दीयते । अकार्यकारणभूतानामिति पदं अकारणयुक्तकार्ये सामान्यजाते आश्रयं तथा च अन्त्यविशेषस्य आश्रयाणां समवायसम्बन्धत्वसूचनार्थं विधीयत इति प्रतिपाद्यते[902] समवाये इहेति प्रतीति: विशेष्यविशेषणप्रतीतिवत् सूच्यते । अन्यच्च नियताश्रयस्थवस्तुनां अविष्वग्भावो अर्थात् अस्वातन्त्र्यं येन सम्बन्धेन क्रियते, स: समवाय: सम्बन्ध: इति वर्ण्यते । अत्र समवायसम्बद्धमनुमानं प्रस्तौति । तद्यथा-**"तन्तुषु पट इत्यादिप्रत्यया: सम्बन्धनिमित्तका अवधारितप्रत्ययत्वात्,इह कुण्डे दधीतिप्रत्ययवत्"** । [903] तन्तुषु पट: इतिरूपे संयोगसम्बन्धशंका 'न चासौ संयोग: 'इत्यनेन वार्यते[904] । अन्यदपि दृष्टान्तो दीयते यत् उर्ध्वास्थितयोरङ्गुल्योर्मध्ये संयोग एव सम्बन्ध:,यतो हि आधाराधेयभावापन्नस्वतन्त्रवस्तुनो एव सम्बन्ध: संयोग: कथ्यते[905] । सत्तावत् लक्षणभेदात् समवायस्य पदार्थान्तरेभ्यो वैभिन्न्यम् प्रमाणाभावात् एकत्वं च विद्यते । समवाये आधाराधेययो: नियामकत्वं विद्यते,अत: द्रव्यादीनामाधारप्रभृतिषु न सङ्करप्रसङ्ग:[906] । पृथिव्यादिषु द्रव्यत्वस्याभिव्यक्त्यर्थे एका शक्ति: स्वीकर्त्तव्या विद्यते सा च समवायरूपेण विद्यते[907] । **समवायस्य नित्यत्वम्**-संयोगसम्बन्धस्य नाश: सम्बन्धिनां विनाशादेव जायते,परञ्च समवायसम्बन्धस्य नित्यत्वात् न तस्य नाशो[908] । अन्यदपि कारणं यथा-**"तस्मादेतस्य सम्बन्धिविनाशेऽप्य विनाश:, सत्तावदाश्रयान्तरेऽपि प्रत्यभिज्ञेयमानत्वात्"**[909] । समवायसम्बन्धस्यातीन्द्रियत्वं स्वीक्रियते । प्रत्यक्षविद्यमानघटादिषु स्वभिन्नसमवायस्य वृत्तिसम्बन्धोऽङ्गीक्रियते,तस्य ग्रहणं संयुक्तसमवायसन्निकर्षेण जायत इति भाष्याद्भिन्नं प्रतिपाद्यते । वस्तुद्वस्य स्वातन्त्र्यापहरणं तथा च अतिनैकट्यं समवायसम्बन्धेन एव क्रियते । यथा च प्रस्तुतेऽस्मिन् विषये श्लोक:-**"परस्परोपसंश्लेषो भिन्नानां यत्कृतो भवेत्, समवाय: स विज्ञेय: स्वातन्त्र्यप्रतिरोधक:"**[910]अर्थात् समवायसम्बन्धेन स्वातन्त्र्यापहरणं क्रियते । समवायस्यान्ते ग्रन्थकारेण स्वस्य परिचय: ग्रन्थाभिधेयश्च दीयते ।

---

902 अवयवावयविनामनित्यद्रव्यतद्गुणानां नित्यद्रव्यतत्समवेतानामनित्यगुणानां कर्मतद्वतां कार्यकारणभूतानां समवाय:, नित्यद्रव्यतद्गुणानां सामान्यं तद्वतामन्त्यविशेषतद्वतां चाकार्यकारणभूतानां समवायोऽयुतसिद्धानामिति नियम.। *तत्रैव,* पृ. ७७३-७७४

903 *न्यायकन्दली,* पृ.७७५

904 *न्या.कं.प्र.पा.भा.* पृ. ७७४-७७५

905 संयोगस्य विभागान्तत्वं विभागविनाश्यत्वं दृश्यते न समवायस्य । संयोगस्वतन्त्रयोरपि भवति, यथोर्ध्वावस्थितयोरङ्गुल्यो.। *तत्रैव,* पृ.७७६

906 *तत्रैव,* पृ. ७७६-७८०

907 समवायाविशेषे कुत एवायं नियमो द्रव्यत्वस्य पृथिव्यादिष्वेव समवायो गुणत्वस्य रूपादिष्वेव कर्मत्वस्योत्क्षेपणादिष्वेव, नान्यत्र । *तत्रैव,* पृ. ७८१

908 समवायस्य तु सम्बन्धिनौ न कारणम्, सम्बन्धिमात्रत्वात्। यथा न कारणं तथोपपादितम्। तस्मादेतस्य सम्बन्धिविनाशेऽप्यविनाश:, सत्तावदाश्रयान्तरेऽपि प्रत्यभिज्ञेयमानत्वात्। *न्या.कं.प्र.पा.भा.* पृ. ७८३

909 न्या.क. पृ. ७८३

910 *तत्रैव,* पृ. ७८६

**कुसुमोद्गमटीकायां समवायपदार्थ:**-कुसुमोद्गमकारेण प्रकरणेऽस्मिन् संक्षिप्ता टीका प्रस्तूयते। कन्दल्यां चर्चितमुख्य-मुख्यबिन्दूनां चर्चा वोम्मिदेवेन विधीयते । १.अवयवावयविभावविरहात् कार्यकारणभूतानां द्रव्यादीनाम् समवायसाधने अनियम: स्यादिति कुसुमोद्गमकारेण सूच्यते[911] । अत्र कारणत्वेन आत्मादीनि तथा च कार्यं बुद्ध्यादिरूपेण कंदल्यां कथ्यते । २.'अयुतसिद्ध' इति सम्बन्ध: संयोगस्य व्यावर्तकधर्म: कथ्यते[912] । अत: अवयवावयविनोर्मध्ये परस्परं सम्बन्ध: संयोगो न[913]इत्यस्मिन् विषये अनुमानवाक्य प्रयोगं प्रस्तौति तद्यथा–**"प्रयोगस्तु अवयवावयव्यादीनां परस्परसम्बन्ध: संयोगो न भवति। अयुतसिद्ध-सम्बन्धात् । न यदेवं न तदेवम्। यथा दधिकुण्डयोरिति"**। [914]३.समवायस्य नित्यत्वविषये कथ्यते यत् समवायो अभिव्यज्यते[915],अतो न तस्यानित्यत्वं यतो हि तत्र उत्पत्तिविरहो विद्यत इति ।अयं व्यतिरेकप्रयोगत्वेनोच्यते । ५.समवायस्यैकत्वविषये कथ्यते यत् एकत्वं प्रमाणरूपम् । अत: समवायोऽपि प्रमाणमिति निरूप्यते । अत्रापि अनुमानवाक्यप्रयोगं प्रदर्शयति यथा-**"एकत्वं प्रमाण विशेष: । प्रमाणं च समवाय एक: । अवांतरभेदलक्षणविरहित्वात् । सत्तावत्"** । [916]६.समवायसम्बन्धस्यानेकत्वे उपाधिभेदो आचार्येण अङ्गीकृतम् । यथा च लिखति-**"एकस्याप्युपाधिभेदाद्भेदकत्वमिति भाव:"**[917] । समवायसम्बन्धस्य वृत्तिमद्भावत्वेनावस्थिति:,यतो हि यो आद्यसम्बन्ध: स वृत्तियुक्तो जायते[918] ।वृत्त्यन्यतरस्वीकरणे भेदाधिष्ठानत्वं विद्यत इति उररीकरोति तद्यथा-**"तस्यैकत्वादिति वृत्तिवृत्तिमद्भावस्य च भेदाभिष्ठानत्वादिति शेष:"**[919] । ७.वस्तूनामाधाराधेयाभावो वस्तुस्वभावकारणादपि अस्तीति कन्दलीभिन्नं प्रतिपाद्यते । संयोग:प्रत्यक्षप्रमाणत्वेन ज्ञातुं शक्यते परञ्च न समवाय:[920] । ९.समवायस्य विधिप्रत्ययविषयत्वं सूच्यते । तस्य बाह्येन्द्रियासम्बद्धत्वं तथा च सम्बन्धान्तरमाध्यमेन इन्द्रियासम्बद्धत्वं वर्तते । इन्द्रियजिज्ञास्यानु व्यवसायत्वात् समवायज्ञानं जायते तर्हि किमर्थं तत्र अनुमानकल्पना क्रियत इति विषयं दर्शयन् अनुमानप्रयोगं प्रस्तौति[921] । अन्यच्च कंदलीवदेव भेदवृत्तियुक्तवस्तूनि पृथग्भावस्य अनवबोधाद् उपश्लेष:,नियतं पारतन्त्र्यं च समवायस्वरूपविवेचने निरूप्यन्ते[922] अर्थात् समवायसम्बन्धेन नियतं पारतन्त्र्यमुपपाद्यत इति । एतदनन्तरं कुसुमोद्गमकारेणापि श्लोकमाध्यमेन स्वस्य परिचयं दीयते ।

---

[911] *टी.न्या.कं.* पृ.६८८

[912] संयोगाद् व्यावर्तकधर्म इति भाव.1 *तत्रैव,* पृ.६८८

[913] साधारणतयाऽयमपि संयोगाद् व्यावर्तको धर्म इत्यर्थ.1 *तत्रैव,* पृ.६८९

[914] *टी.न्या.कं,* पृ.६९०

[915] अभिव्यंग्यत्वेनोत्पत्तिविरहादित्यर्थ.1 अत्रापि पूर्ववद् व्यतिरेकी प्रयोग: द्रष्टव्य.1 *तत्रैव,* पृ.६९०

[916] *तत्रैव* पृ.६९२

[917] *तत्रैव,* पृ.६९२

[918] यो आद्य: सम्बन्ध: स: सर्वोवृत्तिमान्, यथा संयोग इति व्याप्ति: कार्यत्वेन सोपाधिकेत्याह कृतको हीति। *तत्रैव,* पृ.६९५

[919] *टी.न्या.कं.* पृ. ६९५

[920] संयोगविषयं ज्ञानं प्रत्यक्षतयाऽनुव्यवसीयते। *तत्रैव,* पृ.६९६

[921] विधिप्रत्ययविषयत्वे सति संयोगसमवाययोरन्यतरेणापि सम्बन्धेन इन्द्रियासंबद्धत्वात्। व्यवहितविप्रकृष्टत्ववदिति। इन्द्रियजिज्ञास्य इच्छयाऽनुव्यवसाय संभवात्तस्य सदसत्तयोरनुव्यवसायसदसत्त्वे एवं प्रमाणं किमर्थ[म]नुमानोपन्यास इत्यर्थ.1 *तत्रैव,* पृ. ६९६

[922] *तत्रैव,* पृ.६९६

समवायस्य नित्यत्वविषये कथ्यते यत् समवायो अभिव्यज्यते। अतो न तस्यानित्यत्वं यतो हि तत्र उत्पत्ति -विरहो विद्यते। समवायस्यैकत्वसाधनविषये कथ्यते यत् एकत्वं प्रमाणरूपेण वर्तते, अत: समवायोऽपि प्रमाणमिति निरूप्यते । समवायसम्बन्धेन नियतं पारतन्त्र्यमुत्पाद्यते ।अनुमानवाक्यप्रयोगदृशा शिडिलवोम्मिदेवेन विषयाणां विवेचनं विश्लेषणं स्पष्टीकरणं च प्रदर्श्यते । 'भाष्यलक्षणपरं द्रष्टव्यम्', 'प्रपंचपरं भाष्यमुपादाय' इत्यादिवाक्यानां साहाय्येन भाष्यमपि उद्ध्रियते। इत्थं प्रकारेण पदार्थानां नातिविशदा, नातिस्वल्पा च व्याख्या प्रस्तूयते अन्यच्च प्रत्येकस्य पदार्थस्य सारं सार्धमेव दत्तम्।

# पञ्चमोऽध्यायः

## समीक्षा

# पञ्चमोऽध्यायः - समीक्षा

**कुसुमोद्गम-टीकायां मङ्गलाचरणम्:-**शिडिलवोम्मिदेवकृतटीकायां सर्वप्रथमं गणेशवन्दना क्रियते । ग्रन्थारम्भे सप्तश्लोका: लिखिता: विद्यन्ते । तेषु गणेशवन्दना, स्ववंशादिपरिचय:, पदार्थनिर्देशश्च क्रियते । सप्तश्लोकेषु यत्र-कुत्रचिद् अस्पष्टता दृग्गोचरी भवति । प्रथमे श्लोके शिववन्दना[1]. द्वितीये गणेशवन्दना, तृतीये चतुर्थे पंचमे स्ववंशविषयकं परिचयम्, षष्ठतमे षड्पदार्थनिर्देश:[2],सप्तमे च व्याख्यार्थे विहिता प्रतिज्ञा वर्ण्यते । रविवंशीय रितुंगोलस्य पुत्रोऽयं शस्त्रशास्त्र-पारङ्गतब्रह्मभूपतिश्चास्ति इति वोम्मिदेवेन स्वयंमेव प्रतिपाद्यते[3] । व्याख्याकरणात्पूर्वं स्वव्याख्याया: संकल्परूपकं कथ्यते[4] । न्यायकन्दल्यामुल्लिखितश्लोकानां पदकृत्यशैल्यां व्याख्या क्रियते । सर्वप्रथमं श्रीधरकृतमङ्गलस्य प्रयोजनं कथ्यते । प्रारीप्सितग्रन्थस्य परिसमाप्ति: तथा च परिपन्थिप्रत्यूहप्रशमार्थं 'अनादिनिधनं...'इत्यादिकं मङ्गलमाचरितम् । ईश्वरसिद्धौ तत्र लोकप्रसिद्धि एव कारणङ्गीक्रियते[5]। अनुमानप्रमाणजनितयोगिप्रत्यक्षगम्यश्च वर्तते । ईश्वर: संसारमलरहित:, स एव श्रुतिस्मृतीतिहासपुराणवर्णितपुरूषोत्तमशब्दवाच्यो ज्ञानात्मा इति वर्ण्यते । ईश्वरोपासनाया: फलं तेन अखिल -बन्धनानां विघटनमिति वर्ण्यते । तत्र वोम्मिदेवमते ईश्वरस्यैकत्वमिति भविष्योत्तरपुराणस्य श्लोकस्य उद्धरणेन ज्ञायते[6]। **मङ्गलप्रयोजनम्-** शिष्टाचारोऽपि इष्टोपायार्थं क्रियते । चैत्यं वन्देत स्वर्गकाम:' इत्यादिभि: विपुलस्थानानामनुष्ठानद्वारा व्यभिचारो न स्यात्; तन्निवृत्त्यर्थं प्रेक्षाजनैरनुष्ठीयमानत्वात् इति लिखितम्[7] । प्रेक्षावद्भि: यस्यानुष्ठानं न क्रियते, न तत्तत् फलकम्, यथा स्वर्गफल: कारीरी, अत्र विघ्नोपशमव्यति -रिक्तवृष्टिफलरूपे ईष्यते । मृगयादिकार्येष्वपि नमस्कारेण विघ्नविघात: तर्हि कथं नु महति कार्ये । किरणावल्यां वर्तते मङ्गलाचरणं परञ्च तत्र विघ्नविनाशो न जात: । अत्र लिङ्गावसेये हि दोष: सूच्यते । दृष्टहेतो: सादगुण्येन अदृष्टहेतुसाद्गुण्यस्य दुर्विज्ञानत्वात् हेतुत्वेऽपि सन्देह:, अत: अकारणमत्र विस्तार:[8] । अन्यच्च विघ्नहेतुसामर्थ्यस्य अनिश्चयात् तस्य निवर्तककारणमनुपादेयमिति कथयितुं शक्यते । विघ्नानां यत्र संदेहो नास्ति तत्रापि विघ्ननिवर्तक उपादेय:, तत्रोदाहरणं यथा- "**न हि पाथा: पाटवरां निश्चितां धनुराददते**[9] **मुनिनमस्कारप्रयोजनम्-** मुनिनमस्कारविषयिण्यां चर्चायां कणादस्य मुनित्वं लोकप्रसिद्धं तर्हि नाम्नोल्लेख: कथम् । उग्रतपस्यया यस्य अज्ञानजनितोन्मादाद्यो नष्टा: अर्थात् अशेषतत्त्वावबोधिना ज्ञानं जातं तादृशो 'मुनि:' इति ।

---

1 शिवाय विदुषां बन्धविध्वंसनपटीयसे ॥।१॥ *टीकात्रयोपेता, न्यायकन्दली*, सं. वसन्तपारीख:,ओरियन्टल-रिसर्च-इंस्टीट्यूट,बडौदरा,१९९१, पृ.२

2 न तत्त्वं न द्रव्यं त्यजति...स्वनिलयम् ॥६॥ *तत्रैव*, पृ.२

3 अभूदभूतपूर्वाणां गुणानामाकरो नृप:,वंशे रवे रितुंगोल: [वीर:] शस्त्रविदां पति:।।३॥ *तत्रैव*, पृ.१

4 अद्याश्वाह्यद्यास्य[ ] व्याख्या: सन्तु विपश्चिताम्, देशेऽत्र या न दृश्यते ततोत्र:[त्र] प्रयतामहे। *तत्रैव*. पृ.३

5 *तत्रैव*, पृ.३

6 ब्रह्माविष्णुर्विषाङ्कश्च त्रयो देवा सनातना:, नामभेदै कृपाभेदैर्भिद्यन्ते वस्तुतोऽन्यथा। *तत्रैव*, पृ.५

7 कर्मादौ मङ्गलाचारो न विघ्नोपशमव्यतिरिक्तफलो नियमेन प्रेक्षावद्भिरनुष्ठीयमानत्वात्। *तत्रैव*, पृ.६

8 दृष्टगुणभूयस्त्वेनादृष्टवैगुण्यस्यापि परिहारसंभवात्। *तत्रैव*, पृ.६

9 *तत्रैव*, पृ.६

तत्त्वसाक्षात्कारान्तरं अपवृक्तमुने: शास्त्रप्रणयेतृत्वं निरासार्थं जीवनमुक्तमित्युक्तम् । यावत्कालं कर्माशयस्य न नाश: तावत्कालं शरीरमवतिष्ठते । एतादृशो मुनि: शास्त्रं प्रणीतवान् यतो हि शास्त्रस्य वातपुत्रीयता न संभाव्यत[10] इत्यनेन ग्रन्थमाहात्म्यं प्रतिपाद्यते । मुने आहारविषयिणी या चर्चा तत्रोक्तं यत् आहारप्रतिपादनं नात्र अभीष्टमत: अपितु आहारविशेषप्रतिपादनं मुनिवैशिष्ट्यार्थं विघ्नोपशमार्थं च वर्तते । विशिष्टव्याख्येयविषयद्वारा व्याख्यानस्य वैशिष्ट्यख्यापनार्थं पूर्वस्य निराकरणं क्रियते । ईश्वरनमस्कार - विषयिण्यपि विशदचर्चायां कथ्यते यत् यद्यपि तत्पूर्विका या प्रतीति यदि न स्वीकृता स्यात्, तथापि इष्टत्वाद् नमस्कारस्य संगति: स्यात् । ईश्वरप्रणामविषये परामर्शो ददाति यत्- **"ईश्वरप्रणामस्य परामर्श इति पश्चाद्धा -वस्यावधिसापेक्षत्वे प्रत्यासत्तेरीश्वरप्रणामस्यैवावधित्वेऽर्थलभ्येऽपि शिष्यबुद्धिवैशद्यायेति भाव:"**[11] अर्थात् शिष्यबुद्धिवैशद्यार्थे नमस्कारो विधातुं शक्यत इति कुसुमोद्गमकारस्य स्वकीया उद्भावना वर्तते । निष्प्रयोजनकार्ये प्रवृत्तिर्न भवितुं योग्या काकदन्तपरीक्षा इतिवत् । तत्र कार्यस्याकरणेऽपि पुत्रो अपुत्रो जायते, अत: तत्र कार्यकृतमपि अकृतं स्यात् । अत एव सम्बन्धप्रयोजनयो: कथनं प्रवृत्त्यर्थे आवश्यकम् । बौद्धमतस्य विज्ञानवादस्य[12] सांख्यस्य च मत खण्डनं विशदतया कंदलीकारवद् कुत्रचिद् दृष्टान्तरेण कुत्रचिद् स्पष्टीकरणमात्रमेव वर्तते । [13] पुरुषार्थे प्रवृत्ति: प्रकृते: एवं सति जडत्वात् तस्या अविमृश्यकारित्वं साध्यते; यथा स्वैरिण्या स्त्रिया स्वभर्तरि दोषसत्त्वेऽपि तं प्रति न विपरिणम्यते; तथैव प्रकृते: प्रवृत्ति वर्तत इति पृथगुदाहरणेन प्रतिपाद्यते[14] अर्थात् अत्रापि न मोक्षसंभव: वाक्यस्य पदानां परस्परसम्बन्ध: आकांक्षायोग्यतादिभिरेव वोम्मिदेवेनाङ्गीक्रियते। एतदनन्तरं मीमांसकप्रभृतीनां मतेषु कंदल्येवानुस्त्रियते[15] । **कुसुमोद्गमे तमसोऽतिरिक्तद्रव्यचर्चा-** सर्वप्रथमं शंकोपस्थानानन्तरं परिहरति सुवर्णसादृश्यादीनां द्रव्यतया प्रमिते सति द्रव्यत्वनिषेधो विहित:, तद्वत् तदधिकस्य शंका वुध्यनारोहणाद् न करणीया । एवमेव तमस: पृथक् द्रव्यत्वं न वक्तव्यम् । तम: नापि व्यापकद्रव्यं, न हि अगुण: प्रत्यक्षत्वात् कादाचित्कत्वात् चेति विवेच्यते । तमस: परिमाणं मध्यमो न कथयित्वा अनुमानवाक्यं कथयति यथा-**"तमो मध्यमपरिमाणद्रव्यं न भवति अप्रतिघातकत्वादप्रतीयमानखण्डावयवित्वाच्च अभाववत्"**[16] इति मतमेकदेशि कथयित्वा निबिडावयवेत्यादि कंदली मतमेवोपस्थापयते । एतदनन्तरं शंका-तम: कार्यद्रव्यविषयमस्ति तमोमात्र -विषयत्वं वा इति चेत् प्रथमेऽसिद्धिरस्ति अत्र भानुपपति: स्यात् । तम: तु केवलं रूपमात्रप्रतीति वर्तत इति[17] । अनेन द्रव्यत्वासिद्धि: प्रतिपाद्यते । तस्मात् नव एव द्रव्याणि, तदा जिज्ञासून् प्रति सुहृद्भावेन तत्स्वरूप- प्रतिपादने परमतं दूषयन् 'एवं तर्हि इति पदेनानुवाद: क्रियते । २. शंखे पीतिमारोपवद् मध्यन्दिने नीलिमा -प्रतीति: तद्गुणाभिभवेन आरोपवद् इति कथितम् । अत्र कंदलीकारमतमेवानुस्त्रियते ।

---

10 *टी.न्या.कं*, पृ.९

11 *तत्रैव*, पृ. ११

12 *तत्रैव*, पृ.१३-१४

13 *तत्रैव*, पृ.१६

14 *तत्रैव*, पृ १६

15 *तत्रैव*, पृ.१७-२२

16 *तत्रैव*. पृ. ३२

17 *तत्रैव*, पृ.३३

ग्रहणभवनस्मरण- रूपेऽपि ह्यप्रतियोगिन: स्मरणं न भवितुमर्हतीति मतमुस्थाप्यते । अभिप्रायोऽयं यत् अन्धकारस्य न प्रतियोगिरूपे प्रतीति: । न केवलं दिने अपितु रात्रौ अपि तम: अवश्यं प्रतिसंधातव्यम् । दिनालोकस्मरणेनैव अर्थसिद्धिर्भविष्यतीत्यस्य निराकरणं क्रियते यत् एतादृशीप्रतीत्यभावे नास्ति एतादृश नियम इति[18] । वोम्मिदेवेन स्वस्य कथनमपि स्थाने स्थाने यत्रावश्यकं तत्र योज्यते । अन्यत् सर्वं कंदलीवत् प्रतिपादितं न कुत्रचिद् विषयविशेषे चर्चा प्राप्यते । ३. तदनन्तरमारोपविषये चर्चां करोति- "अभिमानो: भ्रम:"[19] यथा सुखाभावे दु:खारोप:, संयोगाभावो विभागारोप: तद्वत् अभावेऽपि भावधर्मारोपे विरोधो न वर्तते । एवं अस्ति चेत् विरोध:, निश्चयेनात्र दु:खविभागयो: आरोप: भावरूप एवास्ति इति प्रतिपाद्यते । दीर्घत्वादि या प्रतीति सा तु अभावरूपा एव वर्तत इति विशेष: । एतदनन्तरं भूगुणत्वेन कार्ष्ण्यं छायादिप्रतिपादनं कंदलीकारवदेव । तमस: प्रतीति भाववदेव, एतां विना चलाचलाह्रस्वादिप्रतीतय: नोत्पत्स्यन्ते । अतो भावाभावयोरत्यन्तवैसादृश्यत्वात् द्रव्यप्रतीति दुरुपपादा वर्तते । अतोऽत्र अन्यथोपपादनं कृतमाचार्येण । वोम्मिदेवेन स्वाभिप्रायं स्पष्टीक्रियते यत् आलोकसहकृतचक्षुसामर्थ्यं हि तमप्रतीतौ सहायक -मिति सर्वजनप्रसिद्धि:, न तत्रापह्नव: । नीलं तम: इति व्यवहारसिद्ध्यर्थं 'आलोकाभाव: तम' इति मन्यमानां रूपारोपो एष्टव्य: । स्वरूपारोपेण तमस: प्रतीति जायते । तत्र अभावग्रहणे आरोपवद् सामर्थ्यं समानम् । विषयाननुपलब्धि संज्ञकमनुमानं न संभाव्यते[20]। एतदनन्तरं तत्र आरोप: लक्ष्यते[21]। निर्वि - कल्पान्यतराग्रहे विवेकाविवेकपरिहारात् सादृश्यसंस्कारप्रतीति: स्वप्नज्ञानवत् विशेषादृष्टेन संस्कारबोधो - पपति: प्रतिपाद्यते । दिक्करणदेश:, आकाशदेश प्रभृतय: चक्षुषा एव सन्निकृष्यन्ते । आलोकाभावरूपतमस: यै ग्रहणं क्रियते तत्रापि एवमेवाधि -करणसिद्धि वर्तत इति प्रतिपाद्यते । अनेन अदृष्टसामर्थ्यस्य कल्पना कर्त्तव्या जायते । आलोकाभावे शौक्ल्याभावरूप सादृश्यनिमित्तस्य नीलपीतादिसाधारणधर्मे यन्नीलिमा – प्रतीतिरूपारोप: तत्सादृश्यनिमित्तकारणानुसरणादेव जायते[22]। 'नीलं तम:' इति प्रतीति: सामानाधिकरणा - प्रतीति: वर्तते । एकम् एव वस्तु अदृष्ट -महिम्ना[23] सत्यपि धर्मधर्मिणो भेदे आक्रान्तरूपे[24] आरोप्यते । अतो न तमस: पृथग्द्रव्यत्वम् । ईश्वरस्य पृथग्द्रव्यनिरास:-ईश्वरेऽपि पृथक द्रव्यत्वशंका क्रियते । संख्यादिभि: पञ्चभि:, सह बुद्धीच्छाप्रयत्न- द्वारा ईश्वरस्य अष्टगुणत्वमिति । 'गुणभेदेन' इति शब्दव्याख्या चतुर्दशगुणत्वेन उच्यते अर्थात् गुणभेदेन जीवात्मपरमात्मनो न भेदो स्वीक्रियते[25] । अत न विद्यते पृथक् द्रव्यत्वमेतस्य ।

---

[18] *टी,न्या.कं.* पृ.३५-३६

[19] *तत्रैव,* पृ.३७

[20] *तत्रैव,* पृ.३७

[21] अविविक्तग्रहणं चारूप: एव तस्मादारोप्यविषयसंस्कारोद्बोधे अधिकरणसन्निकर्षे च असंसृष्टतया स्मर्तव्ये संसृष्टतयानुभव इति युक्तम्। *तत्रैव,* पृ.३७

[22] *तत्रैव,* पृ.३७

[23] अदृष्टमहिम्ना एकमेव वस्तु धर्मधर्मिभावभेदरूपाक्रान्ततयैवारोप्यत इति। टी.न्या.कं.पृ.३८

[24] भाभावस्तम इति लौकिके उपचारे प्रयोजनमालोकाभावोपकरणत्वान्नीलिमारोपस्यालोकापेक्षित्वात्शंकानिवर्तनमिति। *न्या. कं. प्र पा.भा.* पृ.३८

[25] *तत्रैव,* पृ.३८

## कुसुमोद्गम-टीकायामुद्देशप्रकरणम्-

केवलं धर्माणां संग्रह इत्युच्यते चेत् पृथिवीप्रभृतिनवद्रव्याणि, रूपादयश्च चतुर्विंशति गुणा: इति अप्रस्तुतमापद्यते। अत: पदार्थशब्दनिर्देश: कृत:। तत्त्वशब्दस्य तद्धितान्तत्वे सति धर्मस्वरूपप्रसंग:, अत: रूढिमाश्रित्य 'यस्याभाव' इति सूचितम् अर्थात् यस्य भाव: तत् तत्त्वं परञ्च कुसुमोद्गमकारो भिन्नं लक्षणं कथयति यथा-**"यद्वस्तु प्रमाणेन निश्चयते तत् तस्य तत्त्वमिति"**[26]। षष्ठी विभक्ते: प्रयोग: शिलापुत्रकस्य शरीरवद् उपचाराश्रितमुच्यते। साधर्म्यवैधर्म्ययो स्वातन्त्र्ये अनभिधानात् द्रव्यादयो -ऽपि तत्त्वं स्वीक्रियते। उद्देशविभागयो लक्षणं तत्र प्रस्तूयते। यथा[27]उद्देशविभागयो: एकैव विषयत्वं भवति। एतदनन्तरम् एकैकश: पदार्थाभिधानस्य चर्चा अत्रापि विहिता वर्तते। इदं कन्दलीत: किञ्चिद् भिन्नं प्रतिपाद्यते। प्रधानज्ञानमप्रधानस्य हेतु: अत: प्रथमं द्रव्यस्याभिधानम्। अक्लिष्टबुद्धे: सामर्थ्यं बहु कथ्यते, अतो गुणानां संख्याबाहुल्यात् कर्मण: पूर्वमभिधानम्,कर्म अल्पविषय: एतत्तु अक्लिष्टबुद्धिनापि ज्ञातुं शक्यते। सामान्यस्य द्रव्यादित्रिकवृत्ति:, कर्मान्विति तस्योपलक्षणम्, विशेषस्य त्रिभ्योऽपकर्ष:[28]। समवायविषये पञ्चपदार्थ- वृत्तित्वात् अन्तेऽभिधानं कृतमित्यस्मिन् कन्दलमतमेवानुस्रियते। **अभावनामकसप्तमपदार्थोऽपि प्रश्नोत्तरपूर्वकं चर्च्यते- आक्षेप:-१.पूर्वमाक्षिप्यते यत् ननु अभावो प्रमाणरूपे यत्र तत्र वर्ण्यते। भवतामपवर्गोऽपि मिथ्याज्ञानादिदु:खान्तानां प्रध्वंश: ? २.द्रव्यादीनाम्, उत्पत्तिविनाशयोरपि प्राक्प्रध्वंसाभावो वर्तते। ३.वैधर्म्यप्रतिपादने इतरेतरात्यन्ताभावो अस्ति, तर्हि अभावस्य निर्देश: कथं न कृतम्[29] ? इति पुनरुद्भावनं क्रियते यत् अभावस्य** भावपारतन्त्र्यमस्ति **इति मत्वा न पृथग्निर्देशश्चेत् संयोगादीनामुद्देशो न करणीयं स्यादिति। समाधानम्-स्वयमेव प्रतिविधीयते यत् शिष्यानामूहाशक्त्यादीनाम् अत्र अधिकारो न विद्यत इति तु अभावस्यानुद्देशेनैव स्पष्टीक्रियते**[30]। यदुक्तं संयोगादीनां कथमुद्देश:, तत्र कारणस्याभावो कथ्यते, अतो निरङ्कुशतया आचार्यस्य विपर्ययशंकावकाशो न विद्यते। केवलसंग्रहप्रतिज्ञामात्रेण न मुक्तौ हेतुत्वमपितु तत्त्वज्ञानस्यापि हेतुत्वं कथ्यते। साक्षात्कारस्य धर्मकारणत्वमस्ति चेत् शास्त्रज्ञानस्य नास्त्यावश्यकता इत्यत उक्तम् यत् द्रव्यादितत्त्वज्ञानं साक्षात्कारस्य धर्मे कारणत्वं वर्तते[31]। **आत्मज्ञानपरिपाकेन दु:खनिवृत्तिरिति।** तत्त्वसाक्षात्कारस्य वासनायुक्तमिथ्या -ज्ञानजनितमोक्षसंभवेऽपि अदृष्टकल्पना अहिकंटकादि -परिहारवत् ज्ञानसहकारि आत्मनो विशेषगुण: (निवृत्तिजनकप्रयत्नम्) साध्योऽस्ति इति कंदल्यनुगुण मेवास्ति। आत्मनो विशेषगुणं वर्णयन् कथयते यत् किमिदं सर्वकर्मसमुच्चयो, काम्यनैमित्तिककर्मसम्मुच्चयो, असमुच्चयो,. यावत् नित्यसमुच्चयो वास्ति ?

---

26 *टी. न्या.क.* पृ २४

27 नामधेयेन पदार्थाभिधानमात्रमुद्देश:। उद्दिष्टस्य अवान्तरविशेषोद्देशो विभाग:। *तत्रैव*, पृ.२४

28 *तत्रैव*, पृ. २५

29 अपवर्ग एवायं तावन्मिथ्याज्ञानादिदु:खान्तानां प्रध्वंस:। द्रव्यादीनामुत्पत्तिविनाशयोश्च प्राक्प्रध्वंसाभावौ। वैधर्म्येषु चेतरेतरात्यन्ताभावौ। तत्कथं तस्यानुद्देश इत्यत आह-अभावस्येति। *तत्रैव.* पृ.२६

30 शिष्याणामूहादिशक्तियुक्तानामत्राधिकार इत्यभावानुद्देशेनैव प्रदर्शिते[तम्]। *तत्रैव*, पृ.२६

31 देहेन्द्रियव्यतिरिक्तो नित्यो विभु: मिथ्याज्ञानरागद्वेषकार्यप्रवृत्तिनिवृत्त्यपायात् धर्माधर्मोपगृहीतदेहेन्द्रियतया बहुविधदु:खादुभय-परिकलिष्टोऽहमिति निरन्तरमभ्यस्यतस्तद्विषयसाक्षात्कार:। *तत्रैव*, पृ.२७

त्रयाणामेव अनुपपत्ति: चतुर्थाश्रमविधिविरोधप्रभृतिभि: समापद्यते। यथाधिकारि -नित्यकर्मणां समुच्चये विरोधो न वर्तते। माध्यवैचित्र्यात् साधने वैचित्र्यं भवितुमर्ह:। दुखादीनां विनिवर्तनकार्ये धर्मादयो बहूपाया: वर्तन्ते तदपि एकत्वे कुत्रचिद् न विरोध:। अत्र कन्दलीत: पृथक् उदाहरणं प्रस्तौति यथा-भिदायां बिले जनयितव्ये अवयविविभागहेतो: कुठारादीनामनेकत्वेऽपि एकत्वमिति। किं धर्मस्य ज्ञानकारणतत्वेऽपि एवं भवति। तत्र साक्षात्कार वैचित्र्यमस्ति। केवलज्ञानेनैवा- पवर्ग इति मतमपि केचननुसरन्ति। वोम्मिदेवोऽपि आगमविरोधी न वर्तते यतोहि आगमविरोधो न स्यादिति भयात् ज्ञानकर्म -समुच्चयमपि विरमन्ति[32]। तदनन्तरं सशंका **"यतोऽभुदयनि:श्रेयससिद्धि: स धर्म:"** इति सूत्रव्याख्या क्रियते। यथाश्रुतं यदि **अस्य व्याख्या क्रियते चेत् अव्यापकमलक्षणं स्यादिति। अभिमतहेतो:** अतीन्द्रियविहित पुरूषस्य गुणो धर्म इति स्वाभिमतं लक्षणं दीयते[33]। अभ्युदयनिश्रेयसयो: पृथक्कथनं अवान्तरभेदप्रदर्शनार्थं मुक्तम्। अनेन यत् किञ्चिद् त्याज्यं हेयत्वं वा अभ्युदयश्च तत्राभ्युदयकार्येण धर्मानुमानं तथा च ज्ञानं नि:श्रेयसकार्येणानुमीयते। सूत्रमिदं धर्मेण प्रमाणप्रदर्शनपूर्वकमस्ति इति। अत्र स्वर्गहेतौ प्रमाण -प्रदर्शनं न कृतम् इति न्यूनत्वस्यावसानार्थं एवं विहितम्। इदं नास्ति यदि आत्मसाक्षात्कारो निवर्तकधर्म - सहितोऽपवर्गहेतो वर्तते चेदागमविरोध: स्यात्; यतो हि ईश्वरोपासनया अपवर्गकारणता अङ्गीक्रियते [34]। अन्ते कथयति यत् ईश्वरेच्छा एका अत: तस्य एकत्वे उपासनारूपसहकारित्वात् विशेषोपाधे: व्यपदेशे विरोधो कथ्यते। **द्रव्याणामुद्देशप्रकरणे समेषां पृथक्-पृथक् चर्चा विधीयते। सा भिन्ना न वर्तते अतो न वर्ण्यते।** नि:श्रेयसं प्रति नवभिन्नद्रव्याणामुपयोगिता न वर्तते, अत: नव एव पदार्था इति कंदलीभिन्नम्। विभागलक्षणसाध्यव्यवहारस्य व्यवस्थितिमात्रस्य प्रतिपादनार्थे लक्षणमिति उक्तम्। लक्षणवाक्येन यदि स्वकार्यात् भिन्नमर्थं प्रतिपादयते चेत् वाक्यभेदस्य प्रसङ्ग आपद्यते। मुनिना सर्वार्थोपदेश: कृत इति ज्ञानं तस्य हेयोपादेयव्यतिरिक्तज्ञानाद् प्रमाणत्वसिद्धिना तथा च शास्त्रप्रणयने नि:श्रेयसहेतुत्वाद् प्रदर्श्यते। अनेन स्वग्रन्थे प्रवृत्तिं गमयतीति[35]। अनेन प्रकारेण इतोऽपि विशदम् एकैकश: पदार्था: चर्च्यन्ते,परञ्च एतेषां नियोजनम् अन्ते वर्तमानपदार्थचर्चायां विधास्यते।

**कुसुमोद्गमे उद्देशसंक्षेप:**-अत्र व्याख्यायां शक्तिसादृश्यादीनां पृथग्द्रव्यत्वस्वीक्तिनिराकरणे बुद्द्ध्यानारोहण मेव कारणं दीयते। तत्र कथ्यते यत् शक्ति: प्रतिबन्धाभाव:, वस्तुस्वरूपं वा ? प्रतिबन्धाभावे सति अभावे, वस्तुस्वरूपे सति द्रव्यगुणकर्मसु अन्तर्भावो जायते[36]।

---

[32] न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रिय:,श्राद्धकृतसत्यवादी च गृहस्थोऽपि विमुच्यते। *तत्रैव* पृ.२८

[33] अभिमतहेतुरतीन्द्रियविहितानुष्ठानजन्य: पुरूषगुणो धर्म इति। *तत्रैव,* पृ.२८

[34] यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवा:, तदा शिवमविज्ञाय दु:खस्यान्तो भविष्यति। *तत्रैव.* पृ.२८

[35] *तत्रैव,* पृ.३१

[36] *तत्रैव,* पृ.५१-५२

**कुसुमोद्गमे षण्णां पदार्थानां साधर्म्यं वैधर्म्यं च**-१.वैशेषिकदर्शने षण्णां पदार्थानां साधर्म्यं त्रिधा अस्तित्त्वाभिधेयत्वज्ञेयत्वरूपेण कथ्यते[37]। त्रयाणामपि पृथक् लक्षणादिकं दीयते। तत्र कुसुमोद्गमकारेण वस्तुस्वरूपं विधिप्रत्ययविषयत्वेन उच्यते[38]। यथा एकैव पिता, पिता पुत्रश्च उभयमपि भवति[39] तद्वत् एतेषाम् अस्तित्त्वादीनामवस्थिति: विद्यते। यद्यपि अभिधेयत्वं ज्ञेयत्वं च भावाभावयोर्मध्ये साधारणे तथापि अभावस्य वैधर्म्यनिर्देशाभावात् तत्र अविरोध एव इति निरूप्यते अर्थात् अत्र कुसुमोद्गमकारेण कथ्यते यत् भावाभावयोर्मध्ये अभिधेयत्वं ज्ञेयत्वं च उभयमपि समानम्। अस्तित्वादीनां परस्परं भेद: उपाधिभेदवद् वर्तत इति कंदलीकारात् भिन्नं प्रतिपादितम्। २.द्रव्यादिषु त्रिषु धर्माधर्मकारणत्वं भाष्यकारेण टीकाकारेण च प्रतिपाद्यते,अनेनैव कर्तृत्वव्यवहार: तत्र उभयोर्मध्ये जायते। कुत्रचिद् स्वशक्ति: तथा च कुत्रचिद् वस्त्वन्वय: कारणं तत्र वर्तत इति स्पष्टरीत्या वोम्मिदेवेन दृष्टान्तद्वयमाध्यमेन विश्लेष्यते-१.यथा एकस्यैव गङ्गाया: जलं स्तूयमानं निन्द्यमानं च यथाक्रमं धर्माधर्मयो: हेतुरिति निरूपितम्। अत्र स्वशक्ते: धर्माधर्म कारणत्वं प्रतिपाद्यते। २.द्वितीयो दृष्टान्त:-'गा दद्यात्' इत्यादौ गो: तदन्वयिमात्रत्वस्यैव धर्माधर्मयो: कारणत्वं प्रतिपाद्यते। दानादिकार्ये अनियतदेशकालस्य अन्वये सत्यपि गो: तदन्वयव्यवच्छेदमात्रे व्यापारो वर्तत इति वर्ण्यते। अत्र धर्माधर्मयो: कारणत्वं तदन्वयिन एव निरूपितम् भावोऽयं यत् त्रिषु भिन्नमपि धर्माधर्मयो: कारणत्वं विद्यते। ३.क्षितिजलज्योतिरनिलमनसां साधर्म्यप्रतिपादने वोम्मिदेवेन क्रियातो वेगभेद: प्रतिपादित:। वैशेषिकसूत्रकारमुद्धृत्य क्रियाया: वेगभिन्नत्वे प्रत्यक्षस्य सुप्रसिद्धत्वं प्रतिपाद्यते। तत्रोच्यते यत् यद्यपि द्वितीयादिषु कारणत्वेन वर्तमानस्य वेगस्यानुमानं कर्तुं शक्यते,तथापि तत्र वैशेषिकसूत्रकृता प्रत्यक्षत्वमपि सुप्रसिद्धमिति प्रतिपादितम् अर्थात् अस्य भेदे प्रत्यक्षमपि कारणं वर्तते। तत्र उद्धृतं सूत्रं यथा-"नोदनादाद्यमिषो कर्म तत्कर्मकारिताच्च 'संस्कार: तथोत्तरमुत्तर च"। मन्दतायां वेगस्य प्रतीतिर्न भवति इति लोके प्रतीयते। क्रियासन्ततिप्रतीतौ समुत्कटता दृश्यते परञ्च स्फटिकादौ गन्धवत् अत्रापि असमुत्कटतया मन्दगतादयो व्यवहार: प्रतिपाद्यते। यथा चन्दनस्य गन्धत्वं सुप्रसिद्धं तथा शीघ्रगतौ वेगत्वमिति कथ्यते। क्रियाक्षणानां वेगव्यवहारो नैरन्तर्येणानुमीयते; तत्र लौकिकप्रसिद्धि: वर्तत इति। लोकप्रसिद्धि: प्रदर्शनार्थं'व्यक्ता चेति' कंदलीटीकोक्त: शब्द: प्रयुज्यते। स्फटिकादौ गन्धवत् मन्दगतौ असमुत्कटतया वेगव्यवहार: तथा च चन्दनस्य गन्धवत् प्रत्यक्षतया आशुगतौ वेगव्यवहारो वोम्मिदेवेन दृष्टान्तेन निरूप्यते। अन्यच्च तत्र लोकप्रसिद्धिरपि वर्तत इति प्रतिपाद्यते ।

**४.क्षितितेजसो: साधर्म्यम्**-अत्र कुसुमोद्गमकारेण विशदा चर्चा प्रस्तूयते। दृष्टान्तवैभिन्न्येन अनुमानवाक्यप्रदर्शनेन च वोम्मिदेवेन सुवर्णस्य तैजसत्वमुपस्थाप्यते। १.सौरालोके अद्रवत्वप्रतिपादने अदृष्टविरहप्रयुक्तत्वं प्रतिपाद्यते; नोचेत् पार्थिवघृतादौ लोष्ठवत् अद्रव्यत्वस्य निवारणे कोऽपि हेतुरपि न वर्तत इति अर्थात् अदृष्टस्याभावकारणात् तत्र सौरालोके द्रवत्वं न वर्तते। २.सुवर्णस्य अभस्मीभावं कथयित्वा तस्य अपार्थिवत्वं व्याख्येय इति लिखति तद्यथा- **"भस्मीभावोपलब्धेरिति पदं पार्थिवद्रवत्वस्य**

---

[37] षण्णामपि पदार्थानामस्तित्त्वाभिधेयत्वज्ञेयत्वानि। *प्र.पा.भा.न्या.कं.*पृ.४१

[38] *टी.,न्या.कं.*पृ.५४

[39] *टी. न्या.कं.* पृ.५५

**नियमेनात्यन्ताग्निसंयोगेन भस्मीभवत्पृथिव्य -समानाधिकरण्येनोपलब्धे:, सुवर्णादिसामान्याधिकरण्येना - नुपलब्धिरिति व्याख्येयम्"** अर्थात् अत्यन्ताग्निसंयोगेन सुवर्णस्य भस्मीभावो पार्थिवद्रव्यवत् न दृश्यते;अतो न पार्थिव इति। ३.कंदलीकारेण सुवर्णस्य तैजसत्वे अनुद्भूतरूपं इत्यत्र'अनूद्भूतत्वरूपत्वेनेति' शब्द: प्रयुक्त:। वोम्मिदेवेन तत्र निरूप्यते यत् इह रूपस्यानुद्भवो विवक्ष्यते इतरथा नयनरश्मिवद् द्रव्यस्य अप्रत्यक्षत्वप्रसङ्ग: समापद्यते। ४.हिरण्यस्य तैजसत्वे श्रुतिप्रमाणरूपेण स्थापयति- **"तेजो हिरण्यमिति श्रुतिरेव प्रमाणम्"** इति। घृतत्वस्य तैजस्त्वसाधने श्रुतेरेवाभावोऽत: तृणादिसाधर्म्येन श्रूयमाणार्थे बाधो न वर्तत,अत: पार्थिवं वर्तते घृतम् इति। अस्मिन्नेव संदर्भे वल्लभाचार्योक्तश्लोकम् उद्धरति – **"अनुच्छिन्नद्रवत्वं[यद्-तद्] वस्तु यस्त्विह भासते । सुवर्णाव्यवहारोऽयं तत्र शास्त्रे प्रवर्तते"**अर्थात् न्यायलीलावतीकारस्य मतमपि कुसुमोद्गमकारेणाङ्गीक्रियते। ५.यै: तु सुवर्णादर्शादेर्भास्वरं रूपं स्वीकृत्य तत्र द्रव्यान्तरसंसर्गेण तस्य रूपस्याभिभवात् भास्वररूपस्य अस्फुटप्रतीति: अङ्गीक्रियते, यतो हि तेषां गृहान्तनिहितदर्पणादौ भास्वररूपं नोपलभ्यते। अनेनात्र स्पष्ट एव प्रमाणबाध इति अर्थात् सुवर्णे भास्वररूपस्य अनुद्भूतत्वं द्रव्यान्तरसंसर्गेण जायत इति न स्वीक्रियते। यदि रूपम् अभिभूतं तर्हि महारजनाभिभूतसितिमा इव प्रत्यक्षमेव लक्ष्यत इति। तत्राभिभावकं तु उपलम्भकपार्थिवभागरूपमेव वर्तत इति। तेजस: शुक्लरूपत्वं वर्तते;अत: पीतिमाया: अनुपपत्ति: तत्र कथ्यते। ७.कुसुमोद्गमकारेण श्रुते: अना - दरोऽपि न क्रियते। अत: दशमद्रव्यत्वशंकापि न विहिता यथोक्तम् तेन –**"किञ्च श्रुत्यनादरे द्रवत्वादिना तेजो व्यावृतौ दशमद्रव्यशंकापि** दुवरित्यलं बहुनोक्तेन इति"। अत: कथयितुं शक्यते यत् सुवर्णस्य तैजसत्वे स्वीकारे श्रुतिप्रमाणमङ्गीकृतम् इति कंदलीभिन्ना विशदा व्याख्या। ५.साधर्म्यवैधर्म्य प्रकरणस्यान्ते 'अन्यदपि' इत्यनेन शब्देन कंदलीकारेण उक्तानां अन्यसाधर्म्याणामपि ऊहा कर्त्तव्या इति कंदलीकारेण निर्दिश्यते। वोम्मिदेवेन तत्र ऊहारूपेण अन्यदपि साधर्म्यत्वेनोच्यन्ते-१.अवादीनामगन्धवत्वम्, २.अनिलादी - नामरसवत्त्वंगुरुत्वम्,३.अनिलादीनामरूपवत्त्वम् ४.प्रत्यक्षादि -माधर्म्यम् अनुवृत्त: कथनीयमिति पृथक्तया प्रोक्तम्। ५.गुरूत्वं हृदो साधर्म्यं तेजप्रभृते: वैधर्म्यमिति कथ्यते। उक्तं च–**"हृदो साधर्म्यमपि गुरुत्वं तेज: प्रभृतेर्व्यावृत्तेर्वैधर्म्यमित्याद्यपि बोधनीयमित्यर्थ:"**। 'इतरव्यावृतेरिति' इत्यनेन शब्देनोक्तं यत् साधर्म्यभिन्नं यद् तद् वैधर्म्यत्वेन कथयेदिति कंदलीकारवदेव साधितम्। एतदनन्तरं तत्र वैधर्म्यं वोम्मिदेवेन निर्दिश्यते। अनेन प्रकारेण वोम्मिदेवेन वैशेषिकदर्शनस्य परम्परायां प्रतिपादितसाधर्म्यवैधर्म्येभ्यो भिन्ना कल्पनापि विहितेति। यद्यपि अन्येषां विषयाणां प्रकरणेऽपि चर्चा कुसुमोद्गमकारेण विहिता परञ्च अवैशिष्ट्यकारणात् न पुनरूक्ति: कृतेति एतदनन्तरं एकैकशो द्रव्याणि निरूप्यन्ते ।

**१.कुसुमोद्गमे पृथिवीद्रव्यनिरूपणम्**:- कुसुमोद्गमकारेण सर्वप्रथमं 'एकैकश:' इति शब्दे प्रयुक्तस्य 'शस्' इति प्रत्ययेन नित्यवीप्सा समासाध्यते। तत्र व्याक्रियते यत् अत्र द्विवचनेन पृथिव्यादिषु एकस्य द्रव्यस्य इति धर्मिसाकल्येन अर्थात् सर्वेषां सार्धमेव कथनं क्रियते, परश्चात्र 'शस्' प्रत्ययेन प्रत्येकस्य अनेकवैधर्म्यं सूच्यते अर्थात् 'शस्' प्रत्ययेन पृथग्रूपेण समेषाम् एकैकशो वैधर्म्यं संकेत्यत इति विश्लेष्यते[40]। २.पृथिव्या: सिद्धायां लक्षणकथने साधनवैयर्थ्यम्, असिद्धायां च लक्षणकथने आश्रयासिद्धि: दोषो विद्यते,अनेनप्रकारेण स्थितिद्वये लक्षणकथने वैयर्थ्यं प्रतिपादितं वोम्मिदेवेन इति। पृथिवी पूर्वमेव सिद्धा इति प्रश्ने सति तत्र साधनवैयर्थ्यं

---

[40] टी.न्या.क.पृ.८४

सूच्यते,इतरथा असिद्धौ आश्रयासिद्धि: कथ्यते[41]। ३.पृथिवीत्वमित्यनेन पृथिवी निर्दिश्यते अन्यथा तत्र स्वरूपासिद्धिप्रसङ्गो भवितुमर्हे[42] इति सूच्यते भावोऽयं यत् यदि पृथिवीत्वमिति अर्थो न गृह्येत, तर्हि तत्र व्यामोहात् व्यावर्तकस्य भेदकस्य चानुपलम्भकारणाद् रूपादीनामनेकसिद्धौ तत्र स्वरूपासिद्धिप्रसङ्गो जायेत[43] इति। ४.एतदनन्तरं व्याख्यायते यत् पृथिव्या: जाति: पृथिवीत्वम् इत्यत्र समवायसम्बन्धो वर्तते। तत्रैकार्थसमवाय: संयुक्तसमवायश्च उभयमपि न स्वीकर्तुं शक्यते यतो हि व्यभिचारदोष: स्यादिति प्रतिपादितम् अर्थात् अत्र जातिरेव विद्यत इति। **५.लक्षणकथनप्रयोजनम्**-कंदल्यां प्रतिपादितं यत् यो पृथिवीति न जानाति तत्र वोम्मिदेवेन उच्यते यत् यो विवेकेन पृथिवीस्वरूपं न जानाति इति; अर्थात् अत्र विवेकशब्द: शिडिलेन योज्यत इति । **अधिकारि**-अधिकारिविषयिणी चर्चा अपि कन्दलीतो व्यतिरिक्ता उपस्थाप्यते। इयं चर्चा लक्षणप्रसङ्ग एव आयाति। १.लक्ष्यलक्षणयो: स्वरूपं जानन्नपि येन विशेषनिमितार्थे व्यवहारजिज्ञासा क्रियते तादृशो अधिकारी जिज्ञासु: प्रथम इतिरूपेण कथ्यते अर्थात् प्रथमोऽधिकारि विशेषज्ञाननिमित्तं प्रवर्तते। २.येन इतरभेदव्यवच्छेदमात्रे जिज्ञासा विधीयते सो द्वितीयो जिज्ञासु इति प्रतिपादितम्[44]अर्थात् कस्यचिदपि वस्तुनो: इतरेभ्यो वैधर्म्यजिज्ञासु अधिकारि द्वितीय:। लक्षणस्य पुन: लक्षणकथने अनवस्था स्यादिति विषये कथ्यते यत् विवेचितं प्रति पुन: लक्षणप्रवृत्तौ सर्वथा अप्रतीतत्वाद् तत्र अनवस्था स्यादिति कंदलीप्रोक्तशब्दमाध्यमेनैव विचारितम्। पूर्वं विविक्तस्यैव त्रिचतुरेषु लक्षणेषु लक्षणतया कथने सति स्वयमेव निरपेक्षो स्यादिति कथ्यते। २;द्वितीयम् अविविक्तम् अपि न स्वीक्रियते । व्यवहारव्यवच्छेदकरूपेण यदि व्यवहारसिद्धिपक्षे तस्य अबादौ व्यवच्छेदकस्य व्याहतत्वमुच्यते । पृथिवीत्वस्य प्रतीतिमाध्यमेन अत्र पृथिवीव्यवहारो व्यवच्छिद्यत इति[45] । **पृथिव्यां गुणा**:-कंदलीकारेण गन्धसहचरितरूपरसादीनां चतुर्दशगुणानां वर्णनं पृथिव्या: वैधर्म्यरूपेण प्रतिपादितम्। तत्र वोम्मिदेवेनापि इदमेव कथितम् । एते गुणा: गन्धैकार्थसमवायरूपेणापि अभिधीयन्त इति। गुणविनिवेशाधिकारे रूपरसगन्धस्पर्शप्रभृतय ये कन्दलीकारेण प्रतिपादिता: तत्रोच्यते यत् एते प्रत्यक्षमात्रेण अत्र प्रतिपादिता इति कथितम् । पतने गुरुत्वं संयोगविरहो कारणं वर्तत इति विशेषरूपेण तत्र निर्दिश्यते। कर्मण: असमवायिकारणत्व मत्रोच्यते। अत्र कर्मण: व्याख्यायां किञ्चिद् वैशद्यं विधीयते। उत्तरकर्मण: असमवायिकारणत्वमत्रोक्तम् अनुमानवाक्यमाध्यमेन तद् वाक्यं यथा- **"उत्तरकर्मासमवायिकारणवत् कर्मत्वात् प्रथमकर्मवत्"**[46]अविद्यमानस्य इति शब्देन बाधकत्वं सूच्यते अर्थात् भावोऽयं यत् आश्रयेऽस्मिन् विद्यमानं वस्तु कार्योत्पादने न वर्तते समर्थेति। **गन्ध**:-जलादिषु पार्थिवद्रव्यसंयुक्तगन्धत्वविषयिणी या चर्चा कंदलीकारेण संपाद्यते सैवात्रापि प्रतिपादितेति। तत्र पृथक् दृष्टान्तेन विषयोऽयं प्रतिपाद्यते। गन्धविषये तत्र समासाध्यते यत् स्फटिकोऽपि गन्धवान् इत्यत्र अनुमानवाक्यमुपस्थापयति यथा-**"तथाहि स्फटिकादौ गन्धवान् पाकनरूपत्वात् ,कंदलीफलवत्"** इति ।

---

[41] पृथिवीमित्युपलक्षणं पृथिवीमित्यपि द्रष्टव्यम्,अन्यथां स्वरूपासिद्धिप्रसङ्गात्, व्यामोहाद्गन्धरूपाद्यनेकसन्निधौ व्यावर्तकविशेषानवधारणात्। *तत्रैव*,पृ.८५

[42] सिद्धे साधनवैयर्थ्यात् तदिसद्धौ वाश्रयसिद्धिरत एव पृथिवीसिद्धावितरेतराश्रययित्वमित्यत आह योहीति। *टी.न्या क.*पृ.८५

[43] सिद्धे साधनवैयर्थ्यात् तदिसद्धौ वाश्रयसिद्धिरत एव पृथिवीसिद्धावितरेतराश्रययित्वमित्यत आह योहीति। *टी.न्या.क.*पृ.८५

[44] *तत्रैव*,पृ.८५

[45] *टी.न्या.क.*पृ.८५

[46] *कुसु.*पृ ८७

इतरथा तस्य पाकजरूपवत्तापि न स्यादिति तत्र प्रतिपाद्यते अर्थात् पाकजेषु गन्धत्वं भवतीति तत्र निर्दिश्यते। **चित्ररूपम्-**वोम्मिदेवेन रूपस्यासाधारणत्वं गन्धसाहचर्येणैव साध्यते। रूपविषये कंदलीकारेण कथितं यत् पृथिव्यामेव रूपवैविध्यं वर्तते। चित्ररूपविषयिण्या एकजातिविषये कंदलीकारेण कथितं यत् परस्परस्वरूपवैभिन्न्यं तु तत्र कारणमिति आक्षिप्तम्। तस्य समाधाने वोम्मिदेवेन वर्ण्यते यत् दण्डचक्रचीवारदीनामेककार्यत्वदर्शनवद् चित्ररूपेऽपि विलक्षणरूपेण नीलत्वपीतत्वादिभ्य: चित्ररूपस्यैकत्वं कथ्यते। अन्ये सर्वे आक्षेपा: समाधानानि च कंदलीवदेव प्रतिपादिता:। तत्र स्वशब्देन कथयति वोम्मिदेव:- **"यथा नीलमित्यनुवृत्तप्रत्यया नीलत्वजातिरेका एवं चित्रमित्यनुवृत्तिप्रत्यय बलाच्चित्रत्वमपि जातिरेका स्वीकर्त्तव्या जातिमात्रविलयापत्तेरिति"**[47]अर्थात् नीलादिषु अनुवृत्तिप्रत्ययकारणाद् एका एव चित्रत्वजाति विद्यत इति। चित्ररूपस्यैकत्वम् अवयविरूपत्वात् एकद्रव्यत्वाद् च स्वीक्रियत इति प्रतिपादितम्[48] भावोऽयं यत् यद्यपि स्वशैल्यामत्र वोम्मिदेवेन व्याख्या विहिता परञ्च कंदलीमतमत्र बहुधा अनुस्रियते। भास्वराभास्वररूपभेदवत् अत्र गन्धभेदेन द्रव्यभेदनिरासकत्वनाम्ना भ्रमनिरासो न जायते अत: पर्युदासवृत्ते आश्रयं गृहीत्वा गन्धस्य समानाधिकरण्यं व्यवस्थाप्यत इति अर्थात् कंदलीकारेण प्रकरणेऽस्मिन् न्यूनाधिकरूपेण वर्तमानस्य असुरभिगन्धस्य सुरभिना सह विरोध: स्थापित:। अभावमात्रता तस्य असुरभिगन्धस्य न वर्तत इति प्रतिपाद्यते। एतदनन्तरं गन्धस्य अन्यथा वर्णने कल्पनागौरवप्रसङ्गविषये लिखति यथा-**"सुरभिगन्धादनुकूलवेदनीयादन्य: प्रतिकूलवेदनी -योऽसुरभिरिति व्युत्पादनात् तृतीयप्रकारकल्पनागौरवप्रसङ्गादिति भाव:"**[49] अर्थात् पर्युदासवृत्तिमाध्यमेन आचार्येण असुरभिगन्धभेद: प्रदर्शित:। **स्पर्श:-** अनुष्णाशीतविषयिणी चर्चा तत्र वोम्मिदेवेन विधीयते। अनुमानवाक्येन स्पर्शविषये उच्यते यत् पृथिवी स्पर्शवती उदकवत् त्वगिन्द्रियग्राह्यवदिति। अनुष्णाशीतव्यवहारपरम्पराभिभवयुक्तो वर्तत इति कथयन् तत्र लिखति वोम्मिदेव:-**"शीतोष्णावेव स्पर्शौ, अनुष्णाशीतव्यवहारस्तु परस्पराभिभवप्रयुक्त इति कल्पनाव्यामोहमात्र निबन्धनमित्यनुसंधेयम्"**। [50]इतोऽन्यद् चर्चा कंदलीवदेव वर्तते । **पृथिव्या: भेदा:-** अत्रोच्यते यत् पृथिव्या: नित्यत्वे प्रमाणाभावाद् अनित्यत्वनियमे कार्यकारणव्यवस्थाया: अनुपपत्तिर्न स्यादिति निवारणार्थम् उभयभेदं नित्यानित्ये च क्रियते । **१.नित्यलक्षणा पृथिवी-**पृथिव्या: नित्यत्वे प्रमाणं परमाणुसिद्धिमाध्यमेन कंदलीकारेण प्रदर्शितम्। तद्वदत्रापि अत: तस्यैवव्याख्या क्रियते । २.**कार्यलक्षणपृथिव्या: उत्पत्ति:-**द्व्युकत: अपकर्षपरम्परया परमाणुसिद्धौ वोम्मिदेवेन दृष्टान्तमेकं दीयते। अत्र बिल्वामलककुवलानां यथाक्रमं लघुलघुतरता प्रतिपाद्यते उक्तं च-**"किन्तु बिल्वादामलकमणु सा आमलकात्कुवलमण्विति येयं परिमाणापकर्षपरम्परा सैवाणुपरिमाण-तारतम्यमित्युच्यते; सा च विश्रान्ति:"**[51]। आकाशवद् महत्परिमाणस्य सिद्धिकारणाद् अत्र तस्य परिमाणप्रकर्षसिद्धिरपि प्रतिपादिता। नित्यस्य निरतिशयो निरवयवत्वमत्र कथ्यते । अन्ते कंदलीप्रोक्तभावमेव स्वशब्देषु प्रस्तौति-**"यद्यप्यन्त्यावयविनाशमपेक्षमाणैस्तैरेव द्वयणुकैरवस्थितसंयोग -पेक्षैस्तत्र खण्डावयववत्वारम्भेणाभ्युपपन्नमेतत्, तवावतिष्ठमान एव घटे बुद्धवोद्य [बुध्नो]दर पार्श्वलोपा**

---

[47] *टी.न्या.क.*पृ ९१

[48] *टी.न्या.क.*पृ.९०-९१

[49] *तत्रैव,*पृ.९२

[50] *टी.न्या.क.*पृ.९२

[51] *टी.न्या.कं.,*पृ.९३

**रसाद्यवयवविभागो नोपलभ्येत,खण्डावयवविन्यारम्भमाणापेक्षणीयान्त्यावयवविनाशस्य तदानीम - भावादिति भाव:"**[52]अर्थात् परमाणूनां संख्याया: न्यूनत्व बाहुल्यत्वकारणादेव कार्यलक्षणपृथिव्या: द्वयणुकक्रमेण उत्पत्ति: परिमाणप्रकर्षो वा जायते। **पृथिवी-कार्याणि** – वोम्मिदेवेन कार्यरूपपृथिव्या: प्रकरणेऽपि कंदलीव्याख्या क्रियते। यत्र कुत्रचिद् किञ्चिद् विशिष्ट: तस्यैव कथनमत्र क्रियते। १.**शरीरम्-** शरीरस्य लक्षणमपि तत्र ददाति-यथा च –**"भोक्तुर्भोगहेतुभूतसंयोगाधिकरणमन्त्यावयविशरीरमिति वा शरीरलक्षणं निर्व्यूढम्"।** [53] शरीरस्यापि सुकुमारप्रतीतिकारणाद् हर्षोत्पत्तौ तस्य कारणत्वं विषयरूपेण स्वीकर्तुं शक्यते इति प्रतिपादनपरकं वाक्यं तत्र उच्यते। विषयरूपे शरीरग्रहणं निकृष्टलक्षणरूपे द्रष्टव्यमिति निर्दिश्यते। शरीरजन्मविषये कंदल्यां या चर्चा तत्र वोम्मिदेवेन कथ्यते यत् शरीर शरीरनिर्माणे परम्परा अपेक्षणीया एव वर्तते,अन्यथा तत्र नरबीजात् वानरजन्मप्रसङ्गो भवेदिति प्रतिपाद्यते[54]। अन्यदपि कुसुमोद्गमकार: जरायुजान् गणयति तद्यथा- ग्राम्यश्चतुष्पाद इत्यर्थ:। अन्येषां मार्जारमूषकादी - नामुभयचरिणामित्यर्थ:। [55]२.**अयोनिजशरीरम्-** अयोनिजशरीरे अदृष्टानुगतपरमाणूनामेव कारणत्वं तत्रोच्यते इति क्षुद्रजन्तूनां शरीरमयोनिजं प्रदर्श्य तस्मिन् यातनाजन्यशरीरे नारकित्वमुपलक्ष्यते[56]। २.**इन्द्रियम्**–अदृष्टकारित्वं तस्य इन्द्रियस्य सृष्टे: कथ्यते यत्र तत्र वोम्मिदेवेन अदृष्टस्योपभोजकत्वं निर्दिश्यत इति। ३.**विषय:**– यद्यपि मृत्पाषाणयो: स्थावररूपत्वं वक्तुम् शक्यते;परञ्च परस्परं जातिवैभिन्यात् मृतत्वम्, स्थावरत्वम्, पाषाणत्वञ्च पृथक् रूपेणोच्यन्त इति। स्थावरे स्वेच्छाधीनतया कार्यकारणस्यासामर्थ्यं वर्तत इति रुढबलीयता परिह्रियते[57]इति कथयित्वा कंदलीकारस्य टीका अवतार्यते अर्थात् मृतपाषाणादयो स्थावरतो भिन्नरूपेणापि कथयितुं शक्यन्त इति। अन्ते कथयितुं शक्यते यत् वोम्मिदेवेन कंदली संक्षिप्तरूपेण व्याख्यायते। स्वकथनं कन्दल्याभावं स्वीकृत्य कथ्यते परञ्च यत्र कुत्रचिद् स्वकथनं स्वमतमपि वा प्रयुज्य वैशेषिकमतमितोऽपि विशदो विहित:।

**२.कुसुमोद्गमे अब्द्रव्यनिरूपणम्-** कुसुमोद्गमकार: जलद्रव्यविषयिणी समस्तां चर्चां करोति । अस्त्वम् इति असाधारणधर्मप्रतीतिविषये कथ्यते यत् इयं प्रतीति: इतरेतराभावरूपप्रतीतिर्न विद्यते यतो हि कार्यकारणयोरेकत्वे अनुपपत्ति: न भवतीति प्रतिपाद्यते। वस्तुमध्ये वर्तमानस्य असाधारणधर्मस्य पृथगुपचारो न क्रियत[58] इति कथनस्य भाव:। कुसुमोद्गमकारेणापि वैधर्म्यरूपेण जलस्य चतुर्दशगुणत्वमिति निर्दिश्यते। यद्यपि एतेषां रूपादीनां चतुर्दशगुणानां वर्णनं वैधर्म्यप्रतिपादकत्वेन परञ्च प्रकारान्तरेणापि एतेषां वर्णनं बुभुत्सोत्पादनाय एतेषां वर्णनं क्रियत[59]इति। **अप्सो गुणा:**-जलस्य रूपे यद् शुक्लत्वं वर्ण्यते तत्र 'एव' इति शब्देन नीलादिवत् शुक्लतरत्वादीनां भास्वरत्वं व्यवच्छिद्यते। तदनन्तरं अत्र विशेषविधे: निषेधपरकत्वम् इति सूचयति तद्यथा **"इतरथा पृथिवीरूपस्य पाकजत्वेन तारतम्यप्रदर्शनेन**

---

[52] *तत्रैव*,पृ.९६

[53] *तत्रैव*,पृ.९८

[54] परम्परापि शरीरेणापेक्षणीयैव अन्यथा नरबीजाद्वानरादिजन्मप्रसङ्गैत्याशङ्कयोपाधिमाह। *तत्रैव*,पृ.१००

[55] *तत्रैव*.पृ.१०४

[56] *तत्रैव*,पृ.१०१

[57] *तत्रैव*,पृ. १०६

[58] प्रात्यात्मिकमिति तत्र भावार्थेऽपृथगुपचारो द्रष्टव्य:। *टी.न्या.क.* पृ.१०८

[59] *टी.न्या.कं.*पृ.१०८

**विशेषविधे: शेषनिषेधपर इति न्यायाद् द्रष्टव्यम्"**[60]। **रस:-** कटुकादिभ्यो विलक्षणरसो जलस्य इति प्रसङ्गे **वोम्मिदेवेन** ओदनसाधारणस्यापि अव्यक्तमधुरता निर्दिश्यते **अर्थात्** **ओदनेऽपि** कटुकादिभिन्नम् अव्यक्तमधुरत्वं तदवत्रापि जले स्यादिति भाव:। [61]**मधुरस्य अवान्तरतारतम्यम्** अपि प्रतिपाद्यते। एकेन दृष्टान्तेन कथ्यते यत् इक्षुज्लौद्रादिषु माधुर्यं न स्यात; यदि जले स्निग्धत्वं न स्वीक्रियेत्[62] अर्थात् जले स्निग्धत्वं वर्तते। जले धूसरादिकस्य या प्रतीति तत्र रूपवदाश्रयसम्भेदो वर्ण्यते। एवमेव अन्यदपि उक्तम्-**"इदं च सामुद्रस्यैव बलहकपीतमुक्तस्य माधूर्योपलम्भात्"**[63]अत्र जलस्य स्नेहसाधारण्यत्वं सूच्यते। स्नेहविषये प्रश्नोत्थाप्यते यत् स्नेहस्य स्थिति: पृथिव्यां गन्धवत् सर्वसाधारणा कतिपयव्यक्तिवृतिना युक्ता वा वर्तत इति। **समाधानम्**-अस्य समाधानमपि कन्दल्या: अनुमारमेव क्रियते अर्थात् सर्वसाधारणत्वम् ईष्टिकाप्रभृतिषु तस्याभावात् साधितम्; अर्थात् ईष्टिकाप्रभृतौ न स्नेहगुणो दृश्यते; अतो न तस्य सर्वसाधारणत्वमिति। अन्यच्च द्वितीयस्य समाधानं संयुक्तसमवायसम्बन्धेन दुग्धे द्रवत्व -मित्यनेन निषिध्यते। साररूपेण एकां पंक्तिं प्रस्तौति तद्यथा-**"अनैमित्तिकपृथिवीगुणस्य सर्वव्यक्तिविशेषसामान्य -विशेषस्यैव सर्वव्यक्ति -वृत्तित्वदर्शनादिति भाव:"**[64]अर्थात् तस्य स्नेहगुणस्य स्थिति: न कतिपयव्यक्तिवृत्तित्वयुक्ता अपितु सर्वव्यक्तियुक्ता विद्यत इति। **जलस्य कार्यम्-१.शरीरम्**-शरीरेन्द्रिय विषयकार्येषु शरीरविषये वोम्मिदेवेन अम्भस: शरीरारम्भद्रव्यरूपेण जलस्य स्थिति: प्रतिपाद्यते। तत्रानुमानवाक्यं प्रयुनक्ति-**"अम्भसत्वं शरीरारम्भकद्रव्यसमवेतत्वम्, द्रव्यारम्भसमवेतत्वात् पृथिवीत्ववदित्यनुमानस्य गन्धैकार्थसमवाय उपाधिरिति भाव"**। [65] एतदनन्तरं कंदलीप्रोक्त-पाञ्चभौतिकशरीरवदत्रापि तस्य निराकरणमेव कृतं नात्र किञ्चिद् विशिष्टं प्रतिपादितम् इति अर्थात् अत्रापि मानवशरीरं पार्थिवत्वेन स्वीकृत्य जलेऽस्मिन् संयुक्तसमवायेन सिद्धत्वं निरूप्यते। **२.इन्द्रियम्-** जलस्य कार्यरूपेण इन्द्रियनिरूपणे कंदलीकारेण निरूपितं यत् विजात्यनभिभूतैर्जलावयवै: आरभ्यते रसनमिति। वोम्मिदेवेन भाष्यकारात् भिन्नप्रतिपादनेच्छया 'विजात्य' इत्यत्र 'वि'प्रत्ययस्याभावोऽपि सूच्यते अर्थात् अत्र समासान्तरमाध्यमेन जात्यानभिभूतत्वमपि जलस्य सूच्यते। यथोक्तं – **"जात्यानभिभूतैरिति वदत: प्रशस्तदेवस्य शिष्टतया (समासान्तरविधे -रन्यत्वात्सि) विप्रत्ययभावोऽपि द्रष्टव्य:"**। [66] कंदलीकारेण प्रतिपादितं यत् रसनेन्द्रियरूप जलीयद्रव्येण एव रसोत्पत्ति:। तद्वदत्रापि निर्दिष्टम्। शरीरसंयुक्तेषु अन्येष्वुदकेषु तत्रापि अनेनैव जलाभिव्यक्ति: स्यादिति नियम उच्यते। अन्यच्च वायुरूपद्रव्यान्तरसंसर्गे रसनेन्द्रियेण रसोत्पत्तिर्न कार्यते[67]। कार्यरूपजलस्य विषयरूपिणि चर्चात्र न वोम्मिदेवेन विधीयते। अनेन प्रकारेण जलस्य कटुकादिरसेभ्यो वैभिन्न्यं वर्तत इत्यस्य तुलना कुसुमोद्गमकारेण ओदनस्य अव्यक्तमधुरतया सह क्रियते। अन्यच्च जले स्निग्धताया अभावो

---

60 *तत्रैव*,पृ १०८

61 ओदनादिसाधारणस्याव्यक्तमधुररसस्यानुभवादिति। *तत्रैव*,पृ.१०९

62 *तत्रैव*,पृ.१०९

63 *तत्रैव*, पृ.१०८

64 *तत्रैव*,पृ.११०

65 *तत्रैव*,पृ.१११

66 *तत्रैव*,*पृ. ११३*

67 वाताद्युपहितरसनस्य रसानुपलब्धे*:* द्रव्यान्तरसंसर्ग*:* सामर्थ्यप्रतिबन्धीत्यनुमानादिति भाव*:*'। *तत्रैव*, पृ.११३

यदि स्यात् तर्हि इक्षुप्रभृतिषु रसो माधुर्यं च न स्यात् । वाताद्युपहितरसनेन्द्रियेण न रसोत्पत्तिः कार्यत इत्यपि उच्यते । एतदेव तत्र वैभिन्न्यं प्रतिपादितम् ।

**३.कुसुमोद्गमे तेजस् द्रव्यनिरूपणम्-** कंदलीकारेण यत्र रूपस्पर्शप्रभृतीनां गुणानां एकादशगुणानां चर्चा विधीयते तत्र रूपे भास्वरत्वम्,स्पर्शे उष्णस्पर्शत्वं च सहचरितम् इति वोम्मिदेवेन व्याख्यायते[68]। **गुणाः- रूपम्-** तेजसः स्वप्रकाशकत्वं कुसुमोद्गमकारेणापि कथ्यते। तेजसः भास्वरत्वं स्वपरप्रकाशेनाभिव्यज्यते। इदं भास्वरत्वं जातिविशेषमपि न वर्तत इति स्पष्टीक्रियते। सौरचन्द्राद्यालोकस्य भास्वरत्वं कंदलीकारेण प्रतिपाद्यते। तत्र कुसुमोद्गमकारेण स्वोद्भावनया आक्षेपः समुथाप्यते यत् घनीभूतस्योदकस्य अशुक्लरूपत्वं वर्तते। यदि तत्र शुक्लत्वं प्रतीयेत तर्हि रूपान्तरस्यानभिभवः स्यादिति प्रतिपाद्यते। अन्यद् उदाहरणमपि तत्र दीयते यथा च –**"जलावसिक्ता नीलशाली(टी) धवला प्रतीयेतेति"**[69]अर्थात् घनीभूते उदके न शुक्लरूपत्वमिति वर्ण्यते। अतो नीलपीतादीनाम् वर्णानाम् उपाधिमूलकता विद्यते। **स्पर्शः-** तेजसि उष्ण एव स्पर्शो वर्तत इति वर्ण्यते। तत्रोच्यते यत् चन्दचामीकरचक्षुयुक्ताः ये तेषामुद्भवाभावे अप्रतीयमानोऽपि स्पर्शः तेजस्तया अनुमेयं वर्तत इति कथ्यते अर्थात् तेजस्तयापि उष्णम्पर्शोऽनुमातुं शक्यत इति कंदलीभिन्नं वर्तत इति। **तेजसः कार्यम्- १.शरीरम्-** शरीरविषयिणी चर्चा न क्रियते कुसुमोद्गमकारेण इति । **२.इन्द्रियम्-** रूपोपलब्धिः चक्षुषः सद्भावे प्रमाणरूपेण वक्तव्यं यतो हि शरीरसंयुक्ते वर्तमाने अपि अन्यत् तेजसि अनेनैव रूपोपलब्धिः कार्यत इति विशिष्टप्रमाणं तत्र प्रतिपाद्यते[70] । **३.विषयः-**कार्यरूपस्य तेजसः विषये केवलं स्वेदनविषयिणि चर्चायां 'स्वेदनं स्तब्धनाशनम्'इति कंदल्यां प्रतिपादितम्। तत्र किञ्चिद् कुसुमोद्गमे कथ्यते यत् अत्र स्तब्धनाशे हेतुः वातश्लेष्मणो अपगमनं वर्तत इति[71]अर्थात् वातश्लेष्मणस्य अपगमनादेव स्तब्धत्वं नाश्यत इति । **१.भौमः** - भौमे तेजसि अबिन्धनविषये कथ्यते अनेन शब्देन शब्दस्य प्रवृत्तिनिमित्तस्य जात्युपसंग्रहकव्यावर्तकधर्मस्य अभिधानमत्र विहितमिति[72] स्पष्टीक्रियते । **४.आकरजः-** सुवर्णस्य तैजसत्वसाधने आगम एव प्रमाणमित्यत्रापि उक्तमिति । अन्यविषयिणी या चर्चा कंदलीकारेण संपादिता;तत्र कंदल्याः अनुकरणं क्रियते परञ्च यत्र कुत्रचिद् स्वभावार्थोऽपि तेनाचार्येण प्रतिपाद्यते। नीलादिगुणभेदकल्पनायां उक्तं यत् गुणेषु गुणिनः कल्पितत्वं बुद्धिसाम्यत्वं चात्र गुणानां कल्पितविषयत्वं विद्यते । स्तम्भादीनां परमार्थत्वं प्रत्यक्षत्वं[73] च विद्यते । यथा च लिखति- **"नीलादिभेदस्य परमार्थत्वमित्यर्थः। तथैव बुद्धिकादाचित्कत्वान्यथानुपपत्त्या स्तम्भादिरपि परमार्थ एव सिद्धयतीत्यत आह प्रत्यक्षेणैव संवित्तिभेदस्यापीति"**[74]। अत्र अवयविनः वास्तविकरूपं स्वीक्रियते । स्पष्टीकरणमिदं

---

[68] भास्वररूपेण उष्णस्पर्शेन वा सहचरिता इति शेष.। *तत्रैव*, पृ. ११४

[69] *तत्रैव*, पृ.११४

[70] कार्या रूपोपलब्धिश्चक्षुषः सद्भावे प्रमाणं,सत्यपि तेजान्तरे शरीरसंयुक्तो अनेनैव रूपोपलम्भ इति नियमो विशिष्टारम्भे प्रमाणमित्यर्थ.। *टी,न्या,कं.*,पृ ११५

[71] *तत्रैव*,पृ.११६

[72] व्युत्पादनमिति शब्दप्रवृत्तिनिमित्तभूतजात्युपसंग्राहकव्यावर्तनधर्मकथनमित्यर्थ.। *टी.न्या.कं*पृ.११६

[73] प्रत्यक्षैव(क्षमे)स्तम्भादीनां नीलादिसाम्यं प्रतिपाद्य तत्र विप्रतिपद्यमानं प्रत्यनुमानप्रदर्शनाय न्यायसूत्रं पठति। . *तत्रैव*,पृ.११८-११९

[74] *तत्रैव*,पृ.११७

कंदलीकारस्य भाव एव विद्यते,न तु भिन्नं प्रतिपादितम्। गुणादिभ्यो अवयविनो वैभिन्यं वर्तत इत्यपि तत्र प्रतिपाद्यते । यथा- "**अयमत्र प्रयोग: स्तम्भादिभ्यो भिद्यन्ते दर्शनस्पर्शनाभ्यां प्रतिसंन्धीयमानत्वात्; ये न भिद्यन्ते न ते प्रतिसन्धीयन्ते यथा रूपादय इति व्यतिरेकी हेतु:। प्रतिसंन्धानं च भिन्नेन्द्रियजप्रत्ययोरेकविषयतावसाया:**"[75]अर्थात् दर्शनस्पर्शनाभ्यां उभयो कृते एकस्य बाह्यस्य अवयविन: सत्ता आवश्यकीति। इयं स्वदर्शनश्रद्धया[76] वर्तत इत्यपि स्पष्टीक्रियते। अनेन प्रकारेण सर्वं कन्दलीवदेव विस्तरेण प्रतिपादितमिति। अत: कथयितुं शक्यते यत् वोम्मिदेवेन कंदलीमतमेवानुस्रियते । संयोगस्य अव्याप्यवृत्तित्वमत्रापि उच्यते । कंदल्यां प्रतिपादितेषु सर्वेषु आक्षेपेषु स्पष्टीकरणमात्रं दीयत इति। अनेन प्रकारेण नातिविस्तरं व्याख्यानमत्र प्रस्तूयते।

**४.कुसुमोद्गमे वायुद्रव्यनिरूपणम्–** कुसुमोद्गमकार: सर्वप्रथमं वायुद्रव्यनिरूपणस्य कारणं प्रस्तौति। कुसुमोदगमकारेण निर्दिष्टं यत् शरीरारम्भकरूपेण प्रत्यक्षकारणतया पृथिव्या:, द्वितीयत्वे प्रत्यक्षकारणस्य अतिशयतया अपाम्, तृतीयत्वे तेजस: तथा च चतुर्थत्वे वायो: वर्णनं कृतम्। अप्रत्यक्षद्रव्यं वायुरिति तत्र निर्दिश्यते । अप्रत्यक्षद्रव्यं वायो: प्रत्यक्षद्रव्याणामिव नित्यानित्यस्वभावयुक्तं वर्तते;अत: अप्रत्यक्षद्रव्येषु तस्य आदौ वर्णनं विहितम् इति वोम्मिदेवन कंदल्या: भावो 'प्रत्यक्षमिति' शब्देन संकेत्यते। [77] **वायु-गुणा:–** संख्यादयोऽपि एतेषां साहचर्येण द्रष्टव्या इति निर्दिश्यते । वायो: अनुष्णाशीतत्वं प्रत्यक्षं वर्तत इति स्पष्टतया लिखति–"**अनुष्णाशीतत्वे सतीति-** इदं च प्रत्यक्षसिद्धमित्यर्थ:"[78]। पृथिवीवद् अत्र परापरत्वमपि वोम्मिदेवेन कथितम्–"**प्रमाणं च वायु: संख्यापरिमाणपृथक्त्वसंयोगविभागवान् द्रव्यत्वात् पृथिवीवत्' स परापरत्वत्वान् मूर्त्तत्वात् पृथिवीवत् इति द्रष्टव्यम्**"[79] अर्थात् भावोऽयं यत् यथा पृथिव्यां परत्वापरत्वे मूर्तत्वं च तदत्रापि वर्तत इत्यर्थ:। वोम्मिदेवेन वायुर्मध्ये कन्दलीभिन्नरूपेण परत्वापरत्वगुणनिरूपणस्य निर्देशोऽपि पृथिवीवत् क्रियत इति । तृणे कर्महेतु: संयोगो नोदनमुच्यते, तं विना तत्र कर्म न संभाव्यत इति। अस्मिन् विषये शंका क्रियते यत् कथम् अप्रत्यक्षद्रव्ये अवस्थिति इति। तत्र अस्य प्रत्युत्तरं कथ्यते यत् रूपिद्रव्येषु संयोगान्तरं विनापि तृणकर्मस्यानुमेयत्वं विद्यत इति। वायो: यद्यपि स्पर्शवत्त्वं परञ्च स्पर्शद्रव्यवत् तस्य अनुव्यवसायो न जायते। [80] वायो सम्पूर्णमपि कार्यं स्पर्शोपलम्भकम्[81], केवलं संयोगमात्रादेव न तत्र कार्यत्वम्। अस्य कृते पृथग्दृष्टान्त उपस्थाप्यते यत् शरीरसंयोगितामात्रकारणादेव केशनखप्रभृतीनां न शरीरावयवत्वं न वक्तुं शक्यत[82]इति। अत्र वोम्मिदेवेन पृथग्रूपेण दृष्टान्त: प्रस्तूयते। त्वचि एतेषां रूपादीनाम् अनुमानं विरुद्धमिति कथितम् । **वायो: कार्यम्-१.शरीरम्-** शरीरविषयिणि चर्चात्र न आचार्येण

---

[75] *तत्रैव*,पृ.११९

[76] *तत्रैव*,पृ.१२०

[77] *टी.न्या.क.*पृ.१२५

[78] *टी.न्या.क.*पृ.१२५

[79] *तत्रैव*,पृ.१२५

[80] स्पर्शानवभूव-*(स्पर्शानुभवव्द्)* व्यानुभवस्यानुव्यवसाययोग्यस्यानुव्यवसायाभावादित्यर्थ.। *तत्रैव*,पृ.१२८

[81] प्रयोगस्तु उपलभ्यमानशीतोष्णस्पर्शाधिष्ठानं स्पर्शवद्द्रव्योपनीतं शीतोष्णस्पर्शाधिष्ठानत्वात् घटाद्यपनीतपय.पावकवदिति। *तत्रैव*,पृ.१२८

[82] केशनखलोमदन्तानां शरीरसंयोगिता न शरीरावयवत्वमिति भाव.। *टी,न्या.कं*,पृ.१२६

विधीयते। २.**इन्द्रियम्** – इन्द्रियविषयिण्यां चर्चायां कंदलीकारेण वाय्वावयवैः निर्मितमिन्द्रियं त्वक् इति उक्तम्। तत्रोच्यते यत् शरीरस्य सर्वेषु अवयवेषु त्वक् वृत्तिरिति। अत्र वोम्मिदेवेन कथ्यते यत् नखलोमदन्तानां शरीरसंयोगित्वमेव न तु शरीरावयवत्वमित्युच्यते। 'त्वचिस्थितमिति' इति कंदलीशब्देन तत्र समाधाननिर्देशः क्रियते। लौकिकप्रसिद्धिकारणात् लक्षणया अधिष्ठानरूपे न त्वक् श्रद्धेया इति। यथा च लिखति– **"लौकिकत्वाच्च नोपचारप्रयोजकं श्रद्देयं तदधिष्ठाने चक्षुरुपघाते तच्छाक्तिवैकल्यदन्धदीनां रूपाद्यनुपलब्धिरिति भाव:**[83] अर्थात् अत्रापि कंदलीवदेव कथ्यते यत् त्वचि एव रूपादीनां स्थितिस्वीकारे अन्धादीनां शक्तिवैकल्यं कथ्यते। लौकिकप्रमाणेन एव त्वचः अधिष्ठानत्वं न सिद्धो भवतीति इदं कंदलीभिन्नं प्रतिपादितमिति। ३.**विषयः**–वोम्मिदेवेनापि कंदलीवदेव कथ्यते यत् एतावन्त एव विषया इति। अत्र अनियताधिष्ठानत्वेन त्रयाणां निर्देशः विहितः। यथा –**"त्वच एवेति कल्पनम्"**[84]। वोम्मिदेवेनात्रापि अनुमानवाक्येन वायौ स्पर्शोऽनुमानप्रमाणरूपेणोपस्थापितमिति यथा च प्रयोगः – **"प्रयोगस्तु उपलभ्यमानशीतोष्णस्पर्शाधिष्ठानं स्पर्शवद्द्रव्योपनीतं शीतोष्णस्पर्शाधिष्ठानत्वात् घटाद्यानीतपयःपावकवदिति"**[85] अर्थात् अनुमानादेव वायुद्रव्यज्ञानमिति। प्रत्यक्षद्रव्यस्यैव स्पार्शनप्रत्यक्षं कर्तुं शक्यत इति उक्तम्। वोम्मिदेवेनापि इदमेव मतं स्वीक्रियते। सैवाभिप्रायः तत्रानुमानवाक्येन अनुमानप्रमाणरूपेणोपस्थापयति इति–**यथा "प्रयोगोऽयं अस्पार्शनो वायुः द्रव्यत्वे सत्यचाक्षुषत्वात् आकाशवत्"**[86]अर्थात् स्पार्शनप्रत्यक्षेण तस्य ग्रहणं स्याच्चेत तथैव तुल्योपलम्भसंख्यादीनामपि ग्रहणं भवेत्[87]। अनेन ज्ञायते यत् संख्यादयो अपि अत्रानुमीयन्त इति। अन्यच्च न वायोः स्पार्शनप्रत्यक्षो भवतीति। वायोः सम्मूर्छन्नविषये समानजवयोर्वाय्वोः यत् संयोगः परस्परगति -प्रतिबन्धकहेतुना सम्मूर्छन्नेन वायोः नानात्वमनुमीयते परञ्च एकदिशोर्मध्ये यत् संयोगः तस्य स्थितिः सर्पकुण्डलावयवानां संयोगवत् स्यादिति वोम्मिदेवेन स्पष्टीक्रियते। अन्यत सर्वं कन्दलीवदेव प्रतिपादितम्। नास्ति तत्र विशेषः। ४.**प्राणः**– प्राणविषये उच्यते यत् उपलभ्यमानस्पर्शस्य अधिष्ठानभूतत्वात् प्राणोऽपि विषय एव तर्हि किमर्थं भवता उपादीयत इति शंकोत्थापनं कृतम्। तस्य समाधाने 'लोक' इत्यादि शब्दाः प्रयुज्यन्ते अर्थात् प्राणो विषयरूपवायुतो भिन्नं वर्तते[88]। पुरुषार्थे तस्य हेतुत्वं कुसुमोद्गमकारेण प्रतिपाद्यते। अनेन प्रकारेण वायुद्रव्यस्य वर्णनं वोम्मिदेवेन संक्षिप्तरीत्या विहितम्। प्रकरणस्यान्ते कंदलीकारवत् स्वपरिचयादिकं वोम्मिदेव सर्वत्र ददाति। यथा च अन्ते कंदलीकारस्य प्रशंसायां श्लोकं लिखति – **"कारूण्यामृतकच्छमूहननिया श्रीधराचार्यवाक्, तज्ज्याख्यानयकन्दलीकुहकग्रीष्मोष्णा शोषिता। वज्रब्रह्मनृपांबुदध्वनिमसावासाद्य सूतेऽधुना,न्यायाख्यप्रसवश्रियंविदधनीति तर्काभिसंधं सौरभम्**[89] अनेन प्रकारेण कन्दलीप्रशंसया स्वग्रन्थरचनाविषये लिखितम्। अनेन विवरणेन स्पष्टं भवति यत् वायुप्रकरणे वायौ

---

[83] *तत्रैव*.पृ.१२६

[84] *तत्रैव*,पृ.१२७

[85]*तत्रैव*पृ.१२८

[86] *तत्रैव*,पृ.१२९

[87] अत्रानुकूलसर्व*:* यदि स्पार्शन*:* स्यात् आश्रग्रेण तुल्योपलम्भसामग्रीकाणां संख्यापरिमाणादीनामप्युपलम्भ*:* स्यादिति। एवं चोपलम्भमानस्पर्शाधिष्ठानत्वादिति प्रतिपक्षानुमानं सर्वदाऽनुपलभ्यमानसंख्यादिकत्वाद-नुपलभामानेविषक्तावयवे पाथसि तेजसि च व्यभिचारीति च द्रष्टव्यम्। *तत्रैव*,पृ.१२८

[88] लोकयोगशास्त्रप्रसिद्धं मूर्तानुमानदेशस्य विरोधं चानुसृत्य वादिप्रतिपत्तेरिति शेष.। *टी,न्या.कं*.पृ.१३२

[89] *तत्रैव*,पृ.१३२

अनुष्णाशीतस्पर्शः,वायुद्रव्यज्ञाने स्पार्शनप्रत्यक्षः तथा च नवगुणानां सत्ता श्रीधरमतानुगुणा एव विहिता। यत्र कुत्रचिद् विषयप्रतिपादने दृष्टान्तवैभिन्न्यम् अवलोक्यते।

**५.कुसुमोद्गमे सृष्टिसंहारप्रक्रिया-** अत्रापि अयमेव प्रश्नोत्थापितं यत् वायु निरूपणानन्तरम् आकाशे निरूपयितव्ये कथं तत्र सृष्टिसंहारनिरूपणमिति उक्त्वा 'उत्पत्तिमन्ति; इत्यादि उपर्युक्तश्लोकमाध्यमेन एव तस्योत्तरं दीयते । अत्रापि कथ्यते यत् अस्य नित्यानित्यत्वरूपविभागो न सम्यगिति। अस्मत्सदृशानां तत्र ज्ञानकारणत्वे न कर्तृत्वं वक्तुं शक्यते तत्तु कार्यवैचित्र्यस्यापादाकेन ईश्वरेण एव क्रियते यथा चोक्तं कुसुमोद्गमे **–"अविच्छेदे तद्वचनादाम्नायस्य प्रामाण्यम्" इति नोपपद्यते, शिष्योपाध्यायसंप्रदायाविच्छेदेनैवाम्नायस्येश्वर प्रणयनानपेक्षत्वात् द्वितीयामनुपपत्तिमपाकर्तुं कार्यवैचित्र्यस्याधिष्ठातास्मदादिविलक्षणो जगत्कर्ता निरूप्यत इत्यवसरवानेव सृष्टिसंहारवादः"।** [90]उत्पत्तिविनाशयोः निरूपणेन उच्यते यत् अनेन अस्य मतस्य निराकरणं कृतं यत्कार्यं तदस्मदादिशक्यज्ञानपूर्वकं वर्तत इति। अङ्कुरादौ एतादृशस्य कारणस्याज्ञानाभावात् हेतोः व्यभिचारः। अस्य विपर्यये अस्मदादिशक्यज्ञानं तस्मिन् न इति अनुमानवाक्यं प्रददाति तद्यथा-**"विपर्यये कार्यकारणसन्तानोऽयं कदाचिदस्मदाद्यशक्यज्ञानोपादानपूर्वकः कार्यकारणसन्तानवत् आरण्यवह्निसंतानवदिति परिशिष्टं चेश्वरवादे स्वयमेवापाकरिष्यति"**[91]अर्थात् अस्य निवारणं करिष्यत इति । आत्माणुसंयोगो यो संहारक्रमे कथ्यते । तत्र आत्मनः अदृष्टपरमाणुभिः सह समवायसम्बन्धः अत्र निर्दिश्यते अर्थात् अत्र कुसुमोद्गमकारेण सम्बन्धनिर्देशः कृतः। कालगणनायामपि कन्दल्येवानुस्रियते। संहारप्रक्रियायां परमात्मेच्छापूर्वकं संकल्पादिकं वर्णनं कन्दलीशब्दनिर्देश पूर्वकमेव कृतं तत्र न किञ्चिद् विशेषः। विचित्रकर्मसाहाय्येन इत्यत्र यागादिजनितकर्माशयः तत्र गृह्यत इति । **सृष्टिः- आक्षेपः**-परमात्मनः कादाचित्कत्तयेश्वरेच्छाया नित्यत्वे विरोधो जायते । **समाधानम्**-'यद्यपि' कंदलीप्रोक्तशब्देनैव तस्योत्तरं प्रदीयते यत् ईश्वरेच्छा यद्यपि कार्यवैभिन्न्यात् भिन्नाः परञ्च दिगादीनामिव नित्या अप्रतिहता च वर्तते। तदनन्तरं पवनपरमाणुषु यत्संयोगो जायते तस्मिन् आगमप्रमाणमपि दृष्टव्य इति कंदलीभिन्नम्। सृष्टिकालेमहद्वायोः यदुत्पत्तिः तं पवनपरमाणुसंयोगः आगमप्रमाणाद् ज्ञातव्यमिति प्रतिपादितम् । अन्यच्च 'वायुः' इति शब्दस्थाने 'पवन' इति शब्दप्रयोगोऽपि अत्रैव विहितः। २.उत्पत्त्यनन्तरं वायौ या अप्रतिहतागतिः कथ्यते सा गतिः अन्यमूर्तस्य द्रव्यस्याभावाद् संभवतीति[92] अपि कंदलीतो भिन्नरूपेण स्पष्टीक्रियते । ४.ईश्वरेण जीवानां भोगभूतये सृष्टिः क्रियत इति सति यत् कारुणिकत्वं ततु भक्तिश्रद्धातिशययुक्तमेव वर्तते। अन्यच्च एतद् वचनं तु परमार्थतत्कारणस्वभावानुरोधि वर्तते;अन्यथा कारूण्यादेव अपवर्गसंपादनप्रसक्तिः तत्र स्यादिति[93]भिन्नः तर्कः कुसुमोद्गमकारेण प्रस्तुत इति। ६.अचेतनप्रवर्तकत्वादेव ईश्वरस्य ईश्वरत्वमित्युक्तं[94] सृष्टिप्रकरणकृतकंदलीव्याख्यायाम्। **ईश्वरसिद्धिः-** 'ईश्वरसिद्धौ' वोम्मिदेवेन आगमप्रमाणमपि दीयते तत्र श्रुतिः उद्दिध्रयते। तद्यथा- **"द्यावाभूमीं जनयं देव एक"** इत्यादिप्रमाणं तत्र सुप्रसिद्धमेव इति तेनोच्यते। कंदल्यां केवलमनुमान प्रमाणमेव दीयत इति। एतदनन्तरम् ईश्वरेऽपि सामान्यविशेषपूर्वकमपि यद् न्यायः कंदलीकारेण प्रतिपादितं तत्रैव चर्चायां कथ्यते,योगिनामपि ज्ञानं तदपि

---

90 *टी.न्या.कं.*पृ.१३३

91 *तत्रैव,*पृ.१३३.

92 तदानीं मूर्तान्तिरस्याभावादित्यर्थः। *टी.न्या.कं.* पृ.१३८

93 *तत्रैव,*पृ.१४०

94 अचेतनप्रवर्तकत्वादीश्वरत्वमिति भावः। *तत्रैव,*पृ.१४०

प्रमाणपूर्वकमिति कथयित्वा तत्रानुमानवाक्यं प्रदर्शयति-**"योगिनामपि प्रमांणाभावेनाभ्युपगमादि - वदनुमानम्,यो य इन्द्रियवान् सोऽस्मदाद्यतीन्द्रियसाक्षात्कारविरही इन्द्रियत्वादस्मदादिवदित्यप्यव्यभि - चारीति द्रष्टव्यम्"।** [95] ईश्वरस्य महाभूतादीनां निर्माणे या नित्येच्छाशक्ति वर्तते। तस्मिन् विषये वोम्मिदेवेन किञ्चिद् चर्चा प्रस्तूयते। तत्रोच्यते यत् यद्यपि नित्यप्रयत्नस्य कृते बुद्धिर्नापेक्षते परञ्च तस्य प्रयत्नपूर्वकत्वेन तस्य कार्यत्वे पर्यवसानं क्रियते। आगममतमनुसृत्य तत्र नित्येच्छाप्रयत्नञ्च कथयति यथोक्तं यद्यपि नित्य: प्रयत्नो बुद्धिं नापेक्षत इति प्रयत्नपूर्वकत्वमात्रमुपस्थाप्य महाभूतचतुष्टये कार्यत्वं पर्यवस्यति तथापि **'ईशान: सर्वभूतानाम्' इत्यागमबलेन नित्यज्ञानेच्छयोरपि नित्यप्रयत्नेन तुल्ययोगक्षेमत्वादपरित्याग इति भाव:"।** [96] इच्छाप्रयत्नयो साहचर्यमात्रेणैव कार्यसम्पन्नवात् उभयो परिहारोऽपि क्रियते । **बुद्धीनां** नित्यानित्यत्वं तु आश्रयभेदेनैव वर्तते यथा पय: परमाणुषु तद्वत् ईश्वरादिप्रसङ्गे अपि। अस्मदादिबुद्धौ अनित्यत्वं प्रमाणसिद्धमेव [97]वर्तत इति निर्दिशति। अशरीरिकर्तृत्वमपि तस्य कुलालशुकादौ वर्तमानस्य परस्परपरिहारेणोपलभ्यमानस्य धर्मिग्राहकप्रमाणेन तत्र ईश्वरे विरोधो परिहरणीय एव विद्यत इति निरूप्यते[98] । ईश्वरे अनध्वसितस्य शंका अपि न करणीयेति प्रतिपाद्यते। मुक्तात्मवदीश्वरो न कर्तेति प्रतिपक्षस्य निराकरणम्। अन्यच्च एतदनन्तरं या चर्चा तत्र कन्दल्या मतमेवोपस्थाप्यते 'इतिभावः' इत्यर्थ इत्यादि वाक्यप्रयोगद्वारेति। ईश्वरसिद्धिप्रकरणस्यान्ते कथयति- **"नित्योऽसंसारी भगवानीश्वरः सिद्ध इत्यर्थ:"**[99]। अनेन प्रकारेण अत्र ईश्वरो जगत्कारण साध्यत इति सुप्रसिद्धमेवेति तेनोच्यते ।

**६.कुसुमोद्गमे आकाशद्रव्यनिरूपणम्–** कुसुमोदगमकारेणापि संक्षिप्तरूपेण न्यायकन्दलीकारप्रोक्तस्य आकाशद्रव्यस्योपरि चर्चा विधीयते। सर्वप्रथमं निर्दिष्टं यत् 'आकाशकालदिशमिति' इति ग्रहणं त्रयाणां समस्य निरूपणार्थं क्रियत इति[100]। **आक्षेप:-** आकाशशब्दस्य पारिभाषिकी संज्ञा विषये आक्षिप्यते यत् आकाशशब्दस्यापि शब्दाश्रयत्वं नित्यं वर्तते, तर्हि तत्र कथं पारिभाषिकी संज्ञा वक्तुं शक्यते? **समाधानम्–** स्वयंमेव तस्योत्तरं प्रस्तौति यत् व्यक्तिस्वरूप ग्रहणेऽपि शब्दाश्रयत्वं तत्र निमित्तं वर्तते चेत् अतः एतादृश्या कल्पनया कल्पनागौरवं प्रसङ्ग: स्यात्। अतः संज्ञाग्रहण एव अपरजातिमत्त्वकारणात् इदं व्यवच्छेदकमात्रं वर्तते, अन्यथा शब्दादिगुणयोगवैधर्म्येण एव वक्ष्यमाणै: विरोधप्रसङ्ग: स्यादिति[101] साधितम् । **आकाशे गुणाः–** गुणेषु शब्दसंख्यापरिमाणादय: पूर्वोक्ता: षड्गुणा निर्दिश्यन्ते। तत्र शब्दविषये कथितं यत् शब्दस्वरूपवद् संख्यादीनामपि तत्साहचर्येण वैधर्म्यं स्यादिति स्पष्टीक्रियते[102] अर्थात् संख्यादयो गुणा: शब्दवत् आकाशे वैधर्म्यसंपादका: वर्तन्ते । **आकाशे प्रमाणम्–** कंदलीकारेण प्रस्तुतं यत् आकाशस्य सद्भावे

---

[95] *टी.न्या.कं* पृ.१४५

[96] *तत्रैव,*.पृ.१४८

[97] अस्मदाद्यसर्वज्ञाशक्यत्वं कार्यस्य विशेष.1 *तत्रैव,*पृ.१५२

[98] एवं कर्तृत्वाशरीरत्वयोरपि कुलालादौ शुकादौ च परस्परपरिहारेणोपलभ्यमानयोर्धर्मिग्राहकादे*:* प्रमाणादीश्वरे विरोध*:* परिहरणीय इति भाव.1 *तत्रैव,*पृ.१४९

[99] *टी.न्या.कं.*पृ.१५२

[100] समस्यनिरूपणे कारणमाह। *टी.न्या.कं.*पृ.१५३

[101] *तत्रैव,*पृ.१५३

[102] *तत्रैव,*पृ.१५३

किं प्रमाणं वर्तत इति विवक्षायां वोम्मिदेवेन कथ्यते यत् अनुपलब्धेषु निर्णीतेषु च अर्थेषु न न्यायः प्रवर्तते[103] अर्थात् आकाश इति धर्मि उपलभ्यते, अतो हेतो अस्य लक्षणं दातव्यम् इति। **श्रोत्रस्य वायवीयत्वं खण्ड्यते अत्र वोम्मिदेवेन तत्र स्वकथनं प्रदीयते। तत्रोच्यते यत्** श्रोत्रस्य बहिरिन्द्रियत्वं तु सिद्धमेव। शब्दस्य यदि वायुगुणत्वं स्वीक्रियते तर्हि श्रोत्रे वायुत्वप्रसक्तिः स्यात् तथा च स्पर्शग्राहकत्वमपि तत्र प्रसज्येत अतो न वायवीयं श्रोत्रम् इति प्रतिपादितम्। अन्यदपि लिखति-**"ततश्च शब्दोऽपि गुणावान्तरजात्या ग्राहकेन्द्रियवर्त्तिगुणजातीयगुणो भवन्त वायुगुण इति चान्तरालव्यापिनीद्वितेन सूचितमिति।** "[104]शंकेयं कंदलीकारतो भिन्ना उपस्थापितेति । अन्यच्च श्रोत्रस्य वायवीयत्वं खण्ड्यते । एतदनन्तरं शब्दस्य दिक्कालमनसां गुणत्वं खण्ड्यते तत्र कंदलीप्रोक्तभावमेव स्वीक्रियते। कुसुमोद्गमकारेण प्रतिपाद्यते यत् श्रोत्रेन्द्रियग्राह्यत्वात् अत्र एकजातीयग्राह्यत्वमुपस्थाप्यते,अनेनैव साध्यते यत् कालदिङ्मनसां न शब्दे गुणत्वम् इति। अत्रानुमानप्रयोगमपि उपस्थापयति तद्यथा-**"अयमभिसन्धिः श्रोत्रग्राह्यत्वादित्यकेन्द्रियजातीय - मुपलक्षयति तस्मादेव प्रयोगः शब्दो दिक्कालमनोगुणो न भवति एकेन्द्रियग्राह्यजातीयत्वाद् गन्धादिवदिति"**[105]। एतदन्तरं वोम्मिदेवेन कथ्यते यत् कंदलीकारेणात्र अन्यथा प्रयोगं रचितम् इत्युक्त्वा'शब्द' इत्यनेन तस्य निर्देशो क्रियते । [106]एतदनन्तरं शब्दलक्षणे प्रयुक्तानां हेतुनां विषये चर्चा क्रियते तत्र पूर्वपक्षो मीमांसकानामिति कुसुमोद्गमकारेण निर्दिश्यते । स्मृते: अप्रामाण्यत्वविषये यदुक्तं तस्मिन् विषये कथ्यते यत् यद्यपि पूर्वानुभवबलाद् यथार्था परञ्च न महर्षिभिः यथार्थज्ञानत्वेन परिसंख्यातेति । तदनन्तरम् अष्टद्रव्यरहितशब्दविषये आकाशसमवायत्वं प्रतिपाद्यते,तत्र कन्दल्यां परिशेषानुमानं निर्दिश्यते। अस्मिन्नपि विषये न विशेषा चर्चा उपलभ्यते। ततश्चाग्रे शब्दमाध्यमेन आकाशे अपि अनेकत्व कथ्यते पूर्वपक्षिभिः। **समाधानम्**-अस्य समाधानपूर्वकं कथ्यते यत् तारतम्यादिभेदेन आकाशे आश्रयभेदो न साधयितुं शक्यत इति। उक्तं च-**"तीव्रमन्दाद्यभि -घातादिनिमित्तकारणतारतम्यान्वयव्यतिरेका - नुविधायितया तारतम्यवन्तोऽपि शब्दा नाश्रयभेद प्रसाधयितुमीशत इति भाव:"**[107]। **आकाशस्य परिमाणम्**- एतदनन्तरं परिमाणविषयिणी चर्चोपस्थापिता कंदल्याम् यत् 'विभववान् महानाकाशः'अर्थात् आकाशस्य विभुत्वमत्र निर्दिष्टम् । २.शब्दप्रकरणेऽस्मिन् वोम्मिदेवेनोक्तं यत् श्रूयमाणशब्दवत् शब्दस्यासमवायिकारणमपि तदवदे वानुसंधेयम् इति नूतना कल्पना। [108] कन्दल्यां कथयति- **"दिविमुव्यन्तरिक्षे चोपजाताः शब्दाः एकार्थसमवेताः शब्दत्वात्, श्रूयमाणद्य शब्दवत्,श्रूयमाणाद्यशब्दयोश्चैकार्थसमवायः कार्यकारणभावेन प्रत्येतव्यः"**इत्यादौ वोम्मिदेवेन पूर्वपक्षरूपेणोद्भाव्यते यत् एकैव सन्तानवर्त्तित्वं तु उपाधिः, अतः तस्य कथं व्यापकत्वमिति प्रश्न:? **समाधानम्** – अत्र समाधानमुपस्थापितं यत् नभसो भेदे प्रमाणाभावो विद्यते। अत: तत्र अनुपाधित्वं कथ्यते इतरेतराश्रयानुपपत्तिकारणादिति । पुनः स्वयमेव प्रश्नोत्थाप्यते– यत् किं एकत्वे प्रमाणम्-१.एकत्वे अनुपाधित्वम्,२. अनुपाधित्वे एकत्वमिति। उभयो: समाधाने कथ्यते यत् आकाशभेदस्थापने प्रमाणाभावात्

---

[103] नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते इति धर्मिण्युपलब्धे लक्षणं वक्तव्यम्। *तत्रैव*,पृ.१५४

[104] *तत्रैव*. पृ.२५६

[105] *टी.न्या.कं.*पृ.१५८

[106] *न्या.क.* प्र.पा.भा.पृ.१५०

[107] *टी.न्या.कं.*पृ.१६०

[108] *टी.,न्या.कं.*पृ १६०

तस्य उपाधित्वं वर्तते यतो हि इतरेतराश्रयप्रसङ्गः तत्र समुत्पद्यते। एकत्वे अनुपाधित्वं तथा च अनुपाधित्वे एकत्वमिति कथ्यते । [109] १.प्रथमे यदि आकाशस्य प्रतिशब्दं संतानवैभिन्नयं तर्हि आकाशस्य परिमाणं मध्यम-परिमाणं स्यात्; एवं प्रकारेण तत्र अप्रत्ययत्वप्रसङ्गो जायते ।२.द्वितीय स्वीकारे मध्यमपरिमाणद्वारा कार्यत्वनियमेन तत्र कार्यत्वम् एव सिद्धम्; अतः अस्पर्शद्रव्ये व्यभिचारः स्यादिति प्रतिपादितम्। यथा च लिखति-" **तदेतदयुतं यद्याकाशं प्रतिशब्दसंतानं भिन्नमविभु च स्यातदा[ऽऽका]शपरिमाणं भवेन्मध्यमपरिमाणं वा; आद्ये शब्दस्याप्रत्ययत्वप्रसङ्गः,द्वितीये च मध्यमपरिमाणद्रव्यस्य नियमेन कार्यत्वादस्पर्शस्य अन्यथा समवायेन व्यभिचारः स्यात्**"[110]भावोऽयं यत् अत्र अस्य समाधाने कंदल्येवानुस्रियते। अन्यच्च समाना - समानजातीयाकारणाभावात् आकाशस्य नित्यत्वं प्रतिपादितम् इति । श्रोत्रे प्रमातुः धर्माधर्मयोः कारणात् बाधिर्यादिकं विकारादय दोषाः[111] दृश्यन्ते तेषां निवारणं चिकित्सापद्धत्या क्रियत इत्यस्मिन् विषये पृथक्तया कथयति वोम्मिदेवः-"**उपलक्षणं चैतत् वातादिना कर्णशष्कुल्युपधानेऽपि चिकित्सानिवर्त्यबाधिर्यदर्शनात्**"[112] द्वयं कुसुमोद्गमकारस्य नूतनोद्भावना वर्तत इति। अनेन प्रकारेण आकाशस्य नित्यत्वं, स्वतन्त्रत्वं तथा च गुणायुक्तत्वं साध्यते वोम्मिदेवेनेति। एतदग्रे यद्यपि कंदलीप्रोक्तमुख्य-मुख्य बिन्दूनामुपरि चर्चा विहिता वर्तते परञ्च तत्र कंदल्या एव अनुसरणं क्रियते। बाधिर्यत्वस्य निवारणं चिकित्सा पद्धत्या कर्तुं शक्यत इति नूतनं प्रतिपादितम् ।

७. **कुसुमोद्गमे कालद्रव्यनिरूपणम्- कालनिरूपणप्रयोजनम्-** १.वोम्मिदेवेन सर्वप्रथमं द्रव्याणां क्रमविषये स्पष्टीकरणं दीयते यत् अप्रत्यक्षद्रव्येषु अणुकार्यभावेन प्रत्यक्षद्रव्यस्य साधर्म्यत्वात् उपभोग्यद्रव्यदवयोः प्राथम्यमुच्यते, एतदनन्तरं कालस्य उपभोग्यगुणानाम् आश्रयरूपेण नभसः आनन्तर्यं विद्यते । अन्यच्च दिक्कालयोः निरूपणम् उपभोग्यगुणनिमित्ततया विधीयत इति प्रतिपादितम्। तत्रापि तपनधर्मस्य उपनादकतया दिक्पदार्थस्य उत्कर्षत्वं वर्तत इति अभिप्रायवानेन कालनिरूपणस्य निर्देशः क्रियत इति । [113]२.'दिग्विशेषात्' इत्यनेन कंदल्यां निर्दिष्टं यत् दिग्विशेषापेक्षया यद् विप्रकृष्टं तस्मिन् अपर इति व्यवहारः क्रियते । एतादृशः प्रयोगः किमर्थमनुष्ठियत इत्यस्य स्पष्टीकरणं वोम्मिदेवेन प्रदीयते। दिग्विशेषेति अनियममभिप्रेत्यैतदुक्तं अन्यथा कदाचिद् दिगपेक्षया कालस्य अपि परप्रत्ययो संभवेत इति निराकरणायेति अर्थात् कालस्य प्रतीतिः दिग्विशिष्टा एव जायते[114]। ३.परापरप्रत्यययोः परत्वापरत्वगुणनिमिताभ्यां युगपत् तपनपरिस्पन्दविशेषावच्छिन्नकालपिण्डस्य संयोगगुणनिमिततया द्रव्यादीनां प्रत्ययानां वैलक्षण्यं वर्तते तथापि कालापेक्षया एव तस्य गुणाः कथिता इति सूच्यते[115] अर्थात् कालस्यापेक्षया एव गुणाः तत्र प्रोक्ता न तु परत्वापरत्वानां निमित्तभूतसंयोगापेक्षया इति । ४. अस्य

---

[109] *टी.न्या.कं* पृ. १६०

[110] *टी.न्या.कं.*पृ. १६०

[111] कार्यपर्यन्तो व्यापारो धर्नाधर्मयोरित्यभिप्रायेण व्याचष्टे तस्येति। *टी.न्या.कं,* पृ.१६२

[112] *टी.न्या.कं.*पृ.१६२

[113] अप्रत्यक्षद्रव्येषु...उपभोग्यगुणनिमित्ततया च दिक्कालयोः निरूपयितव्यम्। तयोरवधिनिरपेक्षतपनधर्मोपनादकतया कालस्य दिक्पदार्थादुत्कर्ष इत्यनेनाभिप्रायेण सङ्गतिमाह' *टी.न्या.कं.* पृ.१६५

[114] *तत्रैव,*पृ.१६५

[115] *टी.न्या.कं.*पृ.१६५

समाधाने दृष्टान्तरं कथ्यते यत् परापरयोः प्रतीतौ निमित्तत्वेन परत्वापरत्वे गुणद्वयं वर्तते। अनयोः उत्पत्तिः तपनपरिस्पन्दनयोः प्रकर्षनिकर्षबुद्धिभ्यामेव जायत इति गुणकाण्डे वक्ष्यत इति निर्दिश्यते वोम्मिदेवेन। तपनपरिस्पन्दनयोः प्राप्तिं विना न पिण्डस्यावच्छिन्नत्वं साध्यत इति निरूपितम्। तपनसमवेतानां परत्वादि-आधारपिण्डानां प्रतीतिः स्वरूपेण संभाव्यते। पटे महारजनीरागस्य तपनं तथा च परिस्पन्दनस्य उपनायकत्वेन वर्तमानं द्रव्यं कल्पनीयमिति प्रतिपाद्यते। अन्यच्च तपनपरिस्पन्दनयोः विषये दृष्टान्तः प्रस्तौति तद्यथा-**"अन्यच्च पृथिव्यादीनां मूर्तद्रव्याणां संयोगद्रव्येण तपनपरिस्पन्दनश्च न संभवतीति प्रतिपादितम् न च महारजनमिव स्वरागं तपन एवं स्वपरिस्पन्दमुपनयति, अप्राप्तेः।** "[116]तपनं परिस्पन्दनं च आकाशात्मनोः माध्यमेनापि नोपनेयः,तथा च उभयोः मिलित्वापि स्वसंयुक्तद्रव्यान्तर्गतधर्ममुपनेतुं न शक्यत इति निरूपितम्। आत्मनः स्वसंयुक्ततया कथिते सति स्फाटिकादीनां मणिनाम् अनुरञ्जनं संयोगोपनायकतया कल्पनीयं वर्तते। [117] अनेन दिशा नोपानीयत इति प्रतिपादितम्। अतः एतेभ्योः भिन्नं विभुद्रव्यं कल्पनीयम्, तदेव द्रव्यं महर्षिभिः कालद्रव्यत्वेन कथ्यत इति। यथोक्तं **"स काल महर्षिभिः परिभाषितः"।** [118]७.अन्यच्च स्थावरादीनां तपनपरिस्पन्दनं प्रकर्षबुद्धिजन्यं वर्तते यतो हि तत्र तस्य अन्वयव्यतिरेकेण सिद्धिरस्ति इति कथयित्वा अनुमानप्रयोगं प्रस्तौति कुसुमोद्गमकारः– **"यद्यदन्वयव्यतिरेकानुविधायि तत्तज्जन्यं यथा कुविन्दानुविधायि कुविन्दजन्यःपटः।** "[119]तपनपरिस्पन्दनयोः पिण्डं प्रति आसन्नत्वं विद्यते महारजनरागवदिति। अन्यदपि इयं प्रत्यासत्तिरपि महारंजनरागवत् द्रव्यान्तरप्रत्यासत्तिवत् वर्तते। ७.'सहभावो यौगपद्यमिति' इत्यत्र उभयोः शब्दयोः अर्थाः निर्दिश्यन्ते-१.'युगपद् भवन्ति,' 'युगपदवतिष्ठन्ते'इत्यादयः प्रतीतयो न कालेन विना संभाव्यन्ते। २.'सह' शब्दस्यार्थं प्रतिपादयन् कथयति–**"एक क्रियावच्छेदको ह्यनेकेषां सहार्थः न चैककाल सम्बन्ध इति भावः"**[120]अर्थात् अनेकेषां सहभवनमित्यस्य अर्थः एकक्रियावच्छेदेकत्वं न त्वेककालसम्बन्ध इति पूर्वपक्षः। तत्र स्वोद्भावनया प्रश्नमुत्थाप्य[121] सहैकभवन्त्या इति अर्थः कुसुमोद्गमकारेण गृह्यते। यथा-**"तृतीये सिद्धं नः" समीहितमित्याह सहभवतामिति"**[122]। ९.कालस्य कथं विशिष्टबुद्धिरिति विषये कथ्यते यत् विशेषणज्ञानान्तरं विशिष्टप्रत्ययो जायते तेनैव इतरेतराश्रयद्वारा विशेषणमनुमीयत इति निरूप्यते[123]। १०.कालस्य गणनायां कंदलीकारेण निमेषस्य चतुर्थभागरूपे क्षणः कथ्यते,परञ्च वोम्मिदेवः तम् अन्यत् परिभाषयति तद्यथा-**"उत्पन्ने कर्मणि यावन्न विभागस्तावान् कालः क्षणः इत्यर्थः"**[124] अर्थात् उत्पन्नकार्यस्य विभागक्षणं प्रति एव विभागः कथ्यते। अन्यच्च उत्पत्तिशीलानां निमित्तकारणत्वम् अत्र स्पष्टतया सूचितम्। **कालद्रव्यस्य गुणाः**– कालस्य गुणसिद्धौ अपि पञ्चगुणाः संख्यादयः तेनापि स्वीक्रियन्ते। तत्रोक्तं यत्

---

[116] *टी.न्या.कं.*पृ.१६६

[117] आत्मा च स्वसंयुततया यत्र क्वचिद्वर्तमानया जपदा सर्वानेव स्फटिकमणीनुपरञ्जयेत्।' *तत्रैव*,पृ.१६६

[118] *तत्रैव* पृ.१६६

[119] *तत्रैव*,पृ.१६६

[120] *तत्रैव* पृ.१६६

[121] या क्रिया व्यक्ता वा असहापि भवन्त्या एकजातीयया वा सहैकभवन्त्या वा सम्बन्धः सहार्थः स्यात्? *टी.न्या.कं.*पृ.१६६

[122] *टी,न्या.कं.*पृ.१६६

[123] *तत्रैव*,पृ.१६८

[124] *तत्रैव*,पृ.१६९

संख्यादीनां पञ्चानां गुणानां सिद्ध्यनन्तरं पुनः तत्कथनं विशेषगुणस्य राहित्यं प्रदर्शनार्थमेव **"विशेष विधिः शेष निषेध पर इति न्यायात्।** "[125]इति न्यायः प्रयुक्तमिति सूच्यते । **कालद्रव्यस्य एकत्वम्-** एकस्मिन्नैव काले अनेकत्वप्रतीतिः या कंदलीकारेण चर्चिता, तत्र उच्यते कुसुमोद्गमकारेण यत् कालाभेदे सत्यपि सहकारिभेदेन ज्ञानोत्पत्तिः क्रियते । अन्यच्च यौगपद्यप्रतीतौ असाधारणकारणत्वेन कालो वर्तते। **कालद्रव्यस्य परिमाणम्-**एतदनन्तरं परममहतत्त्वसाधने यदुक्तं तत्र कथ्यते यत् स्वसंयुक्ततपनसंभवेऽपि तस्य परिस्पन्दाः उपनायकरूपेण एव घट्यन्ते। तस्य व्यापकत्वं तु परममहत्त्वं विना न संभवतीति प्रतिपादितम् अर्थात् कालस्य परिमाणं परममहद् वर्तत इति। ११.सर्वेषां कार्याणामिति शब्दनिर्देशेन कंदल्यां कालस्य जगत्प्रतिनिमित्तकारणत्वमुक्तम्। तत्र वोम्मिदेवेन कथ्यते यत् धर्मधर्मिणोर्मध्ये कारणत्वमिति व्याख्येयम्। एतदनन्तरं धर्मापेक्षया धर्मिणामेकरूपत्वेऽपि त्रैकाल्यं तत्र प्रदर्श्यते। अस्मिन्नेव विषये दृष्टान्तं प्रस्तौति यत् 'कुविन्दः पटं भावयति' अभयवदितिः 'भावयिष्यतीति' इत्यत्र एकेन अपि कुविन्दे क्रियाभेदाद् कालवैभिन्त्र्यं बोध्यते तद्यथा लिखितवान् कुसुमोद्गमकारः–**"तत्र ह्येकरूपोऽपि कुविन्दः पटोत्पादनव्यापारासन् प्रागभावापेक्षया भावयिष्यतीति तदुपलक्षितः । कालोऽपि तथा (यथा) व्यापारोपरमापेक्षया तदुपलक्षितः।** "[126] अनेन प्रकारेण प्रध्वंसविषयेऽपि एतावदेवकाला उपलक्ष्यन्ते। यथा चोक्तं–**"अत्र हि प्रध्वंसस्य धर्मस्य वर्तमान त्वेऽपि तत्प्रतियोगिनी नी(न्यती) तत्वे प्रध्वंस्त इति भूतप्रत्ययः अत्रापि तदुपलक्षितः कालोऽपि यथा (तथा) व्यपदिश्यत इति त्रिष्वतुरंजनीयम्।** "[127]तत्रैवोच्यते यत् बुद्धिसिद्धधर्मिणा धर्ममात्रवर्तमानत्वेऽपि 'भविष्यति पट' इत्यादि वर्तमानतया एव निर्दिश्यते अर्थात् अत्र सिद्धपुरुषस्य धर्मोत्पादने सामर्थ्यं परिलक्ष्यत इति भावः। अन्ते वोम्मिदेवेन प्रतिपादितं यत् 'परत्वोत्पत्ति' वर्तमाने घटे धर्मातीतरूपेण भूतप्रत्ययो निर्दिश्यते इत्यपि स्वयंमेव ऊहा करणीयेति भावोऽयं स्वीकृत्य एव कुसुमोद्गमकारः कथयति– **"अत्र हि वर्तमान एव पटे परत्वोत्पत्तिरूपधर्मातीतत्वेन भूतप्रत्ययो निर्दिश्यते इत्यादि स्वयमूहनीयम्। यथाश्रुतभाष्यानुरोधे त्वतिरोहितार्थैव कन्दलीति।** "[128]अनेन प्रकारेण कालविवरणं वोम्मिदेवेन विशदतया प्रतिपादितम्। वोम्मिदेवेन तपनपरिस्पन्दयोः माध्यमेन परत्वापरत्वप्रतीतिः पृथक्तया वर्ण्यत। अन्यच्च जगतो निमित्तकारणत्वरूपेण कालस्य स्पष्टतया निर्देशः वोम्मिदेवाचार्येण विहित इति ।

**८.कुसुमोद्गमटीकायां दिग्द्रव्यनिरूपणम्–** कुसुमोद्गमकारेण निर्दिष्टं यत् दिक्कृतपरत्वापरत्वे गुणकाण्डे कथयिष्यते। अतः तस्याः लिङ्गत्वं तत्रैव सेत्स्यति इति प्रतिपादितम् । दिशां पूर्वापरादयोः युगपद्प्रतीतिविषये यत् कंदलीकारेणोच्यते तत्र लिख्यते यत् मूर्तद्रव्याणामेवावधिभूतत्वं वर्तते, तैरेव पूर्वापरप्रतीतयो जायन्त इति। तत्र वोम्मिदेवेन अन्यथा प्रस्तुतं यत् यद्यपि ग्रीष्मात्पूर्वं वसन्तस्यावधित्वं दृश्यते तथापि दक्षिणोत्तरप्रभृतिषु दिग्प्रत्ययेष्वेव अवधित्वम् अन्वयव्यतिरेकेण साध्यत[129] इति पृथग्रीत्या

---

[125] *तत्रैव,*पृ.१६९

[126] *टी.न्या.कं.*पृ.१७२

[127] *तत्रैव,*पृ.१७१

[128] *कुसुम.टी.*पृ.१७१

[129] यद्यपि ग्रीष्मात्पूर्वं वसन्त इति*(व्या)*१० पकस्यं*[एकस्याम्]* अवधित्वं दृश्यते तथापि दक्षिणोत्तरादिप्रत्ययसमभिव्याहृतपूर्वादिप्रत्ययेषु पूर्वस्यावधित्वं चान्वयव्यतिरेकाभ्यां निश्चितमित्यभिप्रायेणाह-अमूर्तद्रव्यस्येति '1 *कुसु.टी.* पृ.१७२

विषयः प्रतिपादितः। एतदनन्तरं कथ्यते यत् अनवच्छिन्नपरिमाणे अवधित्वं न वर्तते अर्थात् अनवच्छिन्नपरिमाणयुक्तद्रव्येषु अमूर्तद्रव्येषु परापरप्रतीतयो न विद्यन्ते;केवलं मूर्तद्रव्यावधिकृतत्वेन पूर्वापरप्रतीतिः,अत्र वोम्मिदेवेन उक्तं यत् अनेन तु घटादिप्रत्ययवत् साधारणत्वप्रसङ्गः समापतेत; एतस्माद् कारणात् 'सर्वत्रावस्थितः' इति विशिष्टं प्रतिपादितं समाधानरूपेण अर्थात् एताः सर्वाः प्रतीतयः सर्वत्रावस्थिता विद्यन्त इति। दृष्टान्तरसाहाय्येनोक्तं यत् ह्रस्वदीर्घादिषु तु परस्परं परिमाणतारतम्येन परस्परं परापरव्यवहारः सापेक्षरूपेण सिद्ध्यते, परञ्च दिशां विना परापरप्रतीतयो न जायन्त इति स्पष्टतया प्रतिपादितं वोम्मिदेवेन[130]। अन्यच्च नियतावधौ स्वस्वाभिधेयापेक्षया एव पञ्चमीविभक्तेः प्रयोगः पूर्वापरप्रतीतौ क्रियत इति प्रदर्शितं तद्यथा–"**द्रव्यादीनां पूर्वापरादिशब्द -प्रवृत्तिनिमित्तत्वानुपपतौ यद्यन्न निमितं तस्यां तस्य स्वस्वाभिधेयस्यापेक्षया नियतादवधेः पञ्चमीति भावः।** "[131]कंदल्यां कथितभावमेव स्वीकृत्य वोम्मिदेवेन स्वशब्देषु उच्यते यत्–मेरुं प्रदक्षिणमावर्तमानस्य आदित्यस्य मेरूणा सह ये संयोगाः ते तु औपाधिकाः वर्तन्ते,अन्यथा विशिष्टप्रत्ययस्य अतिप्रसङ्गः स्यादिति प्रश्नः। **समाधानम्-** एतस्माद् कारणाद् संयोगस्य क्रियायाः च उपनायकरूपेण कालवद् कश्चिद् व्यापकद्रव्यं कल्पितव्यं यतो हि इच्छामात्रेणैव न संयोगः प्राप्यते। क्रियासंयोगयोः एकजातिजत्वेनापि परापरप्रतीतिः चेत् काल एव प्राच्यादि -व्यवहारस्यापत्तिः स्यात् इति कथितम्। अन्यच्च कालवदत्रापि दिशि पूर्वापरादिप्रत्यायानां न प्रमातृसाधारण्यं वर्तते,यतो हि यत्र यस्य पूर्वप्रत्ययः तत्रैवापरप्रत्ययो जायत इति निर्दिष्टम् एवमुक्त्वा प्रमातृनियमः प्रदर्शयति– "**यत्र हि कस्यचित्पूर्वप्रत्ययः तत्रैवान्यायापरप्रत्यय इति प्रमातृनियमदर्शनात्**"[132]अर्थात् पूर्वापरादीनां प्रमातृत्वप्रतीतिसाधारण्ये दिग्द्रव्यकल्पना करणीयेति कंदलीकारतो भिन्नरीत्या प्रदर्शितम्। एतदनन्तरं श्रुतिस्मृतिसिद्धदिक्कालयोः पृथग्व्यवहारविषये कथयति तद्यथा-"**अवश्यं संयोगोपनायके कल्पनीये प्रमातृनियमे च प्रमाणसिद्धेः श्रुतिस्मृतीतिहासपुराणेषु दिक्कालयोर्भेदसिद्धिमनुसृत्यैव द्रव्यान्तरकल्पनाय अविरोधात्**"[133] अर्थात् द्रव्यकल्पना अविरुद्धा एव। अन्यदपि प्रतिपाद्यते यत् आदित्यसंयोगसाहित्येन तथा च मध्यमसंयोगराहित्येन उत्तरदक्षिणादिदिशां व्यवहारो जायते। सूर्यमपेक्ष्य पृथिव्याः तथा च पृथिवीमपेक्ष्य यतो नक्षत्राणि तत्र उर्ध्वमिति इत्यादिव्यवहारः संपाद्यते। [134]। इयं अग्रेसारिणीया कल्पना अर्थात् कंदलीकारभिन्ना वोम्मिदेवेन प्रस्तुतेति प्रतिपादितम्। अनेन प्रकारेण कथयितुं शक्यते यत् कुसुमोद्गमकारेण कंदलीकारप्रतिपादितविषयाणां वर्णनं विशदं दृष्टान्तरमाध्यमेन च प्रतिपाद्यते। सूर्यपृथिव्योः उर्ध्वाधरप्रतीतिः तयोः परस्परापेक्षया जायत इति भिन्नं प्रतिपाद्यते अर्थात् कुसुमोद्गमकारेण दिग्विषयः इतोऽपि स्पष्टीकृतः।

---

130 "ह्रस्वदीर्घादिषु तु परिमाणतारतम्ये प्रसिद्धे परस्परापेक्षो व्यवहार उपपद्यते पूर्वापरादिषु तु दिगनङ्गीकारे वायष्टविषयानुपपत्तौ नोपपद्यत इति भाव। टी.न्या.क.पृ.१७३

131 *तत्रैव*,पृ.१७३

132 *टी.न्या.कं.*पृ.१७५

133 *तत्रैव* पृ.१७५

134 सूर्यमपेक्ष्य यतः पृथिवी सा अधरा, पृथिवीमपेक्ष्य यतो हि नक्षत्राणि सोर्ध्वा। *तत्रैव*,पृ.१७६

**९.कुसुमोद्गमे आत्मद्रव्यनिरूपणम्**– भाष्यकारेणाष्टमपदार्थत्वेन आत्मनो निर्देश: क्रियते । तत्र सर्वप्रथमं कुसुमोद्गमकारेण निर्दिश्यते यत् सर्वेषां त्रयभोग्यानां वर्णनं जातमिदानीं भोक्तुः आत्मनो वर्णनं प्रारभ्यते[135]। नि:श्रेयससंसारयो: प्रयोजकरूपकारणत्वात् आत्मनो निरूपणं क्रियते अत:'आत्मत्वाभि -सम्बन्धादात्मेति' कथितम्। आत्मन: सिद्धिरूपहेतुत्वप्रयोजकरूपेण कन्दल्यां भाष्ये च ये तर्का: प्रोक्ताः तेषां संक्षिप्तरीत्या स्पष्टीकरणमात्रमेवाचार्येण वोम्मिदेवेन क्रियते। अत: शब्दप्रयोजनमात्रमेव तत्राभिधीयते। इन्द्रियाणां प्रयोजकरूपेण कर्तु: अनुमानं कंदलीकारेण क्रियते,तत्र कुसुमोद्गमकार: स्पष्टीकरोति यत् प्रत्यक्षयोग्यकर्तु: बाधे सति प्रत्यक्षार्थे आत्मन: सिद्धि: वृद्धव्यवहारेण जायत इति कथयति[136]अर्थात् आत्मनः 'आत्मा' इति संज्ञाकरणे वृद्धव्यवहारप्रामाण्यमपि दीयत इति कन्दली भिन्नम्। २. अहं ममेति प्रतीतिमाध्यमेन शरीरेन्द्रियसंघातभिन्नत्वे आत्मत्वप्रतिपादनेन चार्वाकस्य निरासो विधीयत इति कन्दलीकारकथितस्य स्पष्टीकरणमात्रम्। अन्यच्च कथ्यते यत् कर्तृत्वं स्वामित्वं च जन्मान्तरीयोपाधिद्वारा कल्प्यत इति। 'शरीरं प्रेरयामि', 'मम च चक्षु:' इत्यादयो प्रतीतय: आत्मप्रयोजकत्वेन एव द्रष्टव्या इति कथयतियथा[137] अर्थात् इन्द्रियेषु कर्तृत्वादय उपाधयो जन्मान्तरीयसम्बन्धेन कल्प्यन्ते। ३.आत्मन: साधकत्वेन शब्दोऽपि ज्ञाने कारणत्वरूपेण उच्यते। यथा च लिखति कंदलीकार:-शब्दादिषु विषयेषु प्रसिद्धिर्ज्ञानं तत्रापि प्रसाधको ज्ञातानुमीयत। ज्ञानं क्वचिदाश्रितम्, क्रिया त्वात्,छिदिक्रियावत्, यत्रेदमाश्रितं स आत्मा। उपर्युक्ते उदाहरणे यत् 'क्रियात्वाद्' इति यद् हेतु प्रदत्तं तत्र कुसुमोद्गमकारेण संशोध्यते यत् क्रियात्वादित्यस्य स्थाने कार्यत्वादिति हेतु: व्याख्यातव्यं वर्तते,यतो हि अनेन ज्ञानस्य अन्यथा परिस्यन्दभावो वार्यते तथा च हेतो: असिद्धिप्रसङ्गोऽपि न जायते। व्याकरणदृशा अपि कारणं दीयते यत् धात्वर्थस्य क्रियापरकत्वं वर्तते; अनेन विनश्यति इत्यादौ अनैकान्तिकदोषो जायते। अन्यदपि अनेन ईश्वरज्ञाने कार्यत्वभागस्य असिद्धि: वार्यते[138]। ४.तत्रोच्यते यत् चैतन्यं चेतनाया आश्रयो विद्यते, यतो हि तत्र समवायिकारणत्वं कार्यभूतस्य चेतनायाः आश्रयो विद्यते,अतः उभयो भेदेऽपि हेतो: सिद्ध्यभावात् तस्यापि साध्याभिन्नत्वं विद्यत इति प्रतिपाद्यते । [139]१.इन्द्रियाणां करणत्वस्य अचैतन्यत्वे उच्यते यत् शरीरे तद्भिन्नम् अधिष्ठातृत्वं न वर्तते। चैतन्ये

---

135 *[शक्य]?* त्रयभोग्यगुणाश्रयनिमित्तभावेन पृथिव्यादय: सप्त निरूपिता:, अथोपभोक्ता *'[क्तृ]* निरूपणप्रयोजनमाह यस्येति। तत्रैव,पृ.१७६

136 प्रत्यक्षयोग्यतया बाधितत्वात् पक्षधर्मतासाहायात् करणत्वसिद्धे.1प्रत्यक्षेऽर्थे वृद्धव्यवहारप्रसिद्धया आत्मेति सञ्ज्ञेत्यभिप्राय:,*टी.न्या.कं.*पृ.१७७

137–"अहं ममेति कर्तृत्वं स्वस्मिश्च शरीरेन्द्रियसङ्घातस्येति वदतश्चार्वाकान्निरसितुं तद्विषयमेव कर्तृत्वं स्वामित्वं च जन्मान्तरीयसम्बन्धोपाधिकृतम्। चक्षुषा पश्यामि 'शरीरं प्रेरयामि ' मम च चक्षु मम च शरीरमिति च। एवं रूपमिति द्रष्टव्यम्। *तत्रैव*, पृ. १७८

138 कार्यत्वादिति व्याख्येयम्, अन्यथा ज्ञानस्य परिस्यन्दाभावेन हेत्वसिद्धिप्रसङ्गात्, क्रियाशब्दस्य धात्वर्थपरत्वेऽपि विनश्यतीत्यादावनैकान्तिक*[त्व]* प्रसङ्गाच्च। विप्रतिपन्नमिति च ज्ञानं विशेषणीयम् ईश्वरज्ञाने कार्यत्वस्य९*(म्)* भागासिद्धिर्माभूदिति। *टी.न्या.क.* पृ.१७८

139 चैतन्यं चेतनाया आश्रयत्वं समवयिकारणत्वं तु कार्यभूतायाश्चेतनाया आश्रयत्वम्, इत्यनयोर्भेदेऽपि हेतोरसिद्धत्वात् साध्याविशिष्टं च द्रष्टव्यम्। *टी.न्या.कं.* पृ.१८०

तदिधिष्ठाताभावाद् अनुपपत्तिः तत्र विद्यत इति निरूप्यते[140]। २.स्मृतेः अनिन्द्रियजन्यत्वं अन्यत्-दृष्टान्तेन तत्र प्रतिपाद्यते यथा- व्रीहिबीजस्याभावेऽपि जायमानस्य अङ्कुरस्य न व्रीहिबीजकार्यत्वं विद्यत इति प्रतिपाद्यते यथा चोक्तम्- **"अत्र प्रयोग:,स्मृतिनेन्द्रियकार्या तद्भावेऽपि ज्ञायमानत्वात्, यथा व्रीहिबीजाभावेऽपि जायमानोप:मङ्कुरो न व्रीहिबीजा(ज)कार्य इति"**[141]। ३.पूर्वानुभूतविषय-स्यानुस्मरणविषये उक्तं यत् इयं इन्द्रियाप्राप्तविषयत्वात् लैङ्गिकज्ञानवद् प्राची प्रतिज्ञेति[142]। अन्यच्च विषयस्य स्मरणे विषयसन्निधिरपि नापेक्ष्यत इति कंदलीवदेव। ५.एतदनन्तरं ज्ञानस्य क्रमानुमानं नर्तकी इत्यस्या: दृष्टान्तमाध्यमेन स्थापयति तद्यथा – **" नैष दोषः आवृत्य नर्तकीमुखादिकमित्थं निरीक्षणमाणस्य इन्द्रियान्तरसन्निहितविषयान्तरेषु ज्ञानानुदयाद्वयासङ्गे तावत् ज्ञानक्रमः स्पष्ट एव दृष्टस्तद् दृष्टान्तबलेन यदा शष्कुलीभक्षणादौ रूपादिप्रत्यानां क्रमानुमानादिति सिद्धान्ते ज्ञानक्रममुपपादयति इति"**[143]अर्थात् अत्र सर्वन्द्रियसिद्धौ रूपरसादिप्रत्यययानां पूर्वोक्तस्यैकस्य कर्तृत्वं प्रतिसंधातव्यम्। ६.आत्मनि स्मृतिक्रमः संस्कारोद्बोधकक्रमेणैव लक्ष्यते,आत्मन: कार्यत्वेन ज्ञानस्योपपादने अनुवाक्यप्रयोगमुप स्थापयति– **"पृथिव्याद्यष्टद्रव्याद्यतिरिक्तद्रव्यकार्यं ज्ञानं तदनाश्रितत्वे सति कार्यत्वात् न यदेवं न च तदेवं यथा गन्ध इति व्यतिरेकी। "**[144]**आत्मन: सिद्धि:-**आत्मनिः अधिष्ठातृत्वरूपेण ज्ञानस्य स्थापने कथ्यते यत् कार्यकारणयो: आश्रयाश्रयिभावः स्थैर्येण एव संभाव्यते न तु क्षणिकत्वमाध्यमेनेति। भावसहकारित्वविषयिणी या चर्चा कन्दलीकारेणोपस्थाप्यते तत्र स्वयंकृतोद्भावनया वोम्मिदेवेन प्रश्नोत्तराणि प्रस्तूयन्ते। आक्षेप:- भावसहकारिणः किमर्थमपेक्ष्यन्ते स्वात्मसिद्धये, कार्यसिद्धये तथा च उपकारार्थे क्रियत [145]इति कथ्यते, अतः तत्र समाधाने सहकारिसमवधानेन विलक्षणशक्तिरुत्पाद्यत इति कंदलीकारप्रभृतिवैशेषिकाभिमतमेव प्रतिपादितम्। सहकारिकारणप्रसङ्ग एव कन्दलीकारेण प्रतिपादितं यत् सहकारिकारणै: अतिशयमुत्पाद्यत इत्यत्र वोम्मिदेवेनोच्यते यत् सहकारिकारणत्वस्याभिप्रायो मिलित्वा कार्यकरणं विद्यते न तु अतिशयोत्पादनमिति निरूप्यते। अतिशयोत्पादने तु अनवस्था स्यात् इति लिख्यते[146]। मनसः कथं प्रेयत्वमिति विषये वोम्मिदेवेन दत्तं यत् दण्डादिवत् तत्रापि करणरूपेण प्रेर्य्यत्वं विद्यते। अदृष्टेनैव तत्राभिमतविषयग्रहणे सामर्थ्योत्पादनत्वात् तस्य आश्रयत्वरूपेण आत्मनः सिद्धि अवर्जनीयतया विद्यत इति प्रतिपाद्यते। इच्छाप्रयत्नयोर्माध्यमेन मध्यकृतकार्यस्यैवोपादनं क्रियत इति निरूप्यते। [147]अन्यदपि तत्रोच्यते यत् न केवलं कार्यमाध्यमेन अपितु गुणमाध्यमेनापि आत्मनः अनुमानत्वं कल्पनीयः।

---

[140] कर्त्रधिष्ठितस्यैव कारणत्वादिन्द्रियाणां चैतन्ये तदतिरिक्तस्याधिष्ठातुरभावेन तज्ज्ञानुपपत्ति.। कारणत्वादित्यसानुकूलस्तर्क.। टी.न्या. क.,पृ१८०

[141] *तत्रैव*,पृ १८२

[142] *तत्रैव*, पृ.१८१

[143] *कुसुम.पृ १८२*

[144] *कुसुम पृ १८४*

[145] *तत्रैव*, पृ.१८५

[146] उपकारं जनयन्तो भावा: किमुपकृता जनयन्ति अनुपकृता वा ? अनुपकृतानामुपकारकत्वे भावस्यानुपकृतस्य कार्यकरत्वप्रसङ्ग.। उपकृतानामुपकारकत्वेऽनवस्थेत्येतद्दूषणं सोबोधमित्यपेक्ष्य प्रकारन्तरेण विकल्प्य दूषयति **स किमिति**। तत्रैव, पृ.१८५-१८५

[147] ततश्चासाक्षात्कृतेऽपि मनसाम् इच्छानुविधायिकर्मादृष्टवशात्प्रयत्न पूर्वक्रमभ्युपगन्तव्यम्। अन्यथा बुभुत्साति -शयेन पटुतरप्रत्ययानुदयप्रसङ्गादिति। कुसुम. पृ.२१३

तत्रैकेन्द्रियग्राह्यत्वेन गुणत्वं, गन्धादिवत् द्रष्टव्यम्। कार्यद्रव्यत्वे कर्मत्वे च पृथिव्यादीनां त्रयाणां द्रव्याणां तथा च तेषां कर्मवत् द्विन्द्रियग्राह्यत्वात् वायुकर्मवत् इन्द्रियेणाग्राह्यत्वं तत्रोच्यते। अयमेव तत्रानुकूलतर्कः प्रतिपाद्यते। यद्यपि अहं सुखी, अहं द्विषामि इत्यादयः प्रतीतयः मनसा अपि सर्वशरीरिभिः क्रियन्त इति पृथक् निरूप्यते। एतत् आत्मविषयकत्वमेतेषां सुखादीनां महर्षेगौरवात् सूत्रसम्मतिं प्रदर्शनाय एवोच्यत इति अनुसंधेयम् अत्र वोम्मिदेवेन सूत्रकारसम्मतिप्रदर्शनार्थमेव आत्मविषयरूपेण सुखादयो गृह्यन्ते,अन्यथा मनसा तेषामुपपत्तिः सर्वैरेव क्रियत इति किञ्चिद् विपरीतमाशङ्कितम्[148]। **आत्मनः अनेकत्वम्**-आत्मनो नानात्वसाधनेऽपि वोम्मिदेवेन पृथक्दृष्टान्तमाध्यमेन विषयः उपस्थाप्यते। कस्यापि सुखीत्व-दुःखीत्वमाध्यमेन एकैकत्वस्योपपत्तिहू जायते। 'पादं मे सुखं' 'शिरसि मे वेदना' इत्यादिवत् शरीरस्य अभावेनापि मुक्तत्वं बद्धत्वं विद्यते अर्थात् तत्रात्मा भेदः। तदनन्तरं व्यवहारः प्रदर्श्यते यत् 'वासिष्ठो मुक्तः''वामदेवो मुक्तः' इत्यादि वाक्यमुक्तिसाधन -सम्बन्धमात्रेण नोपचारप्रतीतिरिति कथयितुं शक्यते। अनेन ईश्वरानीश्वर व्यवस्थापि भ्रान्तिसिद्धा एवेति प्रतिपादितम्[149]। एतदनन्तरम् आत्मनो विभुत्वे अनुमानप्रमाणं दर्शयति- **"अग्न्यूर्ध्वज्वलनहेतुरदृष्टं स्वकार्यकर्माश्रयसंयुक्तसमवेतं व्यधि[करण] कर्महेतुगुणत्वात् विप्लवदातुकर्महेतुस्रोतवत् इति विभुत्वानुमानं द्रष्टव्यम्"**[150]। एतदनन्तरं अनेनैव भावेन कन्दल्याम् अथ केयमित्यनेन आत्मनः एकत्वं बहुत्वं च आशङ्कयते। एतदनन्तरं कन्दलीप्रतिपादिता अन्यापि चर्चा वोम्मिदेवेन विधीयते। वोम्मिदेवकृतव्याख्या आत्मप्रकरणे नातिविशदा विद्यते,तत्र कन्दलीकारविवेचिततर्काः संक्षेपेण 'इति भावः' 'इत्यभिप्रायः'इत्यादिशंब्दानां माध्यमेन चर्च्यन्ते। वोम्मिदेवेन मुख्यमुख्यरूपेण सर्वेषां तर्काणामुपरि चर्चा विहिता परञ्च न विशेषः प्रतिपादितः, अपितु स्पष्टीकरणमाध्यमेन विषयसंवर्द्धनमेव कृतः।

**१०.कुसुमोद्गमे मनोद्रव्यनिरूपणम्–** कुसुमोद्गमकारेण निर्दिश्यते यत् मनस् द्रव्यनिरूपणात् पूर्वं भोग्यभोक्तुः चर्चा जाता,इदानीं तेषां करणरूपमनसो निरूपणं क्रियते[151]। समानगुणकार्ययुक्तव्यक्तिषु परसामान्यं दृश्यत इत्येवं रूपेण मनसः सामान्यनिरूपणं क्रियते[152] अर्थात् कदाचिद् साम्यादिकं दृष्ट्वा मनस्त्वमिति परसामान्यमनुमीयते। ज्ञाने सुखदुःखयोः भेदसाधने वोम्मिदेवेनाशंक्यते यत् ज्ञानत्वं तु सामान्यं वर्तते,अतः सुखदुःखौ तस्य विशेष्यौ स्त इति कथयित्वा 'बोधेति' इति कंदलीशब्दः निर्दिश्यते। समाधानम्- तत्र समाधानरूपेण कथ्यते यत् यद्यपि बोधाकारस्य परस्परं वैलक्षण्यं परञ्च अनयोः व्यावृत्तिः प्रत्यक्षसिद्धा वर्तते, अतः तत्र सामान्यविशेष -परकत्वकथनं व्यर्थमेव विद्यते। यथा च निरूपयति- **"उभयोः सुखदुःखजन्मनि बोधाकारस्य वस्त्वंतरस्य प्रतीतौ सत्यामेव[त]द्विलक्षणयोः परमनुकूलतया व्यावृत्तस्याः(स्य) प्रत्यक्षसिद्धत्वात्सामान्यविशेषभावोऽपि न संगच्छत इति भावः"**[153]अर्थात् बोधाकारस्य साधारणत्वे अपि

---

[148] *टी.न्या.कं.*पृ.२१८

[149] *तत्रैव,*पृ.२२०

[150] *तत्रैव,*पृ.२२५

[151] ये भोग्यस्य भोक्तुश्च निरूपणानन्तरं भोगाय कारणं प्राप्तमित्यभिप्रायेण सङ्गतिं करोति प्रधानत्वादिति, *टी.न्या.कं.*पृ.२२६

[152] *टी.न्या.कं.*पृ.२२७

[153] *टी.न्या.कं.*पृ.२२९

उभयोः परस्परं व्यावृत्तत्वाद् वैभिन्यं वर्तत इति कंदलीकारस्य एव अनुसरणं विहितम्। सुखदु:खयो: वासनाजन्यत्वेन **बौद्धमतं यत्र** प्रस्तुतं टीकाकारेण तत्र कुसुमोद्गमकारेण पृथक् दृष्टान्तेन तदेव भावःस्पष्टीक्रियते। रागद्वेषयुक्ता वर्तते वासनेति, तयैव सुखदुःखयोरूत्पत्तिः इतरथा हेमन्तेऽपि चन्दनस्पर्शसुखं तथा च वीतरागेणपि कामिनीस्पर्शसुखं अनुभूयेत इति अर्थात् उपेक्षाज्ञानस्य संसारेऽभावः स्यादिति वोम्मिदेवेन दृष्टान्तरेण भिन्नरीत्या स्पष्टीकृत्य प्रतिपादितम्[154]। **मनसि गुणा:–** कुसुमोद्गमकारेण अतिसंक्षिप्तव्याख्यानं तत्र प्रस्तूयते । प्रतिशरीरे एकस्य मनसः सत्ता वर्तत इति[155]। मनस एकत्वसाधने वोम्मिदेवेन उच्यते यत् एकत्र ज्ञानस्य प्रयत्नस्य वा उत्पत्तौ तस्यानुपत्तिः विषयान्तरे जायत इति भावो गृहीत्वा कथयति– "**विषयात्मतत्सन्निकर्ष -व्यतिरिक्तसहकारिविरहयुक्ता तेषु सत्के[षु] च कार्यानुत्पत्तित्वात् सम्प्रतिपन्नवदिति प्रयोगः**"[156] इति । **परिमाणम्–** मनसःउच्यते यत् मनसः परमाणुवद् प्रयोगः, यतो हि तत्र अविभुत्वं विद्यत इत्यत्र अनुमानवाक्यप्रयोगं प्रतौति"**मनोऽणु अविभुत्वे सति नित्यद्रव्यत्वात्परमाणुवदिति प्रयोगः**"। [157]यत्र मनसि अपसर्पणोपसर्पणमाध्यमेन यत्र संयोगगुण: साध्यते तत्रोच्यते यत् वीतरागजन्यबहूशरीराणां प्रेत्याभावानुपपतिः स्याद्। अतो मनसि संयोगगुणसत्त्वं स्वीकरणीयमिति[158]। मनस: अतीन्द्रियसत्त्वेऽपि तत्र अपेक्षाबुद्धया परत्वापरत्वयोः सत्ता न निषेध्येति। अत: तत्र परत्वापरत्वगुणावपि वर्तत इति। तत्र अदृष्टकार्ययुक्तकर्मयोगिजनेनापि छलनादिवदेव तत्र वेगोऽपि स्वीकर्त्तव्यः। अत उक्तम् "**अदृष्टकार्यकर्मयोगित्वेनापि छलनादिवदेव वेगोऽपि प्रमाणसिद्धः स्वीकर्त्तव्यः इति भावः**। "[159] अन्यच्च कथ्यते यत् केवलं मनस अस्पर्शत्वमाध्यमेन अमूर्तत्वं न अनुमातव्यम्, अनेन परत्वापरत्वावेगानाम् अनुमानमुच्छिद्यत इति शंकानिराकरणाय भाष्यपठननिर्देशः क्रियते[160]। अन्यदपि कथ्यते यत् गुरुत्वादिवत् अत्रापि प्रयत्नादृष्टयोः मनसि क्रियाकारणत्वम् अनुमेयं वर्तते अर्थात् मनसि क्रिया अपि वर्तते। अनेन प्रकारेण मनोद्रव्यस्य सिद्धिरुच्यते। अन्ते स्पष्टीक्रियते यत् गुणान्वितद्रव्याणि प्रतिपादितानि,तेषां प्रतिपादने मुनियोगम् अपेक्ष्यत इत्यप्युक्तम्। अन्यदपि सूचितं यत् ग्रन्थोऽयं कस्य संतोषाय ग्रन्थित इति यथा च उक्तम्–"**वराज्ञब्रह्मावसुन्धराधिपतिना धात्रीधरेन्द्रात्मज - वैक्रमोजविकासनालभरणेन्दीवरस्य संप्रीतये**। "[161]अनेन कथनेन द्रव्यपदार्थसमाप्ति: निर्दिश्यत इति। अनेन प्रकारेण कथयितुं शक्यते यत् यथा कंदलीकारेण प्रत्येकस्य द्रव्यस्य अन्ते ग्रन्थपरिचायकं विवरणं यथा प्रस्तूयते,तद्वत् कुसुमोद्गमकारेणापि कुत्रचिद् दीयते। अन्यदपि स्पष्टं भवति यत् यद्यपि वोम्मिदेवेन विशदं विवरणं व्याख्यानं वा कुसुमोद्गमे नूतनदृष्टान्तमाध्यमेन प्रस्तुतं परञ्च न वर्तते कंदलीकारतो मुख्यसिद्धान्ते भेदः। द्रव्याणां निरूपणानन्तरं गुणानां साधर्म्य-वैधर्म्यप्रतिपादनं भाष्यकारप्रभृतिभि: क्रमश: क्रियते-

---

154 *टी.न्या.कं.* पृ.२२९

155 *टी.न्या.कं.*पृ.२३३

156 *टी.न्या.कं.*पृ २३४

157 *कुसुम.*पृ. २३५

158वीतरागजन्मदर्शनादेकस्यानेकशरीरयोगसिद्धे व्यापकस्य संयोगहेतु क्रियाविरहान्मनसस्तदभावेऽपसर्पणोपसर्प- णयोरसिद्धौ प्रेत्याभावानुपपत्तिरिति भावः। *तत्रैव* पृ.२३६

159 *तत्रैव* पृ. २३६

160 *तत्रैव*,पृ. २३६

161 *टी.न्या.कं.* पृ.२३८

## कुसुमोद्गमे गुणानां साधर्म्य-वैधर्म्य-प्रकरणम्-

आचार्येण क्रमशः गुणानां साधर्म्यादिकं निरूप्यन्ते परञ्च यत्र विशेषा चर्चा तदेव अत्र वर्ण्यते। कुसुमोद्गमे संयोगजगुणानां निरूपणप्रसङ्गे शब्दविषये कथ्यते यत् विभागजे शब्दे संयोगो न वर्ततेऽतः संयोगजत्वाभावः तत्र विद्यत इति। २.तुलपरिमाणविषये कथ्यते यत् समानसंख्यापरिमाणैः अवयवैः समारब्धे द्रव्ये सजातीयपरिमाणस्य अपेक्षाधिकपरिमाणस्योपलक्षणत्वं वर्तते,[162]अतः एतस्य शिथिलसंयोगस्य उपलक्षणत्वं कथ्यते। संयोगजसंयोगरूपेण'प्रचयः'[163]कथ्यत इति भिन्नरूपेण प्रतिपादितवानाचार्यः। कुसुमोद्गमे समानजातीयारम्भकगुणानां निरूपणप्रकरणे समानजात्यार- म्भके संग्रहनिमित्ते स्नेहस्यापि कथनं विहितं वोम्मिदेवेन,समानजातीयेषु पूर्वं चर्चितं यत् ज्ञानभिन्नगुणैः रूपादिभिः समानजात्यारम्भकत्वं निष्पाद्यते,तत्र आत्मव्यतिरेकोऽपि[164]एपितव्य इति कुसुमोद्गमकारेण निर्दिष्टं स्पष्टीकृतं च। स्नेहस्य समानजातीयारम्भकत्वे कथ्यते यत् 'संग्रहकरणे' स्नेहगुण प्रयोगः स्याद्[165]इति। कुसुमोद्गमे असमानजातीयारम्भकगुणानां निरूपणप्रसङ्गे असमानजात्यारम्भकेषु सुखेन अन्यत् सुखोत्पत्तेः चर्चा कंदलीकारेण यत्र क्रियते तत्र वोम्मिदेवेन उच्यते यत् यद्यपि सुखज्ञानेन नापरसुखोत्पत्तिः तथापि पूर्वभावित्वानियमेन इच्छायाः कारणं सुखं वक्तुं शक्यत[166] इत्युदभावना वोम्मिदेवस्येति। अनेन सुखप्राप्तौ इच्छायाः कारणत्वं शिडिलवोम्मिदेवेन कथ्यते। कुसुमोद्गमे असमवायिकारणत्वरूपेण गुणनिरूपणे धर्माधर्मयोः आत्मनो विशेषगुणोत्पादने असामर्थ्यं कंदलीकारेण प्रस्तुतम्, तत्रैव तं भावं स्वीकृत्य एव अनुमानवाक्यप्रयोगं कथयति-**"अत्र प्रयोगः बुद्धादयो न धर्माधर्मसमवायिकारणकाः आत्मगुणत्वात् प्रमेयत्वाद्वा अधर्माद्दुःखवद्धर्मात्सुखवच्चेति"**[167] । अनेन प्रकारेण ज्ञानादीनाम् असमवायिकारणरूपेण न सुखादयो वर्तन्त इति । तत्र धर्माधर्मौ श्रुतिस्मृतिरपि निमित्तरूपेण प्रदर्श्यन्ते। तद्यथा लिखितम्-**"तथाऽरूणया क्रीणाति, वायव्यंगश्वेतमालभेत कपिलां न ताडयेदित्यादि श्रुतिस्मृतिबलाद् भूयस्य धर्माधर्मोत्पत्तौ निमित्त्वादस्यापि दर्शनाविरोधः"**इति[168]अर्थात् श्रुतिस्मृत्योरपि कारणत्वं विद्यत इति कंदलीकारतो भिन्नं प्रतिपादितम्। एतदनन्तरं कुसुमोद्गमकारेण एकैकशः गुणानां व्याख्यानं प्रारभ्यते।

**१.कुसुमोद्गमे रूपगुणनिरूपणम्-** रूपगुणप्रकरणे कुसुमोद्गमकारेण कंदलीकारेण प्रयुक्तानां शब्दानां स्पष्टीकरणमात्रमेव दीयते। 'सामान्य'शब्दग्रहणात् सामान्यादीनां त्रयाणां ग्रहणार्थं तथा च संख्यादिभ्यो व्यावृत्यर्थं 'पृथिव्युदकज्वलनवृति'रिति शब्दः कथ्यते। कदाचित् समवायेन, एकार्थसमवायेन तथा च समवेतसमवायेन रूपस्योपलब्धौ कारणत्वं कथ्यते। पुरुषार्थत्वहेतुनापि रूपेण द्रव्याद्युपलम्भः कार्यत इति वोम्मिदेवेन कंदलीकारात् भिन्नं प्रतिपादितम्। यथा च लिखति-**"एतेन क्वचित्तु समवायात्क्वचिदेकर्थ - समवायात्क्वचित्समवेतसमवायाच्च रूपस्य विषयोपलब्धिकारणत्वेन कारणस्थस्य पुरुषार्थहेतुत्वमुक्तमिति**

---

162 *टी.न्या.कं.*पृ.२४८

163 प्रचयः संयोगजः संयोगः संयोगकाण्डे वक्ष्यति। *टी.न्या.कं.*पृ.२४८

164 तद्व्यतिरेकेण-आत्मधर्मव्यतिरेकेण। *टी.न्या.कं.*पृ.२४९

165 *टी.न्या.कं.*पृ.२४८

166 *टी.न्या.कं.*पृ.२५०

167 *टी. न्या.कं.*पृ.२५२

168 *तत्रैव,*पृ.२५३

भाव:"[169]द्व्यणुकस्य तद्रूपयो: परस्परव्यतिरेक: आश्रयाश्रयिभावश्च वर्तत[170] इति ।

**२.कुसुमोद्गमे रसगुणनिरूपणम्–**रसप्रकरणविषये कुसुमोद्गमकारेण अतीव संक्षिप्ता व्याख्या प्रस्तूयते। भाष्यकारेण कंदलीकारेण च जीवनारोग्यप्रभृतीनां वृद्धिरूपेण रसगुणस्य निमित्तत्वं कथितं परञ्च कुसुमोद्गमकारेण तद्विपर्यये मरणत्वादौ अपि रसस्यैव निमित्तत्वं कथ्यन्ते तद्यथा **"मरणकार्श्यबलहानिरोगाणामपि रसनिमित्तत्वात्"**[171]अर्थात् मरणकार्श्य बलादिषु रसस्य निमित्तप्रतिपादनत्वरूपवैभिन्य्रं कंदलीकारात् भिन्नरूपेण प्रतिपाद्यते ।

**३.कुसुमोद्गमे गन्धगुणनिरूपणम्-** रसगुणानन्तरम् अस्य प्रकरणस्यापि श्रीधरेण संक्षिप्ता व्याख्या क्रियते। केवलं गन्धभेदविषयकं किञ्चिद् निरूप्यते। असुरभिगन्ध: केवलं सुरभेः अभावमात्रमेव न विद्यत इत्युपस्थापयति कुसुमोद्गमकारः तद्यथा– **"असुरभिरिति सुरभिविपरीतो भाव एवानुभवसिद्धः अधर्मवत्। न तु सौरभ्याभावमात्रमिति भाव:"**[172] अर्थात् सुरभिगन्धात् विपरीतभावत्वेन असुरभिगन्धो वर्ण्यते न तु सुरभिगन्धस्य अभाव: तत्र विद्यते। एतदनन्तरं कथ्यते यत् गन्धस्य गणना विशेष गुणेषु वर्तत इति।

**४.कुसुमोद्गमे स्पर्शगुणनिरूपणम्-**अत्रापि कुसुमोद्गमकारेण संक्षिप्ता व्याख्या प्रस्तुतेति। स्पर्शगुणस्य विशेषगुणत्वं संख्यासाधारण्यस्यापेक्षया इति सूच्यते[173]अर्थात् स्पर्शो विशेषगुण:।

**कुसुमोद्गमे पाकजप्रक्रियाप्रकरणम्-** पाकजप्रक्रिया इति विषयस्योपरि कुसुमोद्गमकारेण साररूपिणी टीका विधीयते। तत्रोच्यते यत् पार्थिवपरमाणुषु पाकक्रिया आरम्भकसमवायिकारणेषु एव जायते। आप्यस्य परमाणुषु अपि पाकक्रिया निमित्ततया आरभ्यत इति वोम्मिदेवेन निरूप्यते[174]अर्थात् वोम्मिदेवेन नैमित्तिकपाकजत्वं तत्र स्वीक्रियते। कारणगुणपूर्वकेण अवयविरूपेण परमाणुरूपस्यारम्भो जायते[175]। अनेन जलादिभ्यो अस्य व्यवच्छेद: कथ्यते[176]। अन्यच्च रूपादिभ्यो शब्दस्य व्यतिरेकप्रदर्शनार्थं तद्विषयेऽपि तत्र कथ्यते यत् मध्यवर्तमानशब्देन एकजातीयं प्रति व्यक्तिभेदाद् पूर्वस्य विनाशकत्वेन उत्तरस्योत्पत्तिरवलोक्यते । एवमेव उपान्त्यव्यक्तिं प्रति उत्पादकत्वं विनाशकत्वं च कालभेदेन दृश्यते। रूपादिषु न एवं विद्यत इति प्रतिपाद्यते। अत्र तर्कं प्रददाति– **"अत्र तर्क:, उत्पद्यमानपाकजावयवाविनाशे कार्यरूपादिविनाश - स्याश्रयविनाशहेत्वाभावकारणत्वप्रसङ्ग"**: अर्थात् घटादिषु पूर्वरूपादीनां विनाशो यदि न स्वीक्रियेत तर्हि अनेकरूपत्वप्रसङ्ग:,अन्यच्च वह्निसंयोगस्य विनाशोत्पादककारणत्वं स्वीकारे तत्र अन्यकारणाभावात् तयो: अकारणत्वं न शङ्कनीयम् इति स्पष्टीक्रियते। अन्त्यसंयोगेन यदि उत्पादकविनाशकत्वे स्वीक्रियते तर्हि द्व्यणुकादे: रूपादिमत्वप्रसङ्ग: स्यादिति प्रतिपादितं वोम्मिदेवेन। एतदनन्तरं घटादीनां सुखदु:खानुभवो यै: करिष्यते ते भोगिन:, तेषां साहाय्येन परमाणुषु क्रिया जायते। अस्मिन् प्रसङ्गे कुसुमोद्गमे 'भोगिनो विशिनष्टि' इत्युक्तम्। तत्रोच्यते यत् इदं कथनं लौकिकनियमस्य प्रयोजकत्वं दर्शनार्थम् कुलालादिनां कृते

---

[169] *टी.न्या.क.*पृ.२५९

[170] *टी.न्या.क.* पृ.२६१

[171] *कुसुम.* पृ.२६२

[172] *कुसुम.* पृ.२६३

[173] *टी.न्या. क.* पृ.२६४

[174] आप्यानामपि निमित्ततयाऽऽरम्भकत्वात्। टी.न्या.कं.पृ.२६६

[175] टी.न्या.कं.पृ.२६६

[176] इदं चाप्यादिपरमाणुरूपादिव्यवच्छेदीयविशेषणम्। *तत्रैव,*पृ. २६६

प्राच्यप्रयासवैयर्थ्यं परिहारार्थम् एवाभिहितमिति अवबोधव्यम्[177]। घटस्योत्पतौ रूपादीनामुत्पत्ति: तत्र प्रमाणरूपेण कथ्यते। द्वयणुकादि-आन्तरालिककार्येण एव घटादिकार्ये रूपोत्पत्तिप्रमाणत्वं विद्यत इति सूचयति तद्यथा- **"पुनर्घटोत्पतौ रूपाद्युत्पत्ति: प्रमाणं घटोत्पत्तिरेव द्वयणुकाद्या - न्तरालिककार्योत्पत्तावित्येवमादि कार्यमेव कारणे प्रमाणं द्रष्टव्यम्"।** [178]अन्यदपि द्वयणुके पक्कं परमाणुरूपं परमाणुरूपमाध्यमेन जन्यत इत्यपि समीचीनं विद्यते;यतो हि द्रव्यारम्भकसंयोगानुकूलक्रियोत्पत्तिमाध्यमेन एव उत्तरकार्याणां रूपादीनामुत्पत्ति: कार्यत इति निरूपितम् अर्थात् द्रव्यारम्भकसंयोगानुकूलक्रिययाद्यणुके पक्कपरमाणुरूपस्योत्पत्ति: परमाणुरूपमाध्यमेन एव कार्यत इति भाव:। एतदनन्तरं यत्र रूपयुक्तद्रव्येषु क्रियावत्वम् आक्षेपरूपेण कन्दल्यां यदुक्तं तत्र तं मतं विषये सूच्यते यत् पिठरपाकवादीनां मतमिदमिति। नैयायिकै: यत्र कार्यद्रव्येषु अग्निसंयोगेन रूपादीनां नाश: कथ्यते। तत्र घटस्य संपूर्णावयवेषु पाको न स्वीक्रियते;एतस्य समाधानरूपेण 'सच्छिद्राणाम्' इति शब्द: प्रयुज्यते। तत्र दृष्टान्तवैभिन्न्येन भावोऽयं सूच्यते यत् अवयवेषु यदि न क्रिया तर्हि घटान्तर्वर्त्तिजलस्य बहि: स्यन्दनं कथं संभवति इति प्रतिपादितम् अर्थात् भावोऽयं यत् घटविनाशं विना तेजप्रवेश: कथ्यते, तद्वद् जलस्यन्दनक्रियापि जायत इति पिठरपाकवादिनामभिप्राय: स्पष्टीक्रियते। कुसुमोद्गमकारेण 'अत्रेति' इति शब्देन निर्देशं कृत्वा एकादशक्षणपर्यन्तं पाकजप्रक्रिया परिशुद्धि: कथ्यते । **पाकजप्रक्रिया-** अग्निना नोदनाभिघातानन्तरम् अन्यतरविभागादिन्यायान् द्वयणुकस्य विनाशो जायते। तत्र स्वतन्त्रपरमाणुषु श्यामादीनां निवृत्ति:,तेन रक्तादीनाम् उत्पत्तिर्जायते। एतदनन्तरं पक्कपरमाणुषु द्रव्योत्पादकक्रियाया: समुत्पाद:,ततो तस्याकारादिभ्यो विभागो जायते। इत: पूर्वं पूर्वसंयोगस्य नाश:तथा द्रव्योत्पादकसंयोगस्य उत्पाद:,ततो नवम प्रक्रमेण रक्तादीनामुत्पत्तिर्जायते अर्थात् इयं नवक्षणप्रक्रिया विद्यते। तत्तत् सहभावेन विहितकार्याणां क्षणगणना क्रियते। एतदनन्तरमाचार्येण एतस्या: प्रक्रियाया: परिशुद्धि संक्षिप्तीकरणं च शिष्यबुद्धिवैशद्याय विधीयते। यथा च वर्णयति- **"अग्निना नोदनाविघातयोरन्यतरस्मात्क्रियाविभागादिन्यायेन द्वयणुकविनाश:। तत: स्वतन्त्रे परमाणौ श्यामादिनिवृत्ति:। ततो रक्ताद्युत्पत्ति:। तत: पक्के परमाणौ द्रव्योत्पा(त)दकक्रियोत्पाद:। तत आकाशादिदेशाद्विभाग:। तत: पूर्वसंयोगनाश: द्रव्योत्पादकसंयोग:। ततो नवमकारणप्रक्रमेण रक्ताद्युत्पत्ति:। तत्तत्सहभुवां तु कीर्तनं सन्पातायातं तत् क्षणगणनायां नोपयुज्यते। सेयं नवक्षणा प्रक्रि[या]यो यत्कर्मणा पूर्वद्वयणुकविनाशस्तदितरपरमाणावुत्पादककर्मचिन्तयाऽऽचार्येण कृता"**[179]अनेन प्रकारेण क्षण- गणनामाध्यमेन नवक्षणा प्रक्रिया समस्तरीत्या वर्णिता। एवमेव नवमस्य दशमस्य च क्षणस्य चर्चापि वोम्मिदेवेन विधीयते । येन कर्मणा पूर्वद्वयणुकस्य विनाश: तथा च परमाण्वितरेषु उत्पादक - क्रियाचिन्ता आचार्येण विहिता तत्र उत्पादककर्मचिन्तायां द्रव्यविनाशसमकाले हि विभागजविभाग इति स्वीकरणे क्रियादशलक्षणा जायते[180]। एतस्य विभागजविभागस्यापि यदि पृथक्क्षणमङ्गीक्रियते चेत् इयं

---

[177] इदं च लौकिकसम्बन्धनियमप्रयोजकं दर्शयितुं कुलालादिप्राच्यप्रयासवैयर्थ्यं(पर) परिहर्तुमुक्तमित्यवगन्तव्यम्। *टी.न्या.क.*पृ. २६८

[178] *कु.सु.* पृ. २६८

[179] *टी.न्या.कं,*पृ. २७३-२७४

[180] उत्पादककर्मचिन्तायां तु द्रव्ये विनाशकालमेव विभागजविभागाङ्गीकारेऽपि दशक्षणा भवति। टीकात्रयोपेता,न्या.कं,पृ. २७४

प्रक्रिया एकादशक्षणयुक्ता जायत[181]इति निर्दिष्टम्। तत्रापि निश्चयेन पूर्वसंयोगविनाशात् उत्तरलक्षणोत्पत्तिषु द्रव्यारम्भकसंयोगहेतु: क्रियानिवृतौ उपेक्षणीयं वर्तते,यतो हि क्रियायुक्तेन अन्यत् क्रिया नोत्पाद्यते[182]। अनया रीत्या कुसुमोद्गमकारेण पाकजप्रक्रियाया विश्लेषणं साररूपेण संक्षिप्तशैल्यां विहितम्। न्यायकन्दल्यां प्रतिपादिताया: पाकजप्रक्रियाया: क्षणगणना वोम्मिदेवेन विहिता। नवक्षणा पाकजप्रक्रिया कंदलीकारेण वर्णिता तत्र कुसुमोद्गमकारेण एकादशक्षणाया: प्रक्रियानिर्देश: क्रियते ।

**५.कुसुमोद्गमे संख्यागुणनिरूपणम्-** कुसुमोद्गमकारेण कथ्यते यत् 'संख्यात्वस्याभिसम्बन्धात् संख्या' इत्यनेन रूपादीनां समेषां सार्धं लक्षणं प्रतिपादितम्। संख्यादीनां प्रति दुर्दर्शनाभ्यासात् संख्यानिरूपणं क्रियत इति कंदलीकारेण वर्णितं तत्र कुसुमोद्गमकारेण कथ्यते यत् दुर्दर्शनाभ्यास: सौगतानां वर्तत इति स्पष्टीकृतम्[183]। १.रूपादिभ्यो भिन्ना संख्या इति कुसुमोद्गमकारेणापि कथ्यते। अन्यच्च समुच्चये संख्याविशिष्टद्रव्यस्यैव प्रतीतिर्जायते । एकत्वस्य अनुवृत्तिकारणाद् स्वरूपाभेद: प्रतिवस्तुनियतो विद्यत इति कथ्यते[184]२.पृथिवीत्वादिषु सङ्करप्रसङ्गात् एकत्वादय: सामान्यविशेषा अपि न वर्तन्त इति। एकादिव्यवहारेण गणनामात्रमेव विवक्ष्यते[185]। ३.संख्यायां समुदायस्य स्वरूपासिद्धिकारणात् गणनाहेतो एकस्य एकत्वादि परार्धपर्यन्तं सर्वसंख्यासाधारणत्वं कथ्यत इति कुसुमोद्गमकारेण स्पष्टीक्रियते[186]। **४.अनेकैकत्वबुद्धि:/अपेक्षाबुद्धि:-**अनेकैकत्वगुणविषयिण्या: बुद्ध्या द्वित्वादिकानामुपपति: न क्रियते[187]। अनेकद्रव्यबुद्धौ एकत्वानाम् असमवायिकारणत्वम्;अनैकत्वविषयिण्या बुद्ध्या: निमित्तकारणत्वं वर्तत इति शेष:। एवं प्रकारेण कुसुमोद्गमकारेण अत्र एकत्वानाम् असमवायिकारणत्वं प्रतिपाद्यते। यथा वोम्मिदेव: प्रतिपादयति[188]। ५.द्वित्वस्योत्पत्ति अत्रापि अपेक्षाबुद्धिजन्या एव अङ्गीकृता। अभिव्यञ्जकत्वस्य अनुपपतौ बुद्धिनियमद्वारा अनुविधीयमानत्वात् शब्दं प्रति संयोगवत् अपेक्षाबुद्ध्या द्वित्वस्योत्पत्ति: विधीयत इति कुसुमोद्गमकार:[189] । ६.संख्याया: प्रतीति: 'दण्डीपुरुषवत्' विशिष्टप्रतीति:,अयम् अत्रापि कथित:। अन्यच्च सप्तमस्य अभावस्यापि निर्देशो विहित:[190]अर्थात् विशिष्टस्य उभयेभ्यो व्यतिरेक: अतिरेक: सप्तमोऽभाव: स्यादिति सूच्यते। विशेषणं व्यवच्छेदकमिति प्रतिपाद्यते। एतदनन्तरं वोम्मिदेवेन विशेषणोपलक्षणयो: भेद: उपस्थापित:। उभयो: समानाधिकरण्ये विशेष: तयो वैयधिकरण्याद् जन्यते। अयमेव भावो लिखति

---

[181]तस्यापि पृथक्क्षणाङ्गीकारेणैकादशक्षणा भवन्ति। टी.न्या.कं,पृ. २७४

[182] सोऽपि हि पूर्वसंयोगविनाशादुत्तरसंयोगोत्पत्तौ द्रव्यारम्भकसंयोगविनाशहेतुक्रियानिवृत्तयोपेक्षणीय:, क्रियावति क्रियान्तरानुत्पादात्.अनयोश्च साध्यसाधुत्वविवेको विभागे स्फुटीभविष्यति। ///////////////\\\\\\\\\\\\\\\\\\\\\\\

[183] दुर्दर्शनं सौगतादिमतम्। *टी.न्या.कं.*पृ.२७६

[184] *तत्रैव*.पृ.२७८

[185] एकादिव्यवहार इति च गणनामात्रस्य विवक्षितत्वात् प्रत्येकं भागासिद्धि:। *तत्रैव*,पृ.२७८

[186] *टी.न्या.कं.*पृ.२७८

[187] *तत्रैव*,पृ.२८०

[188] एकत्वानामसमवयिकारणत्वम्, अनेकैकविषयिण्या बुद्धेश्च निमित्तकारणत्वमित्यर्थ:। *तत्रैव*,पृ. २८०

[189] अपेक्षाबुद्धी द्वित्वजननी,अभिव्यञ्जकत्वानुपपत्तौ सत्यां बुद्ध्या नियमेनानुविधीयमानत्वात् शब्दं प्रति संयोगवदिति चापेक्षाबुद्धेर्द्वित्वोत्पादकत्वसिद्धि:। *तत्रैव*,पृ.२८४

[190] विशिष्टस्योभयातिरेकसप्तमोऽभाव: स्यादत आह वैलक्षण्यमिति। *तत्रैव*,पृ.२८६

तद्यथा-**"विशेषणोपलक्षणयो: सामान्याधिकरण्ये वैयधिकरण्याभ्यां विशेष इत्यर्थ:"**[191]। ७.अन्यदपि स्पष्टीकृतं यत् केवलं द्वित्वादयो हि केवलं सामान्यविशिष्टतया प्रतीयन्ते,न तु विशिष्टविशेषणसम्बन्धरूपेण[192] इति। घटत्वस्य द्वित्वघटत्वसामान्येन विशिष्टघटस्य विशिष्टतया द्वित्वं प्रतीयते। द्वित्वादीनां नियतजातीयानामपेक्षाबुद्ध्या सामान्यविशेषत्वं यथा वर्णयते। [193]। ८.अन्यदपि योगजनिताविशेष्यस्य सिद्ध्यर्थम् 'अस्मदादि -द्वारा'इति शब्द: कथ्यते। यथा च विवक्तम्-**"नापि बाह्यैर्घटादिभिर्व्यभिचार:स्यादत उक्तं तद्बुद्धिरहितैरित्यादि; ईश्वरयोग्यापेक्षया योगाविशेष्यासिद्धिपरिहराय अस्मदादिभिरिति। विदितपरमार्थमिति भाव:"**[194] अर्थात् भावोऽयं परमार्थविदितत्वे सति नैतादृशी अपेक्षाप्रवृत्ति:। अत: 'को वै' इत्यनेन अपेक्षाबुद्धिकल्पना न विहिता,अपितु बुभुत्सानुसारेण सत एव प्रतियोगि बोध्यत[195] इति कुसुमोद्गमकारेण व्याख्यायते । ९.अपेक्षाबुद्धिविनाशस्य सद्भावे गण्यमानाया: उत्तरोत्तरसंख्यया पूर्वसंख्याया: अनुपलम्भ: प्रत्यक्षमिद्धमिति कथ्यते। इयमुपलब्धि: कारणान्तरेषु अवर्तमानापि भङ्गविनाश एव गण्यत इति निरूप्यते[196]। १०.द्वित्वादीनां नाशे अन्यविनाशकस्याभावात् निमित्तविनाशस्यापि गुणविनाशकत्वम् अङ्गीक्रियते,इतरथा विनाश: आकस्मिक: स्यात् । अनेन अत्र अतिप्रसङ्गोऽपि न विधीयते यतो हि यथादर्शनं व्यवस्थापनं विहितम्[197]। १२.कारणस्य स्वरूपे कथ्यते यत् नैतदावश्यकं यत् कार्योत्पत्तिपर्यन्तं तस्य सत्त्वं स्यादिति;तत्र कुसुमोद्गमकारेण इतोऽपि स्पष्ट्यते यत् केवलं समवायिकारणं 'परित्यज्य' अयं नावश्यक इति अर्थात् समवायिकारणे कार्योत्पत्तिपर्यन्तं कारणस्यावस्थतिरिति। अस्य कृते तत्र दृष्टान्तो दीयते[198] अर्थात् कार्योत्पत्त्यनुकूलव्यापारोत्पादनं हि कारणस्वरूपमिति दृष्टान्तरेण विश्लेष्यते। १३.द्वित्वत्रित्वादिकार्यविशेषस्य उत्पत्तौ अपेक्षाबुद्धिसहकारित्वभावस्य जन्यत्वमिति कथ्यते[199]। अत्र अपेक्षाबुद्धे: सहकारिभावो बोध्यत इति भावार्थ:। शतसंख्या नवनवत्याधारयुक्ताया: अनेकैकगुणविषयिण्या: स्मृत्यनन्तरभाविनी शततया अनुभवे रूपापेक्षाबुद्ध्या शतसंख्या जन्यते[200]। अविच्छिन्नेन्द्रियसन्निकर्षेषु द्वित्वादिसाम्यमेव वर्तत इति कुसुमोद्गमकारेण भाव: स्पष्टीक्रियते । बहिरिन्द्रियनिरपेक्षमनसा सह कलनात्

---

[191] *तत्रैव*,पृ.२८७

[192] द्वित्वादयो हि केवलसामान्यविशिष्टा: प्रतीयन्ते न तु विशिष्टविशेषणसम्वन्धितया। *तत्रैव*,पृ.२८८

[193] तथा द्वित्वत्रित्वादयो नियतजातीयामेकैकगुणविषयिणीं बुद्धिमनुविधाय प्रतीयमानसामान्यविशिष्टतया गृह्यन्ते, यथा वा दृष्टान्तभूता: सुखादयो नियतजातीयस्रगादिबुद्धिमनुविधायप्रतीयमानसुखत्वादि सामान्यविशि- ष्टा: प्रतीयन्ते। *टी.न्या.कं.*पृ.२८७

[194] *तत्रैव*,पृ.२८८

[195] को वै इति न वयमपेक्षां कल्पनां ब्रूम: वस्तु सत एव प्रतियोगि बुभुत्सानुसारेण प्रतिपिपायिषामिति।तत्रैव,पृ. २८८

[196] अपेक्षाबुद्धिनाशस्य सद्भावे उत्तरोत्तरसंख्याभि: सह पूर्वसंख्यानुपलम्भ: प्रत्यक्षसिद्ध.1 स चानुपलब्धिकारणान्तरेष्वसत्सु भङ्गं विनाशमेव गणयति। *तत्रैव*,पृ.२८९

[197] *तत्रैव*,पृ.२८९

[198] इह विशेषणस्य विशेषज्ञानानुत्पादानुकूलो व्यापार: स्वविषयं ज्ञानमेव कूपस्य खनितु: प्रमादा*[त्]* पति*[त]*ब्राह्मणपरनिमित्ते प्रतिवायाभावस्तु तदुद्देशाभावो द्रष्टव्य.1 टी.न्या.कं.*पृ.* १०

[199] *तत्रैव*,पृ.२९१

[200] विच्छिन्नेन्द्रियसन्निकर्षे एकोनशतसंख्यावत्यनेकैकगणविषयस्मृत्यनन्तरंन्तरभाविन्या शततमानुभवरूपयाऽपेक्षा- बुद्ध्या शतसंख्यया जायते। *तत्रैव*,पृ.२९२

गणनाकरणात् वा संकलनं जायत इत्येवम् एतस्या: सङ्कलनं क्रियत इति तस्य स्वरूपमिति[201]। १४.एकत्वं सामान्यज्ञानं वर्तते। क्षणत: पञ्चमक्षणपर्यन्तम् अपेक्षाबुद्धे: नाश इति कुसुमोद्गमकारेण संक्षेपत: सूच्यते। अवयवे कार्योत्पत्तिदृशा या प्रक्रिया तत्र चतुर्थे क्षणे भवता द्रव्यनाशादपेक्षाबुद्धिनाशस्य समकालमेव द्वित्वस्य नाशो जायत इति संक्षिप्य वर्ण्यते। अयमेव भावो गृहीत्वा वोम्मिदेवेन उच्यते-"**एकत्वसामान्यज्ञानं क्षणमारभ्य पञ्चमे क्षणेऽपेक्षाबुद्धिविनाश:। अवयवे कर्म्मोत्पत्तिक्षणमपि चतुर्थक्षणे भवता द्रव्यनाशेनाऽप्यपेक्षाबुद्धिसमकाल एव द्वित्वविनाश इति प्रक्रियासङ्क्षेपा:**"[202]अर्थात् अत्र वोम्मिदेवेन नाशादिकाल गणना विधीयते। १५.'शब्दवदाकाशम्, इत्यत्र शब्दज्ञानम्,आकाशज्ञानम्, च एतानि ज्ञानानि क्रमश: अत्यन्तशीघ्रतया उत्पद्यन्ते। अतो न तेषां भेद: परिलक्ष्यत इति श्रीधराचार्येण कथ्यते। अत्र अयं पदार्थप्रतीतिपूर्वकात् संसर्गात् अभिहितान्वयवादिनामिव जायत[203]इति कुसुमोद्गमकारेण सूच्यते । १६.ग्राह्यलक्षणायोग चर्चायां विषयनियमस्य अन्यथा अनुपपत्तौ आकारकल्पना करणीयेति। ज्ञानस्य निर्विषयकत्व 'मम माता वन्ध्या' इतिवत् बद्धानां मानसंविद्संवादात् अपेक्षणीयं वर्तते। वाच्यस्योत्पादनं विषयविशेषस्य ज्ञानमुत्पत्त्यर्थं विधीयते। विषयाभावे तज्ज्ञानं निरूपपत्तिकमिति कथ्यते[204] । १७.वैयाकरणिकज्ञानपरिचायकत्वमपि आचार्यस्य दृश्यते। सहोपलम्भनियमे सहशब्दस्य अर्थद्वयं साहाय्यं यौगपद्यं च सूचयते[205]। १७.कारणानां स्वभावकार्योन्मुखीभवनं वर्तते। अयमेव तेषां परिपाक इति कंदलीकारेण यत्प्रतिपादितं तस्य इतोऽपि स्पष्टीकरणार्थम् उक्तं यत् अयमेव बाह्यार्थसिद्धौ प्रत्यक्षं प्रमाणमिति। अनेन प्रकारेण संख्या आचार्येण प्रतिपादिता। कुसुमोद्गमकारेणापि किञ्चिद् वैभिन्यं व्याख्यायां प्रदर्शितम्, परञ्च न मुख्यसिद्धान्ते भेद:। तत्र सारम्-१.संख्याया: एकत्वादिव्यवहारेण गणनामात्रं विवक्ष्यते। २.अनेकद्रव्यबुद्धौ समवाय्यसमवायिकारणानां वर्णनं क्रियते। अनेकद्रव्यबुद्धौ एकत्वानाम् असमवायिकारणत्वम्; अनैकत्वविषयिण्या बुद्ध्या: निमित्तकारणत्वं वर्तते; एवं प्रकारेण कुसुमोद्गमकारेण अत्र एकत्वानाम् असमवायिकारणत्वं प्रतिपाद्यते। संख्यादीनां ज्ञाने अपेक्षाबुद्धि: अस्मदादीनां जायते न तु परमार्थविदितत्वानां यतो हि परमार्थविदितत्वे सति नैतादृशी अपेक्षाप्रवृत्ति: समुत्पद्यते । द्वित्वादीनां नाशे अन्यविनाशकस्याभावात् निमित्तविनाशस्यापि गुणविनाशकत्वम् तत्र अङ्गीक्रियते, इतरथा विनाश: आकस्मिक: स्यात्। क्षणत: पञ्चमक्षणपर्यन्तम् अपेक्षाबुद्धे: नाश इति कुसुमोद्गमकारेण संक्षेपत: सूच्यते । अपेक्षाबुद्धिविनाशस्य सद्भावे गण्यमानाया: पूर्वसंख्यया उत्तरोत्तरसंख्याया: अनुपलम्भ: प्रत्यक्षमिद्धमिति कथ्यते। सहोपलम्भनियमे सहशब्दस्य अर्थद्वयं साहाय्यं यौगपद्यं च सूच्यते। अनेन प्रकारेण कुसुमोद्गमकारेण कंदलीकारप्रतिपादितसर्वे तर्का: चर्चिता: परञ्च किञ्चिद् व्यतिरेकाभावात् पुनरुक्तिर्न कृतेति । विषयाणां पूर्वोत्तरपक्षनिरूपणपूर्वका सूचना स्वशब्दै: स्पष्टीकरणपूर्वका तत्र दीयत इति। विषयनिरूपणे दृष्टान्तवैभिन्यं तथा च 'मम माता वन्ध्या' प्रभृतयो युक्तय: अपि दृश्यन्ते ।

---

201 *तत्रैव*,पृ.२९२

202 *टी.न्या.कं*.पृ. २९४

203 अभिहितान्वयनये पदार्थप्रतीतिपूर्वकत्वात्तत्संसर्गप्रतीते /ए/वमुच्यते। *तत्रैव*,पृ.३००

204 *तत्रैव*,पृ,३१९

205सह शब्दस्येति-साहाय्ये 'सह'शब्दो यथा महानद्या सह कुल्या समुद्रमुपसर्प्पतीति यौगपद्ये सह शब्दे यथा पुत्रेण सह भुङ्कत इति। *तत्रैव*,पृ.३१३

६.**कुसुमोद्गमे परिमाणनिरूपणम्–** पाकजप्रक्रियाया: अनन्तरं कुसुमोद्गमकारेण परिमाणगुणप्रकरणस्य व्याख्या प्रस्तूयते। कुसुमोद्गमकारेण परिमाणनिरूपणे सर्वप्रथमम् आक्षिप्यते यत् मानस्य इयतायां व्यवहारकारणत्वं संख्यागुरुत्वयोरपि विद्यते तर्हि तत्र कथं न अति व्याप्तिरिति? **समाधानम्–** अस्य समाधाने कन्दलीशब्द: "मानव्यवहारकारणम्' इत्युच्यते अर्थात् मानव्यवहारस्य प्रसिद्धिरेव कारणत्वमत्र[206]परिमाणे विधीयते। २.परममहत्परिमाणस्य आदौ वर्णनस्य कारणं प्रत्यक्षं प्रमाणं कथयति तद्यथा- "**कारणवर्त्तितया अणुपरिमाणस्य प्राथम्येऽपि प्रत्यक्षसिद्धतया महत्त्वस्य प्रथमं** व्याख्यानमिति द्रष्टव्यम्"। ३.महत्त्वाद् भिन्नस्य परमशब्दस्य सिद्धौ शास्त्रसिद्धिप्रमाणं स्वीक्रियत इति कंदलीकारात् भिन्नं प्रतिपाद्यते[207] । ४.पारिमाण्डल्यशब्दस्य पङ्कजातिशब्दवत् योगरूढित्वं विद्यत इति कन्दलीमतमेव स्पष्टी क्रियते,परञ्च न तत्र योगरूढित्वस्य निर्देश:। तद्यथा- "**पारिमाण्डल्यशब्दस्य पङ्कजादिशब्दवद्योगरूढितां दर्शयति**"[208]। ५.घटादिकार्ये परिमाणस्य बहुभिराभ्यमाणत्वं कंदलीकारेण कथ्यते तत्र समवायस्य एकार्थसमवायस्य च सम्बन्धनिर्देश: वोम्मिदेवेन क्रियते[209]। ६.अन्यच्च कथ्यते यत् बहुसमवायिकारणै: आरभ्यमाणं परिमाणं बहुत्ववत् जायते,अन्यच्च बहुत्ववत्त्वम् आरम्भकसमवायेन विद्यते वा एकार्थसमवायेन इत्यपि व्याख्येयमिति तत्र निर्दिश्यते अर्थात् अत्र समवायस्य एकार्थसमवायस्य वा निर्देशो वोम्मिदेवेन विहित:। द्वितन्तुकस्य आरम्भकत्वं **बहुत्वारभकत्वयुक्तत्वं कथ्यते[210] अर्थात् अत्र द्वयणुके बहुत्वारम्भकरूपोपाधि: वर्तते। अनेन त्रयणुकात् व्यभिचारो वार्यते,यतो हि द्वयणुकसंयोगित: अधिकसंयोगित्वं तत्र विद्यत इति[211]।** ८.द्वयणुकप्रक्रियायामपेक्षाबुद्धिरूपेण ईश्वरस्य ग्रहणे स्पष्टीकरणं क्रियते यत् द्वयणुकादयो न अस्मदादिग्राह्या:,अत: तेषां अतीन्द्रियसूचनार्थमेव एतदभिहितम्। अन्यच्च ईश्वरबुद्धि: सर्वविषयग्राहिणी विद्यते अत: न केवलं त्रीण्येव एकत्वमपि गृह्यते,तस्य एतस्य प्रमाणत्वं लिखति तद्यथा–"**यद्यपीश्वरबुद्धे सर्वविषयत्वात्रीण्येवैकत्वानि समाहृत्य न विषयीकरोति तथापि द्वयणुकोत्पादकादृष्टसहकारितया त्रित्वोत्पत्यनुकूलापेक्षया बुद्धि: सम्भवत्येवेति भाव:।** "[212]९.त्रित्वस्य उत्पत्ति: द्वयणुकोत्पादकस्य अदृष्टसहकारितया ईश्वरबुद्धि: त्रित्वानुकूलापेक्षाबुद्धिसाहाय्येन जायत इति कथ्यते। [213]अन्यदपि द्वयणुकस्यारम्भकस्य परमाणुद्वयस्य विनाश अदृष्टक्षयादेव जायत इति कन्दलीवदेवोच्यते। तत्र द्वित्वस्य नाशे आश्रयविनाशो न संभाव्यत इति निरूप्यते[214]। १०.प्रचये 'द्रव्यारम्भक' इति विशेष्यं द्रव्यारम्भकरस्य

---

[206] अत्रैव मुख्यो मानव्यवहार: प्रसिद्ध इत्यर्थ.1 *टी.न्या.कं.*पृ.३३०

[207] एवं शास्त्रसिद्धिरित्यर्थ.1 *टी.न्या.कं.*पृ.३३०

[208] टी.न्या.कं पृ.३३१

[209] बहुत्ववत्त्वं च आरम्भकस्य समवायेन वा, एकार्थसमवायेन वा द्रष्टव्यमिति व्याख्येयम्। टी.न्या.क.पृ.३३२

[210] बहुत्ववदारब्धस्योपाधित्वात्-द्वितन्तुकस्य च बहुत्वैकार्थसमवेतारब्धत्वेन बहुत्ववदारब्धत्वात्,बहुत्वे सतीति विशेषणीयो हेतुर्वा। *टी.न्या.कं,*पृ.३३२

[211] त्र्यणुके व्यभिचारपरिहाराय द्वयणुकं व्याप्त्यधिकं व्याप्तितोधिकव्याप्तित्वाकत्वादिति द्वयणुकसंयोग्यधिक- संयोगित्वादित्यर्थ.1 *टी.न्या.कं.*पृ. ३३२

[212] *कुसुम,*पृ.३३४

[213] यद्यपीश्वरबुद्धि*(द्धे:)*सर्वविषयत्वात्रीण्येवैकत्वानि*(स)*माहृत्य न विषयीकरोति तथापि द्वयणुकोत्पादकादृष्टसहकारितया त्रित्वोत्पत्त्यनुकूलापेक्षया बुद्धि: *(स)*म्भवत्येवेति भाव.1 *टी.न्या.क.*पृ. ३३४

[214] *टी.न्या.कं.* पृ ३३४

विद्यत इति सूच्यते। तत्र समवायिकारणाभावाद् परिमाणानाम् अनारम्भकत्वं विद्यत इति। तुलपरिमाणोत्पादने गुणकर्मसु आरब्धेषु प्रचयेषु सापेक्षत्वं विद्यत इति निरूप्यते[215]। ११.अन्यदपि कार्यपरिमाणारम्भे सजातीयस्य उत्कर्षहेतुत्वं तत्र प्रदर्शयति तद्यथा– **"कार्ये परिमाणमारभ्यमाणस्य सजातीयोत्कर्षहेतुतावगम्यते,तथा महदारब्धं महत्तरम्, एवमण्वो -[रा]रब्धमणुतरं भवेदित्यर्थः"**[216] कंदलीकारेणापि इत्थमेव प्रतिपाद्यते। अणुत्वमहत्त्वयोर्व्यवहारे भाक्तत्वं यदुच्यते तत्र भिन्नदृष्टान्तः कुसुमोद्गमकारेण कथ्यत। यथा माणवके सिंहवृहस्पतित्वं परस्परापेक्षं तद्वदेव अणुत्वमहत्त्वव्यवहारस्य भाक्तत्वं विद्यत इति। अन्यच्च नैतेषां स्वाभाविकत्वमपितु काल्पनिकत्वमेव विद्यत इत्यर्थः[217]। परममहत्परिमाणे शास्त्रप्रमाणं कथ्यते। पारिमाण्डल्यम् इति शब्दस्य योगरुढित्वम् इति अर्थो गृह्यते। अन्यच्च अणुत्वमहत्त्वादि यो परिमाणसम्बद्धव्यवहारः सः काल्पनिक इति वोम्मिदेवेन सूच्यत इति सारः। अतः सर्वत्रैव कंदलीकारस्य मतस्य पोषणमेव करोति शिडिलवोम्मिदेवः।

७.**कुसुमोद्गमे पृथक्त्वगुणनिरूपणम्**– पृथक्त्वस्य अवच्छिद्यनिधारणत्वेन पञ्चमीविभक्ते निर्धारणं क्रियते[218]। अत्र 'अन्यारादितर...इत्यादिसूत्रेण पञ्चम्याः निर्देशः क्रियते। यथा च लिखति-**"न च पृथक्त्वादिशब्दानां प्रलयादिशब्दसाम्यम् अत उभयोपसृष्टवाक्यार्थे पदवचनात् इह तु तदभावात्। किञ्च पृथगन्यदित्यादिपदानामितरेतरभावार्थत्वे घटः पटो न भवतीत्यत्रापि 'अन्यारादितर' इति पञ्चमी स्यात्। अन्य इत्यर्थग्रहणादिति भावः"**[219]। २.पृथक्त्वमस्मदादिगम्यं विद्यते अतः तस्य विशेषेऽपि अन्तर्भावो न कर्तुं शक्यते[220]। ३.इह प्रत्ययहेतोरत्र अभावात् पृथक्त्वस्य न समवायसम्बन्धः[221]। एतदनन्तरं पृथक्त्वस्य अन्येभ्योऽपि व्याप्तिःवार्यते । १.पृथक्त्वस्य एकस्मिन्नेव द्रव्ये वृत्तित्वात् सामान्ये,अचलनात्मकत्वात् कर्मणि तथा च निर्गुणत्वात् द्रव्ये न एतस्य व्याप्तिरिति। अतोऽयं परिशेषाद् गुणो वर्तते[222]। २.पृथक्त्वे इतरेतराभावोऽपि न विद्यते। सर्वत्रैव पृथक्-पृथक् इति व्यवहारः पृथक्त्वेन न जायते यतोहि तत्र तस्य स्वरूपस्य अवधिसपक्षत्वं विद्यते[223]। गुणेषु'रूपाद्रसःपृथक्' इत्येतादृशी प्रतीतिः गौणा भाक्ताः वा वर्तते। अवधिसपक्षत्वयुक्तं कथ्यते पृथक्त्वस्य व्यवहारः,अतो रूपादिभिः द्वौ शुक्लौ इत्यादिव्यवहारो न संपद्यत इति। पृथक्त्वे यदि अपरजातिमत्वं स्वीक्रियते तर्हि तस्य द्वित्वादिना सह सङ्कर प्रसङ्गः समापद्यत[224]इति। दिक्पृथक्त्वेन[225]अस्य साक्षादेव प्रयोगः तत्र कुसुमोद्गमकारेण कथ्यते। अन्यथा तत्र जातिसाङ्कर्यप्रसङ्गः

---

215 *तत्रैव*, पृ.३३६

216 *तत्रैव*.पृ.३४०

217 भाक्ते*:* अणुत्वह्रस्वत्वे भिन्नभक्तत्वात् माणवके सिंहवृहस्पतिवत् परस्परापेक्षकृतत्वमिति। ततश्चै*[के]* काला *[वित्य]* न्यतराभावा*[द्]?* उभयाभाव इति न्यायात्र स्वाभाविकत्वं किन्तु काल्पनिक*[त्व]*मित्यर्थः। *टी.न्या. कं.* पृ.३४२

218 अपोद्धारव्यवहारः*:-*अवच्छिद्य निर्धारणं पञ्चम्या निर्धारणमित्यर्थः। *टी.न्या.क.*पृ.३४३

219 *तत्रैव*,पृ,३४३

220 *टी.न्या.कं.*पृ ३४३

221 इहप्रत्ययहेतुत्वाच्च न समवायः। *तत्रैव.*पृ.३४३

222 एकद्रव्यस्यापि संभवात् *[न]* सामान्ये,अचलनात्मकत्वात्र कर्मणि निर्गुणत्वात् द्रव्ये, परिशेषाद् गुणः। *तत्रैव*,पृ.३४३

223 एकपृथक्तस्य ह्याश्रयव्यतिरिक्तं सर्वमेवावधिः,द्विपृथक्त्वादयस्तु पुनरिति *? तत्रैव*,पृ.३४४

224 *तत्रैव*, पृ.३४४

225 अत्र द्विपृथक्त्वमिति भवितुमर्हति। *तत्रैव*, पृ.३४५-३४६

स्यादित्यपि प्रतिपाद्यते। सामान्यात् भिन्नत्वसाधने अन्यद् अपि अवधित्वं हेतुः तत्रोच्यते[226]। अन्यच्च अनुवृत्तिप्रत्ययस्याप्यभावोऽपि विद्यते। अतः पृथक्त्वस्य भेदो सर्वेभ्यो व्यतिरिच्य वर्तत इति वोम्मिदेवेन प्रस्तूयते। अन्ते कथयितुं शक्यते यत् कुसुमोद्गमकारेण पृथक्त्वगुणस्य व्यावृत्ति: अन्यपदार्थेभ्यो गुणेभ्यो च विधीयते। इतोभिन्नं न किञ्चिद् तत्र प्रतिपादित:। गुणेष्वपि अयमस्मात् पृथगिति व्यवहारो गौण:कथित:। अन्यच्च पृथक्त्वमिति व्यवहार: अवधित्वयुक्तं कथ्यते। कन्दलीकारमतस्य स्पष्टीकरणं वोम्मिदेवेन सुष्ठुतया विहितम्। कुत्रापि सिद्धान्तमतस्य उल्लंघनं नावलोक्यते ।

**८.कुसुमोद्गमे संयोगगुणनिरूपणम्–** यद्यपि कुसुमोद्गमकारेण कन्दलीकारेणोपस्थापितविषयाः संक्षिप्तरूपेण चर्च्यन्ते,परञ्च तत्र यत्र कुत्रचिद् वैशिष्ट्यं विद्यते तस्य एव चर्चा करिष्यत इति । १.असत्कारणानामेव उत्पत्तिर्विद्यते, एनं स्वीकृत्य साख्यानां मतखण्डनार्थम् एव कुसुमोद्गमकार: लिखति - **"अस्यैव विपर्ययोऽसत्त्वसाधनं द्रष्टव्यं, प्रयोगस्तु कार्यमुत्पत्तेः प्राक् स्वकारणेष्यसत्,उपलब्धिकारणेषु सत्सु उपलभ्यमानत्वात् भूतलघटादिवदिति"**। [227]खण्डनाअनभिव्यक्तिः किं वर्तत इत्यत्र उक्तं यत् अनभिव्यक्तिः पूर्वमसत् चेत् असत्कारणवाद एव स्वीकर्तव्यो भविष्यतीति प्रतिपादितम्। तत्र एव वोम्मिदेवेन स्पष्टीकृतं यत् तद्व्यतिरिक्त कार्येषु प्रमाणाभावो विद्यत इति। यत्र आकाशकुसुमस्य असत्त्वस्वभाव उक्त: तत्र स्पष्टीक्रियते यत् असदेकस्वभावकारणात् स्वभावस्य प्रतियोगिनो रूपे प्रमाणमसिद्धो विद्यत इति। ३.प्रागभावरूपेण यत्र मन्त्रादीनां सन्निधिमात्रेण कार्योत्पत्तिरूच्यते,तत्र कुसुमोद्गमकारेण 'प्राक्' इति शब्दो विशेषणत्वेन कथ्यते,तेन मन्त्रादिनां निर्विशेषीभाव: सर्पादीनामिव दृश्यत इति[228]। परमार्थतस्तु तत्र कारणस्वरूपस्य अविनाशक एव प्रतिबन्धकरूपेण कथ्यते। अन्यच्च तत्र जातिसंसर्गस्य भावोऽपि कारणम्। अन्यच्च संयोगस्य लक्षणं स्वरूपलक्षणं विद्यत इति । ५.अन्यतरकर्मजे श्येनस्योदाहरणस्वरूपविवेचने आक्षेपोत्थापितं कन्दल्यां यत् श्येनस्य पाद एव क्रिया विद्यत इति तत्र समाधानस्पष्टीकरणे वोम्मिदेवेन कथ्यते यत् चरणवत् श्येनेऽपि क्रिया विद्यते, परञ्च तया संयोगाभावेऽन्तरायो न वर्तत इति निरूप्यते[229]। संयोगजसंयोग एव कथितं यत् गुणेभ्यो गुणान्तरोत्पत्तिः क्रियते, तस्य निराकरणे उक्तं यत् गुणस्य गुणे कारणत्वं विद्यते। तत्रैव स्पष्टीकरणे कुसुमोद्गमकारेण वर्ण्यते यत् परमाणुवृत्तिगुणाभ्यां द्वयणुके कस्यापि गुणस्यानारम्भकत्वात् द्वयणुकस्य निर्गुणत्वप्रसक्ति:जायते अतः अत्र महान् दोषः समुत्पाद्यत[230] इति निरूपितम् । शरीरावयवेषु अन्यविनाशरहिताया: पाकप्रक्रियाविषये कथ्यते यत् तत्र पाकनिक्षिप्तकुम्भतुल्य -तया एव विनाशकारणं संभाव्यत[231] इति प्रतिपाद्यते अर्थात् पटस्य खण्डावयवानामिव तस्य बालकस्य शरीरोत्पत्तौ अवयवानामुपलब्धिर्नजायत इति । आकाशे यद्यपि अवयवात्मकप्रदेशाभावयुक्तत्वं विद्यते तथापि तत्र उपाधिभेदाद् आकाशोऽपि प्रदेशयुक्त इति प्रतीतिर्जायत इति[232]। प्राप्तानां विद्यमानत्वमेव

---

[226] सामान्यं हि विनावधिना निरूप्यते,पृथक्त्वम्सवधिनैव निरूप्यत इति सामान्याद्भिद्येत इत्यर्थ:। *टी.न्या.कं.*पृ. ३४५

[227] *तत्रैव,*पृ.३५२

[228] *तत्रैव,*पृ.३५५

[229] *तत्रैव,*पृ.३५८

[230] *टी.न्या.कं.*पृ.३५९

[231] *तत्रैव,*पृ.३६२

[232] *तत्रैव,*पृ.३६५

युतसिद्धेः व्यापकलक्षणं विद्यत इति प्रतिपाद्यते[233]। अतः कथयितुं शक्यते यत् कुसुमोद्गमकारेण अत्र टीकायाः स्पष्टीकरणमेव बहुलतया क्रियते। अस्मिन् प्रकरणे यत्र कुत्रचिद् किञ्चिद् विशदवर्णनमपि क्रियते। संयोगनाशप्रक्रियायां व्यापकस्य निवृत्या व्याप्यनिवृत्तिर्जायत इति लक्ष्यते। अन्यच्च यत्र एकद्विबहुभ्यां संयोगाभ्यां संयोगनिर्देशश्च तत्र आरभ्य-आरम्भकवादः प्रत्यक्षतया निर्दिश्यते।

**९.कुसुमोद्गमे विभागगुणः–** कुसुमोद्गमकारेण विभागगुणस्य संक्षिप्तैव चर्चा विधीयते । कन्दलीभावं स्वीकुर्वन्नेव कथ्यते यत् कर्मणा संयोगविभागौ न नाश्येते,यतो हि कर्मव्यधि करणे विद्यते। अत्र दृष्टान्तमाध्यमेन कर्मादीनां विभागविनाश्यत्वं वार्यते। हस्ततरोः संयोगस्य विनाशे न स्वकारणविनाशः संभाव्यते,तत्र अङ्गुलिकर्मणाः व्यधिकरणं कथ्यते। अन्यच्च हस्ततरुसंयोगः कर्मजः, अतः अङ्गुलिसंयोगविनाशेन न तस्य नाशो जायते, यतो हि तस्य तत्र अकारणत्वं विद्यत इति[234] अर्थात् अत्र कारणविनाश न समानाधिकरण्येन न विरोधिधर्मेण वा संभवति इति प्रतिपाद्यते । विभागात् पूर्वं संयोगस्य स्थिति निमितत्त्वमात्रं पूर्वकालभाविमात्रेणैव कुसुमोद्गमकारेण कथ्यते परञ्च कन्दल्याम् अवस्थितिमात्रमेव उच्यते [235]। कन्दल्यामुक्तं यत् यस्यां क्रियायाम् अन्वयव्यतिरेकाभ्यां सामर्थ्यं निश्चीयते तयैव विभागः। अयमेव भावः कुसुमोद्गमकारेण सूच्यते[236] । संयोगस्य विभागोत्पत्तौ निमित्तत्वं कन्दलीकारेण साध्यत इति वोम्मिदेवेन सूच्यते। उत्तरदेशसंयोगपर्यन्तमेव विभागस्यावस्थितिः इत्यपि तत्र सूचयति तद्यथा – उत्तरसंयोगपर्यन्तमवतिष्ठमानं तत्प्रतिबन्धकसंयोगविनाशकविभागोत्पत्तेः पूर्वभावितया कर्म्मणो निमित्तकारणमेषितव्यमिति भावः[237]अर्थात् विभागे कर्मणोऽपि निमित्तकारणत्वं विद्यते । एतदनन्तरं कथ्यते वोम्मिदेवेन यत् कर्मणो विभागो असमवायिकारणको न विद्यते अतः तत्र अनुमान प्रयोगं दर्शयति– **"अत्र प्रयोगः विमतो विभागो न कर्मासमवायिकारणकस्तदुत्पत्त्य- नन्तरमनुत्पद्यमानतो सति विभागत्वाद, अत्र यदेवं न तदेवं यथा प्रथमो विभागः।** "[238]तत्र अन्यदपि प्रक्रमप्रकान्तसमाप्तिः सूच्यत इति तत्र कन्दल्यां नास्ति। उत्पलादिदृष्टान्तेन यत्र क्रमानुमानं प्रतिपादितं तत्र वोम्मिदेवेनापि प्रत्यक्षस्य अन्यथासिद्धत्वबाधकत्वमुच्यत इति । तत्र न किञ्चिदपि संयोगजसंयोगव्युत्पादने उत्पन्नमात्रस्यैव प्रतिज्ञानाषु पटस्य वीरणादिद्वारासंयोगः प्रतिपाद्यते। यत्र विभागस्य साध्यसमत्वमाशङ्कितं तत्र आशंकास्पष्टीकरणे कथ्यते यत् अत्र उत्तरसंयोगस्य विनाशकत्वं साध्यं विद्यते अतः सैव हेतुः। आश्रयनाशाद् विभागनाशप्रक्रियायां आरभ्यआरभ्यकवादो तत्र स्पष्टतया सूच्यते तद्यथा लिखितम् -**"आरभ्यारम्भकवादे यथा तन्त्वोः संयोग आरम्भकस्तथा तन्त्वंशुसंयोगोऽपि। ततश्च तत्तद्विभागोऽपि तन्तुविभागवद्**

---

233 *व्यापकं तु लक्षणमप्राप्तयोर्विद्यमानत्वं युतसिद्धिरिति। तद्भेदकथनं तु भाष्यकारीयम्। तत्रैव,*पृ.३६७

234 हस्ततरोर्संयोगविनाशे स्वकारणविनाशः संभवति अङ्गुलिं कर्म च व्यधिकरणं तस्मादङ्गुलिकर्मणा जनितेन हस्तततरुसंयोगो समानाधिकाराणि हस्ततरूसंयोगो विनाशयितव्य.1 न चाङ्गुलि संयोगविनाशे न नाश्यते कर्मजं हस्ततरुसंयोगं प्रति तस्याकारणत्वादिति। *टी.न्या.कं.*पृ.३६०

235 अवस्थितिमात्रमेवेति-निमित्तत्त्वमात्रमित्यर्थ.1 *तत्रैव,*पृ.३७१

236 अयं भाव इह त्वन्वयव्यतिरेकाभ्यां संयोगविनाशस्य कर्म कारणमेषितव्यं तौ च कारणकारणातयाप्युपपद्यमानौ न नियतं कर्मणः संयोगनाशकारणत्वं गमयितुमर्हत.1 *तत्रैव,*पृ.३६९

237 उत्तरसंयोगपर्यन्तमवतिष्ठमानं तत्प्रतिबन्धकसंयोगविनाशकविभागोत्पत्तेः पूर्वभावितया कर्म्म निमित्तकारणमेषितव्यमिति भावः। *तत्रैव,*पृ.३७५

238 *तत्रैव,*पृ.३७५

**द्रव्यारम्भकसंयोगप्रतिद्वन्द्वी भवत्येवेति भावः** "[239]अर्थात् विभागोऽपि तन्तुविभागवद् द्रव्यारम्भकसंयोगस्य प्रतिद्वन्दी विद्यते। अन्यदपि तन्तुसंयोगेन यद्विनाशो विधीयते,सः तन्त्वारम्भकसंयोग विनाश एव कथ्यते[240]। विभागे कर्मणो निमित्तकारणत्वं प्रोच्यते। अतः कथयितुं शक्यते यत् बहुलतया कन्दल्या एवानुसरणं विहितम्। कंदल्या व्याख्याने विशेष आरभ्यारम्भकवादः तथा च व्याप्यस्य निवृत्तिः व्यापकाधारेणैव जायत इति प्रतिपादितम् |

१०. **कुसुमोद्गमे परत्वापरत्वगुणनिरूपणम्:-** कुसुमोद्गमकारेण प्रकरणेऽस्मिन् अतीव संक्षिप्ता टीका प्रस्तूयते। सर्वप्रथमं कथ्यते यत् परत्वापरत्वयोः प्रतीतौ संयुक्तसंयोगस्य अल्पीयस्त्वभूयस्त्वमाध्यमेन न सिद्धसाधनत्वम्,यतो हि उभयोर्मध्ये इतरेतराश्रयत्वमवधित्वमपेक्ष्य एव विद्यते। अन्यच्च तत्रैव वोम्मिदेवेन दिक्कालयोः सर्वोत्पत्तिनिमित्तकारणत्वं सूच्यते। दिक्पिण्डयोः असमवायिकारणाधारकृतविशेषेण दिक्कृतपरत्वापरत्वव्यवहारो भवति इति विशेषरूपेण तत्र प्रतिपाद्यते। यथा च प्रदर्शयति- **"असमवायिकारणाधारकृतो विशेष इत्यर्थः। असमवायिकारणा -धारत्वसाम्येऽपि समवायिकारणनियमः कारणनियमः,कारणस्वभावात्। यथा मनःसंयोगजापि बुद्धिरात्मन्येव न मनसि"**[241]। तत्रोच्यते वोम्मिदेवेन यत् अन्यगुणवत् परत्वापरत्वयोः असमवायिकारणरूपाधारतया दिक् यद्यपि उपाध्यावच्छिन्ना तथापि कारणमिति। तद्यथा लिखितम्-**"अगन्य(न्य) गुणयोरपि परत्वापरत्वयोर - समवायिकारण संयोगाधारतया उपाध्यवच्छिन्ना दिगपि कारणमित्यर्थः"**। [242]परत्वापरत्वयोः दिक्कालप्रत्यायकत्वं विद्यते; परञ्च अत्र आश्रययोः देशावस्थाप्रत्यायकत्वमभीष्टं वर्तत इति[243]। अपेक्षाबुद्धिप्रभृतिभिः परत्वा परत्वनाशप्रक्रियायां वोम्मिदेवेन अत्यल्पा चर्चैव क्रियते। परत्वविनाशप्रक्रिया व्याप्यव्यापकनिवृत्ति माध्यमेन क्रियते[244]। अस्याः व्याप्ते व्यापकत्वस्य निवृत्तौ व्याप्यनिवृत्तिरवश्यंभावित्वात् तत्र संयोगविनाशस्यैव परत्वविनाशकारणत्वं विद्यते यतो हि पूर्वकालभाविरूपेण तत्र अपेक्षाबुद्धिर्न विद्यत इति। अन्यदपि कंदलीप्रोक्तसमवाय्यसमवायिनिमित्तानां परत्वनाशप्रक्रिया अतिरोहार्था एव विद्यत इति कथयति–**"तदेतं समवाय्यसमवायिनिमित्तविनाशानां प्रत्येकं परत्वं चिन्तितम्;द्योर्द्वयो स्त्रयाणां च समुच्चयस्य परत्वविनाशकारणप्रक्रियातिरोहार्थः"**। [245]अनेन प्रकारेण वोम्मिदेवेन परत्वापरत्वयो व्याख्या विहिता इति। इत्थं प्रकारेण कुसुमोद्गमकारेण कालदिशोःअसमवायिकारणत्वं सूचितम्। अन्यच्च परत्वापरत्वनाशप्रक्रियायाः सारभूतं तत्त्वमुच्यते यत् व्याप्तेर्व्यापकनिवृत्तौ व्याप्यस्यनिवृत्तिः अवश्यंभाविनी विद्यत इति। प्रकरणेऽस्मिन् अतीव समस्ता व्याख्या शिडिलवोम्मिदेवेन विहितेति।

---

239 *तत्रैव*,पृ.३९०

240 तन्तुसंयोगे विनाशः तन्त्वारम्भकसंयोगविनाशैत्यर्थः। *तत्रैव*,पृ.३९२

241 *टी.न्या.कं.*पृ.३९४

242 *टी.न्या.कं.* पृ ३९४

243 *तत्रैव*,पृ.३९५

244 यत् परं तद्विप्रकृष्टं*(तद्)* यदपरं तत्सन्निकृष्टमिति व्याप्तेर्व्यापकनिवृत्तौ च व्याप्यनिवृतावश्यंभावित्वादपे- क्षाबुद्धिविनाशस्य च पूर्वकालभाविविरहात् संयोगविनाशस्यैव परत्वविनाशकारणत्वमेषितव्यमिति भावः। *तत्रैव*,पृ.

245 *तत्रैव*,पृ.३९६

१९. **कुसुमोद्गमे बुद्धिप्रकरणम्–** कुसुमोद्गमकारेण बुद्धिप्रकरणस्योपरि संक्षिप्ता टीका विहिता विद्यते। मुख्य-मुख्यविषयाणामेव यत्र कुत्रचिद् स्पष्टीकरणं क्रियते। बुद्धेः यत्र प्रतिविषयनियतत्वं सूचितं तत्र वोम्मिदेवेनापि तत्र अयमेव भावो अवबोध्यते। 'यावन्तोऽर्थभेदाः तावन्त एव बुद्धिभेदा विद्यन्त इति मानसप्रत्यक्षेण सिद्धं विद्यत इति। यथा- **"अर्थभेदा इयन्त",बुद्धिभेदो मानसप्रत्यक्षसिद्ध इत्यर्थः"**[246]। पूर्वम् अविद्याप्रतिपादनस्य प्रयोजनं लिख्यते यत् संसारहेतोः अविद्याया निवृत्त्यर्थमेव शास्त्रविद्या समुत्पाद्यते[247]। अविद्योत्पादनं निवृत्य एव ज्ञानोत्पादनं कर्त्तव्यमिति कथनस्याभिप्रायः सूच्यते । **१.संशयनिरूपणम्-**तर्कस्य अविद्यात्वखण्डने कुसुमोद्गमकारेण कथ्यते यत् कोटिद्वयस्याभावात् नायं संशयः,नापि निर्णयः अनुद्यात्,इति सूच्यते। यथा च उक्तम्- **"न तावदयं संशयः, कोटिद्वयानुल्लेखात्; न च निर्णय एवमेवेत्यनुदयात्। तथात्वे वा प्रमाणान्तरं नोपदिश्येतेति भावः"**[248]अर्थात् नेदं भिन्नं प्रमाणमिति । कुसुमोद्गमकारेण निरूप्यते यत् तर्कस्य उक्तविधासु अन्तर्भावो जायते। ऊहस्य कारणम् अभ्युपगममात्रमेव विद्यत इति हेतुस्वरूपम् अविद्यमानस्य अनिष्टस्य एव ज्ञानं विद्यते। तस्य विपर्ययात् पृथक्त्वमपि सूच्यते अर्थात् आहार्यारोपकारणाद् ऊहो विपर्ययोऽपि न विद्यते। तस्य परिगणनम् अविद्यासु एव वर्तते । अतः पृथक्तया न उपदेष्टव्यमिति निर्दिश्यते[249]। ३.उपकार्योपकारकत्वेन तर्कस्य अन्तर्भावं कथयति- कारणत्वेन तर्कः कथ्यते। प्रमाणानुग्राहक स्य तथा च विवेकाविवेकयो उभयोः कार्यत्वं तर्केण एव संपाद्यत[250] इति वक्ति। विच्छिन्नविपक्षे स्वपक्षजिज्ञासापि[251]तेनैव कार्यत इति। यथा निरूपयति-**"न मया तर्कस्य मुख्यं प्रमाणमुक्तं** किंतूपकार्योपकारकद्योतयोरभेदविवक्षयेति भावः"। ४.संशयज्ञानविषये कन्दल्याम् आशंकितं यत् सामान्यदर्शनमात्रेणैव न संशये तस्य कारणत्वमिति तत्रोच्यते यत् प्रत्ययाकारनिर्देशो नोपपद्यते । तद्वद्स्मरणमात्रपुरोवर्ति-उपलब्धिस्वीकरणे स्थाणुपुरुषयुक्ताः स्मृतयः प्रतिविषयं भिद्यन्ते न वा इति पुनः स्वोदभावनया एव प्रश्नः क्रियते[252] । १.अभिन्नत्वं उभयोर्मध्ये स्वीक्रियते चेत् आदित्यकारोऽपि तत्र स्यात् । २.द्वितीये स्वीकारणे स्थाणुपुरुषौ एव स्यात्। अत अनिष्टमेव तत्रेति । अन्ते कथ्यते यत् स्मृत्यविशेषविषयो जननं क्रमभावेन विद्यत इति निरूप्यते वोम्मिदेवेन[253]। संशयप्रकरणस्यान्ते कथ्यते यत्

---

[246]*टी.न्या.कं.*पृ.४०४

[247] संसारहेतुभूताविद्यानिवृत्तये शास्त्रं विद्यामुत्पादयति तदुत्पादनं च निवर्त्य ज्ञानान्तरमेव कर्त्तव्यमित्यस्यार्थस्य प्रतिपादनं विवक्षितमिति भाव.1 *तत्रैव,*पृ.४०५

[248] *टी.न्या.कं.*पृ.४०५

[249]सत्यमस्त्येव तर्क*:* तस्योक्ता -स्तु विधास्वन्तर्भावं उच्यते इत्यर्थ.1अत्रायं विवेक*:*, ऊहस्य तावत्कारणमभ्युपगम -मात्रसिद्धो हेतुस्वरूपं च भवेदित्येवमविद्यमानस्यानिष्टस्य ज्ञानम्। एवं चाहार्यारोपतया ऊहो न विपर्यय एव स वा *(ह)* *[ऽवि]*द्यासु परिगणित एव। तस्मान्न पृथगुपदेष्टव्य इति स्थिते आचार्यस्तर्क फलस्य प्रमाणानुग्रहय तर्काभेदमनुग्राह्यानुग्राहकयोश्चा- भेदं विवक्षात् प्रमाणेऽन्तर्भावयति किं परपक्षाभावेति *"टी.न्या.कं.*पृ.४०८

[250] प्रमाणानुगहस्तर्कस्य कार्यं न भवति किन्तु विषयविवेक इत्यत अविवेकविषयस्यापीति बाधकप्रमाणेनैव कृतकत्वादिति। तस्यापि तर्ककार्यत्वादनुग्रहं प्रत्यङ्गत्वाच्चेति भाव.1 *तत्रैव,*पृ.४१०

[251] विच्छिन्नविपक्षे *(छ)* स्वस्य स्वपक्षजिज्ञासैव प्रमाणमनुगृह्णातीत्यर्थ*.*1 *तत्रैव,*पृ.४१०

[252] *टी.न्या.कं.*पृ.४१३

[253]अन्यथा तद्भयानार्थं विशेषजिज्ञासानुपपत्ते*:* स्मृत्योर्विशेषविषययो*:* क्रमेणोत्पत्तिं मन्यमानस्य चोद्यं सामान्यं दृष्टवेति। *तत्रैव,*पृ.४१३

सम्पूर्णोऽपि संशयः समानधर्मस्यैवोपपत्तिर्विद्यत इति मत्वा तत्र भेदद्वयं यत् प्रदर्श्यते[254]। तस्य सत्त्वम् अन्तर्गणिकभेदेन एव विद्यते[255]। संशयनाम्नी अविद्या एका एव विद्यत इत्यभिप्रायेण भाष्यकारेण तस्या द्वैविध्यं प्रतिपादितम् इति वोम्मिदेवेन सूच्यते। अनेन प्रकारेण तत्र संशयवर्णनमभिहितमिति। तर्कप्रसङ्गस्य च प्रमाणे उपकारकतया अन्तर्भावो विहित:। अर्थभेदात् बुद्धिभेद: मानसप्रत्यक्षविषय इति सूच्यते । **२.कुसुमोद्गमे विपर्ययनिरूपणम्**-कुसुमोद्गमकारेण अपि प्रकरणेऽस्मिन् व्यस्तं व्याख्यानं विधीयते। तत्रोच्यते यत् विपर्ययत्वेन यदारोप: स विशेषप्रतीत्यनन्तरमेव विद्यते अन्यथा नारि केलद्वीपवासिनाम् अङ्गारस्याप्रतीतौ विपर्ययस्य अनुपपत्ति: स्यादिति प्रतिपाद्यति-**"आरोपविषयस्य विशेषप्रतीतिर(नन्तरमेव) तन्त्रमेव इतरथा नारिकेकलद्वीपवासिनोऽङ्गारा प्रतीतौ कुत्रचिद् विपर्ययानुपपत्तिप्रसङ्गात्"**[256]। अन्यदपि आरोप्यप्रसिद्धे विपर्यय:, तद्विषयकेन संस्कारेण एव जन्यते बोध्यते च । यत्र गोप्रतीतिमध्ये अश्वप्रतीति: कंदल्यां कथ्यते,तत्रोच्यते यत् धर्मधर्मिणो: भेदे दोषस्य शक्तिवैचित्र्यसन्निहितेष्वपि तेन कस्यापि ग्रहणं प्रतिबद्ध्यत इति प्रतिपाद्यते। दोषस्य विपरीतकार्यजननं प्रति सामर्थ्यं विद्यते। तत्रकथयति- **"अनधिकरण - मिन्द्रियसम्बन्धा नधिकरणम्"**[257] अर्थात् अनधिकरणे अधिकरणप्रतीति: विपर्ययज्ञानाद् जायते । 'अतस्मिन् तद्बुद्धि' इति रूपेण विपर्ययज्ञानं कंदल्यां यत्र बोध्यते तत्र कथ्यते यत् यद्यपि नात्र विपर्यय:, तथापि अधिष्ठानं संस्कारवत् तदुबोधकसादृश्यं नापेक्ष्यते, यदि एवं स्यात् तर्हि 'अतस्मिन् तद्' इति लक्षणे व्याघातप्रसङ्ग: स्यादिति निरूप्यते[258] । अनुमानसम्बद्धदृष्टान्ते कामिजनस्य वनस्पत्तिप्रभृतावपि कामिनी-प्रतीतिसम्बन्धे कंदल्याम् उक्तं यत् इयं विपर्ययप्रतीति: निरधिष्ठाना विद्यते परञ्च कुसुमोद्गमकारेण आलोकमण्डलं तत्र अधिष्ठानत्वेन कथ्यते। तत्र नूतनमुद्भावं सूच्यते यत् कामादिदोषाणामिदं माहात्म्यं यत् पदार्थत्वादिद्वारा तत्र सादृश्यबाहुल्योत्पत्तिकारणात् तत्र संस्काराणाम् उद्बोधनार्थे जिज्ञासा क्रियते। अत्र विपर्ययस्य अनुमानत्वं कथ्यते। अयं संस्काराधारेण जन्यत इति। शङ्खादौ या पीतिमा तत्र धवलताया: अगृह्यमाणसम्बन्धत्वेन एव सादृश्यसंस्कारस्य अवबोध: क्रियत इति । तत्रेदमपि सूच्यते यत् इयमेव परीक्षकमर्यादेति[259] अर्थात् पित्तदोषकारणाद् श्वेतवर्णे पीतवर्णस्य प्रतीतिर्वर्तते । अन्यदपि तत्र स्पष्टीकरणं क्रियते यत् आचार्येण या: निरधिष्ठाना: वाचो युक्तयो दीयन्ते ते लौकिकप्रतीतिमाधारीकृत्य एव विद्यन्त इति प्रतिपाद्यते। प्रत्यक्षानुमानाधारितमेव विपर्ययम्, भाष्यकारवत् लौकिकप्रतीतिरपि स्वीकर्तुं शक्यते[260]

---

[254]सर्वोऽपि संशय एकविध एवेत्यभिप्रायेण द्वैविध्यं प्रदर्शितं भाष्यकृतेति भाव: । *तत्रैव*,पृ.४१४

[255]"सर्वोऽपि संशय: समानधर्मोपपत्तेरेव तत्र यथाऽन्तर्बहिरित्यान्तर्गणिको भेद: समानधर्म्मननुरुद्ध्यैव तद्वदन्योऽपि पराभिमतो भेद.समानधर्ममनुरुद्ध्यैव। न तु तत्प्रतिरोधेन तत्र तावदनेकान्यग्रैर्निरूपयिष्यते*(न्म)*। विप्रतिपत्तिस्तु परस्परोपमर्देन प्रतिपत्तितद्विषयत्वं हि इ*[न्द्रि]*यभौतिकवयो: समानो धर्म.। *टी.न्या.कं.*पृ. ४१४

[256] *टी.न्या.कं.*पृ. ४१७

[257] *तत्रैव*,पृ.४१८

[258] *तत्रैव*,पृ.४१८-४१९

[259] "पीत: शङ्ख इत्यत्रापि संसर्गारोपे अगृह्यमाणे नयनरश्मिवर्त्तिनि पित्ते वर्तमानस्य गृह्यमाणस्य पीतिम्न-स्तेनैवाभिभूतधवलिम्न: शङ्खस्य च केवलस्य गृह्यमाणस्य संसृष्टाभ्यां विरिविल्पपीतिमभ्यामगृह्यमाणा- सम्बन्धत्वमेव सादृश्यं संस्कारमुद्बोधयतीति परीक्षकमर्यादा। *टी.न्या.कं.*पृ.४१९

[260] तथापि लौकिकप्रसिद्धिमनुसृत्य निरधिष्ठानवाचायुक्तिराचार्येण कृतेत्यविरोध.। *तत्रैव*,पृ.४१९

भावोऽयं यत् विपर्ययज्ञानं प्रत्यक्षानुमानयो आधारेणैव वर्तते। निर्मेघाकाशे नीलिमाया: आरोप: प्रत्यक्षत्वेन सर्वजनप्रसिद्धो विद्यते[261] । अत: तत्र प्रत्यक्षप्रमाणम् । नीरूपरहितत्वात् आकाशस्य न प्रत्यक्षत्वम्, तत्रालोकसहकृतचक्षुषा न अप्रत्यक्षधर्मिणि नीलरूपस्यानुपपत्ति: स्यादिति संभावनापि उदाहरणेनैव निवार्यते[262] । तत्र प्रत्यक्षविषयत्वस्य आरोपो विधीयत इति प्रतिपाद्यते। **गतिमदप्रतिबन्धादिसादृश्यत्वद्वारा** प्रत्यक्षीभूतगगने नीलिमाया: आरोपोऽवलोक्यते[263]। अतीन्द्रियत्वेऽपि ऐन्द्रियकत्वं समारोप्यते तत्तु येन केनचिद् सादृश्येन योज्यते। तत्र दृष्टान्तोऽयं दृश्यते देवदत्तोऽयं विद्वान् इति। इदमुदाहरणं सादृश्याधारेण विहितस्य विपर्ययस्य वर्तत इति । हेतुप्रक्रमेण अनुमितिप्रसङ्गे हेत्वाभासो विपर्यय एव।[264]अन्यदपि हितेऽपि न वर्तते हितमिति[265] विपर्यये कथ्यते यत् अत्र लिङ्गे लिङ्गस्याभासो विद्यत इति निरूप्यते । इदं रजतमिति प्रतीति: भेदग्रहणाभावं विना न संभाव्यते। यथा च व्याख्यायति-**"यथा भेदाग्रहणादिदं रजतमित्यस्य व्यवहारस्य प्रसक्ति:, एवमभेदस्याप्यग्रहणान्नेदं रजतमिति व्यवहारोऽयं सिद्ध एव"**। [266] वोम्मिदेवेन विशदत्वं प्रतिपादयते यत् औत्सर्गिककार्यनिबन्धने अन्यकार्यजनकत्वात् दोषाणां न गुणत्वमिति विलिख्यते यतो हि अतिशयौत्सर्गिककार्यकारणं गुणानां स्वभावो वर्तत इति भाव: कथ्यते[267]। द्विचन्द्रादिविषयिणि या आपति:तत्र अनिर्वचनीयख्यातिवादो विद्यत इति सूच्यते[268]। अलौकिकवस्तुभिर्न कार्योत्पत्तिव्यवहार इति कंदल्यां यदुक्तं तत्र विस्तृतस्पष्टीकरणं कुसुमोद्गमकारेण क्रियते। अत्रालौकिक इति असहनीयविचारमिति[269]। असत्ख्यातिस्वीकर्तृभि: स्वाकारात् बहिर्ज्योतिरपि निरस्यते। असत: स्वीकारे विद्यमानासत: आकाररूपपरिस्फुरणे प्रवृत्त्यनुपपत्ति: कथ्यते। अन्यच्च सत्ताया: बहिरूपेण परिस्फुरणेऽपि अन्यथाख्याते: तत्र आपत्ति: स्यादिति सूच्यते[270]। एवं प्रकारेण संक्षिप्तरूपेण प्रतिपाद्यते विपर्यय इति वोम्मिदेवेन अत्र सारगर्भितं व्याख्यानं प्रस्तुतम्। आरोप्यप्रसिद्धे: विपर्यय:, तद्विषयकेन संस्कारेण एव जन्यते। प्रत्यक्षानुमानाधारितमेव विपर्यय:,अत: कुत्रचित् उभयभिन्नविपर्ययसंभावना न स्यादिति निवारणार्थं विपर्ययस्योदाहरणं तत्र निर्दिश्यते। अन्यच्च तत्र भाष्यकारवत् लौकिकप्रतीतिरपि स्वीकर्तुं शक्यते। प्रकरणस्य अन्ते अनिर्वचनीयाख्यातिप्रभृतीनां निरास: क्रियते। अनुमितौ हेत्वाभासोऽपि विपर्ययो वर्तते। श्रीधरप्रतिपादितसमग्राणां बिन्दूनामुपरि वोम्मिदेवेन चर्चा विहिता।

---

261 इहैव हि संभाव्यते निर्मेघे व्योम्नि नीलारोपस्तावत् सर्वजनप्रसिद्धो नापह्नवमर्हति। *तत्रैव*,पृ.४२०

262 *तत्रैव*,पृ.४२०

263 सेयं संभावनाऽनेनोदाहरणान्तरेण निवर्त्यते, आरोपितप्रत्यक्षविषयत्वोपपादनात्। तथा ह्यलोकमण्डले गतिमद- प्रतिबन्धादिना सादृश्येनारोपिते अत एव प्रत्यक्षीभूते गगने नीलिमारो*[पो]* दृष्टो ह्यतीन्द्रियस्याप्यैन्द्रियकतया समारोपो येन केनचित्सादृश्येन यथा देवदत्तोऽयं विद्वानिति। *तत्रैव*,पृ.४२०

264 *तत्रैव*,पृ. ४२१

265 लिङ्गाभासभ्रमकृतो हितेऽहितत्व इत्यर्थ.। *तत्रैव*,पृ.४२२

266 *तत्रैव*,पृ.४२५

267 औत्सर्गिककार्यप्रतिबन्धने कार्यान्तरजनकत्वेन दोषाणां न गुणत्वं, गुणनामौत्सर्गिककार्यातिशयकारणत्वादिति भाव.। *तत्रैव*,पृ.४२६

268 अनिर्वचनीयख्यातिवादिनमुत्थाप्य दूषयति। *तत्रैव*,पृ.४२६

269 इहालौकिकं नाम विचारासहमुच्यते,तस्य तथैव प्रतीतौ प्रवृत्त्यनुपपत्ति.। *तत्रैव*,पृ.४२६

270 असत*:* स्वाकारस्थ चऽसत्तया स्वाकारतया च परिस्फुरणे प्रवृत्त्यनुपपत्ते.। *तत्रैव*,पृ.४२६

३.**कुसुमोद्गमेऽनध्यवसायनिरूपणम्-** कुसुमोद्गमकारेणापि भाष्यस्य व्याख्यायां प्रयुक्तानां शब्दानां प्रयोगस्य प्रयोजनं स्पष्टीक्रियते। 'अनवधारितविशेषणम्' इत्यनेन अस्य अनध्यवसाय स्य अनिश्चयात्मकं ज्ञानत्वं सूच्यते[271]तेन तत्र निश्चयात् अपि संशयव्यतिरेकोऽवगम्यत इति। वाहीकस्योदाहरणेन वाहीकस्य पनसस्य अज्ञानात् अध्यवसायेच्छा 'अनध्यवसाय:' इति कंदलीकारेण प्रतिपाद्यते तत्र वोम्मिदेवेन दक्षदेशे पनसस्याप्रसिद्धत्वं सूच्यते। तत्र अन्यदपि स्पष्टीकरणं दीयते यत् तत्र विशेषसंज्ञानिश्चयो न जात[272]अर्थात् अत्र विशेषविवक्षा वर्तत इति। सास्नादर्शनात् 'गौ' अनुमानविषयको यदध्यवसाय:,तस्मिन् विषये कथयति यत् अवयववि -क्रियाया:अनुमानविषयकमुदाहरणं स्पष्टीकरोति **तद्यथा-"चेष्टाविशेषेण प्राण्यवयवत्वमनुमाया- वयविनमनुमाय तस्यैवावयवस्य पूर्वप्रसिद्धप्रामाण्यसम्बन्धितया 'को नु खल्वयं प्राणी'त्यनध्यवसाय: करोतीत्यर्थ[273]:**"भावोऽयं यत् अवयवक्रियानुमानाद् पूर्वप्रसिद्धावयविनो विषये को नु अयं प्राणीरिति अनध्यवसायो जायते। अनध्यवसायस्य हानादि व्यवहारेऽङ्गत्वं विद्यते यतो हि अविद्येयमिति। सामान्यज्ञानस्य विशेषजिज्ञासामात्रमेव न अनध्यवसाय:,यतो हि इच्छाज्ञानपूर्वकत्व -व्यवहारोऽपि तस्य कथ्यत इति कुसुमोद्गमकारेणोच्यते यथा लिखति-**"न तु ज्ञान -सामान्यस्य विशेषजिज्ञासामात्रमनध्यवसाय: इच्छाया: स्वविषयज्ञानपूर्वकमितिन्य मादिति"।** [274] हानादिव्यवहार: अनध्यवसायमाध्यमेन न जायते यतो हि अविद्या एव वर्तते। सामान्यस्य विशेषज्ञानमात्रिणी इच्छा एव न अनध्यवसाय इति स्पष्टीकृतम्। अनेन प्रकारेण कुसुमोद्गमकारेण तत्र संक्षिप्य व्याख्यानं प्रतिपादितमिति क

४.**कुसुमोद्गमे स्वप्ननिरूपणम्-**स्वप्नप्रकरणे कुसुमोद्गमकारेण सारगर्भिता टीका प्रस्तूयते। लक्षणे 'उपरतेन्द्रियस्य'इति शब्दस्य स्पष्टीकरणे कथ्यते यत् अनेन विद्याविपर्ययसंशया -नध्यवसायानां च व्यवच्छेद:,'अनुभव'इत्यनेन स्मृते:व्यवच्छेद:[275]क्रियते। अन्यच्च प्रलीनमनस्के परमहेतुत्वेन इन्द्रियव्यापारोऽङ्गीक्रियते वोम्मिदेवेन[276]इति। इन्द्रियद्वारेण स्वप्नज्ञानस्यापि अयथार्थत्वं विद्यते[277],अत:अविद्या एव कथ्यते। 'निशिविश्रामार्थम्' इत्यत्र निशिशब्द: शयनस्य उपलक्षणं वर्तते[278]। प्राणापानादिवायुसञ्चारादिक्रिया आहारपरिणामार्थे तथा च जठराग्ने: उर्ध्वज्वलनप्रतिपादितकरणार्थं प्रतिपाद्यत इति कथ्यते[279]। 'पूर्वानुभूतम्' इत्यनेन असद्वस्तूनां शशश्रृङ्गादीनां व्यभिचारो वार्यत इति सूच्यते[280]। धातुदोषविशेषात् स्वप्ने यत्स्वरूपज्ञानं तस्मिन् 'आगम:' प्रमाणत्वेन कथ्यते,यथा च उक्तं-

---

271 अत्र चानवधारितपदेन निश्चयाद् व्यावृत्ति.1 *टी.न्या.कं.*पृ.४२७

272 विशेषसंज्ञानिश्चयो न भवतीत्यर्थ.1 *टी.न्या.कं.*पृ. ४२७

273 *तत्रैव*,पृ.४२८

274 *तत्रैव*,पृ.४८

275 *टी.न्या.कं.*पृ. ४२९

276 प्रलीनमनस्कस्येन्द्रियव्यापारो परमहेतु.1 *तत्रैव*,पृ.४२९

277 *तत्रैव*,पृ.४२९

278 निशीति शयनोपलक्षणम्। *तत्रैव*,पृ.४३०

279 प्राणापानप्रवृत्तिप्रतिपादनं च आहारस्य रसादिपरिणामायजाठरस्याग्नेरूर्ध्वज्वलनं प्रतिपादयितुम्। *तत्रैव*,पृ.४३०

280 *टी.न्या.कं.*पृ.४३०

**"दोषविशेषस्य स्वप्नविशेषहेतुत्वमागमसिद्धं द्रष्टव्यम्"**[281]। धातुदोषयुक्तस्वप्नज्ञाने आगमप्रमाणं वोम्मिदेवेन कंदलीकारात् भिन्नं स्वीक्रियते। अन्यत् सर्वं टीकाया: यत्र कुत्रचिद् स्पष्टीकरणमेव वर्तते।

**कुसुमोद्गमे प्रत्यक्षा विद्या–** प्रमाणस्य प्रथमनिर्देशविषये कुसुमोद्गमकारेण स्पष्टीक्रियते यत् प्रत्यक्षस्य प्रथमरूपेणाभिधानं तस्य निरपेक्षत्वकारणात् विद्यते[282]२.अक्षमक्ष प्रति इति वीप्साप्रयोगः अव्ययीभावस्य शंकया तथा च स्त्रीलिङ्गस्य अनुपपतिप्रसङ्गकारणात् विद्यते। एतस्मादेव कारणात् 'प्रत्यक्षः प्रत्ययः', 'प्रत्यक्षाबुद्धिरिति प्रयोगाः तत्र क्रियन्त इति[283] ३.यत्र कन्दलीकारेण इन्द्रियसम्बन्धस्य प्रत्यक्षे प्रामाण्यभावः पूर्वपक्षशंकाकाले उच्यते, तस्यैव स्पष्टीकरणं कुसुमोद्गमकारेण क्रियते यत् सत्यमेतत् यत् उक्तलक्षणेन इन्द्रिय -सम्बन्धे प्रामाण्यलाभो किन्तु प्रमितेः कारणत्वात् इन्द्रियसम्बन्धस्यापि प्रमाणे कारणत्वं इति कथ्यते[284]। ४.'इन्द्रियलक्षण'इति कथनेन वागिन्द्रियस्य व्यावृतिः जायते यतो हि वाक् शरीरसंयुक्तासाक्षात्कारे साहाय्यरूपेण विद्यते अतो न तस्यां व्याप्तिः[285]। ५.अहंकारविशेषविकारमेव, तत्र अहंकारप्रमायां प्रमाणा -भावात् न तस्य इन्द्रियलक्षणत्वम् इति वोम्मिदेवेन स्पष्टतया उच्यते[286]। इन्द्रियाणां न्यूनसंख्यासाधनव्युदासो जायत इत्यपि कुसुमोद्गमकारेण तत्र सूच्यते। मनसः षष्ठतम-इन्द्रियत्वेन स्मृतिजन्यत्वरूपेण निर्देशो विधीयते[287]। अनेन पञ्चेन्द्रियस्वीकर्त्रिणां बौद्धानामपि खण्डनं जायते। प्रत्यक्षे यत्र धर्माधर्मदिक्कालजन्यत्वम् अङ्गीक्रियते तत्र आलोकस्य मनसः चापि संग्रहो करणीयः इति कंदलीकारतो भिन्नं योज्यते अर्थात् धर्माधर्मदिक्कालमनसाम् आलोकस्य च तत्र प्रत्यक्षे साधारणकारत्वं विद्यते[288]। ५.चतुष्टयसन्निकर्षः संयोगो विद्यते,अतः तत्र समवायादीनां सन्निकर्षाणां अपि कारणत्वमविरुद्धमेव। यथा वक्ति-**"चतुष्टयसन्निकर्ष: संयोग: तस्मात्संयुक्तसमवायादीनां सन्निकर्षान्तराणां कारणत्वमविरुद्धमेव।** अनुव्यवसायेन एव निश्चीयते यत् अयं रूपज्ञानं रसज्ञानमिति। यो न येन युक्तः,सः तेन न नियम्यते तत्र तु सामानाधिकरणप्रतीतिमाध्यमेन एव प्रथितत्वं जन्यते। यथा गौ न अश्वः इति प्रतीतिः। तत्र नामजात्य -धारेण विषयाणां स्फुरणं जायत इति कथ्यते[289]। अस्य समाधाने कथ्यते यत् अनुव्यवसायाभावेऽपि संस्कारोद्बो -धकरूपेण निर्विकल्पकज्ञानमनुमेयं वर्तते। यथा च व्याख्यायति- **"अनुव्यवसायाभावेऽपि नामधेयस्मृतिहेतु -संस्कारोद्बोधेन कार्येण निर्विकल्पकमनुमेयमिति भाव:"**[290]। निर्विकल्पकज्ञानेन एकस्या व्यक्तेः ग्रहणं कृत्वा अपरव्यक्तेः सविकल्पेन ग्रहणं कुर्वन् तत्र

---

281 *तत्रैव*,पृ.४३१

282 आदौ प्रत्यक्षस्येति-प्रमाणान्तरनैरपेक्ष्यादिति शेष:। *टी.न्या.कं.* पृ.४३३

283 *तत्रैव*, पृ.४३३

284 *तत्रैव*, पृ.४३४

285 इन्द्रियलक्षणपर्यालोचनया च वागादीनामनिन्द्रियत्वम्। तच्च शरीरसंयुक्तमतीन्द्रियं साक्षात्कारत्वप्रतीति- साधनमिति। *तत्रैव*, पृ.४३५

286 न चाहंकारविकार इन्द्रियमिति लक्षणम्; अङ्कारादिप्रमायां प्रमाणाभावात्। *तत्रैव*, पृ.४३५

287 *तत्रैव*, पृ.४३५

288 आलोके मन: समाधौ च सति प्रत्ययस्य भावात्तयोरपि सङ्ग्रह इति भाव:। *तत्रैव*, पृ.४३६

289 ततश्च सर्वदा सर्वय नामजात्याद्युल्लेखेनैव विषया: स्फुरन्तीति न कदाचिन्निर्विकल्पकं सम्भवतीति। *तत्रैव*, पृ.४३८

290 *तत्रैव*, पृ.४३८

समानजातीय एव प्रतिसंधीयत इति प्रतिपाद्यते । एतद् प्रतिसंधानं केवलं निर्विकल्पकज्ञान एव सङ्गतमिति कथ्यते । उभयग्रहणं तु सविकल्पके भवतीति निरूप्यते । निर्वि -कल्पकसविकल्पकयो: वैशिष्ट्यानवगाहि अवगाहिरूपेण तत्र वर्णनं कन्दल्या अनुसारमेव क्रियते उक्तं च-**"व्यक्त्यन्तरं सविकल्पकेन गृह्णन् प्रतिसन्धत्ते तज्जातीयमिति । तदिदं प्रतिसन्धानं पूर्वं निर्विकल्पकेन सामान्यग्रहणेन सङ्गच्छेतेति भाव: । यद्युभयं गृह्णाति तर्हि सविकल्पकात्कोऽस्य विशेष इत्यत आह-यदि परमिति"**[291]। सविकल्पकज्ञानेन प्रमाणान्तरेभ्यो सर्वथाज्ञातविषय एव अवबोध्यते । अन्यच्च सविकल्पक -ज्ञानस्य विषये प्रमाणमप्युपस्थाप्यते-यथा-**"तदयं प्रमाणार्थ:- निर्विकल्पकं विशेषणविशेष्यभावं नावगाहते अननुसंहितपिण्डान्तरस्य जायमानत्वात्, यत्पुनर्विशेषणविशेष्यावगाहि तदनुसंहितपिण्डन्तरस्यैव भवति यथा सविकल्पकमिति व्यतिरेकी"**[292]। शब्दजन्यत्वविषयिणी या चर्चा कन्दलीकारेण क्रियते तत्र कुसुमो - द्गमकारेण कथ्यते यत् जात्यादीनाम् अर्थत्वम् अस्माभिरपि स्वीक्रियते[293] । इन्द्रियसन्निकर्षस्य कारणत्वम् इन्द्रियार्थजन्यत्वेन स्वीक्रियते । कुसुमोद्गमकारेणापि शब्दसंयोजनात्मिकाकल्पना सविकल्पकस्य कथ्यते । प्रथमेन्द्रियसन्निपातेन उपाधिवासनायाः परिपाकेन एव विशिष्टज्ञानं कल्प्यते[294] । अत्र 'वासना – परिपाकविशेषः 'इति कन्दलीतः पृथग्रूपेण उक्तम् इति । अनेकद्रव्येषु समवेतानां रूपादीनां प्रत्यक्षे कारणत्वं तथा च 'द्वयणुकरूपस्य' प्रत्यक्षत्वं निराक्रियते[295] । अन्यच्च कथ्यते यत् संख्यादीनां कर्मपर्यन्तं ग्रहणं चक्षुस्पर्शाभ्यां क्रियते । कुसुमोद्गमकारःतत्र तद्धर्माणां सहायम् इत्यपि योजयति तद्यथा-**"अत्र यद्यनुमितं कर्म चलतीति प्रत्ययस्य विषय: तर्हि देशाद्देशान्तरप्राप्त्यानुमितेन कर्मणा सवितर्यपि चलतीति प्रत्यय:स्यात् । अथ तत्र गगनदेशान्तरस्याप्रत्यक्षतया तत्प्राप्तिरप्रत्यक्षा तर्हि नभसि सञ्चरति खद्योतेऽपि चलतीति प्रत्ययो न स्यात्। स्वप्रभावयवसंयोगविभागाभ्यां कर्मानुमानं सवितर्यपि समानं, नुद्यनोदकयोरिव प्रभा - प्रभावतो:संयोगविभागौ न प्रतीयेते इति चेत्,न तत्र द्रव्यस्याविनष्टस्याचलचक्षुषोपलब्धस्यानुपलम्भेन देशान्तरप्राप्तिमनुमाय चलतीति प्रत्यय: सवितर्यपि न स्यादित्यतिप्रसङ्गस्य प्रद्योतनाय धर्मं प्रचिनोति तद्धर्मसहायस्तमर्थं प्रद्योतयतीत्यन्वय:"**[296] । अनेन प्रकारेण कथयितुं शक्यते यत् शिडिलवोम्मिदेवेन न केवलं व्याख्यानमात्रं विहितमपितु कंदलीकारतो भिन्ना अपि चर्चा तत्र प्रस्तूयते ।

**१.योगजप्रत्यक्ष:-**१.योगिप्रत्यक्षे कुसुमोद्गमकारेण सर्वप्रथमं संप्रज्ञातयोगे कथ्यते यत् धारकप्रयत्नेन आत्मनो विशेषप्रदेशे नियोजितमनसः तत्त्वज्ञानेच्छायुक्तात्मनः परस्परसंयोग एव कथ्यते । २.द्वितीयेऽसंप्रज्ञातयोगे अभिलाषारहितमनसः अविचार्यमेव द्रव्येण सह संयोगः असंप्रज्ञातयोगनाम्ना कथ्यते । संप्रज्ञातयोगदशायां तादृशस्य योगजधर्मस्याभावे मलस्यावरणं न प्रक्षीयते[297] । तत्र योगजधर्मानुगृहीतावरणप्रक्षय -माध्यमेन प्रत्यक्षे युक्तमनसः अपि सहकारिभावः कथ्यते । योगिजनैरेव अहंकारः, ममकार इति प्रतीतिभ्यो विनिर्मुक्तस्य अभ्यासस्य अतिशयाधायाकतया आत्मनः साक्षात्कारं

---

291 *टी.न्या.कं,* पृ.४३९

292 *तत्रैव,* पृ.४३९

293 *तत्रैव.* पृ.४४४

294 *तत्रैव,* पृ.५४०

295 बहुवचनेन द्वयणुकरूपस्य प्रत्यक्षत्वं निवारयति। उद्भवसमाख्यातोऽपि स्वगतो विशेषो द्रष्टव्य:। *तत्रैव,* पृ,४५१

296 *तत्रैव,* पृ.४५३-४५४

297 सम्प्रज्ञातयोगदशायां तादृशधर्मस्याभावान्न मलावरणप्रक्षय इत्यर्थ:। *तत्रैव.* पृ .४५५

क्रियते[298] । ज्ञानस्योत्कर्षविश्रामः तु साक्षात्कारेण एव क्रियते यतो हि उत्कर्षपारम्पर्यमपि कुत्रचिद् समाप्यत इति प्रतिपादितम्[299] यथा- "अस्त्वभ्यासस्यातिशयाधायकत्वं सोऽतिशयः साक्षात्काररूप इति कुतोऽपसितमित्यत आह्" यत्रोत्कर्षसमाप्तिः सैव साक्षात्कार इत्यभिधीयते[300] । योगिजना अपि प्राणिनः,अतो न तेषां इन्द्रियातीतज्ञानं संभाव्यते । मतमिदं मीमांसकानाम् इति कुसुमोद्गमकारेण स्पष्टतया सूच्यते[301] । तत्र कुसुमोद्गमकारेणापि योगजधर्मविरहेण अस्मदादीनाम् असर्वज्ञत्वम् इत्येव स्वीक्रियते[302]। माररूपेण तेन कथ्यते यत् पुराणप्रामाण्यवादिनाम् अस्मदादीनां मते योगजधर्म एव अतीन्द्रियत्वे कारणं विद्यत इति[303] । अन्यच्च घटादिजनितसुखादिप्रतीतिनां कृते उपादेयत्वं गुणदर्शनं च यदुच्यते तत्र सुखप्रदाने उपादेयत्वं गुणदर्शने च क्रमो विद्यते, तस्य क्रमस्यावभास एतेषां ज्ञानानां अभ्यासपाटव्येन कर्तुं शक्यत[304]। चतुष्टयसन्निकर्षविषये कथ्यते यत् इदं तु उपलक्षणमात्रं द्वित्रयाणां च सन्निकर्षेण अपि ज्ञानं जायत इति कंदलीकारतो भिन्नं प्रतिपादितम् । कुसुमोद्गमकारेण यद्यपि कन्दलीप्रोक्तसर्वेषां विषये यथावश्यकं स्पष्टी - करणं दत्तम् परञ्च यत्र कुत्रचिद् विशेषः तस्यैव वर्णनं शोधेऽस्मिन् कृतं विद्यते । प्रत्यक्षे यत्र धर्माधर्मा – दिक्कालजन्यत्वम् अङ्गीक्रियते तत्र आलोकस्य मनसः चापि संग्रहः करणीय इति कंदलीकारतो भिन्नं योज्यते अर्थात् धर्माधर्मदिक्कालमनसाम् आलोकस्य च तत्र प्रत्यक्षे साधारणकारणत्वं विद्यते । संख्यादीनां कर्मपर्यन्तं ग्रहणं चक्षुस्पर्शाभ्यां कथ्यते । कुसुमोद्गमकारः तत्र 'तद्धर्माणां सहाय्यम्' इति कथयित्वा तत्र वोम्मिदेवात् भिन्नं कथनं योज्यते । योगजप्रत्यक्षप्रकरणे ज्ञानस्योत्कर्षविश्रामः तु कुत्रचिद् समाप्यते, सैव स्थितिः साक्षा त्कारत्वेन कथ्यते। साररूपेण तेन कथ्यते यत् पुराणप्रामाण्यवादीनाम् अस्मदादीनां मते योगजधर्म एव अतीन्द्रियत्वे कारणं विद्यत इति ।

**२.कुसुमोद्गमे अनुमाननिरूपणम्–** कन्दलीकारेण 'दर्शन' शब्दस्यार्थो स्पष्टीक्रियते यत् तत्र कुसुमोद्गमकारेण पाणिनीस्मृतेः कथनं कृत्वा कथ्यते यत् दृशिज्ञानमात्रम् इति अर्थात् पश्चार्थानामालोचनम् इत्यनेन दर्शनशब्दस्यार्थोऽभिधीयते। [305]अत्र संशयविपर्यय स्मृतिरिति कथनेन स्मृतिव्युदासः क्रियते[306]।
२.देशकालसम्बद्धम् अविनाभावो यत्र कंदल्यां प्रोक्तं तत्र स्पष्टीक्रियते यत् देशकालविशेषेषु क्वचिद् प्रयोजकत्वं विद्यते । तत्र व्यावृत्तेः तुच्छत्वं तादृशेन अधिकरणेन अपि सम्भाव्यते । अनेन प्रकारेण वैधर्म्यस्य दृष्टान्ते अवश्यमेव प्रामाणिकाश्रयं न एषितव्यं इति निरूपितम्। यथा च वर्णयति-**"क्वचिदप्रयोजकत्वो[त्वे]वि(तिं) देशकालविशेषयोः क्वचित्प्रयोजकत्वादेवमुक्तमिति भावः। अनयोश्चोदाहरणम्- एवं सर्वत्र देशकालाविनाभूतमित रस्य लिङ्गमित्येतद्भाष्यव्याख्यानावसरे वक्ष्यति। अयं तेषामाशयः,**

---

298 योगजधर्मानुहीतेनेति मलाव्रणप्रक्षया[तु] सामर्थ्येऽपिप्रक्रममात्रजनिते युक्तमनः सहकारी भवत्येवेति भावः। *टी.न्या.कं,* पृ.४५६

299 *तत्रैव,* पृ.४५८

300 उत्कर्षपरम्परा क्वचिद्विश्रान्तेत्यर्थः ज्ञानोत्कर्षविश्रमस्तु साक्षात्कार एव। *टी.न्या,कं.* पृ .४५८

*301 तत्रैव,* पृ. ४५९

*302 तत्रैव,* पृ.४६०

303 *तत्रैव,* पृ. ४६०

*304 तत्रैव,* पृ .४६४

*305* पश्चार्थैश्चालोचन इति पाणिनि स्मृतेर्दृशि.ज्ञानमात्रेऽपि वर्तते इत्येतदुक्तं संशयविपर्ययस्मृतीनामिति। *टी.न्या.कं.*पृ.४६४

*306* यद्यपि संशयविपर्ययौ न लिङ्गदर्शनाज्जायेते तज्जनकस्य वक्ष्यमाणलिङ्गलक्षणव्रहात्तथापि स्मृतिव्युदासाय क्रियमाणः संशब्दो मन्द्बुद्धीन् प्रति तावपि व्युदास्यतीति भावः। *तत्रैव,*पृ. ४६४-४६५

**व्यावृत्तेस्तुच्छत्वं तादृशेनाप्यधिकरणेन निरूपणं सम्भवतीति वैधर्म्यदृष्टान्ते वैधर्म्योदाहरणे अवश्यं प्रामाणिक आश्रयो नेषितव्य:"।** [307] ३.कंदल्यां कथितं यत् साध्यविपरीतहेतोः असत्ता विपक्षेऽपि प्रमाणसिद्धा स्यात् एतस्यैव स्पष्टीकरणे कथ्यते यत् अभावस्यापि भाववत् तुल्ययोगक्षेमत्वकारणात् तस्यापि न तुच्छत्वं विद्यते। सपक्षप्रतीतिः 'यत्रेदं तत्रेदं' इतिवत् यथा सपक्ष: प्रमाणीक्रियते तथैव व्यतिरेकस्यापि प्रामाणिकदृष्टान्तोऽपेक्ष्यत इति निरूपितम्। इतरथा प्रामाणिकसपक्षस्य स्वीकरणप्रसङ्ग: स्यादिति उक्तम्। उक्तं च- **"अभावस्यापि भावात्तुल्ययोगक्षेमतया प्रमाण गम्यत्वे न तुच्छत्वम्। तथा च यत्रेदं तत्रेदमिति यथा सपक्ष: प्रामाणिक इष्यते तथा व्यतिरेकनिरूपणे प्रामाणिक एव दृष्टान्त एषितव्य"**[308]। अग्रे अनुष्णता यत्र कृतकत्वहेतुना माध्यते तत्र वह्नौ कृतकत्वे विद्यमानत्वे सत्यपि तस्य अनुष्णत्वं प्रत्यक्षविरुद्धमेव विद्यते। अत्र कालात्ययपदिष्टो हेतुत्वमपि विद्यत इति श्रीधरेण कथ्यते। **तत्र वोम्मिदेवेन कथ्यते यत् अस्य सिद्धि: विपक्षत्वहेतुना एव वर्तते, अत: पुनरनुसंधानेन मृतमारणकल्पना एव वर्तते**[309]**भावोऽयं यत्** पूर्वप्रत्यक्षसिद्धस्य पुनः साधनं मृतमारणवदेव विद्यत इति । अत्र मृतमारणन्यायपृथक्त्वेन उच्यत इति। वस्तुनां गमकत्वे अव्यभिचार एव कारणं विद्यते । अन्वय-व्यतिरेकस्तु निश्चयार्थम् उपायद्वयं विद्यते[310]। व्यापकनिवृतौ व्याप्यस्यनिवृतिः जायत इति नियमः[311]। सात्मकं शरीरं जीवानामित्यत्र आत्मनः स्पष्टीकरणे कथ्यते यत् 'ममेन्द्रियाणि, मम शरीरम्' इत्यादयः प्रतीतयः,एतासु बुद्धिशरीरेन्द्रियसंघातेभ्यो अष्टद्रव्येभ्यः च भिन्नरूपेण आत्मसिद्धि: जायते । स तु केवलव्यतिरेकिहेतुमाध्यमेन परं प्रति साध्यत इति वर्ण्यते[312]। उपनयविषये कथ्यते यत् समानतन्त्रे व्याप्तिस्मृतिभ्यां सहैव पक्षधर्मप्रतिपादकं वाक्यं'उपनय' इति विद्यते[313]। अनेन अत्र न्यायदर्शनस्य हेतूपनयसम्बद्धं मतं संकेत्यते। एतदपि अत्र परिलक्ष्यते यत् न केवलं कंदलीकारस्य अपितु भाष्यकारस्य मतमपि तै: व्याख्यार्थं[314]स्वीक्रियते । तत्र' उदाहरणापेक्ष' इति पदेन तस्य आनन्तर्य - मात्रमेव बोध्यते न तु उत्तरकालमिति [315]। अत्र स्मृतेः अनुमाने लिङ्गस्मृतिपूर्वकत्वेन व्याप्तेः स्मरणमविरोधः इति कथ्यते । लिङ्गनिश्चयकारणाद् व्याप्तेः सत्त्वं स्मृतितः पूर्वं विद्यत इति अभिप्राय: तत्र सूच्यते । अन्यदपि पक्षधर्मतानुसंधानस्य अनुमितिसाधनत्वं कथ्यते[316]। व्याप्तिस्मरणं तत्र लिङ्गस्मृतिपूर्वकमेव[317]

---

[307] *टी.न्या.कं.*पृ.४६९

[308] *टी.न्या.कं.*पृ.४७०

[309] यस्मात्तद्भावे च नास्त्येवेत्यनेन दुर्वचनं तयोरनुपजीवनेनैकान्तिकत्वमपि सुवचम्। मृतमारणन्यायश्चाप्युभयत्रापि तुल्यस्तथापि प्रथमरूपप्रतिपत्त्यवसरे रूपान्तरप्रतिपत्तेरभिसम्भवन्त्या: परित्यागे न कारणमस्तीति भाव.1 सामान्यलक्षणत्वमभिप्रेत्य शङ्कते। *तत्रैव*,पृ.४७२

[310] अव्यभिचारो हि गमकत्वे कारणम्। अन्वयव्यतिरेकौ तु केवलं तन्निश्चयोपायावित्यर्थ.1 तत्रैव,पृ.४७३

[311] *तत्रैव*,पृ.४७४

[312] स्वयं तावन्मम शरीरं' ममेन्द्रियाणि 'तेन बुद्धिरिति बुद्दीन्द्रियशरीरसङ्घातपरिहारेणाष्टद्रव्यातिरिक्त एव सिद्ध.1 स एव परं प्रति केवलव्यतिरेकिणा साध्यत इत्यर्थ.1 *तत्रैव*,पृ.४७५

[313] अथवाऽन्वयव्यतिरेकप्रसिद्धेरेवाविनाभावनिश्चयोपायता न पुन: कार्यकारणभावादेरित्येतत् कुत इति शङ्कानिराकरणपरतया भाष्यावतारणमित्यवगन्तव्यम्। तत्रोदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनय इति; समानतन्त्रे व्याप्तिस्मृतिसहितस्यैव पक्षधर्मस्य प्रतिपादकं वचनमुप[नय]इति लक्षणात्। *तत्रैव*,पृ.४७७

[314] इति शंकानिराकरणपरतया भाष्यावतारणमित्यवगन्तव्यम्। *तत्रैव*,पृ.४७७

[315] उदाहरणापेक्ष इति पदमुप[नय]स्योदाहरणानन्तर्यमात्रपरं न तु व्याप्तिस्मृते[:]उत्तरकालमेतत्। *तत्रैव*,पृ.४७७

[316] "इह हि व्याप्तिस्मृति सहितस्य पक्षधर्मतानुसंधानस्यानुमितिसाधनत्वमित्यत्राविवादो वादिनाम्। *टी.न्या.कं.*पृ. ४७८

विद्यत इति निरूपयत उक्तं च–"**न च पूर्वकालभाविनो लिङ्गदर्शनस्य विषयनाशान्नाश:- (ज्ञा[न]नाशान्नाश:) ज्ञानानां विषयनाश्यत्वानभ्युपगमात्। स्मृत्यानुमानेऽपि लिङ्गस्मृतिपूर्वकमेव व्याप्तिस्मरण -मित्यविरोध:इति भाव:**"। [318]अविनाभावसिद्धौ यत्र कार्यकारणभावप्रसङ्गे उपलम्भा -नुपलम्भरूपेण तेषां पञ्चप्रकारककार्यकारणत्व यत्र दृश्यते तत्र कुसुमोदगमकार: तेषामेव मतं स्पष्टीकरोति।[319]वस्तूनाम् आकस्मिकसम्बन्धत्वे काकतालीयन्यायो[320] वोम्मिदेवेन सूच्यते अर्थात् वस्तूनामाकस्मिकरूपेण कदाचित् सम्बन्ध:,कदाचित् न इति प्रकारकसम्बन्धेन न व्याप्ति: निश्चीयते। वृक्षशिंशपयो: यदि अभिन्नत्वं स्वीक्रियते तत्र वोम्मिदेवेन कथ्यते यत्र तादात्म्ये न अनुमानं विद्यते न च अनुमाने तादात्म्यमिति उत्तरपक्षिमते[321]। एतदनन्तरं बौद्धमतखण्डनं कंदल्यनुगुणं स्वशब्दै: क्रियते। उपाधिविषये कथ्यते यत् उपाधिस्तु प्रमाणपथे अवतीर्णे सति शंकनीयेति। अन्यथा तत्र अतिप्रसङ्गो जायते। तस्य लक्षणं कुसुमोद्गमकार: सूचयति- "**तल्लक्षणं च व्याप्याभिमतमव्याप्नुवद् व्यापकभिमतं च व्याप्नुवंस्ततश्च व्याप्यमान इति**"[322]अस्मिन् लक्षणे प्रयुक्तानां शब्दानां प्रयोजनमपि वोम्मिदेवेन दीयते। व्याप्तिमतव्याप्नुवत् व्यापकस्य अभिमतत्वेन व्यापनं यत्र विहितं तेन व्याप्नेन व्याप्यमान: उपाधि: कथ्यते। धूमव्यापकत्वे आर्द्रेन्धनसंयोगरूपोपाधे:अनुपाधित्वं धूमेन एव साध्यते। अस्य कृते प्रथमं विशेषणं दीयते। महानसादौ व्यभिचारव्यतिरेकाय द्वितीयं विशेषणप्रयोग:। सोपाधि -प्रयुक्तत्वात् मठादौ न व्यभिचारो स्यात् इत्यस्य कृते तृतीयविशेषणं प्रयुज्यते यतो हि तत्र पर्वततत्वं इति विद्यते[323]। सहभावस्य अविनाभावस्य वा भूर्यादर्शनेन रत्नत्वादिवत् अभ्यास: अपेक्ष्यत इति वोम्मिदेवेन सूच्यते। उपाधिविषये व्यस्ता चर्चा तत्र क्रियते। पूर्वं कथ्यते यत् अन्वयव्यतिरेकिणि प्रयोजकान्तरं साध्ये उपाधय: प्रत्यक्षयोग्या आशङ्कनीया: तद्विपरीता वा ? उभयो: खण्डनं तत्र विहितम्। योग्यानामनुपलम्भ: तथा च अयोग्या उभयमात्रव्यापका:। तत्र ये धूममात्रव्यापका: तेषां लक्षणहानौ अनुपाधित्वं वर्तते[324]। तत्र पुन: शंङ्का क्रियते यत् वह्निमात्रव्यापका नित्या अनित्या वा विद्यन्ते। तस्यापि तत्र निषेध: 'ते हि यदि स्वरूपेति' कंदलीशब्देन एव क्रियते। ये नित्या: तेषां कृते कथ्यते यत् तेषां साहचर्यं न औपाधिकम् उक्तं च–"**नित्या हि वह्निमात्रव्यापकास्तत् परमाणव एव। तदयं प्रयो(या)ग:-धूमस्य वह्निसाहचर्य मनुपाधिकम्, अप्रमीयमाणोपाधिकत्वात्, यस्य साहचर्यं सोपाधिकं तदुपाधिमत्तया प्रतीयते । तथा न साहचयमौपाधिकतयेति व्यतिरेकी**"[325]। **तत्र आशङ्का क्रियते यत् धूमेन सह वह्निसाहचर्यनियम: स्वभावानुबन्धी धर्मश्चेत् वह्ने अनुष्णत्ववत् प्रथमत एव गृहणीयात्, तर्हि भूयोदर्शनै: किमिति प्रश्न:? समाधानम्-** अस्य समाधाने उच्यते यत् कदाचिद् स्वाभाविकेषु अपि रत्नत्वादिषु धर्मदर्शनाभ्यास आवश्यक:। यथा च उक्तम्- "**सन्त्येव हि केचित् स्वाभाविका अपि धर्मादर्शनाभ्यासा वा (स**

---

[317] लिङ्गं हि व्याप्तिस्मृते: पूर्वमेव दृश्यत इत्यभिप्राय:। *तत्रैव*,पृ.४७८

[318] *तत्रैव*,पृ.४७८

[319] यथा नियतस्य वह्ने: पञ्चभि: प्रत्यक्षै कारणत्वं गम्यते तथा नियतावधिमतस्तदेककार्यत्वमित्यर्थ:। तत्रैव,पृ.४८०

[320] काकतालीयं साहचर्यमित्यर्थ:। *टी.न्या.कं.*पृ.४७९

[321] *तत्रैव*,पृ. ४८२

[322] *टी.न्या.कं.*पृ.४८७

[323] *तत्रैव*,पृ. ४८७

[324] अयोग्या हि उभयाव्यापका धूममात्रव्यापकाश्च लक्षणहानेरनूपाधय:। *तत्रैव*,पृ.४८८

[325] *तत्रैव*,पृ. ४८८

**या) यथा रत्नत्वादय इति भावः"**[326]। सविकल्पकप्रत्यक्षेण अविनाभावग्रहणं यत्र कथ्यते तत्रैव कथ्यते पूर्ववत् परप्रत्ययजनकत्वे प्रमाणस्यैव उपलक्षणत्वं विद्यते[327]। सम्बन्धिद्वयस्य प्रत्यक्षत्वे प्रत्यक्षमेव प्रमाणं विद्यते[328]। उभयो -रन्यतरातीन्द्रियत्वे अनुमानमेव विद्यते। यथा तत्र दृष्टान्तः प्रदर्श्यते वनस्पतिद्वयस्य वायुना तथा च तस्य परमाणुभिः सह सम्बन्धोऽपि द्रष्टव्यः इति कथ्यते[329]। कंदलीकारेण कथ्यते यत् अविनाभावे विशेषोऽपि सामान्यत्वेनाभासते। तत्र व्याप्तौ विशेषज्ञानं पक्षधर्मता सहकारिबलेन जायत[330] इति। सामान्येन व्यक्तीनामपि न ग्रहणं परञ्च तत्र क्रोडीकृतव्यक्तिविषयकव्याप्तिमाध्यमेन कथं देशकालविशिष्टसाध्यसिद्धत्वं शंकनीयम्। यथा च वर्णयति- **"सामान्ययोर्व्याप्तिग्रहो नापि व्यक्तीनां किन्तु क्रोडीकृतव्यक्तिविषयया व्याप्त्या कथं देशकालविशिष्टसाध्यसिद्धिरिति"**[331]। पक्षधर्मतासहकारिबलेन एव तत्सिद्धिः। हेतुसाध्ययोः परस्परम् अन्वितत्वं विद्यते। व्याप्तिग्रहणवेलायां तस्य एव अन्वेषणं क्रियत इति। काश्मीरस्थहेमाङ्कुर इति दृष्टान्तस्य चर्चा कंदलीवदेव विधीयते। दैशिकस्य अविनाभावस्य प्रतीतिः दैशवैशिष्ट्येन अविनाभूतत्वयुक्ता वर्तते। [332]सुवर्णभाङ्गारिकै हेमाङ्कुरसंरक्षणे तेषां संरक्षणक्रियायाः तत्र ज्ञापकत्वं सूच्यते। यथा लिखति शिडिलवोम्मिदेवः-**"एवमितरत्रापि-यथा काश्मीरेष्वतिप्रयोगः-एतानि यवबीजानि हेमांकुरकारीणि कश्मीरेषूप्यमान एवं वीक्षया तं संप्रति यत्नवदिति सुवर्णभांडागारिकसंरक्षणस्य लिङ्गत्वमनुग्राहकतर्कप्रदर्शनायोक्तं यदि काश्मिरे यववाटिकायां हेमाङ्कुराः न भवेयुः सुवर्णभांडा गारिकाःतान् न रक्षेयुरिति हि तर्कः"।** [333]नृपतिप्रबोधे गायनादिनां ज्ञापकत्वं विद्यते । तत्र स्वाभाविकसम्बन्ध एव कुसुमोद्गमकारेण अङ्गीक्रियते[334]। नोदनादीनाम् अवयवक्रियायां हेतुत्वं विद्यते। तत् अप्राप्तचन्द्रोदयेन न क्रियते। अतो न चन्द्रमसः उदयविरहे व्यभिचारो यतो हि अगस्त्योदयं विना शरदि न जलप्रसादो वक्तुं शक्यते[335]। कार्यादीनां माध्यमेन यत्र 'अस्येदम्' इति सूत्रेण अनुमानाङ्गत्वसम्बन्धप्रतिपादनं उदाहरणार्थं विद्यत इति सूत्रार्थो वोम्मिदेवेन सूच्यते[336]।

**अनुमानस्य भेदाः-**सामान्यतोदृष्टविषये कथ्यते यत् समानतन्त्रे पूर्ववच्छेषः सामान्यतोदृष्टम् अनुमानं विद्यते[337]। सामान्यतोदृष्टेऽपि दर्शनविषयत्वसाम्येन 'पुनः दृष्टम्' इति ग्रहणे ब्राह्मणपरिव्राजकन्याय-माध्यमेन अयं विशेषो न सिद्धयत इति प्रतिपाद्यते[338]। अनुमानस्य कंदलीभिन्नमुदाहरणम् अपि वोम्मिदेवेन

---

326 *तत्रैव*,पृ.४८९

327 पूर्ववत् परप्रत्ययजनकं प्रमाणमुपलक्षयति। *तत्रैव*,पृ.४८९

328 *तत्रैव*,पृ.४८९

329 *टी.न्या.कं.*पृ.४८९

330 पक्षधर्मतासहकारिबलाद्विशेषसिद्धेः। *तत्रैव*,पृ. ४९०

331 तत्रैव,पृ.४८९

332 *टी.न्या.कं*,पृ.४९१

333 *तत्रैव*,पृ.४९१

334 *टी.न्या,कं.*पृ.४९१

335 *तत्रैव*,पृ.४९३

336 तथा च सिद्धान्ते अस्येदमित्यनुमानाङ्गसम्बन्धप्रतिपादनं परिशिष्टमुदाहरणार्थमिति। *तत्रैव*,पृ.४९३

337 *टी.न्या.कं.*,पृ.४९५

338 *तत्रैव*,पृ.४९५

प्रस्तूयते । पूर्वदृष्टपित्रादिव्यक्तीनां वर्तमानकाले कुड्यादिव्यवहितत्वात् ध्वनिविशेषेण एव लिङ्गस्य अनुमिति क्रियते, तथापि अनुमानव्यपदेकसामान्यविशेषस्य व्याप्तिग्रहणत्वविषयेऽपि तदनुमानम् अङ्गीक्रियते[339]। अन्यच्च गोत्वे शब्दाभिधेयत्वसाम्ये अपि सामान्यतोदृष्टत्वात् भेददर्शनाय उपचारोऽयं विहितमिति निरूपितम् । सामान्यतोदृष्टस्य व्यपदेशिका जाति भिन्ना भवति इति कथ्यते[340]। पक्षे जात्यन्तरव्याप्तेः प्रयोजिकात्वं सामान्यतोदृष्टम् इति तत्र सूचितम्। यथा-"पक्षेऽन्याजातिर्व्याप्तेः **प्रयोजिका, तत्सामान्यतोदृष्टमित्यव गन्तव्यम्**"। [341]लैङ्गिकीबुद्धिमध्ये प्रमाणस्य करणत्वं विद्यते। तस्य व्याख्या येन प्रमीयत इति रूपेण करणीया। तस्याः फलमपि प्रमाणात् विलक्षणमेव विद्यत[342] इति सूच्यते। व्यापारविषयत्वं हि तत्र करणप्रयोगेण तस्य मुख्यविषयो विद्यते[343] । नित्यानुबन्धिनः स्वकार्यफलाभावे साधकतमं विद्यत इति प्रतिपादितम्। वर्णाश्रमिणां विषये चार्वाकेण या जीविकार्जनरूपशंका कथ्यते, तत्र वोम्मिदेवेन सुखसाधनानि परित्यज्य कृच्छ्रचान्द्रायणादीनां कर्तृणां निर्देश: क्रियते,तेन कथं तेषां जीविका - लिप्सा सिद्ध्येत इति[344] । भावोऽयं यत् एतादृशा हि महानुभावा:,ये स्वसुखानि परित्यज्य दु:खे जीवनं यापयन्ति। अनेन प्रकारेण कथयितुं शक्यते यत् अत्र कंदलीकारोक्तानां सर्वेषां विषयाणां चर्चा विहिता वर्तते । वोम्मिदेवेन अत्र बह्वो न्याया: उद्ध्रियन्ते ते च मृतमारण -कल्पना,काकतालीयन्याय:,कोडीकरणम्, ब्राह्मणपरिव्राजकन्याया: च सन्तीति। हेत्वादीनां वाक्यानां स्पष्टीकरणे उपनयवाक्यस्य पक्षधर्मप्रतिपादकत्वं कथ्यते। अविनाभावस्य साहचर्यभावस्मृति: लिङ्गस्मृति -पूर्वकत्व मेव जन्यते। अत्र स्मृतेः अनुमाने व्याप्तेः स्मरणमविरोध इति कथ्यते। लिङ्गदर्शनस्य विषयनाशात् नाशो न जायते। तादात्म्ये न अनुमानं विद्यते न च अनुमाने तादात्म्यमिति संकेतमात्रं विहितमिति। भूर्यादर्शनेन रत्नत्वादिवत् अभ्यासो अपेक्ष्यत इति वोम्मिदेवेन सूच्यते । अनेन प्रकारेण यत्रोचितं यथावश्यकं स्पष्टीकरणं दीयते ।

१.**कुसुमोद्गमे शब्दस्यानुमानेऽन्तर्भाव:-** कुसुमोद्गमकारेणापि प्रकरणेऽस्मिन् विशदा टीका विधीयते। तत्रोच्यते यत् शब्दादीनाम् अनुमाने अन्तर्भावो विद्यते, नोचेत् भाष्यकारात् विरोध: प्रसज्येत्। यथा च लिखति-"**शब्दादीनीति प्रमाणान्यनुमानानीति व्याख्येयम्। इतरथा शब्दादिभ्योऽपीत्यागामिभाष्येण विरोधप्रसङ्गात्**"[345]। अत्र शब्दादीनाम् अनुमानान्तर्भावे अर्थप्रतिपादकत्वरूपं यद् हेतु: स: साधारणहेतुत्वेन कथित इति स्पष्टीक्रियते[346]। अत्र उदाहरणप्रभृतीनां स्पष्टीकरणमात्रं दीयते न तत्र विशेष:। यथा गवादिशब्देन ककुदाद्यर्थो अव्यभिचारिनियमेन:[347]। ५.कन्दल्यां शब्दस्य अर्थज्ञापकत्वे लिङ्गत्वज्ञापनानन्तरं

---

[339] *टी.न्या.कं.*पृ. ४९५

[340] ततश्चयत्रानुमानव्यपदेशिका जातिर्भिद्यते व्याप्तिग्रहणविषयभूता जातिविशेषा तूभयोरन्या।

[341] *तत्रैव,*पृ.४९६

[342] अत: फलमपि प्रमाणाद्विलक्षणं निरूपणियमिति भाव:। तत्रैव,पृ.४९७

[343] व्यापारविषयो हि करणप्रयोजयन् तस्य मुख्यविषय:। नित्यानुबन्धी तं प्रति स्वकार्यफलाभावे साधकतमत्वाभावादित्यर्थ्य:। *तत्रैव,*पृ.४९८

[344] ये ह्युपनतमपि सुखसाधनं परित्यज्य ,कृच्छ्रचान्द्रायनादिदु:खसाधनमेवमुपपाददते। न तेषां जीविकालिप्सेति भाव:। *तत्रैव,*पृ.४९७

[345] *टी.न्या.कं.*पृ.४९९

[346] *टी.न्या.कं.*पृ.४९९

[347] *तत्रैव,*पृ ५०१-५०२

तत्र कथ्यते यत् शब्दस्यार्थवाचकत्वे विद्यते कश्चित् शक्तिरित्यस्मिन् विषये, गुडजिह्विकान्यायेन अत्र पृच्छयत इति सूच्यते[348]। अत्र आचार्येण नूतनो न्याय: संकेतित: । ७.अन्यदृष्टान्तमाध्यमेन कथ्यते यत् यथार्थसंसर्गे लैङ्गिकप्रवृत्ति एव विद्यते[349]। अग्निना सिञ्चति' इत्यत्र सार्वकालिकं तथा च तात्कालिकं 'पुत्रो राज्ञ: पुरुषोऽपसार्यतीति' इत्यस्मिन् दृष्टान्ते विद्यते[350]। 'चैत्र पयसामेको रथे यात्योदनंभुक्त' इति दृष्टान्तमाध्यमेन व्यावृत्तिदृशा अत्र संसर्गनियमो बोध्यते यत् आसन्नताग्रहणम् आवश्यकं वर्तते[351]। संसर्गात्पूर्वं न ज्ञानं जायत इति। यथार्थे संसर्गे या अनेन प्रकारेण लैङ्गिकप्रतीतिकारणात् शब्दोऽनुमानमेव । शब्दादीनाम् अनुमानान्तर्भावे अर्थप्रतिपादकत्वरूपं यो हेतु: स: साधारणहेतुत्वेन कथ्यत इति उक्तम् । कुसुमोद्गमकारेण प्रकरणेऽस्मिन् दृष्टान्तरेण विषय:प्रतिपादित: । प्रमाणबाधस्य भेदादीनामपि सोदाहरणं व्याख्यानं कंदलीकारतो व्यतिरिच्य विहितं गुडजिह्विकान्याय: इति नाम्ना नूतनो न्याय: संकेतित: । अनेनेदमपि ज्ञायते यत् अत्र केवलं व्याख्यानमात्रमेव न संपादितमपितु प्रकरणानुसारिणी भिन्ना चर्चापि क्रियते ।

**२.कुसुमोद्गमे स्वत: प्रामाण्यवाद:**-कुसुमोद्गमकारेण न अस्मिन् प्रसङ्गे विशदा विशिष्टाचर्चा च विधीयते। यत्र स्वत: यथार्थपरिच्छेदकत्वं प्रमाणस्य पृच्छयते तदा घटकुद्या(ऽयां)प्रभातमिति न्याय: तत्र उद्धियते। तत्र सूच्यते यत् समानन्यायेन तस्य स्वकीयं प्रामाण्यं परत: स्वीक्रियते। तत्र अनुप्रयोगं दर्शयति– **"अनभ्यस्तदशायां सांशयिकत्वात्, अप्रामाण्यवदिति"।** [352]अनेन प्रकारेण प्रामाण्यवादेऽपि संक्षिप्तमेव व्याख्यानं प्रतिपादितमाचार्येण इति। अन्यच्च तत्र जिज्ञासाया अपि अन्वयव्यतिरेकाभ्यां कारणत्वं वार्यते । यथा च लिखति- **"इदं प्रामाण्यं सांशयिकप्रामाण्यं प्रमाणत्वादित्यस्यातथात्वेन निश्चायकत्वानुपपत्तेरिति** भाव:"। अनेन तत्र प्रवृत्तिसामर्थ्यलिङ्गस्य व्याप्तिग्रहणं न संभाव्यत इति कथयित्वा भाष्यस्यावतारणं क्रियते[353] अर्थात् भाष्यकाराभिमतमस्याचार्यस्य मतं वर्तत इति ।

**३.कुसुमोद्गमे चेष्टाया: अनुमानेऽन्तर्भाव**:-हस्तादीनां माध्यमेन या आह्वानविसर्जनरूपक्रिया तस्या: वर्णनं कंदलीवदेव टीकाकारेण क्रियते। अत्र हस्तकर्मणा एतादृशस्य आह्वनादिरूपस्य अर्थविशेषस्य प्रतिपादनमेव प्रमाणरूपेण कथ्यते। अन्यच्च सम्बन्धाभावे अनुमानं न विद्यते,अत: तस्य प्रामाण्यं पृथक्त्वेन विद्यत इति पूर्वपक्षस्यैव स्वशब्दै: क्रियते तद्यथा- "यदाभिमुख्येन हस्ताकुञ्चनं क्रियते तत्कृतिव्याप्यमाकुञ्चनं तफ़्दभ्गमनवधेयतया प्रतीयते, तदाभिमुखेन हस्तस्य पराङ्गमुखात् क्षेपणं क्रियते,तत्कृतिव्याप्यमुत्क्षेपणं कर्त्त्वपेक्षया दूरदेशगमनं च तथा प्रतीयते। तदेतादृशहस्तकर्मैतादृशमर्थविशेषं प्रतिपादनप्रमाणम्। न चेन्द्रियसंबन्धाभावादन्मानम्। अत: पृत(थ)गेतत्प्रमाणमित्यर्थ:" स्पष्टीकरणं क्रियते । अन्यच्च चेष्टाविशेषे संकेतविशेषणस्य अर्थस्य प्रतिपत्ति: क्रियते। चेष्टया अभिप्रायस्यावच्छेदनं क्रियते; यथा च लिखति–"अत्र

---

348 *तत्रैव*,पृ.५०४

349 *तत्रैव*,पृ.५०५

350 *तत्रैव*,पृ.५०५

351 आसन्नताग्रहणं तु चैत्र: पयसामेको रथे यात्योदनं भुक्त इत्यत्र व्यभिचारनिवृत्तये आकांक्षानुसंसर्गविगमप्र(प्रा)गभावरूपासत्तया कारणमिति न तया हेतुर्विशेषणीय.1 न हि तस्या: संसर्गाविगमात्प्राक्ज्ञानंसंभवति। *तत्रैव*,पृ.५०५

352 *कुसु*. पृ ५१४

353 अस्त्वेवं जिज्ञासायां प्रामाण्याग्रहणादनवस्थाभाव.1 तत्र प्रामाण्यग्राहकस्य प्रवृत्तिसामर्थ्यलिङ्गस्य व्याप्तिग्रहणं न संभवतीत्याशयेन चोदयति यदे(दी)ति भाष्यमवतारयितुम्। *टी.न्या.कं.*पृ.५१६

**चेष्टायां संकेतविशेषणार्थप्रतिपत्ति:,सा शब्द इवभिप्रायावच्छेदकमनुपायतीत्यनु मानमेव"**[354] अयमेव भाव: तत्र अनुमानवाक्यप्रयोगेन अपि दृश्यते[355]। अत: चेष्टा अनुमानमेव।

**४.कुसुमोद्गमे उपमानस्य अनुमानेऽन्तर्भाव:-** कुसुमोद्गमकारेण समस्ता सारगर्भिता च टीका प्रस्तूयते। अत्रापि उपमानस्य शब्देऽन्तर्भावो क्रियते। अत्र कुसुमोद्गमकारेण स्वकथनस्पष्टीकरणार्थं भाष्यस्य कथनं क्रियते। 'गौस्तथा गवय:'इति वनेचरवचने उपमानप्रमाणं केनचिद् सूच्यते[356] परञ्च एतत्तु भाष्यकथित - न्यायेन एव अनुमाने अन्तर्भाव्यते । २.नैयायिकानां मीमांसकप्रभृतीनां मतेऽपि कुसुमोद्गमकारेण यत्र कुत्रचिद् स्पष्टीकरणं दीयते । सादृश्यज्ञानस्य प्रथमं कारणं वनेचरवाक्यं तेन तस्य आप्तत्वं विद्यते। यथा च कथयति कुसुमोद्गमे-**"संज्ञा-संज्ञिसम्बन्धप्रतिपत्ते लैङ्गिकमाह यदपीति तदप्यनुमानमिति- स्फूट विमतो गोसदृशो गवय सदृश(?) वाच्य इति प्रतिज्ञाया: दर्शितप्रायत्वाद् हेत्वादींश्चतुरावयवानाह तत्रेति (?) ।** "[357] अत्र सिंहावलोकनन्यायेन हेतो अविगानत्वं कथ्यते। तेन अविगानेन वनेचरस्य आप्तत्वं निश्चेयमिति कथितम्[358]। अन्यच्च संज्ञा-संज्ञिभावप्रतिपत्ति: लैङ्गिकी विद्यत इति स्पष्टीकरणं कन्दल्या:। ३.'गो सदृशो गवय:'इति वनेचरप्रयुक्तशब्देन पशुविशेषणस्यापेक्षणं वाचकत्वं क्रोडीकारोऽपि अनुमानेऽस्मिन् अर्थसिद्धो विद्यत इति पृथक्दृष्टान्तेन स्पष्टीक्रियते[359] । ४.प्रत्यक्षानन्तरम् 'अयमसौ गवय. इति ज्ञानं जायते परञ्च स्मरणरूपसंस्कारजन्यत्वात् अप्रमाणमेव विद्यते। यथा च लिखति-**"सत्यमिदानीमयनसौ गवय इति ज्ञानं भवत्येव किंतु सा [तद]प्रमाणं भवति । स्मरणरूपत्वात्। स्मरणत्वं च अंस्कारजत्वात् । अत: संस्कारोद्बोधकं निर्दिष्टम्"**[360]। ५.एतदनन्तरं सप्तमभावरूपस्य सादृश्यस्य गुणेषु अभेदत्वं प्रदर्श्य तस्य पृथक्प्रमाणरूपेण निराकरणं क्रियते। यथा चोक्तं कुसुमोद्गमे–**"यैस्तु पूर्वागसादृश्यं न ज्ञानं न च शब्दप्रवृत्तिनिमित्तं सादृश्यम्, तावदगुणावयवकर्मसामान्यात्मकं,तस्य तद्वद्भिशब्दप्रवृतिनिमित्तशंकायां गुणादीनां तद्वतासहाभेद -प्रसङ्गात्सप्तमस्य भावरूपस्य सादृश्यशब्दवाच्यस्य प्रमाणबाधाया: प्रागेव दर्शितत्वात्। इत्युपमानान्तर्भाव:"**[361]। अनेन प्रकारेण उपमानस्यापि अनुमानेऽन्तर्भाव: क्रियते। उपमानस्य संस्कारजन्यत्वरूपत्वात् अप्रमाणत्वमेव कथ्यते। शब्दप्रवृत्तिरूपं यत्सादृश्यं तस्य सप्तमभावरूप प्रामाण्यस्याभावात् तथा च गुणकर्मादिभि: सह तद्वत्ताभेदप्रसङ्गात् तस्यापि प्रमाणबाधा अवलोक्यते। अनेन कुसुमोद्गमकारेण सप्तमपदार्थत्वेन आशङ्कितस्य सादृश्यस्य अपि खण्डनं विधीयत इति निर्दिश्यते ।

---

[354] *टी,न्या.कं.*पृ.५१८

[355] एवं च प्रयोग:-अयं पुरुषो मम स्वसमीपदेशप्राप्तिं विधेयतया विप्रैति,मदाभिमुख्येन विशिष्टांगुलिविन्यासवत्त्वात्। यो यदाभिमुख्येन विशिष्टांगुलिन्यासवान् तस्य स्वसमीपदेशप्राप्तिं विधत्ते। यथाऽहम् एवं विसर्जनेऽपि द्रष्टव्यमित्यर्थ.। *तत्रैव,*पृ.५१८

[356] इह केचिद्यथा गौस्तथा गवय इति वनेचरवाक्याद् गवयस्य गवा यत्सादृश्यं प्रतीयते तदेवोपमानस्य विषय इति मत्वा तत्प्रतीतिकरणं वनेचरवचनमेवोपमानमित्याचक्षते। *टी.न्या.कं.*पृ.५१९

[357] संज्ञासंज्ञिसम्बन्धप्रतिपत्ते: लैङ्गिकमाह तदपीति। *टी.न्या.कं.*पृ.५२२

[358] *तत्रैव,*पृ.५२२

[359] वि वनेचरवाक्यश्रवणसमनन्तरं गवयशब्दवाच्यत्वप्रतीत्यनुदयात्सादृश्य *(श)*तोपलक्षणत्वे निश्चिते पशुविशेष - सादृश्योपलक्षणान्यथानुपपत्त्या वा कवदृत्यादि*(?)* वैलक्षण्येन च्युत्पत्त्या वा पशुवाचकत्वनिश्चयात्पशुत्वावान्तर सामान्यस्य निमित्ततया क्रोडीकारोऽप्यस्मिन्ननुमानेऽर्थसिद्ध इति भाव। *तत्रैव,*पृ.५२३

[360] *तत्रैव,*पृ.५२३

[361] *टी.न्या.कं.*पृ.५२३

**५.कुसुमोद्गमे अर्थापत्तिप्रमाणस्य अनुमानेऽन्तर्भाव:**-अर्थापत्तिप्रमाणे यत्र दृष्टश्रुतयो: लक्षणं दीयते तत्र वोम्मिदेवेन कथ्यते यत् 'श्रुतग्रहणस्येति' अत्र ग्रहणशब्देन श्रुतशब्दस्य पृथगुच्चारणम्[362] इति अर्थो निर्दिश्यते। अत्र न्यायमेकं कथ्यते यत् अस्य श्रुतार्थापत्तिविषयस्य प्रतिपादनं तस्यां विशेपार्थस्य अभिमंधाने विधीयते। अत: उभयो पृथक् निर्देश: तत्र क्रियत इति। अनयो:वर्णनं बाह्मणपरिव्राजकन्यायेन क्रियत इति संकेत्यते[363]। श्रुतार्थापतिविषये विशेषरूपेण कथ्यते यत् अर्थान्तरेऽपि शब्दान्तरं ग्राह्यम् इति। [364]अत्र दृष्टान्ते 'जीवं चैत्रवद्' इति वाक्येन अपि अत्र श्रुतार्थापत्तिरेव विद्यत इति। यथा-**"नायं परोक्तवाक्यानुवाद: किन्तु प्रमाणान्तरसिद्धत्वादित्यर्थ:"**[365] भावोऽयं यत् श्रुतार्थापत्ति: प्रमाणान्तरसिद्धा। २.कंदल्यां कथितं यत् अर्थापति: अन्वयव्याप्तिमाध्यमेन गृह्यते। चैत्रस्य बहिर्भावात् तस्य गृहेऽनवस्थिति: अन्वयव्याप्तिमाध्यमेन ज्ञायते। अत्र वोम्मिदेवेन कथ्यते यत् लिङ्गलिङ्गिनो: परस्परविरोधत्वात् अत्र न विरोध्यनुमानम् इति। अस्यैव शंकाया: अपनयनार्थम् अनुमानस्यावान्तरभेदो न अनुमानात् बहिर्विद्यते। यथा-**"वाक्यं हि तदा न्यूनं भवेत् यदि कल्प्यमानं वाक्यशेषमन्तरेण श्रूयमाणानां यदा नाम[366]न्वयो न स्यात्,इह चास्त्वन्वय:। पीनकर्तृकभोजनाभावस्य रात्रौ भुङ्क्त इत्यश्रवणेऽपि कालविशेषसम्बन्धप्रतीति रित्यर्थ:"**[367]अर्थात् अन्वयव्याप्ति: अनुमानस्याङ्गं विद्यते;अत: अत्रापि अनुमानमेव विद्यते दिवा भुङ्कत इति शब्दोऽपि निरपेक्षेण अर्थं बोधयत्येव इति लिख्यते । अन्यच्च तत्र अन्यमतस्य विषये कथ्यते यत् यद्यपि श्रुतार्थापत्ते दृष्टार्थापत्तावन्तर्भाव:, तथापि स्वग्रन्थविरोधाद् अस्य मतमाशङ्कयते[368]। पदकृत्यशैल्यां शब्दनियोजन प्रयोजनं वोम्मिदेवेन प्रस्तूयते। अग्रे कंदलीवदेव यत्र कुत्रचिद् स्पष्टीकरणं दत्त्वा एव प्रतिपादितम्।

**६.कुसुमोद्गमे सम्भवप्रमाणस्यानुमानेऽन्तर्भाव:**-शतसंख्याविषये कथ्यते यत् सहस्रसंख्या न्यूनाधारसंख्यया जायत इति व्याख्यानं अनुमानवाक्यप्रयोगमाध्यमेन कथयति-**"प्रयोगस्तुसहस्रसंख्या स्वतो न्यूनसंख्याधारेषूत्पद्यते,ततोऽधिकसंख्यात्वात्, एकत्वाधारभूतेषूत्पद्यमान- त्वादिवदिति ज्ञानं ज्ञेयस्य कार्यमिति"**[369]। अन्यच्च अत्र शतसंख्या ज्ञेया विद्यते। अत: कथयितुं शक्यते यत् कुसुमोद्गमकारेण अत्र भिन्नं स्पष्टीकरणं क्रियत इति। भाष्यकारेण कंदलीकारेण च अत्र अविनाभावो बोध्यते ।

**७.कुसुमोद्गमे अभावप्रमाणस्यानुमानेऽन्तर्भाव:**- अभावविषयिणी या चर्चा सा विशदा कंदली कारवत् क्रियते ततो नात्र पुनरुक्ति: विधीयते। अभावस्य भेदनिरूपणे प्रागप्रध्वंसाभावयो: उत्पत्ते: औपचारिकत्वं कथ्यते। एवमेव प्रागभावस्यापि विनाशोऽपि औपचारिकत्वम् इति कथितम् । यथा-**"प्रध्वंशस्य तु पूर्वावधि -सद्भावमात्रेणौपचारिकीत्यर्थ: । न केवलं प्रध्वंसस्योत्पत्तिरौपचारिकी,अपि तु प्रागभावस्य विनाशोऽपि**

---

362 गृह्यत इति ग्रहणं श्रुतपदम्। तस्य पृथगभिधानं पृथगुच्चारणम्। *टी.न्या.कं.*पृ.५२४

363 ततश्च ब्राह्मणपरिव्राजकन्यायेनाधीयत आह श्रुतार्थापत्ते: कोऽपि विशेषोऽभिमत इत्यभिसंधिना उभयतोऽपि [प्रति]पादितार्थापत्तिरिति भाव.1 *तत्रैव,*पृ. ५२४

364 एवमर्थान्तरमित्यत्रापि शब्दान्तरमिति द्रष्टव्यम्। *तत्रैव,*पृ.५२४

365 *तत्रैव,*पृ.५२५

366 अत्र 'नान्वयो 'इति शब्दो युक्तं प्रतिभाति।

367 *तत्रैव,*पृ.५२८

368 एवं श्रुतार्थापत्ते: दृष्टार्थापत्तावन्तर्भावमुपपादितमपि स्वग्रन्थविरोधादश्रद्धानस्य मतमाशङ्कते। *तत्रैव,*पृ५३०

369 *टी.न्या.कं*.पृ.५३२

**तथेति दर्शयस्यभावोत्तरावधित्वं व्याचष्टे"**[370]। अन्यच्च 'नासतो भावो विद्यते नाभावो विद्यते सत:' इत्यपि तत्र उद्धियते। देशकालावच्छिन्नम् अधिकरणमपि अत्यन्ताभावत्वेन अभिधीयते। देशकालावच्छिन्नाधिकरणोऽप्यत्यन्ताभावो भवत्येव[371]। अवान्तरभेदान् परित्यज्य भावेषु सप्तत्वसंख्या न विद्यते इत्येवं प्रकारेण कुसुमोद्गमकारेणापि अभावनाम्ना सप्तमपदार्थो न स्वीक्रियते[372]। यतो षडेव भावपदार्था इति दृष्टान्त एव निर्दिष्टम् इति। अत्यन्ताभावस्य दृष्टान्तरमपि कुसुमोद्गमकारेण दीयन्ते तद्यथा-**"यथेहेदानीं घटो नास्ति, यथा च संग्रामस्थले जयं(य)वानन्यो भीपो नास्तीति। यथा षटपदार्थेभ्यो इदमुदाहरणमेवं व्याख्येयम्**[373]। "अत:अभाव न पृथक् पदार्थ इति प्रतिपादितम्। प्रकरणेऽस्मिन् आचार्येण मीमांसकानां सांख्यानां च खण्डनं विहितम्। पदकृत्यशैल्या: कंदलीटीकायां प्रयुक्तशब्दानां प्रयोजनकथनपूर्वकं व्याख्यानं विहितम् ।

**८.कुसुमोद्गमे ऐतिह्यस्य अनुमानेऽन्तर्भाव:**-अत्र कुसुमोद्गमकारेण ऐतिह्यस्य लक्षणं प्रदीयते तद्यथा- "ततश्चानिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यमैतिह्यमिति लक्षणमुचितम्"[374]अर्थात् अत्र अनिर्दिष्टरूपे अवितथप्रवक्तु: प्रवादपारम्पर्यम् अभीष्टं वर्तते। अत: कथयितुं शक्यते यत् वोम्मिदेवेन पित्रादिवत् अनिर्दिष्टप्रवक्तु: अवितथवचनं प्रवादपरम्परया ऐतिह्यमिति[375] बोध्यते। तत्तु न शब्दप्रमाणात् भिद्यते। शब्दस्य अनुमाने अन्तर्भावत्वात् तदप्यनुमानमेवेति।

**कुसुमोद्गमे परार्थानुमानम्-** परार्थबोधनार्थे परार्थानुमानमित्येवं कुसुमोद्गमकारेण प्रतिज्ञायां अवयवत्वसाधने कथ्यते यत् तन्तूनां पटसाधने एककार्यत्वं यथा विद्यते तद्वदेव प्रतिज्ञाया: अपि समुदायवाक्यस्याप्रसङ्गत्वं विद्यते। तत्रैव शंकोपस्थाप्यते यत् वर्णानां तु आशुतर विनाशित्वं तर्हि कथम् एककार्यत्वम्[376]? **समाधानम्**-अस्य समाधाने कथ्यते यत् एकदैव वाक्यलक्षणस्य पूर्वपदस्मृति - रूपनिचयसहितान्त्यपदस्मृतिसंकेतद्वारानुग्रहीतत्वात् इति विशेषप्रतिपतिरूपेण वाक्यस्य लक्षणत्वं बोध्यते। वर्णसमुदायपदस्य न एकानुभवगोचरत्वम् अपितु प्रत्येकस्य क्रमश एव अनुभवनं क्रियत इति। तत्र प्रतिज्ञायां स्मृते: क्रमवत् संस्कारित्वं सूच्यते। तत्र न तु पदानाम्,न च पूर्ववर्णस्मृतिनिचयान्त्यवर्णानुभवानां विषयपदं विद्यते। स्मर्यमाणैकार्थप्रत्ययद्वारा एकेन कार्येण अवच्छिन्नवर्णानाम् एकपदत्वम् । अत: पदानामपि एकस्मृत्यारूढत्वं विद्यते। अनेन वाक्यार्थबोधो कार्यत इति प्रतिपाद्यते[377] । अनेन एव वाक्यार्थप्रतीते: अन्यथानुपपति जायत इति। अनया अन्यथानुपपत्या कल्पितवाक्यस्फोटनिरंशरूपेण तस्या: अनुपपतिरेव निरस्यते । नियतानुपूर्वके नियतसंख्यकवर्णस्य अपेक्षया संकेतग्रहणात् एका तत्र अन्यथासिद्धिरिति विद्यते[378]। भावोऽयं यत् अत्र वाक्यस्फोटस्यापि कल्पना विहिता। अत्रैव भूतलवाक्यस्य पञ्चभागानाम्

---

370 *तत्रैव* ,पृ.५४५

371 *तत्रैव*,पृ.५४६

372 यथा षट्पदार्थेभ्यो इदमुदाहरणमेवं व्याख्येयम्। अवान्तरभेदं विहाय भावेषु सप्तत्वसंख्या नास्तीति। *तत्रैव*,पृ.५४६

373 *तत्रैव*,पृ.५४६

374 *टी.न्या,कं*.पृ ५४६

375 अवितथामैतिह्यमात्रमुपदेश एवेति प्रमाणभूतवाक्यत्वात्पित्रादिवाक्यवदिति शेष.1 *तत्रैव*,पृ.५४६

376 *टी.न्या.कं*.पृ.५४७

377 *टी.न्या,कं*,पृ.५४७

378 *तत्रैव*,पृ.५४८

एकदेशे अवान्तरवाक्यप्रयोग:सूच्यते। यथा च लिखति-**"तद्वदेव भूतलस्य वाक्यस्य पञ्चभागैकदेशावान्तर - वाक्यान्वय वा उच्यते इत्यत एव वाक्यार्थप्रतीतेरन्यथानुपपत्ते:। तदन्यथानुपपत्त्या कल्पितस्य वाक्यस्फोटस्यनिरंशतया तस्यानुपपत्तिरित्यपि निरस्तम्"**[379]। 'गो' इति पदे एकपदत्वस्य प्रत्यक्षेणैव स्फोटसिद्धि: न आशङ्कनीया यतो हि तस्य नियतनुपूर्वके नियतवर्णापेक्षया अन्यथासिद्धिर्विद्यते। यथा च लिखितम्-"**न च गोरित्येकं पदमिति प्रत्यक्षेणैव स्फोटसिद्धि: शंकनीया। नियतानुपूर्वके नियतसंख्यकवर्णापेक्षया संकेतस्य ग्रहणादेकार्थप्रतीत्यवच्छिन्न तयाऽन्यथासिद्धि:"**[380]। अन्यदपि कथ्यते यत् प्रयुज्यमानवाक्यप्रयोग:वाचकत्वाद् अनुमानं परञ्च भाष्ये कारकव्यापाराभिधानेन हेतुसम्बन्ध: सूच्यते। तद्यथा- **"वाक्यप्रयोग:-प्रयुज्यमानं वाक्यमनुमानस्य वाचकत्वादनुमानमित्युपचर्यते भाष्ये तु कारकव्यापाराभिधानमुपचारेहेतुसम्बन्धं दर्शयितुमित्यर्थ:"।** विपर्यस्तस्यार्थे कथ्यते यत् जल्पवितण्डरूपे अहंकारेण मलिने संशयिकत्वात् कारणिकेन अर्थसंपादनं कर्तव्यम्। अव्युत्पन्नस्य व्युत्पत्तिप्रभृतिं कृत्वा तस्य यथाकथञ्चिद् संशयव्यापादनं करणीयमिति सूच्यते[381] भावोऽयं यत् सुसन्दिग्धस्य अधिकारिण: कृते विषय:संशयरहितो बोधनीय:। इदं विवरणार्थे वर्ण्यत इति सूच्यते यथा च अधिकारिणो संदर्भे चर्च्यते तद्यथा-"**नन्वसुसन्दिग्धोऽधिकारी,संदिग्धे न्याय: प्रवर्तते इत्युक्तत्वादितरयोस्तु कथं अधिकार:,प्रत्युत विपर्यस्त: प्रतिकूलमेव साधन: प्रयुक्तेऽव्युत्पन्न: सूक्तमपि न जानाति पदाना[]मर्थेषु संगतिग्रहणस्याभावदिति चेत्,न अभिप्रायानवबोधात्"**। [382]उदाहरणेन पदज्ञानविषये पक्ष: स्पष्टीक्रियते यत् यथा व्याप्तिपक्षधर्मताया: अनुसंधानं धूमस्य इति कर्तव्यता,तद्वद् पदै: प्रतिपादनं पदानामेवेति इति कर्तव्यता नोचिता, यतो हि पदकार्यज्ञानस्य पदार्थस्वरूपमात्र विषयत्वं विद्यते,तत्र अतीन्द्रियशक्तिर्न स्वीकरणीया इति[383]। पञ्चावयववाक्यस्य साध्यव्याप्तहेतुत्वद्वारा कथनेन परार्थानुमानत्वमिति प्रयोग:। तस्य शाब्दत्वप्रसङ्गवारणाय क्रियत इति कथ्यते। संशयितविपर्यस्तानां व्युत्पन्नानां कृते निश्चितार्थप्रतिपादनं यत्रोक्तं तत्र वोम्मिदेवेन विपर्यस्तस्यार्था: स्पष्टीक्रियन्ते। 'परार्थानुमानम्' इति शब्दे कुसुमोद्गमकारेण शंकोपस्थाप्यते यत्'परार्थ:''अनुमानम्'इति पदद्वयं मुख्यवृत्या तु न ज्ञायते न चानुमानेन। तस्य तत्र औपचारिकं समानाधिकरण्यम् इति प्रतिपाद्यते। तत्रापि 'अत्र समाधिरिति'इति कंदलीप्रोक्तपदेन व्यभिचारम् आशङ्क्यते,परञ्च प्रयोजनाभावे लौकिकप्रचार सहमानेन न प्रसङ्ग' इति पदेन समाधानं क्रियते[384]अर्थात् तत्र औपचारिकं सामानाधिकरण्ये स्वीकारे अतिप्रसङ्गदोषो समायाति;अत:अत्र लौकिक एव प्रचारो विद्यते। कुसुमोद्गमे अधिकारिण: सुसन्दिग्धत्वं कथ्यते,यतो हि सन्दिग्धे न्याय:प्रवर्तते। तत्र प्रमाणेन सुसन्दिग्धस्य अधिकारिण: कृते विषय: संशयरहितो बोधनीय:। अनेन प्रकारेण कुसुमोद्गमकारेण

---

379 *तत्रैव*,पृ.५४८

380 *टी.न्या.कं.*पृ.५४८

381 अयमत्र अभिप्राय:, विपर्यस्तस्य जल्पवितण्डाभ्यामहंकारे मलिने सांशयिकस्य सत: कारणिकेन प्रतिपादनं कर्तव्यम्। अव्युत्पन्नस्यापि व्युत्पत्तिमादौ कृत्वा यथाकथंचित्संशयं व्यापाद्य पश्चात्प्रतिपादनं कर्त्तव्यमिति। *तत्रैव*,पृ.५४९

382 *तत्रैव*,पृ.५४९

383 एवं पदै: प्रतिपादनमपि यदि पदार्थानामिष्टि(ति)कर्त्तव्यता न स्यात्, न चैवं पदकार्यस्य ज्ञानस्य पदार्थस्वरूपमात्रविषयत्वादतीन्द्रियायाश्च शक्तेरनङ्गीकारादित्यर्थ:। *टी.न्या.कं.*पृ.५५०

384 *तत्रैव*,पृ. ५५३-५५४

अपि विशदं विवरणं प्रस्तूयते । तत्र मीमांसकमतस्य वाक्यस्फोटदीनां च विश्लेषणं क्रियते । यद्यपि परार्थानुमाने प्रतिज्ञापद्शोपनयानुसंधानप्रत्याम्नायवाक्यानां पञ्चावयवानां चर्चापि वर्तते परञ्च साररूपेण कथ्यते चेत् तत्र दृष्टान्तरमाध्यमेन विषयप्रतिपादनं तथा च कंदल्या: स्पष्टीकरणमेव विद्यते। न तत्र किञ्चिद् विशेष: प्रतिपादित: । अतो विस्तृतिभायाद् न वर्ण्यते।

**१.कुसुमोद्गमे निर्णय:-**कुसुमोद्गमकारेण संशयनिर्णययो: वध्यघातकविरोधो सर्वज्ञानसाधारणत्वेन स्वीक्रियते यतो हि निर्णयस्योत्पत्त्यनन्तरं संशयज्ञानस्योच्छेद:[385] । अन्यदपि प्रस्तूयते यत् संशयस्य विमर्शं कृत्वा पक्षेषु अर्थावधारणं हि निर्णयत्वेन कथ्यते[386] । एतावदेव वर्णनं कुसुमोद्गमकारेण क्रियते ।

**२.कुसुमोद्गमटीका-स्मृति:-**'लिङ्गदर्शन चेति' इत्यत्र व्युत्पत्तिमाध्यमेन 'लिङ्गदर्शनस्य इच्छा अनुस्मरणं च' अत्र अन्यसमासस्य व्यावृत्त्यर्थं द्वन्द्वसमासस्य निर्देशो विधीयते[387] । आत्ममनसो: संयोगस्य लिङ्गसहका- रितया विशेषकार्योत्पत्तिरूच्यते[388] यथा शिडिलो वर्णयति-**"लिङ्गदर्शनं वह्न्यादिलिङ्गस्य धूमादेर्दर्शन -मिच्छार्नुस्मरणमनुक्रमवतामन्यतमस्य स्मरणम्"**[389] भावोऽयं यत् वह्न्यादिलिङ्गस्य धूमदर्शनप्रभृती च्छानुस्मरणम् । कदाचित् एकदा एव दर्शनकारणात् स्मृति: दृश्यते अत्र कारणम् औत्सुक्यविशेष: कथ्यते[390] । अन्यच्च परप्रत्ययोद्बोधनेन अतिशयेन विहितं प्रत्ययपाटवं तेनापि स्मृतिरवलोक्यत इति । अन्यदपि तत्र अनुस्मरणं पुनरुच्चारणस्मरणार्थं क्रियत[391]इति । अनुमानस्यापि स्मृतिवत् अतीतविषयत्वं विद्यते; कथं तस्य वैधर्म्यमिति विवक्षायां कथ्यते यत् स्मृति: पूर्वाधीना (अनुभवाधीना) वर्तते,परञ्च अनुमिति: परामर्शप्रभृतीनां कृतेऽधीना विद्यते । साध्यरूपस्य असाधारणविषयज्ञापने नापरस्यापेक्षा,तत्र पूर्वानुभवोऽपि न अपेक्ष्यते । कुसुमोद्गमकारेण केवलं स्वविषयपरिच्छेदे पूर्वानुभवस्यापेक्षत्वं स्मृते: प्रत्युत्तररूपेण सूच्यते[392]अर्थात् स्मृतिना स्वविषय: परिच्छिद्यते । एवं प्रकारेण अत्र कंदलीकारस्य भाव एव स्पष्टीक्रियते ।

**३.कुसुमोद्गमे आर्षज्ञानम्-**आर्षज्ञानं विषये कुसुमोद्गमकारेण समस्ता व्याख्या प्रस्तूयते। आर्षज्ञानस्य विधा -तारो व्यासादयो विद्यन्ते[393] । आगमै: ईश्वरप्रणेतृत्वात् अतिशयाधानं क्रियत[394] । अन्यच्च प्रातिभप्रमाणविषयो वर्ण्यते यत् वक्तादीनाम् अनुष्ठानस्य स्वाभिमतसाक्षात्कारिपुरूषे स्थिति: तथा च शिष्टाचारत्वात् अग्निष्टोमा -दीनां यत् पुराणप्रथितव्यवहार: स: प्रातिभज्ञानत्वेन कथ्यते । तत्र

---

385 *तत्रैव*. पृ.५९९

386 प्रसिद्धिप्राबल्यादिति। यथोक्तं विमृश्य पक्षाभ्यामर्थावधारणं निर्णय इति संशयनिर्णययो: विरोध: न गवाश्वादिवदितरेतराभाववत्त्वं बाध्यबाधकभाव इति दर्शयन्नित्यर्थ:। *तत्रैव*, पृ.५९९

387 *तत्रैव*. पृ.६००

388 *तत्रैव*, पृ.६००

389 *तत्रैव*, पृ.६००

390 औत्सुक्यविशेषण दर्शनीय इत्यर्थ:। *तत्रैव*, पृ.६००

391 *तत्रैव*, पृ.६००

392 स्वविषयपरिच्छेदे पूर्वानुभवापेक्षणात्। *तत्रैव*, पृ.६००

393 *तत्रैव*, पृ.६०१

394 तस्य विभागादिकर्तार: व्यासादय ईश्वरस्येव प्रणेतृत्वांगीकारादतिशयाधानमपि करोतीत्यर्थ:। *तत्रैव*, पृ.६०१

प्रातिभज्ञानस्य अर्थं निरूपयति- "एवं **वक्तृकाद्यनुष्ठानं स्वाभिमतसाक्षात्कारिपुरुषवर्त्तित्वं शिष्टाचारत्वात्राग्निष्टोमवत्, यद्वा पुराणव्यवहार- प्रसिद्धिर्वा प्रमाणं प्रतिभैव प्रातिभमिति प्रतिज्ञातत्वात्**"[395] । इयं युक्तावस्था लौकिकानां न संभाव्यते । तत्र सुधर्मकार्यदर्शनात् कन्याया: अनुभव:अव्यभिचारित्वात् प्रमाणं विद्यते[396] । अन्यच्च तस्य परोक्षापरोक्षत्वविषये कथ्यते । [397] आर्षप्रत्यक्षविषये कथ्यते यत् तत्प्रत्यक्षं अंजनादिसहकृतालोचनेन रश्मे: व्यवहितविप्रकृष्टप्राप्तिरेव विद्यत इत्येव कल्पना कल्पनालाघवाय करणीयेति निरूप्यते। अन्यच्च लौकिकै: मणिमन्त्रौषधीनां प्रभाव -विषये कथितं यत् एतेषां प्रभावो विद्यत इति ज्ञानसामर्थ्ये ग्रहसंचारादिकानां लिङ्गत्वकारणात् तथा च बृहस्पतिप्रभृतीनां वचनकारणाद् तत्र लिङ्गत्वस्य अवगति: क्रियत इति प्रतिपाद्यते[398] ।

**४.कुसुमोद्गमे सिद्धदर्शनप्रकरणम्-** कुसुमोद्गमकारेण नात्र टीका विहिता

कुसुमोद्गमकारेण बुद्धिपर्यन्ता:गुणा एव व्याख्यायन्ते। अत: त एव वर्ण्यन्ते। बुद्धे: अनन्तरं कर्मपदार्थस्यैव चर्चा क्रियते।

**३.कुसुमोद्गमटीकायां कर्मपदार्थनिरूपणम्-** कुसुमोद्गमकारेण कर्मप्रकरणस्य भाष्यकन्दल्यो: अपेक्षया संक्षिप्ता समस्ता च टीका प्रस्तूयते। **१.आक्षेप:-**कुसुमोद्गमकारेण प्रश्नोत्पाद्यते यत् एकद्रव्यत्वं यद्यपि रूपादिगुणेष्वपि विद्यते,तर्हि रूपकर्मणोर्मध्ये को भेद[399] इति प्रश्नोत्थाप्यते । **समाधानम्-** अस्य कृते'एकदा' इति शब्द: कथ्यते अर्थात् एकस्मिन् समये एकद्रव्ये एकमेव कर्म विद्यत इति कथ्यते । यथा रूपादय: स्वसमानजातीयेन रसादिभि: सह तिष्ठन्ते तद्वत् उत्क्षेपणादीनां न स्थिति:[400]। २.एकस्मिन् द्रव्ये विरूद्धकार्यसमवायोऽपि न विद्यते यतो हि तत्र प्रत्यक्षमेव प्रमाणं विद्यत इति कुसुमोद्गमकारेण सूच्यते । उत्क्षेपणकर्मकाले अपक्षेपणस्याभाव: प्रतीयते। अत एकस्मिन् समये एकस्यैव कर्मण: स्थितिकर्मत्वात् तत्र परस्परं सम्प्रतिपन्नत्वं विद्यत इति कथ्यते। [401]३.अन्यच्च एकया क्रियया यद्द्रव्यचालनं तदपरया न संभाव्यते यतो हि एकेन सह गम्यमा नानां संयोगादीनां गमनभेद: प्रत्यक्षप्रमाणेन एव सिद्धो वर्तते। क्रियाणां क्षणिकत्वप्रभृतय: परस्परसाधर्म्यमात्रं तत्तु गुणादिष्वपि संभाव्यत[402]इति सूच्यते।

---

395 *तत्रैव,* पृ .६०२

396 न हि लौकिकानां युक्तावस्था संभवति,प्रकृष्टसुधर्मकार्यदर्शनात्कन्याया अपि कल्प्यत इति भाव:। अत: प्रमाणमेवेत्यर्थाव्यभिचार्यनुभवत्वादिति भाव:। तत्रैव, पृ .६०२

397 न च वाच्यं परोक्षत्वेऽनुमानान्तर्भाव:, अपरोक्षत्वे प्रत्यक्षान्तर्भाव इति। पक्षद्वयव्यापकमिन्द्रियलिङ्गव्यावृत्त्या तत्त्वव्यावृत्ते:। *तत्रैव*, पृ .६०२

398 *तत्रैव,* पृ .६०२

*399 टी.न्या.कं.*पृ.६४०

*400*यथा रूपादय*:* स्वसमानजातीयेन रसादिना सहैकद्रव्ये वर्तन्ते, नैवमुत्क्षेपणादय*:* स्वसमानजातीयै*:* सहैकस्मिन्द्रव्ये वर्तन्त इत्यर्थम् द्वितीयं तु व्याख्यानं संयोगादिवदनेकद्रव्यवृत्तिव्युदासाय स्वरूपादिसाम्यं प्रथमेव्याख्यातेऽर्थे प्रमाणं सूचयितुं तर्कमाह। *तत्रैव,*पृ.६४०

*401* तत्र तावद्विरुद्धकर्मद्वयसमावेशाभावे प्रत्यक्षमेव प्रमाणम्। प्रतीयते हि उत्क्षेपणकर्मवदपक्षेपणाभाव:।*तत्रैव,*पृ. ६४०

*402 टी.न्या.कं.*पृ.६४०

४.गुरुत्वसंयोगप्रयत्नद्रवत्वै: चतुर्भि: समस्तेन व्यस्तेन अन्यतमेन वा कर्मोत्पत्ति: विधीयते। तद्यथा उक्तम्- **"गुरुत्वादिष्वन्यतमेन समुदितैर्वा जायमानत्वमित्यर्थ:"**[403]। कर्मणा केवलम् असमवायिकारणत्वं कंदलीवदेव कथ्यते। यथा च लिखति वोम्मिदेव:-**"सत्ताव्यतिरिक्तनिमित्तकारणजातिहितत्वे सत्यसमवायिकारण - मुत्क्षेपणादीनामि त्यर्थ:"**[404]। ५.इच्छाप्रयत्नादिमाध्यमेन यत्र कार्योत्पत्ति: तत्र 'आदि' शब्देन वेगस्यापि ग्रहणं कुसुमोद्गमकारेण सूच्यते। ६.उत्क्षेपणादिकर्मणामुत्पत्ति गुरुत्वसंयोगप्रयत्नादि भ्यो जायते। तत्र एकस्यापि विश्लेषे न उत्क्षेपणकर्मोत्पत्तिरिति। तुषमुसलादिकर्मणि गुरुत्वतारतम्यम् उत्क्षेपणतारतम्यं च गुरूत्वमपि तत्र कारणं विद्यते तथा च एतेषां समुदितानामपि तत्र कारणत्वं कुसुमोद्गमकारेण विशेषरूपेण कथ्यते[405]। ७.उत्क्षेपणादिषु 'उत्क्षिपति,'अपक्षिपति' इत्यादिरूपेण अनुवृत्तिव्यावृत्तिप्रत्यय: साक्षादेव प्रत्यक्षरूपेण दृश्यत इति स्पष्टीक्रियते। निष्क्रमणप्रवेशनादीनामेव केवलं न जातिसाङ्कर्यम्, अपितु केचन प्रत्ययानाम् आवृत्तिरपि न दृश्यते अर्थात् भाष्ये वर्णितपरस्परविरूद्धद्रष्ट्रो: कृते निष्क्रमणप्रवेशनयो: च एका एव प्रतीति:परञ्च अपवरकापवरणे सति तत्र गमनमात्रमेव ज्ञायते। अतोऽत्र उपाधिभेद एव विद्यते। अयमेव केचन प्रत्यायानामनुवृत्तिरिति[406]कथनेन स्पष्टीक्रियते। ८.नालिकायां पतितपत्रादिषु पार्श्वस्थस्य कृते भ्रमणप्रत्ययज्ञानं तस्य आश्रयभेदाद् क्रियते। तत्र वायो: प्रवेश: अपेक्षाभेदाद् जात इति स्पष्टी -क्रियते[407]। ९.अत्र अन्यदपि जातिभेदनिश्चयो जायत इति कथ्यते अर्थात् समानधर्माभावात् पृथगभिधानात् च जातिभेदो निश्चयस्य हेतुर्विद्यत इति प्रतिपाद्यते[408]। अत्र दृष्टान्तमाध्यमेनापि स्पष्टीक्रियते यत् यथा एकस्यां व्यक्तौ एकस्मिन् समये निरूपणीये नमनत्वकर्मणि हस्तत्व-करत्ववत् परस्परं भिन्नं विद्यते । एतेषु भेद: द्रव्यत्वपृथित्वादिवत् वर्तते,अतो विशेषाभिधानादेव उत्क्षेपणादीनां जातिसिद्धि विधीयत इति दृष्टान्तरेण कुसुमोद्गमकार: लिखति- **"अयं भाव- एकस्यां व्यक्तौ सहनिरूप्यमाणत्वात्किं नमनत्वकर्मत्वे हस्तत्व-करत्ववत्परस्परं भिद्यते, किं वा द्रव्यत्व-पृथिवीत्वादिवत् भिद्यते,[इति अत्र ] विशेषाभिधान च निर्णायकम्"**[409]। १०.ईश्वरस्यैव सर्वकर्माधिष्ठातृत्वं विद्यते यतो हि स ईश्वर: संपूर्णजगतो निमित्तकारणत्वेन विद्यते तत: तस्यात्माधिष्ठितेषु कथं कर्म इति प्रश्न:?अस्य समाधाने कथ्यते यत् स: असाधारणजीव इति[410]नाम्नापि कुसुमोद्गमकारेण निरूप्यते । ११.कंदुकदृष्टान्तेन अभिघातक्रिया वर्ण्यते। अभिघातक - हस्तादिभ्य: कंतुको भूप्रदेशेषु किञ्चित् नतो भूत्वा उर्ध्वम् उत्क्षिपति, तत्र कंतुकसंयुक्तकर्मण उत्पतौ संयुक्तसंयोगयोरुभयो: आवश्यकता विद्यते । गुरूत्वधारणात् तस्य गुणान्वितिरपि तत्र कथ्यते[411]। १२.दण्डसंयोगात् चक्रावयविनि यथा क्रियोत्पत्ति: तद्वत् दण्डविगमे वेगसंस्कारविनाशात्

---

[403] *तत्रैव*,पृ.६४०

[404] *टी.न्या.कं*,पृ.६४०

[405] तुलमुसलादिषु गुरुत्वतारतम्य-उत्क्षेपणतारतम्यदर्शनाद्गुरुत्वमपि कारणम्। *टी.न्या.कं*.पृ.६४२

[406] उत्क्षिपति वि (इ)त्यादिषु अनुवृत्तिव्यावृत्तिप्रत्यक्षवद् दृश्यत इति भाव:। *तत्रैव*,पृ.६४४

[407] *तत्रैव*,पृ. ६४६

[408] समानधर्माभावातपृथगभिधानस्य च जातिभेदनिश्चयहेतोर्भावादिति भाव:। *तत्रैव*,पृ.६४७

[409] *टी.न्या.कं*.पृ. ६४७

[410] *तत्रैव*,पृ. ६५७

[411] *टी.न्या.कं*. पृ. ६५८-६५९

कर्मसंतानस्योपरमो जायत इति वर्ण्यते[412]। १३.योगिप्राणकर्मवत् प्राणायामवेलायां प्राणकर्म: स्वेच्छया प्रेर्यते तथा च द्वेषजन्यप्राणक्रियाप्रेरणे'नासारन्ध्रेति' उदाहरणनिर्देश: कुसुमोद्गमकारेण क्रियते[413]। विशिष्टात्ममनस: संयोगो जीवनम्' इति कंदल्यां प्रोक्ते स्पष्टीक्रियते यत् उपभोजकस्य अदृष्टमेव उपग्रहस्य वैशिष्ट्यं विद्यते[414]। तत्र कर्मविनाशविषये कथ्यते यत् उपभोजकस्य अदृष्टमेव उपग्रहस्य वैशिष्ट्यं विद्यते। अनेन प्रकारेण कुसुमोद्गमकारेण सारग्रहणरूपकर्मप्रकरणं व्याख्यायत इति। १.यथा रूपादय: स्वसमानजातीयेन रसादिभि: सह तिष्ठन्ते; तद्वत् उत्क्षेपणादीनां न स्थिति: । २. अत एकस्मिन् समये द्रव्ये एकमेव कर्म विद्यत इति कथ्यते । ३. परस्परविरुद्धकर्मण अभावो द्रव्ये प्रत्यक्षप्रमाणेन एव विद्यते। कर्मोत्पादने गुरुत्वसंयोगप्रयत्नादीनां समुदितानामपि कारणत्वं वर्तते । तत्र सूच्यते यत् क्रिया दिग्विशेष एव जन्यते । ४. कर्मसु साक्षादेव प्रत्यक्षरूपेण अनुवृत्तिप्रत्ययो दृश्यत इति स्पष्टीक्रियते। निष्क्रमण -प्रवेशनादीनामेव केवलं न जातिसाङ्कर्यम् नालिकायां पतितपत्रादिषु भ्रमणप्रत्यय: आश्रयभेदाद् तथा च तत्र वायो: प्रवेश: अपेक्षाभेदाद् जायते । ५. कर्मण: उत्पत्ति इच्छाप्रयत्नादिमाध्यमेन जायते, तत्र आदिशब्देन वेगोऽपि निर्दिश्यते । चक्रं भ्रामयतु: दण्डस्य विगमे वेगसंस्कारविनाशात् कर्मसंतानस्योपरमो जायते । ६. योगिप्राणकर्मवत् प्राणायामवेलायां प्राणकर्म: स्वेच्छया प्रेर्यते, तथा च द्वेषजन्यप्राणक्रियाप्रेरणे नासारन्ध्रमाध्यमेन द्वेषकार्योऽपि उत्पाद्यते । ईश्वरस्य जगतो निमित्तकारणत्वसाधने असाधारणत्वजीवत्वं कथ्यते । धर्माधर्मयोर्माध्यमेन ऐहिकशरीरप्राप्तिर्भवति इति तयो: प्रयोजनम् । आमुष्मिकशरीरजन्य - सुखादय: प्रायशो दैशिका: विद्यन्ते । विभुकार्याणां तथा च तेषां समवायिकारणानाम् अनुरोधकारणात् नियम: संयोग: ऐहिकसुखस्य असमवायिकारणं विद्यते। आमुष्मिकशरीरेण सह संयुक्ते सति आत्ममनसो: संयोगोऽसमवायिकारणम् इति सम्बन्धानां स्पष्टीकरणं क्रियते । विषयाणां स्पष्टीकरणप्रसङ्गे दृष्टान्तरकल्पनापि अवलोक्यते । अनेन प्रकारेण ज्ञायते यत् यद्यपि वोम्मिदेवेन अस्मिन् प्रकरणे भाष्याद्यपेक्षया संक्षिप्ता चर्चा क्रियते,तथापि तत्र मुख्य-मुख्यबिन्दव एव चर्च्यन्ते। अनेनाचार्येण वैशेषिकदर्शने इतोऽपि नूतनो विषयो योजित: इति उपर्युक्तवर्णनदृशा कथयितुं शक्यते।

**४.कुसुमोद्गमटीकायां सामान्यपदार्थ:-**कुसुमोद्गमकारेण सामान्यस्य संक्षिप्ता व्याख्या प्रस्तूयते। परापरसामान्यविषये कथ्यते यत् एकस्मिन् व्यक्तौ समाविष्टस्य परापरयो: नियमेन परापरभावो भवति[415]इति कंदलीभावमेव स्पष्टीक्रियते। १.सर्वसामान्यं सर्वेषु वस्तुषु आकाशादिसामान्येन वर्तत इति मतं स्पष्ट्यते[416]भावोऽयं यत् आकाशादिवत् सामान्यस्य सर्वगतत्वं वर्तते २.सामान्यस्य यत् स्वाश्रयं तस्य भेदो मत्स्यसंयुक्तजलरूपाश्रयात् भिद्यते[417] । अतो भावार्थो अयं यत् भेदकारणात् मत्स्यविषयकं जलरूपाश्रयं न तस्य सामान्यमिति कुसुमोद्गमकारेण स्पष्टीक्रियते । ३.'अनेकभाजनगतफलानि' इतिवत् विशेषे अनुवृत्ति - प्रत्ययो न संभाव्यते, अर्थात् विशेषत्वे अनुमाने अयोग्यत्वं वर्तते। द्वित्वादिकमिति व्यासज्यवृते यदुल्लेख: तत्तु लक्षणसंगत्यर्थमेव विहितमिति। अन्यच्च अनेकवृत्तित्वे सति इति शब्दप्रयोगोऽपि लक्षणे

---

[412] यावत्संस्कारविनाशात्कर्मसंतानोपरम इत्यर्थ.1 *टी.न्या.कं.*पृ.६६१

[413] अत्र द्वेषोऽप्युपलक्ष्यते अतस्तस्य कर्मकारणत्वनुदाहरणे दर्शयति नासारन्ध्रेति। *तत्रैव*,पृ.६६२

[414] उपभोजकादृष्टोपग्रह एव वैशिष्ट्यम्। *तत्रैव*,पृ.६६४

[415] एकव्यक्तिसमाविष्टयोर्नियमेन परापरभाव इत्यादि व्या*(ख्या)*त*[मि]*-त्यर्थ.1 *टि.न्या,कं.*पृ.६६८

[416] आका*[शा]*दिसामान्येनेति शेष.1 *तत्रैव*,पृ.६६८

[417] *तत्रैव*,पृ.६६८

भ्रमनिवारणार्थमेव विहितमनेन सामान्यस्य एकस्वभावत्वं कथ्यते[418]। ४.अन्यच्च कंदल्यां सामान्यस्य स्वरूपानुगमप्रतीति: या कथ्यते तस्या: स्पष्टीकरणे कथ्यते यत् पूर्वप्रतीतिविषयस्य उत्तरप्रतीतिविषयेभ्यो अर्थसिद्धो भेद: तेन प्रतिपाद्यत इति अपौनरुक्त्यमेव इत्यत्र परप्रश्नस्य भाव: स्पष्टीक्रियते तथा च प्रमाणविषयकत्वमपि कथ्यते। यथोक्तं शिडिलवोम्मिदेवेन-"**पूर्वप्रतीतिविषयस्योत्तर प्रतीतिविषयादर्थ - सिद्धोऽभेदो तेन प्रतिपाद्यत इत्येतावताऽपौनरूक्त्यं परस्य प्रश्न इति प्रमाणविषय इति भाव:**"[419]। ५विशेषशब्दस्य गौणत्वं यत्र कंदल्यां कथितम्; तत्र कुसुमोद्गमकारेण कथ्यते यत् सामान्यविशेषयो: परस्परविरोधेन अन्यतरस्य गौणत्वम् अवश्यंभावि विद्यत इति निरूपयति तद्यथा- "**सामान्यविशेषयो: परस्परविरोधादन्यतरस्य गौणत्वमवश्यंभावि, तत्कतरदत्र गौणमिति प्रश्नार्थ:**"[420]। सामान्यस्य नित्यत्वविषये कथ्यते यत् सामान्यस्य नित्यत्वं तस्य विनाशकारणाभावात् भावरूपत्वाद् च विद्यते। द्रव्यादिषु अभेद- प्रतीतिकारणाद् तस्य नित्यत्वमिति कथ्यते। यथा च वर्णयति- "**भेदसाधकास्यानुवृत्तिप्रत्ययस्यानु कूलस्तर्क:-विनाशकारणाभावे सति भावरूपत्वान्नित्यत्वं तद्द्रव्याभेदेनोपपद्यत इत्यर्थ:**"[421]। अय:पिण्डस्यापि दृष्टान्त: तत्र दीयते। जातिव्यक्त्यो: असम्बद्धतया अनवस्थानकारणात् भेदनिराकरणं तत्र विधीयत इति। तयो: परस्परपरिहारेण नोपलम्भ:तथा च तत्रायुतसिद्धनाम्नो पाधिरपि विद्यत[422] इति निरूप्यते। कंदल्यां यत्र सौगतमतखण्डनं तत्र एकक्रियाकारित्वं सामान्यग्रहणे कारणत्वं यदा उक्तं तदा कंदल्यां दोहनादिकार्येषु दुग्धप्रदानेऽसमर्थानां गवां चर्चा क्रियते। तत्र कुसुमोद्गमकारेण 'वृषभ:' इत्यपि योज्यते[423]। कंदल्यामन्ते यत्र साररूपेण सामान्यस्य प्रवृत्तिनिमित्तत्वं लोकयात्रामाध्यमेन साध्यते तत्र कुसुमोद्गमकारेणापि कथ्यते यत् अपरिज्ञातसामर्थ्येन यदि सामान्यस्य अनङ्गीकार: क्रियते तर्हि तज्जातीयलिङ्गस्यानुसंधानं न कर्तुं शक्यते[424]अर्थात् भिन्नव्यक्तिषु एकाकाराप्रतीतिर्न जायत इति कथ्यते। सामान्यस्य एकस्वभावत्वं कथ्यते। अनेकभाजनगत फलानि' इतिवत् विशेषे अनुवृत्तिप्रत्ययो न संभाव्यते। द्वित्वादिषु सामान्यस्य लक्षणसंगतिकारणात् व्यासज्यवृत्ते: निषेध: क्रियते। सामान्यस्य नित्यत्वविषये कथ्यते यत् सामान्यस्य नित्यत्वं तस्य विनाशकारणाभावात् भावरूपत्वाद् च विद्यते। यादृशो विषय: तादृशी बुद्धि:,अत एकस्मिन् वस्तुनि तस्यैव परापरयो: भेदाभेदो न सामान्ये न विरुद्ध:,यतो हि सामान्यस्य परापररूपं यद् भेद: तस्मिन् कारणं तेषां न्यूनाधिकभावो विद्यत इति कुसुमोद्गमकारेण कंदलीकारतो भिन्ना कल्पना विहिता। सामान्ये एकक्रियाकारित्वयुक्ता: द्रव्यादयो न गृह्यन्ते; एवं सति अदुग्धप्रदात्र्य: गावो वृषभस्य च गोत्वसामान्ये न अन्तर्भाव:स्यादिति कथनस्याभिप्राय:। सामान्यविशेषयो: परस्परविरोधेन अन्यतरस्य गौणत्वम् अवश्यंभावि विद्यत इति प्रतिपाद्यते। यद्यपि कुसुमोद्गमकारेण कंदल्यां चर्चितानामन्यविषयाणामपि चर्चा क्रियते परञ्च पुनरुक्तिकारणात् नात्र लिख्यते।

---

[418] *तत्रैव*,पृ.६६८

[419] *टी.न्या.कं.*पृ.६६९

[420] *न्या.कं.प्र.पा.भा.*,पृ.६७१

[421] *तत्रैव*,पृ.६७२

[422] *तत्रैव*,पृ.६७५

[423] एकसर्थनिदोहनवहनादिलक्षणा एको हेतु: उ(वृ)षभादि:। *तत्रैव*,पृ.६७८

[424] *टी.न्या.कं.*पृ.६८३

**५.कुसुमोद्गम-टीकायां विशेषपदार्थनिरूपणम्-** कुसुमोद्गमकारेण संक्षिप्ता टीका विषयेऽस्मिन् प्रस्तूयते। पूर्वमाशंक्यते यत् 'अन्ते' इत्यस्य अर्थो विनाश:,तत्र तु निवृत्तकार्यावयवा एव विद्यन्ते तर्हि कथं तत्र विशेष इति प्रश्न:?[425]तत्र समाधानरूपेण तेषां विशेषाणां स्थिति उत्पादविनाशयोऽवसाने विद्यत[426]इति प्रतिपाद्यते। एतदनन्तरम् 'एकैकश:'इति कथनस्य प्रयोजनं सूच्यते यत् एकस्मिन् द्रव्ये नित्यमिति अर्थो स्वीक्रियते तर्हि तत्र एकस्मिन्नेव द्रव्ये अनेकविशेषस्वीकृतिप्रसङ्ग: स्याद्[427]इति प्रतिपादितम्। अत्यन्तव्यावृत्तिबद्धे हेतुत्वं कथनेन व्यासज्यवृत्तिरपि तत्र निषिद्ध्यते। तत्र वोम्मिदेव: लिखति- **"व्यासज्यवृत्तिरत्यंन्तव्यावृत्ति बुद्धिहेतव इति अनेनैव निषिद्धा"**[428] इति वोम्मिदेवेन सूच्यते। 'प्रत्येकमनुवर्तन्ते' इति शब्देन विशेषा: प्रत्येकमनुवर्तन्त नित्यतया च विद्यन्त[429] इति सूच्यते अर्थात् तेषां स्थिति: अनुवृत्ततया प्रत्येकेषु नित्यतया वर्तत इति स्पष्टीक्रियते। विशेषा: उत्पादविनाशयो: अन्तेऽवसाने च वर्तन्त इति साध्यते। विशेषाणां नित्यत्वं स्पष्टतया सूचितम्। इत्थंप्रकारेण सारग्राहिणी समस्ता शब्दकथनस्य प्रयोजनपूर्विका व्याख्या आचार्येण प्रस्तुता इति।

**६.कुसुमोद्गमटीकायां समवायपदार्थ:-** कुसुमोद्गमकारेण प्रकरणेऽस्मिन् समस्ता टीका प्रस्तूयते। कन्दल्यां चर्चितमुख्य-मुख्यबिन्दूनां चर्चा वोम्मिदेवेन विधीयते । १.समवायसम्बन्धे अवयवावयवि - भावविरहात् कार्यकारणभूतानां द्रव्यादीनाम् समवायसाधने अनियम: स्यादिति कुसुमोद्गमकारेण सूच्यते[430]। अत्र कारणत्वेन आत्मादीनि तथा च कार्यं बुद्ध्यादिरूपेण कंदल्यां कथ्यते । २.समवायसम्बन्धस्य वर्णने अयुतसिद्धसम्बन्धस्य वर्णनं तथा च 'संयोगस्य व्यावर्तकधर्मत्वं कथ्यते[431]। अत: अवयवावयविनोर्मध्ये परस्परं सम्बन्ध: संयोगो न वर्तत[432] इत्यस्मिन् विषये अनुमानवाक्यप्रयोगं प्रस्तौति तद्यथा-**"प्रयोगस्तु अवयवावयव्यादीनां परस्परसम्बन्ध: संयोगो न भवति। अयुतसिद्धसम्बन्धात्। न यदेवं न तदेवम्।** यथा दधिकुण्डयोरिति[433]४.समवायस्य नित्यत्वविषये कथ्यते यत् समवायो अभिव्यज्यते[434],अतो न तस्यानित्यत्वं यतो हि तत्र उत्पत्तिविरहो विद्यते। तत्र अयं व्यतिरेकप्रयोग त्वेनोच्यते । ५.समवायस्यैकत्वविषये एकत्वं प्रमाणरूपेण कथ्यते, अत: समवायोऽपि प्रमाणमिति निरूप्यते। अत्रापि अनुमानवाक्यप्रयोगं प्रदर्शयतियथा- **"एकत्वं प्रमाणविशेष:। प्रमाणं च समवाय एक:। अवांतरभेदलक्षणविरहित्वात्। सत्तावत्"।**

---

425 *तत्रैव*.पृ..६८४

426 *तत्रैव*,पृ.६८४

427 यद्येकस्मिन्नित्यमर्थ*:* स्यात्, तत् एकस्मिन्द्रव्येऽनेकविशेषा*:* प्रसज्येरन्नित्यत आह- एकैक इति। *तत्रैव*,पृ.६८४

428 *टी.न्या.कं.* पृ.६८४

429 नित्यतया वर्तन्त इत्यर्थ.1 टीकात्रयोपेता*(*न्यायकन्दली-मञ्जिका,टिप्पणम्.कुसुमोद्गम*:* च*)*,सं,जे.एस.जेटली,वसन्त-पारीखश्च, ओरियन्टल-इंस्टीट्यूट,वडोदरा,१९९१,पृ.६८६

430 *टी.न्या.कं*.पृ.६८८

431 संयोगाद् व्यावर्तकधर्म इति भाव.1 *तत्रैव*,पृ.६८८

432 साधारणतयाऽयमपि संयोगाद् व्यावर्तको धर्म इत्यर्थ.1 *तत्रैव*,पृ.६८९

433 टी.न्या.क.,पृ.६९०

434 अभिव्यंग्यत्वेनोत्पत्तिविरहादित्यर्थ.1 अत्रापि पूर्ववद् व्यतिरेकी प्रयोग*:* द्रष्टव्य.1 *तत्रैव*,पृ.६९०

[435]६.समवायसम्बन्धस्यानेकत्वे उपाधिभेदो आचार्येण अङ्गीकृतम्। यथा च लिखति- **"एकस्याप्युपाधिभेदाद्भेदकत्वमिति भाव:"**[436] । समवायसम्बन्धस्य वृत्तिमद्भावत्वेनावस्थिति:,यतो हि यो आद्यसम्बन्ध: स वृत्तियुक्तो जायते[437]। वृत्त्यन्यतरस्वीकरणे भेदाधिष्ठानत्वं विद्यत इति उररीकरोति तद्यथा- **"तस्यैकत्वादिति वृत्तिवृत्तिमद्भावस्य च भेदाभिष्ठानत्वादिति शेष:"**[438]। ७.वस्तूनामाधाराधेयाभावो वस्तुस्वभावकारणादपि अस्तीति कन्दलीभिन्नं प्रतिपाद्यते । ८.संयोगसम्बन्धस्यापि कार्यत्वेन सोपाधिकत्वं कथ्यते, संयोग: प्रत्यक्षप्रमाणत्वेन ज्ञातुं शक्यते परञ्च न समवाय:[439]। ९.समवायस्य विधिप्रत्ययविषयत्वं सूच्यते । तस्य बाह्येन्द्रियासम्बद्धत्वं तथा च सम्बन्धान्तरमाध्यमेन इन्द्रियासम्बद्धत्वं वर्तते। इन्द्रियजिज्ञास्यानुव्यवसायत्वात् समवायज्ञानं जायते तर्हि किमर्थं तत्र अनुमानकल्पना क्रियत इति विषयं दर्शयन् अनुमानप्रयोगं प्रस्तौति-उक्तं च**"विधिप्रत्ययविषयत्वे सति संयोगसमवाययोरन्यतरेणापि सम्बन्धेन इन्द्रियासंबद्धत्वात्। व्यवहितविप्रकृष्टत्ववदिति। इन्द्रियजिज्ञास्य इच्छयाऽनुव्यवसाय संभवात्तस्य सदसत्तयोरनुव्यवसायसदसत्त्वे एवं प्रमाणं किमर्थ[म]नुमानो -पन्यास इत्यर्थ:"**[440]। अन्यच्च कंदलीवदेव भेदवृत्तियुक्तवस्तूनि पृथग्भावस्य अनवबोधाद् उपश्लेष:, नियतं पारतन्त्र्यं च समवायस्वरूपविवेचने निरूप्यन्ते[441]अर्थात् समवायसम्बन्धेन नियतं पारतन्त्र्यमुपपाद्यत इति कुसुमोद्गमकारेण विविक्तम्। एतदनन्तरं कुसुमोद्गमकारेणापि श्लोकमाध्यमेन स्वस्य परिचयं दीयते। समवायस्य नित्यत्वविषये कथ्यते यत् समवायो अभिव्यज्यते। अतो न तस्या नित्यत्वं यतो हि तत्र उत्पत्तिविरहो विद्यते। समवायस्यैकत्वसाधनविषये कथ्यते यत् एकत्वं प्रमाणरूपेण वर्तते,अत: समवायोऽपि प्रमाणमिति निरूप्यते। सत्तावत् सामान्यस्य अपि भेदा: न वर्तन्ते। समवायसम्बन्धेन नियतं पारतन्त्र्यमुत्पाद्यते। अनुमानवाक्य प्रयोगदृशा शिडिलवोम्मिदेवेन विषयाणां विवेचनं विश्लेषणं स्पष्टीकरणं च प्रदर्श्यते। 'भाष्यलक्षणपरं द्रष्टव्यम्','प्रपंच परं भाष्यमुपादाय' इत्यादिवाक्यानां साहाय्येन भाष्यमपि उद्ध्रियते। इत्थं प्रकारेण नातिविशदा, नातिस्वल्पा च व्याख्या प्रस्तूयते ।

---

[435] *तत्रैव* पृ.६९२

[436] *तत्रैव*, पृ.६९२

[437] यो आद्य: सम्बन्ध: स: सर्वोवृत्तिमान्, यथा संयोग इति व्याप्ति: कार्यत्वेन सोपाधिकेत्याह कृतको हीति। *टी.न्या.कं.*पृ.६९५

[438] *टी.न्या.कं.* पृ. ६९५

[439] संयोगविषयं ज्ञानं प्रत्यक्षतयाऽनुव्यवसीयते। *तत्रैव*,पृ.६९६

[440] *तत्रैव*,पृ.६९६

[441] *तत्रैव*,पृ.६९६

# उपसंहारः

## उपसंहार:-

भारतीयदर्शने वैशेषिकदर्शनस्य अन्यतमं स्थानं वर्तते । कुसुमोद्गमटीकापि अस्यामेव परम्परायामन्तभूता वर्तते । प्रस्तुतलघुशोधप्रबन्धेऽस्मिन् प्रथमाध्याये वैशेषिकदर्शनस्य परम्परा चर्चिता वर्तते । अध्यायेऽस्मिन् वैशेषिकसूत्राणामुपरि ये केऽपि व्याख्यानभूता: ग्रन्था: भाष्यटीकाप्रभृतय: ते वर्ण्यन्ते । शोधार्थिन्या: दृष्टौ वैशेषिकसूत्रस्योपरि पुरातनकाले वर्तमानासु संस्कृतव्याख्यासु सप्तदश भाष्यप्रभृतय:, तथा च आधुनिककाले प्रचलिता: सप्तसंख्यका: संस्कृतव्याख्या: अद्यावधि उल्लेखेषु प्रकाशितग्रन्थेषु च प्राप्यन्ते । हिन्द्यां प्रचलितासु वैशेषिकसूत्रस्य व्याख्याप्रभृतिषु न्यूनातिन्यूनं षड्व्याख्या एव शोधार्थिन्या दृष्टौ समागता । वैशेषिकसूत्रस्योपरि विद्यमानानाम् एतासां व्याख्यानां यद्यपि स्वस्वमाहात्म्यं परञ्च प्रकाशितगन्थेषु प्रशस्तपादकृतस्य चतुर्थशताब्दस्य प्रशस्तपादभाष्यस्य माहात्म्यं तस्य टीकोपटीकामाध्यमेन तथा च सुसम्बद्धरीत्या विषयप्रतिपादनदृशा वर्तत इति कथयितुं शक्यते ।

द्वितीयाध्याये प्रशस्तपादभाष्यस्य उपलब्धानुपलब्धपाण्डुलिपिरूपे प्राप्तानां त्रयोदशटीकानाम् वर्णनं समयादिकपरिचयेन सह क्रियते । अध्यायस्य अन्ते शोधदृष्ट्या अभीष्टाया: श्रीधराचार्येण रचिताया: दशमशताब्दस्य न्यायकन्दल्या: संस्करणानि परिचयादिकं च दत्तं वर्तते । प्रशस्तपादस्य प्रकाशितटीकानां किरणावलीप्रभृतीनां संस्करणानि चापि तत्र लिख्यन्ते ।

तृतीयाध्याये न्यायकन्दल्या: पञ्चटीकानां कालसम्बद्धपरिचयादिकं वर्ण्यते । एतासु टीकाद्वयं पञ्जिका, न्यायकन्दलीप्रकाशश्च राजशेखरेण लिखिता । पद्मनाभेन न्यायकन्दलीसार:, नरचन्द्रसूरिणा टिप्पणम्, तथा च शिडिलवोम्मिदेवेन कुसुमोद्गम-टीका रचिता । शोधकार्ये अभीष्टटीकाकर्तु: शिडिलवोम्मिदेवस्य कालस्य न कापि सूचना प्राप्यते ।

**चतुर्थे पञ्चमे च अध्याये आगता: बिन्दव:, ये कुसुमोद्गमकारेण कंदलीकारतो भिन्नरूपेण निरूप्यन्ते ते अधो विषयानुक्रमेण विलिख्यन्ते-**

**१.मङ्गलाचरणम्-** १.मङ्गलाचरणप्रवृत्ति: काकदन्तपरीक्षावत् न निष्प्रयोजना । मङ्लाचरणे मुने: नमस्कारप्रसङ्गे तस्य आहारविषयिण्यां चर्चायाम् आहारप्रतिपादनं न अभीष्टम्, अपितु आहारविशेष -प्रतिपादनं मुनिवैशिष्ट्यार्थं विघ्नोपशमार्थं च कथ्यते । विशिष्टव्याख्येयविषयद्वारा व्याख्यानस्य वैशिष्ट्य -ख्यापनार्थमपि नमस्कारो विधीयते। ईश्वरप्रणामस्य अवधिसत्त्वेऽपि मङ्गलाचरणे शिष्यबुद्धिवैशद्याय अपि मङ्गलाचरणं कर्तव्यम् । ईश्वरसिद्धौ तत्र लोकप्रसिद्धिरेव कारणत्वेनाङ्गीक्रियते । जगच्छब्द: कार्यवर्गपरत वर्तते, यतो हि तत्र अन्यकारणस्यापेक्षा न वर्तते । अन्यच्च विघ्नोपशमार्थे ग्रन्थसमाप्त्यर्थं नमस्कार: कंदलीकारवदेवाङ्गीक्रियते ।

**तमसोऽतिरिक्तद्रव्यचर्चा-** तमसो मध्यमपरिमाणत्वं निराक्रियते । अन्धकारस्य न प्रतियोगिरूपे प्रतीति: । २. न केवलं दिने अपितु रात्रौ अपि तम अवश्यं प्रतिसंधातव्यम्; अनेन दिनालोकस्मरणनेनैव अर्थसिद्धि -र्भविष्यतीत्यस्य निराकरणं क्रियते । ३. नीलं तम: इति व्यवहारसिद्ध्यर्थं 'आलोकाभाव: तम' इति मन्यमानां रूपारोपो एष्टव्य: । ४.आलोकसहकृतचक्षुसामर्थ्यं हि तमप्रतीतौ सहायकमिति सर्वजनप्रसिद्धि: । ५. 'नीलं तम:' इति प्रतीति सामानाधिकरणा प्रतीतिर्वर्तते । नीलरूपस्य तमसि आरोपविषये कथ्यते यत् एकम् एव

वस्तु सत्यपि अदृष्टमहिम्ना धर्मधर्मिणो भेदे आक्रान्तरूपे आरोप्यते । आलोकाभावे शौक्ल्याभावरूप-सादृश्यनिमित्तस्य नीलपीतादिसाधारणधर्मे यन्नीलिमाप्रतीतिरूपारोप: तत्सादृश्यनिमित्तकारणस्य अनुसरणादेव जायते । मुख्यसिद्धान्ते कंदलीकारेण सह न भेद: अर्थात् तेजसोऽभाव नीलरूपस्य प्रतीति: । अनेन प्रकारेण न तस्य पृथग्द्रव्यत्वम् । ६. एतदनन्तरं शक्तेरपि पृथग्द्रव्यत्वं निराक्रियते, नैतत् श्रीधरेण वर्ण्यते ।

**२.पदार्थानामुद्देश प्रकरणम्-** अत्र कुसुमोद्गमटीकायाम् एकैकश: पदार्थाभिधानस्य चर्चा विहिता वर्तते । एवं कन्दलीकारत: किञ्चिद् भिन्नं प्रतिपाद्यते । प्रधानज्ञानमप्रधानस्य हेतु: अत: प्रथमं द्रव्यस्याभिधानम् । क्लिष्टबुद्धे: सामर्थ्यं बहु कथ्यते, अतो गुणानां संख्याबाहुल्यात् कर्मण: पूर्वमभिधानम्, कर्म अल्पविषयं एतत्तु अक्लिष्टबुद्धिनापि ज्ञातुं शक्यते । सामान्यस्य द्रव्यादित्रिकवृत्ति:, कर्मान्विति तस्योपलक्षणम्, विशेषस्य त्रि - भ्योऽपकर्ष: । समवायविषये पञ्चपदार्थवृत्तित्वात् अन्तेऽभिधानं कृतमित्यस्मिन् कन्दलीकारमतमेवानुस्रियते । सप्तमपदार्थत्वेन अभावस्यापि चर्चा क्रियते । १.द्रव्यादीनाम्, उत्पत्तिविनाशयो: प्राक्प्रध्वंसाभाव: तथा च तेषां वैधर्म्यप्रतिपादने इतरेतरात्यन्ताभाव: कथ्यते तर्हि अभावस्य निर्देश: कथं न कृतम् इति आक्षेप: क्रियते । अस्य प्रत्युत्तरे कथ्यते यत् शिष्यानामूहाशक्त्यादीनाम् अत्र अधिकारो न विद्यत इति तु अभावस्यानुद्देशेनैव स्पष्टीक्रियते । २. संयोगादीनां कथमुद्देश: इति प्रश्नस्योत्तरे कारणस्याभावो कथ्यते । अन्यच्च निरङ्कुशतया आचार्यस्य विपर्ययशंकावकाशो न विद्यत इत्यपि समाधीयते । भावपारतन्त्र्यमपि अनुद्देशस्य कारणत्वेन कथ्यते । चर्चेयं श्रीधराचार्येण न विधीयते ।

**३.पदार्थानां साधर्म्य-वैधर्म्यम्-** षट्पदार्थानां साधर्म्यप्रतिपादने वस्तुन: स्वरूपं विधिप्रत्ययविषयत्वेन अङ्गीक्रियते । एकमेव वस्तूपाधिभेदाद् 'पिता पुत्रवत् यथा भिन्नव्यवहारविषय: तथैव अभिधेयत्वज्ञेयत्वयो: परस्परं भेद:।

३.१.धर्माधर्मयो: कारणत्वं वस्तुनि कार्ये वा कुत्रचिद् स्वशक्त्या, कुत्रचिद् कार्यान्वितिरूपेण अन्वयीक्रियते । ३.२.क्षितितेजसो: साधर्म्यप्रतिपादने सुवर्णस्य तैजसत्वं 'तेजो हिरण्यमेव' इति श्रुतिप्रमाणेन साध्यते । सुवर्णस्य अनुच्छिन्नं द्रवत्वम्। तत्र कथ्यते यत् यद्यपि सुवर्णस्य तैजस्त्वात् भास्वरत्वं परञ्च द्रव्यान्तरसंसर्गात् न परिलक्ष्यते । तत्र पीतिमाया: अनुपपत्तिर्विद्यते । तस्य रूपं न पार्थिवम् । श्रुतिसिद्धसुवर्णस्य पृथग्रूपेण दशमद्रव्यशंकापि न करणीया। अनेन ज्ञायते यत् श्रुत्यनादरो वोम्मिदेवेन नाभीष्ट: । ३.३.क्रियावेगयो: परस्परभिन्नत्वे चन्दनगन्धवत्, शीघ्रगतौ वेगव्यवहाररूपप्रत्यक्षं प्रत्यक्षप्रमाणत्वेन अङ्गीक्रियते । श्रीधराचार्य: तत्र लोकप्रसिद्धिं कारणतया वक्ति ।

३.४. कंदलीकारेण पदार्थानां साधर्म्यं निर्दिश्यते। कुसुमोद्गमकारेण तत्र इतोऽपि साधर्म्य-वैधर्म्यकल्पना क्रियते- १.अबादीनामगन्धवत्वम्, २.अनिलादीनामरसवत्त्वं गुरुत्वम् च, ३.अनिलादीनामरूपवत्त्वम् ४.प्रत्यक्षादिसाधर्म्यम् अनुवृत्ते: तत्र पृथक्तया प्रोक्तम् । तत्र वैधर्म्यं वोम्मिदेवेन निर्दिश्यते - यद्यपि गुरुत्वं हृद: साधर्म्यं परञ्च अनेन तेजप्रभृते: वैधर्म्यं संपाद्यते। अनेन प्रकारेण कंदलीकारतो व्यतिरिक्ता, वैशेषिकदर्शनस्य ज्ञानम् अग्रेसारणीयापि कल्पना वोम्मिदेवेन क्रियते ।

**पृथिवीद्रव्यम्-** अधिकारिविषयिण्या: चर्चा पृथिवीद्रव्यनिरूपणे क्रियते-१. वस्तुन: लक्ष्यलक्षणं स्वरूपतो जानन्नपि विशेषजिज्ञासा येन क्रियते स: प्रथमो जिज्ञासु: । २. इतरभेदव्यवच्छेदमात्रं येन इष्यते तादृशो

द्वितीयो जिज्ञासुः । श्रीधराचार्येण प्रकरणेऽस्मिन् अप्रतिपन्नस्य बालमूकादीनां च अधिकारित्वं खण्ड्यते । १.गुणविनिवेशाधिकारे रूपरसगन्धस्पर्शाः श्रीधरेण प्रतिपादिताः तत्र वोम्मिदेवेन कथ्यते यत् एते प्रत्यक्ष -मात्रेण अत्र प्रतिपादिता इति । २.कदलीफलवत् स्फटिकेऽपि गन्धवत्वं अनुमानप्रमाणेन प्रतिपादितम् । ३.पृथिव्यां रूपस्यासाधारणत्वं गन्धसाहचर्येणैव साध्यते । ४. भोक्तुः भोगस्य हेतुः संयोगाधिकरणम् अन्त्या -वयविशरीरमिति लक्षणं कथ्यते । योनिजशरीरप्रसङ्गे कथ्यते यत् विषयरूपेण शरीरग्रहणं निकृष्टं लक्षणं वर्तते । सुकुमारप्रतीतिकारणाद् हर्षोत्पत्तौ तस्य कारणत्वं विषयरूपेण स्वीकर्तुं शक्यत इति निरूप्यते । ४.शरीरनिर्माणप्रक्रिया या कंदलीकारेण उक्ता तत्र कथ्यते यत् शरीरनिर्माणे प्रक्रिया अपेक्षणीया, अन्यथा नरबीजात् वानरजन्मप्रसङ्गः । योनिजशरीरेषु जरायुजशरीरिणां गणनायां गवादीनां यत्र गणना, तत्र मार्जारमूषाकादीनाम् उभयचारिणाः परिगण्यन्ते । अयोनिजशरीरेषु क्षुद्रजन्तूशरीराणां नारकित्वं नरक -लक्षणत्वं च कथयति । **घ्राणेन्द्रियम्-** कुसुमोद्गमकारेण 'अतीन्द्रिय' इति शब्देन घ्राणस्य अतीन्द्रियत्वं च सूच्यते । एतस्य सृष्टेः उपभोजकत्वस्य च अदृष्टकारित्वं कथ्यते अर्थात् घ्राणस्य उपभोगेऽपि अदृष्टमेव कारणं वर्तते । न्यायकंदल्यां न वर्तत इयं चर्चा ।

**जलद्रव्यम्-** जलस्य कटुकादिभ्यो विलक्षणरसत्वं वोम्मिदेवेन ओदनसाधारणस्य अव्यक्तमधुरतावत् निर्दि -श्यते अर्थात् ओदनवत् जलस्य अव्यक्तमाधुर्यं वर्तते । मधुरस्य अवान्तरतारतम्यं प्रतिपाद्यते । जलस्याभावे इक्षुजलाद्रार्दिषु माधुर्यं न स्यात्, अतो जले स्निग्धत्वं स्नेहगुणश्च विद्यते । **इन्द्रियम्-** वोम्मिदेवेन भाष्यकारात् भिन्नप्रतिपादनेच्छया 'विजात्य' इत्यत्र 'वि'प्रत्ययस्याभावोऽपि सूच्यते । अत्र समासान्तर -माध्यमेन जात्यनभिभूतत्वमपि जलस्य सूच्यते । आदरपूर्वकं वोम्मिदेवेन प्रशस्तपादभाष्यादितरकल्पना क्रियते । तत्रोच्यते यत् प्रशस्तदेवस्य शिष्टतया जातिद्रव्यानभिभूतैः इन्द्रियं निर्मीयत इति संकेत्यते । रसनेन्द्रिये रसोत्पत्तेः अभावो वाताद्युपहितरसनेन्द्रियेणः कार्यत इत्युच्यते । चर्चेयं न वर्तते कंदल्याम् ।

**तेजद्रव्यम्-** तेजसि गुणचर्चायां रूपे भास्वरत्वम्, स्पर्शे उष्णस्पर्शत्वं च सहचरितम् इति वोम्मिदेवेन तेजसो वैधर्म्यं निरूप्यते । स्पर्शः तेजस्तयापि अनुमातुं शक्यत इति प्रतिपाद्यते । सुवर्णस्य तैजस्त्वे कंदलीकारवदेव आगमप्रमाणमङ्गीक्रियते। ।

**वायुद्रव्यम्-** त्वगिन्द्रियस्य त्वचि स्थितिः आधेयरूपे लक्षणावृत्त्या स्पष्टरूपेण कंदलीकारवदेव तत्र निर्दिश्यते। २. त्वचः अधिष्ठानत्वं लौकिकप्रमाणेन तत्र इन्द्रिये वर्तत इत्यपि वोम्मिदेवेन सूच्यते । रूपादीनां स्पर्शप्रत्यक्षेण त्वगिन्द्रियसत्त्वं श्रीधराचार्येण मन्यते । ३.समानजवयोर्वाय्वोः परस्परगति-प्रतिबन्धकहेतुना सम्मूर्छन्नेन वायोः नानात्वमनुमीयते परञ्च एकदिशोर्मध्ये यत् वायुसंयोगः, तस्य स्थितिः सर्पकुण्डलावयवानामिव जायत इति वोम्मिदेवेन निरूप्यते ।

**सृष्टिप्रक्रिया-** १.आत्मनः अदृष्टपरमाणुभिः सह समवायसम्बन्ध इति निर्दिश्यते,कंदलीकारेण न क्रियते । सृष्टिकाले पवनपरमाणुषु यत्संयोगो जायते तस्मिन् आगमप्रमाणं दृष्टव्यमिति कंदलीभिन्नम् अर्थात् सृष्टिकाले महद्वायोः यदुत्पत्तिः तं पवनपरमाणुसंयोगः आगमप्रमाणाद् ज्ञातव्यमिति। २.स्वार्थविहीना ईश्वरेण जीवानां भोगभूतये करुणया सृष्टिः विहिता, तत्र यत् कारुणिकत्वं ततु भक्तिश्रद्धातिशययुक्तमेव वर्तते । एतद् वचनं तु परमार्थतत्कारणस्वभावानुरोधि वर्तते; अन्यथा कारुण्यादेव अपवर्गसंपादनप्रसक्तिः स्यादिति भिन्नः तर्कः।

**ईश्वरसिद्धि:-**' ईश्वरसिद्धौ' वोम्मिदेवेन अनुमानेन सह **'द्यावाभूमीं जनयन् देव एक:'** **इति श्रुत्या** आगमप्रमाणमपि ददाति । कंदल्याम् उभयो: निर्देशमात्रं विहितं, तत्र केवलमनुमानप्रमाणमेव वर्ण्यते । प्रकरणस्यान्ते **'नित्योऽसंसारी भगवानीश्वरः सिद्ध:' इति लिखति ।**

**आकाश:-** शब्दस्य यत्र वायुगुणत्वं स्वीक्रियते तत्र कथ्यते यत् श्रोत्रस्य वायुगुणत्वस्वीकारे श्रोत्रे वायुत्वप्रसक्तिः ,स्पर्शग्राहकत्वमपि तत्र प्रसज्येत,अतो न वायवीयं श्रोत्रम् इति प्रतिपादयति । तर्कोऽयं कंदलीकारेण न प्रस्तूयते । २.इन्द्रियस्य चर्चायां श्रोत्रे ये बाधिर्यादयो विकारा: प्रमातुः अदृष्टत्वादिकदोषकारणाद् दृश्यन्ते, तेषां निवारणं चिकित्सापद्धत्या कर्तुं शक्यत इति कुसुमोद्गमकारस्य नूतनोद्भावना वर्तत इति ।

**कालद्रव्यम्:-** जगतो निमित्तकारणत्वरूपेण कालस्य स्पष्टतया निर्देश: अत्र प्राप्यते । सर्वेषां कार्याणामिति शब्दनिर्देशेन कंदल्यां कालस्य जगत्प्रतिनिमितकारणत्वमुक्तम् । २. कालस्य प्रतीति: दिग्विशिष्टा एव वर्तते । २.कालगणनायां क्षणस्य विषये कथ्यते यत् 'उत्पन्ने कर्मणि यावन्न विभागस्तावान् कालः क्षणः इत्यर्थ:' अर्थात् नाश: क्षण एव जायते । ३.तपनपरिस्पन्दयो: दृष्टान्तरमाध्यमेन संपूर्ण कालविवरणं कंदलीकारवदेव प्रस्तूयते । ४.कालस्य कथं विशिष्टबुद्धिरिति विषये कथ्यते यत् विशेषणज्ञानानन्तरं विशिष्टप्रत्ययो जायते तेनैव इतरेतराश्रयद्वारा विशेषणमनुमीयत इति निरूप्यते । लौकिकानां तपनपरिस्पन्दनभेदानां विशिष्टतयैव । तस्य व्यापकत्वं तु परममहत्त्वं विना न संभवतीति प्रतिपादितम् ।

**दिग्द्रव्यम्-** १.दिग्विषये वोम्मिदेवेन प्रस्तुतं यत् यद्यपि ग्रीष्मात्पूर्वं वसन्तस्यावधित्वं दृश्यते तथापि दक्षिणोत्तरप्रभृतिषु प्रत्ययेष्वेव अवधित्वम् अन्वयव्यतिरेकेण साध्यत इति पृथग्रीत्या विषय: प्रतिपादित: । एतदनन्तरं कथ्यते यत् अनवच्छिन्नपरिमाणे अवधित्वं न वर्तते अर्थात् अनवच्छिन्नपरिमाणयुक्तद्रव्येषु अमूर्तद्रव्येषु परापरप्रतीतयो: न विद्यन्ते । केवलं मूर्तद्रव्यावधिकृतत्वेन न पूर्वापरप्रतीतिः,अन्यथा घटादि - प्रत्ययवत् साधारणत्वप्रसङ्ग:समापतेत; २.भिन्न-भिन्नदेशानां संयोगाधारेण यत्र दिश: कंदलीकारेण उच्यन्ते तत्र वोम्मिदेवेन सूर्यमपेक्ष्य पृथिव्याः अधोभागत्वं तथा च पृथिवीमपेक्ष्य सूर्यस्य नक्षत्राणां च उर्ध्वत्वं निर्दिश्यते । इयं अग्रेसारणीया कल्पना अर्थात् कंदलीकारभिन्नं वोम्मिदेवेन प्रस्तुतेति प्रतिपादितम् । उर्ध्वा - धरप्रतीतिविषयेऽपि उक्तं यत् एता: प्रतीतय: सूर्यपृथिव्यो: परस्परापेक्षया जायन्त इति ।

**आत्मद्रव्यम्-** १.आत्मनः प्रत्यक्षत्वव्यवहारे वृद्धव्यवहारोऽपि आत्मसंज्ञायामभिधीयत इति प्रतिपाद्यते अर्थात् आत्मनः 'आत्मा' इति संज्ञाकरणे वृद्धव्यवहारोऽपि अपेक्ष्यत इति कन्दलीकारात् भिन्नं प्रतिपादितं तत्र अनुमानप्रमाणं दीयते । २.शरीरेन्द्रियमनसां यत्र चैतन्यं निराक्रियते तत्र चार्वाकनिरास: कृतमिति कुसुमो - द्गमकारेणोच्यते । ३. कार्योत्पादने सहकारिकारणत्वप्रसङ्गे कन्दलीकारेण प्रतिपादितं यत् सहकारिकारणै: अतिशयमुत्पाद्यते । तत्र वोम्मिदेवेनोच्यते यत् सहकारिकारणत्वस्याभिप्रायो मिलित्वा कार्यकरणं विद्यते न तु अतिशयोत्पादनत्वमिति निरूप्यते । अतिशयोत्पादने तु अनवस्था स्यात् इति लिख्यते ।

**मनोद्रव्यम्-**१.एकमेव वस्तु कार्यं कारणं च न भवितुमर्हति इत्यत्र विज्ञानस्य प्रकाशकत्वे सत्यपि सुखादिभ्यो तस्य भेदादेव करणतया मनसःसिद्धि तत्र जायत इति नूतनं प्रतिपाद्यते । **२.परिमाणम्**–मनसः परिमाणचर्चायां मनसः परमाणुवद् प्रयोगेण अविभुत्वं निरूप्यते । २.अन्यच्च वोम्मि -

देवेनोच्यते यत् विभुद्रव्ययो: संयोग:,अज:संयोगो न वक्तुं शक्यते । अतो न मनसः विभुत्वमिति भावः । ३.अन्यच्च कथ्यते यत् केवलं अस्पर्शमाध्यमेन अमूर्तत्वं न अनुमातव्यम्, अनेन परत्वापरत्वावेगानाम् अनुमान -मुच्छिद्यत इति शंकानिराकरणाय भाष्यपठननिर्देशः अर्थात् यथावश्यकं भाष्यकारकथनमपि योज्यते।

**गुणानां साधर्म्य-वैधर्म्यम्-**१.कुसुमोद्गमे संयोगजगुणानां निरूपणप्रसङ्गे तूलपरिमाणे समानसंख्या - परिमाणैः अवयवैः समारब्धे द्रव्ये सजातीयपरिमाणस्य अपेक्षाधिकपरिमाणस्योपलक्षणत्वं वर्तते, अतः तत्र शिथिलसंयोगस्य उपलक्षणत्वं कथ्यते । २. संयोगजसंयोगरूपेण 'प्रचय' इति भिन्नरूपेण प्रतिपादितम् । २.कुसुमोद्गमे समानजातीयारम्भकगुणानां निरूपणप्रसङ्गे समानजात्यारम्भके संग्रहनिमित्ते स्नेहस्यापि कथनं विहितं वोम्मिदेवेन । स्नेहस्य समानजातीयारम्भकत्वे कथ्यते यत् 'संग्रहकरणे' स्नेहगुणप्रयोग इति । ३.कुसुमोद्गमे उभयजातीयारम्भकगुणानां निरूपणप्रसङ्गे ज्ञानात् ज्ञानस्योत्पत्तौ उक्तं लिङ्गज्ञानात् लिङ्गि -ज्ञानमिति । २. स्नेहगुणस्यापि कथनं स्यादिति वोम्मिदेवेन वैभिन्र्यं प्रतिपादितम् । स्नेहे अवयवस्नेहाद् अवयविस्नेहोऽवलोक्यते; अत: सङ्ग्रहकार्यारम्भेऽपि सजातीयरूपेणोत्पादकत्वकथनेऽपि स्नेहे न विरोध इति । ज्ञानादीनाम् असमवायिकारणरूपेण न सुखादयो वर्तन्ते, तत्र धर्माधर्मौ श्रुतिस्मृतिरपि निमित्तरूपेण कारण -त्वरूपेण प्रदर्श्यन्ते । एवं प्रकारेण कंदलीकारतो व्यतिरिक्ता सिद्धान्तस्य अग्रेसारणीया कल्पनापि विधीयते।

**रसगुण:-**न्यायकंदल्यां यत्र जीवनारोग्यप्रभृतीनां वृद्धिरूपेण रसस्य निमित्तत्वं कथ्यते, तत्र कुसुमोद्गमकारेण तद्विपर्यये मरण-कार्श्य-बल-हानि-रोगेषु अपि रसस्यैव निमित्तत्वं निरूप्यते ।

**गन्धगुण:-** अत्र गन्धभेदविषयकं किञ्चिद् निरूप्यते । असुरभिगन्धः केवलं सुरभेः अभावमात्रमेव न विद्यते अपितु असुरभिगन्धे सुरभेः विपरीतभावो वर्तते । अन्यच्च गन्धगुणस्य गणना विशेषगुणेषु क्रियते ।

**पाकजप्रक्रिया-** कुसुमोद्गमकारेण 'अत्रेति' इति कंदल्या: शब्देन निर्देशं कृत्वा एकादशक्षणपर्यन्ताया: पाकजप्रक्रियाया: परिशुद्धि: कथ्यते । तत्र वोम्मिदेवेन पाकजप्रक्रिया संक्षिप्य क्षणगणनामाध्यमेन नवक्षणा वर्ण्यते । तत्रैव समस्तरीत्या नवमस्य दशमस्य च क्षणस्य चर्चापि विधीयते ।

२.नवम प्रक्रमेण रक्तादीनामुत्पत्तिर्जायते अर्थात् इयं नवक्षणप्रक्रिया विद्यते । तत्र क्षणगणना तत्तत् सहभावेन विहितकार्याणां क्रियते । एतदनन्तरमाचार्येण एतस्या: प्रक्रियाया: परिशुद्धि: संक्षिप्तीकरणं च शिष्यबुद्धि - वैशद्याय विधीयत इति कंदलीकारतो भिन्नं योज्यते । तत्र प्रक्रियायां क्षणगणनापि न विहिता विद्यते ।

**संख्यागुण:-** १. एकादिव्यवहारेण गणनामात्रमेव विवक्ष्यते । २.समुदायस्य स्वरूपासिद्धिकारणात् गणनाहेतो: एकस्य एकत्वादिपरार्धपर्यन्तं सर्वसंख्यासाधारणत्वं कथ्यत इति कुसुमोद्गमकारेण स्पष्टीक्रियते । २.अनेकद्रव्यबुद्धौ एकत्वानाम् असमवायिकारणत्वं तथा च अनैकत्वविषयिण्या बुद्ध्या: निमित्तकारणत्वं सम्बन्धनिर्देशपूर्वकं प्रतिपाद्यते । ३.अपेक्षाबुद्धिविनाशस्य सद्भावे गण्यमानाया: उत्तरोत्तरसंख्यया पूर्व - संख्याया: अनुपलम्भ: प्रत्यक्षसिद्धमिति कथ्यते । ४. सहोपलम्भनियमे सहशब्दस्य अर्थद्वयं साहाय्यं यौगपद्यं च सूच्यते । ५.एकत्वं सामान्यज्ञानं वर्तते । क्षणत: पञ्चमक्षणपर्यन्तम् अपेक्षाबुद्धे: नाश जायत इति कुसुमो - द्गमकारेण क्षणगणना संक्षेपत: सूच्यते । अवयवे कार्योत्पत्तिदृशा या प्रक्रिया तत्र चतुर्थे क्षणे भवता द्रव्य - नाशेन अपेक्षाबुद्धिनाशस्य समकालमेव द्वित्वस्य नाशो जायत इति संक्षिप्य वर्ण्यते अर्थात् अत्र वोम्मिदेवेन नाशादिकालगणना क्रियते; सा कंदलीकारेण न विहिता वर्तते ।

**परिमाणगुण: –**१.परिमाणगुणे परममहत्परिमाणे शास्त्रप्रमाणत्वं विद्यते। २. महत्त्वाद् भिन्नस्य परम - शब्दस्य सिद्धौ शास्त्रसिद्धिप्रमाणं स्वीक्रियत इति कंदलीकारात् भिन्नं प्रतिपाद्यते। ३.पारिमाण्डल्यशब्दस्य पङ्कजातिशब्दवत् योगरूढित्वं विद्यत इति कन्दलीमतमेव स्पष्टीक्रियते। ४. त्रित्वस्य उत्पत्तौ कथ्यते यत् यद्यपीश्वरबुद्धेः सर्वविषयत्वात्रीण्येवैकत्वानि समाहृत्य न विषयीक्रियन्ते परञ्च द्वयणुकोत्पादकस्य अदृष्टसहकारितया त्रित्वानुकूलापेक्षाबुद्धिसाहाय्येन जायते। ५.व्यापकमहत्त्वे परिमाणगुणोत्पादने संख्या - कारकत्वमपि कुसुमोद्गमकारेण परिशेषरूपेण सूच्यते। ६.अणुत्वमहत्त्वयोर्व्यवहारे कथ्यते यत् नैतेषां स्वाभाविकत्वमपितु काल्पनिकत्वमेव विद्यत इत्यर्थः परममहत्परिमाणे शास्त्रप्रमाणत्वं कथ्यते।

**पृथक्त्वम्-** पृथक्त्वस्य पदार्थेषु व्यतिरेकः वोम्मिदेवेन स्पष्टीक्रियते। एकस्मिन्नेव द्रव्ये वृत्तित्वात् सामा - न्यात्, अचलनात्मकत्वात् कर्मणः तथा च निर्गुणत्वात् द्रव्याद् एतस्य व्यतिरेकः। अन्ते परिशेषाद् गुणत्वं साध्यते। पृथक्त्वे नापरजातिर्विद्यते। पृथक्त्वे द्विपृथक्त्वस्य साक्षादेव प्रयोगो जायतेऽन्यथा तत्र जाति - स्वीकरणे जातिसंङ्करप्रसङ्गः समापद्यते। सामान्यात् पृथक्त्वस्य भिन्नत्वसाधने अवधित्वं हेतुः तत्रोच्यते।

**संयोगगुण:-** १.संयोगस्य लक्षणं स्वरूपलक्षणमिति कथ्यते। २. संयोगजसंयोग एव उच्यते यत् गुणेभ्यो गुणान्तरोत्पत्तिः क्रियते तस्य निराकरणे उक्तं यत् गुणस्य गुणे कारणत्वं विद्यते। ३.संयोगनाशप्रक्रियायां व्यापकस्य निवृत्या व्याप्यनिवृत्तिर्जायत इति लक्ष्यते। अन्यच्च यत्र एकद्विबहुभ्यां संयोगाभ्यां संयोगनिर्देशः तथा च तत्र आरभ्य-आरम्भकवादः प्रत्यक्षतया निर्दिश्यते।

**विभागगुण:-** १.विभागात् पूर्वं संयोगस्य स्थितिः निमितत्त्वमात्रम्, सा पूर्वकालभाविमात्रेणैव कुसुमोद्गमकारेण कथ्यते। कन्दल्याम् अवस्थितिमात्रमेव संयोगस्य उच्यते। २.आश्रयनाशाद् विभागनाशप्रक्रियायां आरभ्यारभ्यकवादः तत्र स्पष्टतया सूच्यते। विभागे कर्मणो निमित्तत्वं प्रोच्यते। विभागनाशप्रक्रियायां व्याप्यस्य निवृत्तिः व्यापकाधारेणैव जायत इति स्पष्टीक्रियते।

**बुद्धि:-** चतुर्विधा अविद्या भाष्यकारप्रभृतिभिरङ्गीक्रियते। अविद्यायां स्वप्नज्ञानप्रकरणे धातुदोषविशेषात् स्वप्ने यत्स्वरूपज्ञानं तस्मिन् 'आगमः' प्रमाणत्वेन कथ्यते।

**प्रत्यक्ष:-** १.प्रत्यक्षग्रहणसामग्र्यां यत्र चतुष्टयसन्निकर्षे आत्ममनसोः, इन्द्रियमनसोः, इन्द्रियार्थयोः संयोगः तथा च धर्माधर्मादिदिक्कालजन्यत्वम् अङ्गीक्रियते तत्र आलोकस्य मनसः चापि संग्रहोकरणीयः इति कंदलीकारतो भिन्नं योज्यते अर्थात् धर्माधर्मदिक्कालमनसाम् आलोकस्य च तत्र प्रत्यक्षे साधारणकारत्वं विद्यते। २.प्रथमाक्षसन्निपातानन्तरं उपाधिवासनायाः परिपाकेन एव विशिष्टज्ञानं कल्प्यते। अत्र 'वासना - परिपाक विशेषः' इति कन्दलीतः पृथग्रूपेण उक्तम् इति। ३. अनेकद्रव्येषु समवेतानां रूपादीनां प्रत्यक्षे, अत्र 'अनेकद्रव्यम्' इति कथने 'द्वयणुकरूपस्य' प्रत्यक्षत्वं निराक्रियते। ४. संख्यादीनां कर्मपर्यन्तं ग्रहणं चक्षुस्पर्शाभ्यां क्रियते। ५. ज्ञानस्योत्कर्षविश्रामः तु साक्षात्कारेण एव क्रियते यतो हि उत्कर्षपारम्पर्यमपि कुत्रचिद् समाप्यत इति प्रतिपादितम्। ६.चतुष्टयसन्निकर्षविषये कथ्यते यत् इदं तु उपलक्षणमात्रं द्वित्रयाणां च सन्निकर्षेण अपि ज्ञानं जायत इति कंदलीकारतो भिन्नं प्रतिपादितम्।

**अनुमानम्-** कन्दलीकारेण'दर्शन' शब्दस्यार्थो स्पष्टीक्रियते यत् तत्र कुसुमोद्गमकारेण पाणिनीयस्मृतेः कथनं कृत्वा कथ्यते यत् दृशिज्ञानमात्रम् अर्थात् पश्चार्थानामालोचनम् इत्यनेन दर्शनशब्दस्यार्थोऽभिधीयते । २. **अत्र बह्वो न्याया: उद्ध्रियन्ते ते च-मृतमारणकल्पना, काकतालीयन्याय:, कोडीकृतन्याय:, ब्राह्मणपरिव्राजकन्यायाः च** इति । ३.'परार्थानुमानम्' इति शब्दे कुसुमोद्गमकारेण शंकोपस्थाप्यते यत् 'परार्थ:','अनुमानम्' इति पदद्वयं मुख्यवृत्या तु न ज्ञायते न चानुमानेन । तस्य तत्र औपचारिकं समानाधिकरण्यम् इति प्रतिपाद्यते [1]अत: अत्र लौकिक एव प्रचारो विद्यते । ४. कुसुमोद्गमे अधिकारिण: सुसन्दिग्धत्वं कथ्यते, तस्य कृते विषय: संशयरहितो बोधनीय: ।

**५.प्रतिज्ञावाक्यम्-** प्रतिज्ञावाक्यस्य प्रारम्भकाले पञ्चावयववाक्यानां निर्देशः 'अवयवा:पुन' इति शब्देन क्रियते । तेन जिज्ञासादीनाम् अवयवत्वस्य निरास: तथा च वाक्यालंकारार्थनिरास: क्रियते । वाक्याल - ङ्कारस्य अर्थो वाच्यभेदात् वैभिन्न्यप्रतिपादनमिति वर्तते । एतदनन्तरं वाच्यार्थयुक्तवाक्यस्य उदाहरणं ' यज्ञदतौ भुङ्गते', 'देवदतः पुनरधीयते' इति वाक्येभ्यो प्रतिज्ञावाक्यस्य वैभिन्न्यप्रतिपादनार्थे वोम्मिदेवेन प्रस्तूयते ।

**हेत्वाभास:-** अपदेशवाक्यनिरूपणप्रसङ्गे अपदेशाभासा: हेत्वाभासा: वा वर्ण्यन्ते । विशेषणासिद्धस्य हेत्वाभासस्य असिद्धहेत्वाभासे श्रीधरेण अन्तर्भाव: सूच्यते, परञ्च वोम्मिदेवेन विशेषासिद्धस्य व्यधिक - रणस्य च अन्तर्भावो बोध्यते । २.अनध्यवसितत्वहेत्वाभासे कथ्यते यत् अक्षपादमते असाधारणहेत्वाभास: अस्माकं मते अनध्यवसित इति नाम्नाभिधीयते ।

**कर्मपदार्थ:-** १.एकस्मिन् समये एकस्मिन्द्रव्ये एकमेव कर्म विद्यत इति कथ्यते । यथा रूपादय: स्वसमान - जातीयेन रसादिभि: सह तिष्ठन्ते तद्वत् उत्क्षेपणादीनां कर्मणां न स्थिति: । एकस्मिन् द्रव्ये विरुद्धकार्य - समवायोऽपि न विद्यते, यतो हि तत्र प्रत्यक्षमेव प्रमाणं विद्यत इति कुसुमोद्गमकारेण सूच्यते । उत्क्षेपणकर्मकाले अपक्षेपणस्याभाव: प्रतीयते । अत: एकस्मिन् समये एकस्यैव कर्मण: स्थितिकर्मत्वात् तत्र परस्परं सम्प्रतिपन्नत्वं वर्ण्यते २. एकया क्रियया यद्द्रव्यचालनं तदपरया न संभाव्यते यतो हि एकेन सह गम्यमानानां संयोगादीनां गमनभेद: प्रत्यक्षप्रमाणेन एव सिद्धो वर्तते ।३. कर्मणामुत्पत्तौ गुरुत्वादिष्वन्यतमेन समुदितैर्वा जायमानत्वं वर्तते । कंदलीकारेण गुरुत्वादिभि: समुदितैरपि कार्यमुत्पाद्यत इति न निर्देश: क्रियते । ४. इच्छाप्रयत्नादिमाध्यमेन यत्र कार्योत्पत्ति: तत्र 'आदि' शब्देन वेगस्यापि ग्रहणं कुसुमो - द्गमकारेण सूच्यते । ५.उत्क्षेपणादिषु 'उत्क्षिपति, 'अपक्षिपति' इत्यादिरूपेण अनुवृत्तिव्यावृत्तिप्रत्यय: साक्षादेव प्रत्यक्षरूपेण दृश्यत इति स्पष्टीक्रियते । अत्र दृष्टान्तमाध्यमेनापि स्पष्टीक्रियते यत् यथा एकस्यां व्यक्तौ एकस्मिन् समये निरूपणीये नमनत्वकर्मणि हस्तत्व-करत्ववत् परस्परं भिन्नत्वं विद्यते । **सामान्यपदार्थ: -**१. सामान्यस्य एकस्वभावत्वं कथ्यते । २. द्वित्वादिषु सामान्यस्य लक्षणसंगतिकारणात् व्यासज्यवृत्ते: निषेध: क्रियते । ३. सामान्यस्य नित्यत्वविषये कथ्यते यत् सामान्यस्य नित्यत्वं तस्य विनाश -कारणाभावात् भावरूपत्वाद् च विद्यते । ४. यादृशो विषय: तादृशी बुद्धि:, अत एकस्मिन् वस्तुनि तस्यैव

[1] तत्रैव,पृ. ५५३-५५४

परापरयो: भेदाभेदो न सामान्ये न विरुद्ध:,यतो हि सामान्यस्य परापररूपं यद् भेद: तस्मिन् कारणं तेषां न्यूनाधिकभावो विद्यत इति कुसुमोद्गमकारेण कंदलीकारतो भिन्ना कल्पना विहिता । ५. सामान्ये एकक्रियाकारित्वयुक्ता: न गृह्यन्ते; एवं सति अदुग्धप्रदात्र्य: गावो वृषभस्य च गोत्वसामान्ये न अन्तर्भाव: स्यादिति कथनस्याभिप्राय: ।

**विशेषपदार्थ:-** अत्यन्तव्यावृत्तिबद्धे: हेतुत्वं कथनेन व्यासज्यवृत्तिरपि तत्र निषिद्ध्यते । 'अनेकभाजन - गतफलानि' इतिवत् विशेषे अनुवृत्तिप्रत्ययो न संभाव्यते परमाणुषु परस्परभेदात् यदि अत्यन्तव्यावृत्तिहेतुत्वं तर्हि तत्र सिद्धसाधनत्वप्रसङ्ग: स्यादिति वर्ण्यते । प्रत्येकमनुवर्तन्त इति शब्देन तत्र सूच्यते यत् विशेषा: प्रत्येकमनुवर्तन्त नित्यतया च विद्यन्त इति ।

**समवाय:-** समवायस्य नित्यत्वविषये कथ्यते यत् समवायो अभिव्यज्यते, अतो न तस्यानित्यत्वं यतो हि तत्र उत्पत्तिविरहो विद्यत इति तत्र व्यतिरेकप्रयोगत्वेनोच्यते । २.समवायस्यैकत्वविषये कथ्यते यत् एकत्वं प्रमाणरूपम् । अत: समवायोऽपि प्रमाणमिति निरूप्यते ।

अनेन प्रकारेण उपर्युक्तविवरणेन कथयितुं शक्यते यत् शिडिलवोम्मिदेवेन केवलं न्यायकन्दल्या: स्पष्टीकरणमात्रं न क्रियतेऽपितु यथावश्यकं नूतनत्वमपि संपाद्यते । वोम्मिदेवेन कंदल्या: व्याख्यायां कुत्रचिद् शब्दप्रयोगप्रयोजनमात्रम्, कुत्रचिद् स्पष्टीकरणमात्रम्, कुत्रचिद् विषयस्पष्टीकरणार्थे कंदलीकारतो व्यतिरिक्ता चर्चा स्वशैल्यां विधीयते । विषयस्य स्पष्टीकरणे पूर्वम् आधारभूमि: निर्मीयते, तदनन्तरं कंदल्या: संकेतमाध्यमेन पूर्वपक्षादीनां खण्डनं क्रियते । दृष्टान्तरेण युक्त्यन्तरेणापि विषया: स्पष्टीक्रियन्ते । तत्र युक्तयो यथा- न वातपुत्रीयता शास्त्रस्येति, काकदन्तपरीक्षा, न हि पाथा: (योधा:) पाटवरां निश्चितां धनुराददते प्रभृतय: युक्तय: तत्र टीकायां प्राप्यन्ते । व्याकरणदृशापि आचार्येण कंदली स्पष्टीक्रियते तद्यथा- 'कृत्तद्धितसमासेषु सम्बन्धाभिधानत्वं तुल्यमिति न्यायात्', 'अधिकरणस्य कारकत्वेऽपि सामान्यापेक्षया अवर्जनीयसन्निधित्वाद् विशेषस्य च व्यवहारो देशनिमित्तत्वम्, वैयधिकरण्यं तु विवक्षात: कारकाणि भवन्तीति परिभाषणान्न दोष:' इत्येवं रूपेण यत्र कुत्रचिद् समासप्रभृतीनामपि निर्देशो विधीयते । यथा पूर्वोक्तम्- कुसुमोद्गमे अनेके न्याया अपि विषयविशदीकरणे स्पष्टीकरणे च प्रयुज्यन्ते – ते च मृतमारणकल्पना. ब्राह्मणपरिव्राजकन्याय:, क्रोडीकरणकल्पना, विशेषविधि: शेषनिषेधपरम्, काकतालीय - न्यायप्रभृतय: । कुसुमोद्गमस्य उद्धरणेषु श्रुति:, न्यायसूत्रम्, वैशेषिकसूत्रम्, किरणावली, न्यायलीलावती, पुराणानि च उद्ध्रियन्ते । वडोदरात: प्रकाशितग्रन्थे प्रतिपादितटीकयो: पञ्जिकाटिप्पणयो: उद्धरणानि कुसुमोद्गमे न प्राप्यन्ते । वसन्तपारीखेण कुसुमोद्गमस्य पाण्डुलिपिसंपादनं एकस्या एव प्रतिलिपे: आधारेण विहितम् । अत: तस्यां यत्र कुत्रचिद् अस्पष्टतापि समागता; अनेन विषयावगमने काठिन्यमपि अनुभूयते । गुणनिरूपणप्रसङ्गे बुद्धिपर्यन्तं टीका वर्तते । इयं टीका टिप्पणपञ्जिकयो: अपेक्षया विशदा पदकृत्यशैल्यां निबद्धा वर्तते । अनेन प्रकारेण कथयितुं शक्यते यत् टीकेयं न्यायकन्दल्या: पूरकरूपेण वर्तते अर्थात् परस्परभावयन्त्यौ टीके इमौ । परमितोऽप्यग्रे भाविशोधसम्भावना तु अस्त्येवेति अलं विस्तरेण ।

# सन्दर्भग्रन्थसूची-

## (क) प्रत्यक्ष-स्रोतांसि (Direct Sources):-


1. *न्यायकन्दली,* श्रीधर: *(टिप्पण-पञ्जिका-कुसुमोद्गम-टीकात्रयोपेता),* सं.जे एस.जेटली, वसन्त जी पारीख, ओरियन्टल-रिसर्च-इंस्टीट्यूट, बडोदरा, प्र.सं.१९९१ ।
2. *न्यायकन्दली,* (पदार्थधर्मसंग्रह-सहितम्) श्रीधरः, विजयङ्ग्राम-संस्कृत-सीरिज, १८९५ ।
3. *न्यायकन्दली,* श्रीधरः, अनु.गङ्गानाथ-झा, द पण्डित.एन.एस.,बनारस-२५, १९०३-३७, १९१५, एन.एस.१(१८८६)-४२(१९२०)।
4. *न्यायकन्दली,* श्रीधराचार्यः,सं,.दुर्गाधर झा,गङ्गानाथ-झा-ग्रन्थमाला,सं.१,वाराणसी, १९६३ ।
5. *प्रशस्तपादभाष्यम्, (पदार्थधर्मसंग्रहः),* प्रशस्तपादः, सं.नारायणमिश्रः, काशी-संस्कृत-ग्रन्थ - माला, सं-१.वाराणसी,१९६६ ।
6. *प्रशस्तपादभाष्यम्,* (न्यायकन्दली-सहितम्), श्रीधरः, सं.व्या.दुर्गाधर-झा-शर्मा, संपूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी, द्वि.सं.१९९७ ।
7. *पदार्थधर्मसंग्रहः* ,प्रशस्तपादः, सं.गङ्गानाथ-झा, चौखम्बा-ओरियन्टीलिया, दिल्ली, १९८० ।
8. *प्रशस्तपादभाष्यम्,* प्रशस्तपादः, (सूक्ति-सेतुव्योमवतीटीकाभिः सहितम्), सं. गोपिनाथ-कविराजः, ढुण्ढिराजशास्त्री, चौखम्बा-अमरभारती-प्रकाशनम्, वाराणसी,१९८३ ।
9. *प्रशस्तपादभाष्यम्,* प्रशस्तपादः, (समीक्षात्मक,भूमिका,अनु.टिप्प.सहितम्), श्रीनिवास-शास्त्री, इण्डो-विजन-प्राइवेट-लिमिटेड, गाजियाबाद, १९१९ ।
10. वैशेषिकसूत्रम्, कणादः, सं. नारायणमिश्रः, चौखम्बा-संस्कृत-सीरिज, वाराणसी, १९६६ ।
11. *वैशेषिकदर्शनम्,* विद्योदयभाष्य, उदयवीर-शास्त्री, विजयकुमार-गोविन्दराम-हासानन्द, दिल्ली, २००९ ।
12. *वैशेषिकसूत्रोपस्कारः,* शंकरमिश्रः, ढुण्ढिराजशास्त्री, चौखम्बा-प्रकाशनम् , वाराणसी, द्वि. सं. वि. सं.२०५९ ।
13. *वैशेषिकदर्शनार्य्यभाष्य,* आर्यमुनिः, हरयाणा-साहित्य संस्थान, झज्जर, हरियाणा, वि. सं २०३९ ।
14. वैशेषिकदर्शनम्, (उपस्कार.कणाद.सू.विवृत्तिः,चन्द्रकान्तभाष्यसहितम्), महादेव शर्मा, राष्ट्रिय - संस्कृत-साहित्य-केन्द्र, जयपुर, प्र.सं.२००४ ।
15. *हिन्दी वैशेषिकदर्शन प्रशस्तपादभाष्य,* ढुण्ढिराज शास्त्री, चौखम्बा संस्कृत संस्थान , वाराणसी, वि.सं.२०५९ ।
16. *किरणावली,* उदयनाचार्यः, सं. विंध्येश्वरी-प्रसाद-द्विवेदी, बनारस-संस्कृत-सीरिज, प्र.सं. १८१७ ।

17. *व्योमवती,* व्योमशिवाचार्य:, सं गोपिनाथ-कविराज:, ढुण्ढिराज-शास्त्री, चौखम्बा-संस्कृत-सीरिज, ग्र. सं. ६१,१९६० ।

18. *तत्त्वचिन्तामणि:,* गङ्गेशोपाध्याय:, सं. आनन्दझा, दरभङ्गा-संस्कृत-विश्वविद्यालय:, दरभङ्गा, प्र.सं.१९८५ ।

19. *वैशेषिकसिद्धान्तानां गणितीयपद्धत्या विमर्श:,* नारायण गोपार डोंगरे, संपूर्णानन्द-संस्कृत-विश्वविद्यालय:, वाराणसी, प्र.सं.१९७९ ।

20. *सर्वदर्शनसंग्रह:,* माधवाचार्य, प्रका. हि.व्या. उमाशंकर शर्मा, चौखम्बा विद्याभवन वाराणसी, २०१२ ।

21. *वैदिकदर्शनेषु ज्ञानम्,* आत्मानन्द -परमहंस, राजप्रकाशनम्, वाराणसी, प्र.स.१९८२।

**आंग्लग्रन्था:-**

1. Parisurma, lekharaja Mahat(ed) *Praśastapāda's, padārthadhamasaṃgraha,* Lahore, 1888
2. śāstrī, Dhuṇḍirāja, saṃakaka Miśra's Upaskāra and *Praśastpāda's padārthadhamasaṃgraha,* KSS.(Kashi Sanskrit Series) 3, 1923

## (ख) अप्रत्यक्ष-स्रोतांसि (Indirect sources):-

**संस्कृत-हिन्दी-ग्रन्था:-**

1. *तर्कसंग्रह:,* अन्नभट्ट:, राकेश शास्त्री, चौखम्बा-संस्कृत-प्रतिष्ठानम्, दिल्ली, पु,मु.२०११ ।
2. *तर्कसंग्रह: (स्वोपज्ञसहितम्),* अन्नभट्ट:, हि.व्या.दयानन्द भार्गव, मोतीलाल बनारसीदास, दिल्ली, प्र.सं.१९७१ ।
3. *तर्कसंग्रह:,* अन्नभट्ट:, पंकजमिश्र, परिमल पब्लिकेशन्स, दिल्ली, प्र.सं.२००१ ।
4. *तर्कभाषा,* केशवमिश्र, सुरेन्द्रदेवशास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी, पु.मु.२००३ ।
5. हि.रूपा. किशोर झा, *न्यायपरिचय,* फणि भूषण, ,सं दिनेश गुह,चौखम्बा विद्याभवन वाराणसी, प्र.सं.१९६८ ।
6. कुमार, शशिप्रभा, *वैशेषिकदर्शन-परिशीलन,* विद्यानिधि प्रकाशन, दिल्ली. प्र,सं.१९९९ ।
7. कुमार, शशिप्रभा, *वैशेषिक दर्शन में पदार्थ निरूपण,* प्रकाशन विभाग, दिल्ली,१९९२ ।
8. कुमार, शशिप्रभा, *वैशेषिक दर्शन में पदार्थ निरूपण,* डी. के. प्रिण्टवर्ल्ड प्रा. लि., दिल्ली, २०१३ ।
9. शर्मा, राममूर्ति, *न्याय-वैशेषिक-एक चिन्तन,* राष्ट्रिय-संस्कृत-संस्थानम्,दिल्ली,१९९८ ।

10. मिश्र, नारायण, *वैशेषिक दर्शन एक अध्ययन,* चौखम्बा विद्याभवन, वाराणसी, पु.मु. २००० ।
11. सिंह, बद्रीनाथ, *वैशेषिकदर्शन-एक तुलनात्मक अध्ययन,* आशा प्रकाशन, वाराणसी, १९७४ ।
12. उपाध्याय, सरोज, *वैशेषिक दर्शन की आयुर्वेद को देन,* कला प्रकाशन, वाराणसी, १९७४ ।
13. शर्मा, श्रीराम, भगवती शर्मा, *न्याय एवं वैशेषिकदर्शन,* युग निर्माण योजना, उत्तरप्रदेश, सं. २०५९ ।
14. उपाध्याय, बलदेव, *भारतीय दर्शन,* शारदा मंदिर, वाराणसी, पु. मु.२००१।
15. राधाकृष्णन्, *भारतीयदर्शन,* अनु. नन्दकिशोर, राजपाल एण्ड संन्ज, दिल्ली, १९६९, भाग-२ ।
16. सिन्हा, हरेन्द्र प्रसाद, *भारतीयदर्शन की रूपरेखा,* मोतीलाल बनारसीदास, दिल्ली,२००२ ।
17. शर्मा रमाशंकर, डी.डी.बदिष्टे, *भारतीय दार्शनिक निबन्ध,* मध्यप्रदेश हिन्दी ग्रन्थ अकादमी, भोपाल, द्वि.सं.१९९१ ।
18. पंकजमिश्र, *वैशेषिक एवं जैन तत्त्व मीमांसा में द्रव्य का स्वरूप,* परिमल पब्लिकेशन्स, दिल्ली, प्र.सं.१९९८ ।
19. वेदालङ्कार, जयदेव, *भारतीय दर्शनशास्त्र का इतिहास,* न्यू भारतीय बुक कॉर्पोरेशन, दिल्ली, २००४।


## ( ग ) द्वितीयक-आंग्लग्रन्था:( Indirect Sources):-

### आङ्ग्लग्रन्था:-


1. H.UI,ed. F.W.Thomas, *The Vaiśika Philosophy according to the Daśapadārthaśāstra,* Choukhamba Sanskrit Series Office, Varanasi.१९६२.
2. Kaviraj, Gopinath, *The History and Bibliography of Nyāya-Vaiśika Literature,* Sampurnanand Sanskrit University, Varanasi, Re.ed.1982.
3. Katsunori Hirano, *The Nyāya- Vaiśika Philosophy and text Science,* Motilal Benarsi Das, Delhi ,2012
4. Agrawal,M.M, *Aspects of indian philosophy,* Shree publishing House, New Delhi, 1968
5. Mishra,Umesh, *Nyaya Vaisesika Conception of Matter in Indian Philosophy,* Bhartiya kala Prakashan, Delhi, 2006
6. Bahadur, K.P. *The Wisdom of Vaisesika,* Sterling Publishers Pvt., Ltd., New Delhi, 1979
7. Bhaduri, Sadananda, *Studies in nyaya-vaisesika metaphysics,* bhandarkar oriental research institute poona, first edition 1947
8. Bhattacharyya, Janki Ballabha, Negation, Indian studies, first edition, 1965
9. Dasgupta, S.N, *History of Indian Philosophy (5 vols.),* Motilal Banarasidas, Delhi, 1975
10. Faddegon, Barend, *The Vaisesika System,* Johannes Muller, Amsterdam, 1918

11. Gough, A.E, *The Vaisesika Aphorisms of Kanada,* Oriental Books Reprint Corporation, New Delhi, 1975
12. Gajendragadkar, veena, s, *kanada doctrine of padarthas,* sri satguru publications, delhi, first edition 1988
13. Hallfass, Wilhelm, *On being and What There Is,* Indian Book Center, Delhi, 1993
14. Kumar, Shashi Prabha, *Classical Vaisesika in Indian philosophy,* Routledge, Park Square, Milton Park, Abingdon, New York, 2013
15. Hirano, Katsunori, *The Nyāya- Vaiśika Philosophy and text Science,* Motilal Benarsi Das,Delhi, 2012
16. Radhakrishnan, S., *Indian Philosophy,* George Allen and Unwin Ltd., London, 1940
17. Shah, Nagin, j. Indian philosophy, Sanskrit Sanskriti Granthamala, Ahmedabad, 1998
18. Thakur, Anantalal, *Origin and Development of the Vaisesika System,* Center for Studies in Civilizations, 2000
19. Chakrabarty, Debasish, *Vaisesika-sutra of Kanada,* D.K. PrintWorld PVT.LTD. Delhi, 2003

## (घ) कोश-ग्रन्था: (Dictionaries):-

1. *न्यायकोश:,* झलकीकर, भीमाचार्य:, सं,वासुदेव-अभ्यंकर:, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, पु.मु. २०११ ।
2. *वाचस्पत्यम्,* तर्कवाचस्पति:, तारानाथ, राष्ट्रिय-संस्कृत-संस्थानम्, नवदेहली,पु.मु.२००२।
3. *अमरकोश:,* सिंह:, अमर, (धराख्य-हि.व्या.टीका), मन्नालाल-अभिमन्यु:, चौखम्बा विद्याभवन-वाराणसी, पु.मु. २००८ ।
4. *शब्दकल्पद्रुम:, (*पञ्चभागा:), चौखम्बा-संस्कृत-ग्रन्थमाला, ग्र.सं.९३.वाराणसी,१९६७ ।
5. *भारतीय दर्शन बृहत्कोश:,* (प्रथम-चतुर्थ भाग) बच्चूलाल-अवस्थी, शारदा पब्लिशिंग हाउस, २००४ ।
6. *बृहद् वैशेषिक-कोश:,* शशिप्रभा कुमार:, (विश्वविद्यालय-अनुदानायोग-द्वाराप्रदत्ता-प्रमुख-शोधयोजना),जे.एन.यू. विशिष्टसंस्कृताध्ययनकेन्द्रम्, नवदेहली,२००६-०९, (अप्रकाशिता)।
7. *संस्कृत वाङ्मयकोश:,(द्वि.खण्ड:),* श्रीधर भास्कर वर्णेकर, लोकभारती प्रकाशन, इलाहाबाद, द्वि.सं. २००१ ।
8. *अमरकोष,* मन्नालाल-अभिमन्यु, चौखम्बा विद्याभवन वाराणसी, सं. २०१२ ।
9. *भारतीय दर्शन परिभाषाकोश,* दीनानाथ शुक्ल, प्रतिभा प्रकाशन, दिल्ली, १९९३ ।

## आंग्ल-ग्रन्था:-

1. *Encyclopaedia of Indian Philosophy( upto Gangesha)*,vols 2-5, H. Potter,Motilal Benarsi Das,Delhi,1977.
2. Potter, Karl H., *Encyclopedia of Indian Philosophies, Vol.1-2,*` Motilal Banarasidas, Delhi, 1970.
3. Willams, Monier, *English-Sanskrit Dictionary,* Munshiram Manoharlal, Delhi, 1976

## (ङ) शोधपत्र-पत्रिकाश्च :-


1. जेटली, *जे एस. द पञ्जिका आफ राजशेखरसूरि,* प्रोसिडिंग आफ आल इण्डिया ओरियन्टल-कान्फ्रेन्समध्ये, पञ्जिकाग्रन्थ: तस्य समयश्च सूचीबद्धरूपेण विहित:, १-३६(१९८६-१९८७), २२,१९६५(२३९-२४०)।
2. जेटली, जितेन्दर, सुन्दरलाल:, *क्रिटिकल सर्वे ऑफ द कॉट्रिब्यूशन ऑफ जैन टू राइटर्स टू न्याय-वैशेषिक लिटरेचर विथ ए क्रिटिकल एडिशन ऑफ (हिदर टू) अनपब्लिशड वर्क; अ टिप्पण ऑफ नरचन्द्रसूरि ( १३-थ सेंच्युती,ए.डी.)* बॉम्बे-विश्वविद्यालय:, मुम्बई, १९५२, पी.एच.डी (अप्रकाशित:)।
3. *व्योमवती,* व्योमशिवाचार्य:, स: गोपीनाथकविराज:, ढुण्ढिराज-शास्त्री, चौखम्बा-संस्कृत-सीरिज, १९६०।
4. *किरणावली,* (न्यायकन्दली-व्योमवती, सहितम्), भण्डारकर-ओरियन्टल-इंस्टीट्यूट, पूना, १९६३ (शोधपत्रम्)।


## (च) अन्तर्जालीयस्रोतांसि (E-Sources) :-


1. http://www.worldcat.org
2. http://books.google.co.in/books?id=fZ6qQMNCsW8C&redir_esc=y
3. http://www.jaindharmonline.com/acharya/haribadr.htm
4. http://www.britannica.com/EBchecked/topic/255276/Haribhadra
5. http://www.jainlibrary.org/index1.php
6. http://www.indcat.org